आर्मी — ची.रुका

॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला
२३५

भक्तिचन्द्रिका

लेखक
डॉ० विश्वनाथ पाण्डेय
एम०ए०, पी-एच०डी०, आचार्य
पुराणेतिहास-विभागाध्यक्ष
श्रीभागवत संस्कृत महाविद्यालय, वाराणसी

सम्पादक
श्री विजयशंकर तिवारी
भारतीय साहित्य विद्यालय, वाराणसी

चौखम्बा सुरभारती प्रकाशन
वा रा ण सी

प्रकाशक

चौखम्बा सुरभारती प्रकाशन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)

के० ३७/११७, गोपालमन्दिर लेन

पो० बा० नं० ११२९, वाराणसी २२१००१

दूरभाष : ३३३४३१

द्वितीय संस्करण १९९५

मूल्य १२५-००

अन्य प्राप्तिस्थान

चौखम्बा संस्कृत प्रतिष्ठान

३८ यू. ए., बंगलो रोड, जवाहरनगर

पो० बा० नं० २११३

दिल्ली ११०००७

दूरभाष : २३६३९१

*

प्रधान वितरक

चौखम्बा विद्याभवन

चौक (बनारस स्टेट बैंक भवन के पीछे)

पो० बा० नं० १०६९, वाराणसी २२१००१

दूरभाष : ३२०४०४

मुद्रक

फूल प्रिण्टर्स

वाराणसी

विषय-सूची

(१) पूर्वार्द्धम्   १-१००

भक्तिविमर्शः	
भक्तेरुपक्रमः	१–२
भक्तिवर्गीकरणम्	९–१५
भक्तेरवस्थात्रयम्	१६–२२
भगवद्भक्तेर्भेदाः	२२–२५
भक्तानां त्रिविधोऽनुभवः	२५–३१
भक्तेरधिगमस्य प्रकारपर्यालोचनम्	३१–३३
भक्तिसमुन्नतेः साधनविमर्शः	३३–३६
भक्तानां चातुर्विध्यम्	३६–३६
भक्तिमार्गे त्रिविधोऽधिकारः	३६–३७
भक्तेः भूमिकाभेदः	३७–५२
भगवन्नाममहिमप्रकाशः	५२–५६
अतिसरलो भक्तिमार्गः	५६–५८
पद्मपुराणस्य	५८–६५
भक्तिरसविभागः	६५–६८
मुख्यरसानां दिङ्मात्रमुदाहरणम्	६८–७३
भक्तिरसप्रवाहस्य पर्यवसानम्	७३–७४
भक्तेर्वैशिष्टचम्	७४–७५
पराभक्तिस्वरूपज्ञानयोरैक्यम्	७६–७७
ज्ञानाद्यपेक्षया भक्तेर्वैशिष्ट्यम्	७७–७७
विभिन्नं भक्तिस्वरूपम्	७७–७९
भक्तिरसस्य विमर्शः	७९–८३
मधुराया भक्तेः परम्पराविवेचनम्	८३–८८
गोस्वामिवर्याणां कार्यम्	८८–९२
भक्तेरुद्गमस्थानस्य समीक्षणम्	९२–९५
भक्तेरुपासनामूलकत्वविवेचनम्	९५–९७
त्रिविधो भक्तः	९७–९८
भक्तेः साध्यसाधनोभयत्वविवेचनम्	९८–१००

(२) उत्तरार्द्धम् १०१–२५०

भक्तेः रसत्व-पुरुषार्थत्वयोः पर्यालोचनम् १०१–१०३
अथ विभावाः १०३–१०५
अथानुभावाः १०५–१०६
व्यभिचारिभावाः १०६–१०९
भक्तेः पञ्चपुरुषार्थत्वसमर्थनम् १०९–११०
रससम्बन्धिनः प्रश्ना ११०–१११
रसपरिणामः १११–१७७
प्रेमपत्तनं नाम नित्यं वृन्दावनं धाम १७७–२०२
श्रीकृष्णकथायाः पृष्ठभूमिसमीक्षा २०३–२१६
पौराणिकवाङ्मयानुसारं राधाकृष्णकथायाः स्वरूपविमर्शः २१६–२२८
भगवल्लीलास्थलविमर्शः २२८–२३६
राधाकृष्णनामनिर्वचनपूर्वकं तयो स्वरूपपर्यालोचनम् २३६–२५०

(३) परिशिष्टम् २५१–२८८

पाञ्चरात्रमतसारांशः २५१–२५१
माध्वचैतन्यगतविमर्शः २५२–२५३
मध्वाचार्यमतम् २५४–२५६
चैतन्यचर्चा तत्सम्प्रदायश्च २५६–२६२
जीवानां क्रमिकविकासविमर्शः २६२–२७४
शाण्डिल्यभक्तिसूत्रम् २७५–२७८
नारदभक्तिसूत्रम् २८०–२८३
भक्तिमीमांसा २८४–२८८

किञ्चित् प्रास्ताविकम्

कान्तिः सिताऽऽमृशति निन्दितशारदेन्दु-
र्यत्रैकतो विलसितामसिताङ्गशोभाम् ।
वृन्दावनेऽपि कृतयामुनगाङ्गसङ्गं
राधामुकुन्दयुगलं तदहं नमामि ॥

विदितचरमेवास्ति धर्मधुरीणानामास्तिकजनानां यदिह जगतीतले चतुरशीतिलक्षयोनिषु जन्ममरणचक्रमनुभवन् प्राणिवर्गः प्रागर्जितपुण्यपुञ्जप्रभावैर्मानवशरीरमासादयति[1]। तदिदमतिदुर्लभतरं मानवशरीरमासाद्यापि न सर्वे जीवा जन्ममरणपरम्परामनुभवन्तः संसारसागरमुत्तर्तुं प्रभवन्ति, प्रत्युत अधिकांशतः पुनरपि तासु तासु योनिषु बम्भ्रम्यमाणा कठिनादति कठिनां दुःखपरम्परामनुभवन्तो भूयो-भूयो जन्ममरणचक्रे चङ्क्रमन्ते एव। तादृग्विधे वैषम्ये नान्यदुपलभ्यते किञ्चिन्मूलम्, ऋते अनन्यभगवद्भक्तेः। अनन्यया भक्त्या भगवन्तं प्राप्य भक्तशिरोमणि र्मानवमणिः कश्चन भक्तप्रवरः संसारे आगमनगमनचक्राद् विमुक्तः सन् शाश्वतं सुखमुपालभते। भगवत्प्राप्तिरूपस्य शाश्वतसुखस्य वास्तविकं सरलं साधनं दृढतरा भक्तिरेवास्ति।

यद्यपि 'अपाम-सोममभृता अभूम' इतिश्रुत्या[2] सोमपानादिभिर्लभ्यस्य स्वर्गादेरपि सुखसाधनत्वं प्रतीयते तथापि गीतावचनानुसारं[3] यज्ञेषु सोमेन भगवन्तमिष्ट्वा सोमरसपानेन पवित्राः सन्तः स्वर्गलोकमासाद्य तत्र देवताभिः

---

१. चतुरशीतिलक्षाणि चतुर्भेदैश्च जन्तवः।
अण्डजाः स्वेदजाश्चैव ह्युद्भिजाश्च जरायुजाः॥
कदाचिल्लभते जन्तु र्मानुष्यं पुण्यसञ्चयात्। ग० पु० २।२

२. छान्दोग्योपनिषद् (५।३।११)

३. त्रैविद्या मां सोमपाः पूतपापाः यज्ञैरिष्ट्वा स्वर्गगतिं प्रार्थयन्ते।
ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान् दिवि देवभोगान्॥ ९।२१
ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति।
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते॥ ९।२२

साकं दिविधान् दिव्यान् भोगानुपभुञ्जते। विशाले स्वर्गलोके दिव्यभोगेन पुण्यसंक्षयात्ते पुनर्मर्त्यलोके जन्म गृह्णन्ति। एवं सकामाः=कर्मविवशा भोगकामाः पुमांसो भूयो भूयो गमनागमनचक्रे परिवर्तन्ते एव। अर्थात् पुण्यप्रभावात् स्वर्गमुपगच्छन्ति, पुण्ये क्षीणे च पुन मर्त्यलोकं समागत्य जन्म ग्रहणं कुर्वन्ति। एवं भगवत्प्राप्तेः पूर्वं न ते शाश्वतं सुखं लभन्ते। अतो भगवत्स्वरूपसाक्षात्कारमन्तरा न किमप्यस्त्यन्यद् वास्तविकं सुखम्। ब्रह्मानन्दप्रदायिनं भक्तिरसमेव द्वारीकृत्य रसरूपस्य भगवतः सान्निन्ध्यमवाप्तुं शक्यते। भगवत्सान्निध्योपलब्धिहेतुभूतं भक्तिदर्शनमपि भगवत्तत्त्वसाक्षात्कारद्वारा अपवर्गद्वारमुद्घाट्य परमं पदं प्रापयति भक्तप्रवरान्। अतो भक्त्या भगवतो वास्तविकं स्वरूपं विज्ञाय परमपुरुषार्थं निर्वाणपदं प्राप्तुं शक्यते इत्यत्र नास्ति कश्चन सन्देहलेशः। तथा चोक्तं स्वयमेव भगवता श्रीकृष्णेनेन श्रीमद्भागवद्गीतायामपि[1]। अतएव श्रीमद्भागवतस्यैकादशेस्कन्धे उद्धवं प्रति प्रोक्तवान् भगवान् श्रीकृष्णः-

भक्तियोगेन मन्निष्ठो मद्भावाय कल्पते।
तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञानसम्भवम्॥
गुणसङ्गं विनिर्धूय मां भजन्तु विचक्षणाः।
भक्तिं लब्धवतः साधोः किमन्यदवशिष्यते॥
मय्यनन्तगुणे ब्रह्मण्यानन्दानुभवात्मनि॥ ११।२६।३०

रसशब्देन रसशास्त्रकाराणां मते परमात्मैव विवक्षितोऽस्ति, यतो हि "रसो वै सः, रसं ह्येवायं लब्ध्वा आनन्दी भवति" (२।६) इति तैत्तिरीयोपनिषदो ब्रह्मवल्ल्यां स्पष्टतया रसशब्देन परमात्मैवावबोधितो वर्तते। रसरूपस्य परमेश्वरस्यानुभवो भगवल्लीलासु चेतसो द्रुतौ सत्यामेव सत्त्विकवृत्तेरुदयेन मायावरणभङ्गे सति प्रत्यक्षगोचरी भवति। एवमागमेन तथाऽनुमानेनापि यज् ज्ञानं जायते तद् अद्वैतवेदान्तिनो ब्रह्म, श्रीमद्भागवद्गीतायाः पुरुषोत्तमः, श्रीमद्भागवतस्य श्रीकृष्णश्चैकमेव परमं तत्त्वमस्ति। तथाहि श्रीमद्भागवते प्रथम स्कन्धस्य द्वितीयेऽध्याये सूत आह—

---

१. भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥ १८।५५

वदन्ति तत्तत्त्वविदस्तत्त्वं यज् ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानीति शब्द्यते ।। १।२।११

एवं दशमे स्कन्धे लोकविधाताऽपि तदेव स्पष्टयति—

कृष्णमेनमवेहि त्वमात्मनमखिलात्मनाम् ।
जगद्धिताय सोऽप्यत्र देहीवाभाति मायया ।। १०।१४।१५

अपि च— जन्मान्तरसहस्रेषु तपोज्ञानसमाधिना ।
नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ।।

अतो रसरूपस्य परमात्मनः प्राप्तये भक्तेः रसत्वं पञ्चमपुरुषार्थत्वं च सोपष्टम्भं संसाधितं भक्तिरसायने भक्तितत्त्वमर्मज्ञैः विद्वद्वरेण्यैः श्रीस्वामिप्रवरैर्मधुसूदनसरस्वतीपादैः रूपगोस्वामिभिश्च हरिभक्तिभक्तिरसामृतसिन्धौ, उज्ज्वलनीलमणौ च विस्तरतः स्पष्टीकृतमस्ति ।

भक्तेः प्रशस्त्यम्

शाण्डिल्यभक्तिसूत्र-गोपलपूर्वतापनीयोपनिषदादिषु प्रतिपादिताया भक्तेः परिष्कृतं रूपं मधुसूदनसरस्वतीपादैः स्वकीयस्य भक्तिरसायनस्य प्रथमे प्रकरणे इत्थं प्रदर्शितमस्ति—

द्रुतस्य भगवद्धर्माद्धारावाहिकतां गता ।
सर्वेशे मनसो वृत्ति र्भक्तिरित्याभिधीयते ।। १।३

द्वितीये च

द्रुते चित्ते प्रविष्टा या गोविन्दाकारतास्थिरा ।
सा भक्तिरित्यमिहिता विशषस्त्वधुनोच्यते ।। २।१

नारदपाञ्चरात्रे तु—

सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम् ।
हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते ।।

विवेकचूडामणौ पूज्यचरणैः स्वामिवर्यैः श्रीशङ्कराचार्यैस्तु

स्वस्वरूपानुसन्धानं भक्तिरित्युच्यते बुधैः ।

श्रीमद्भागवतेऽपि श्रीमता महामुनिना कपिलेन निजमातरं देवहूतिं प्रति निर्गुणस्य भक्तियोगस्य लक्षणं सोपष्टम्भमेवं प्रकाशितमस्ति—

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ।
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्॥
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे॥ (३।२६।११-१२)

भक्तशिरोमणिना रूपगोस्वामिना स्वकीये हरिभक्तिरसामृतसिन्धवपि उत्तमाया भक्ते र्लक्षणमित्थं कृतमस्ति—

अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृत्तम्।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुच्यते॥ १।११

किञ्च

अनन्यममता विष्णौ ममता प्रेमसङ्गता।
भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः॥

एतादृशी एव भक्ति : भगवन्तं श्रीकृष्णं समाकर्षति। अत एव भक्तेर्गुणान् वर्णयतापि तेन तत्रैव प्रोक्तमस्ति यत्—

क्लेशघ्नी शुभदा मोक्षलघुताकृत् सुदुर्लभा।
सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षणी च सा॥ १।१।१३

एवं तत्तदाचार्याणां भक्तिलक्षणसमीक्षया इदमेव तात्पर्यं पर्यवस्यति यद् अखिलात्मनि परमात्मनि अनन्यं प्रेमैवास्ति भक्तिः। भज् सेवायामिति-धातोर्भावे क्तिन् प्रत्ययेन निष्पन्नस्य भक्तिशब्दस्यार्थः प्रेम्णा भगवतः सेवैव भक्तिः प्रतीयते। अतो भगवति जगदीश्वरेऽनन्यानुराग एव भक्तिरिति निष्कर्षः।

अतः पद्मपुराणस्य श्रीमद्भागवतमाहात्म्यानुसारं भगवतः प्रसन्नतायै तत्प्राप्तये च एकमात्रं प्रमुखं कारणं भक्तिरेवप्रोक्ताऽस्ति—

न तपोभि र्न वेदैश्च न ज्ञानेन नापि कर्मणा।
हरि र्हि साध्यते भक्त्या प्रमाणं तत्र गोपिकाः॥ २।१८

अनन्यया भक्त्या सन्तुष्टो भगवान् भक्तस्य सर्वविधां वाधां निरस्यति, मनोरथं च सर्वं पूरयति, येन गोपदमिव संसारसागरं समुत्तीर्य भगवद्भक्तः परमं पदं प्राप्नोति। तदुक्तं श्रीमद्भागवतस्य दशमस्कन्धे गोवत्सवालकानामपहरणप्रसङ्गे ब्रह्मणः स्तुतौ—

समाश्रिता ये पदपल्लवप्लवं महत्पदं पुण्ययशो मुरारेः।
भावाम्बुधिर्वत्सपदं परं पदं पदं पदं यद्विपदो न तेषाम्॥ १०।१४।५८

अपि च ज्ञाननिमित्तं प्रयासं दूरतस्त्यक्त्वा सतां निवासस्थाने स्थिताः, सद्भिर्भगवद्भक्तैः स्वभावत एव नित्यं प्रकटितां-श्रवणं प्राप्तां भवदीयां कथां ये तनुवाङ्मनोभिः सत्कुर्वन्त एव जीवन्ति। हे अजित! कालकर्मादिभिरजितोऽपि प्रायशस्त्रिलोक्यां तैस्त्वं वशीकृतोऽसि। अतः किं ज्ञानप्रयासैः? हे विभो! धर्मार्थकाममोक्षाणां सरसो निर्झराणामिव श्रेयोमार्गभूतां ते भक्तिं त्यक्त्वा ये केवलं ज्ञानप्राप्त्यर्थं शास्त्राभ्यासादिकं कुर्वन्ति तेषाम् अल्पप्रमाणं धान्यपुञ्जमुज्झित्वा वहुप्रमाणस्थूलतुषावधातिनां यथा क्लेशल एव शिष्यते तथाऽसौ क्लेशजनक एवावशिष्यते नान्यत्—

ज्ञाने प्रयासमुदपास्य नमन्त एव
जीवन्ति सन्मुखरितां भवदीय वार्ताम्।
स्थाने स्थिताः श्रुतिगतां तनु वाङ्मनोभि-
र्ये प्रायशोऽजित! जितोऽप्यसितैस्त्रिलोक्याम्॥
श्रेयः श्रुतिं भक्तिमुदस्य ते विभो?
क्लिश्यन्ति ये केवलवोधलब्धये।
तेषामसौ क्लेशल एव शिष्यते
नान्यद् यथा स्थूलतुषावघातिनाम्॥१०।१४।३,४

महापातकिनोऽपि भगवद्भक्तिमाश्रित्य पापरहिताः सन्तः पुण्यमयेऽध्यात्मराज्येऽग्रेसरा भवन्तीत्येषोऽपूर्वोऽस्ति भक्तिमहिमा। तथाचाह सूतः श्रीमद्भागवतान्ते—

सङ्कीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसाम्।
प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवातिवातः॥ १२।१२।४७

अपि च

अविस्मृतिः कृष्णपदारविन्दयोः
क्षिणोत्यभद्राणि शमं तनोति च।
सत्त्वस्य शुद्धिं परमात्मभक्तिं
ज्ञानं च विज्ञानविरागयुक्तम्॥ १२।१२।५४

अतो भगवत्प्रतिमादिषु विधिपूर्वकं यथा लब्धोपचारैः परमेश्वरपूजया परमभक्तः आनन्देन अतितृप्तः सन् परमं पदं प्रयाति—

श्रीविष्णोरर्चनं येतु प्रकुर्वन्ति नरा भुवि।
ते यान्ति शाश्वतं विष्णोरानन्दं परमं पदम् ॥

भगवद्भक्तिं द्वारीकृत्य भक्तिशिरोमणयो मानवमणयो न कदापि परिच्यवन्ते, अपितु अमरतामाप्नुवन्त्येव। तांश्चानन्यभक्तान् परमकारुणिको भगवान् स्वीयं सच्चिदानन्दमयं परमं स्वरूपं प्रत्याययति, येन जननमरणरूपसंसारक्लेशपरम्पराविरहितास्ते मुक्तिपदमासादयन्ति। तथा चोक्तं श्रीमद्-भगवद्गीतायाम्—

भक्त्या त्वनन्यया लभ्य अहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परमन्तप: ॥ ११।५४

अत एव भगवद्भक्त्याऽमृतत्वं लभ्यत इत्यत्र नास्ति काचित् संशीतिः। अत एव पद्मपुराणस्य श्रीमद्भागवतमाहात्म्ये सततं भगवति समासक्तचेतसां सचेतसां भगवद्भक्तानामेवं प्राशस्त्यमुक्तमस्ति। तस्माद्भक्तिज्ञानविरागसम्पादनद्वारा परमतत्त्वपुरुषोत्तमप्राप्तावेव पुराणानां पर्यवसानमवसीयते। अतएव श्रीमद्भागवते सिद्धान्तितम्—

वासुदेवे भगवति भक्तियोगः प्रयोजितः।
जनयत्याशु वैराग्यं ज्ञानं च तदहैतुकम् ॥ १।२।७

भक्तिः किल सर्वसाधनमूलत्वात् समेषां धर्माङ्गानां सहायिका विद्यते। अतो निखिलसंप्रदायसाधकानां समपेक्षितत्वात् सा भक्तिः सर्वश्रेष्ठाऽवगन्तव्या। साधनमार्गेऽग्रेसरतां सर्वेषां पुंसां भक्तिर्भवति अत्यावश्यकी। कर्मासक्तेन अज्ञेन, तत्त्वदर्शिना, विज्ञेन 'प्रवृत्तिमार्गसेविना गृहस्थेन' निवृत्तिपथपथिकेन ज्ञानिना संन्यासिना, सर्वविधसाधकवर्गेण च साधनमार्गेऽग्रेसरतुं भक्तिर्नूनं समाश्रयणीया एव। अतो भक्तेराश्रयणं समेषां साधकानांकृतेऽत्यस्यावश्यकं कर्तव्यमुपदिष्टमस्ति—

यथा समस्तलोकानां जीवनं सलिलं स्मृतम्।
तथा समस्तसिद्धीनां जीवनं भक्तिरिष्यते ॥

अतः सर्वत्रैव साधनप्रणाल्यां भक्तिः प्राणरूपाऽवगन्तव्या। यतो हि भक्त्यैव साधक. तीव्रसवेगं संगच्छति। तथाचोक्तं–योगिसजेन भगवता पतञ्जलिना योगसूत्रे–'तीव्रसंवेगाद्वा आसन्नः।

अतो भक्तिः सर्वतो गरीयसी। उपासनामूलं भक्तिरेवेति हेतोश्चित्तशुद्धौ सत्यां भक्तिजिज्ञासाऽवश्यं कर्तव्या। विहितकर्मानुष्ठानेन चित्तशुद्धेरनन्तरमेव भक्तेः जिज्ञासाया अधिकारो जागर्त्ति। इत्येवमभिप्रेत्यैवोक्तं महर्षिणा शाण्डिल्येन शाण्डिल्यभक्तिसूत्रे—'अथातो भक्तिजिज्ञासा' (१।१) इति।

यौगिकसाधनद्वारा चित्तवृत्तीनां निरोधपूर्वकमन्तः करणं निर्मलं विधाय साधको भक्तेः प्रभावेण भगवन्तं साक्षात्कृत्य तत्सन्निधानं लभमान आत्मज्ञानमधिगम्य निर्वाणपदं प्राप्तुं शक्नोतीति निश्चित्य उपासनापरिपुष्टये विश्वकल्याणकामनया महर्षिभिः सुगमोपायं भक्तिशास्त्रमाविष्कृतम्। तत्र देवर्षिणा नारदेन चतुरशीति (८४) सूत्राणि प्रणीताणि, महर्षिणा शाडिल्येन च द्वयधिकशतानि (१०२) सूत्राणि निर्मितानि। तत्र नारदभक्तिसूत्रापेक्षया शाण्डिल्यभक्तिसूत्रं भक्तिसंप्रदाये विशिष्टं स्थानं महत्त्वं च बिभर्ति। तत्र द्वाभ्यां स्वप्नेश्वर-भवदेवमिश्राभ्यां पृथक् पृथक् स्वतन्त्रं भाष्यद्वयं कृतमस्ति। श्री स्वामिना नारायणतीर्थेन च भावपूर्णा विशदा व्याख्या विहितास्ति। एवं भाष्यद्वयविभूषितस्य व्याख्यासंवलितस्य च शाण्डिल्यभक्तिसूत्रस्य भक्तसमाजे विपुलोऽस्ति प्रचारः प्रसारः समादरश्च किन्तु नारदभक्तिसूत्रे किमपि भाष्यं व्याख्यानं वा नोपलभ्यते, केवलं तत्र सूत्रमेव दृष्टिपथमायाति। एतयोः सूत्रयोराधारेण पुराणसाहित्ये विस्तृतं विवेचनं जातमस्ति।

भेदनिर्देशपूर्वकम् 'आत्मा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदीध्यासितव्यश्चेति वृहदारण्यक श्रुत्यनुसारमात्मनो दर्शनाय प्रधानानि त्रीणि साधनान्युक्तानि सन्ति।

श्रीमद्भागवतस्यैकादशे स्कन्धे उद्धवं प्रति भगवता श्रीकृष्णेनापि ज्ञानसाधनस्यत्रय उपाया निर्दिष्टाः-ज्ञानयोगः, कर्मयोगः, भक्तियोगश्चेति। तेन निर्विण्णचित्तानां कृते ज्ञानयोगस्य विधानमस्ति। अनिर्विण्णचित्तानां कृते कर्मयोगस्य निर्देशो जातः। उभयभिन्नानां कृते भक्तियोगस्योपदेशोऽस्ति—

योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया ।
ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ॥
निर्विण्णानां ज्ञानयोगो: न्यासिनामिह कर्मसु ।
तेष्वनिर्विण्णचितानां कर्मयोगस्तु कामिनाम् ॥
यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ।
न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥११।२०।६-८

एतेषु प्रमुखेषु त्रिषु साधनेषु ज्ञानमार्गस्य कृपाणधारासमत्वेन सर्वसुलभत्वाभावाद् निष्कामकर्मणश्च कष्टसाध्यत्वाद् भगवद्भक्तिरेव सर्वसाध्या सुलभा निःश्रेयस्करी च प्रतीयते ।

पुराणानुसारेण भगवती भक्तिर्भक्तान् दुःखबहुलादस्मात् संसारसागराद् आनन्दपूर्णपरिस्थितौ समुपस्थापयतीतीदमेकमात्रं सुगमं साधनं निर्दिष्टमस्ति । तत्त्वस्यास्य प्रतिपादनं तु प्रतिपुराणं प्राप्यत एव । अथापि पुराणमूर्धन्ये सर्ववेदान्तसारे वैष्णवकुलतिलके श्रीमद्भागवतमहापुराणे भक्तितत्त्वस्य सर्वाङ्गीणं विश्लेषणं प्रस्तुतमस्ति । तदनुसारेण प्रेमपयोधावखिलात्मनि सकलरसामृतसिन्धौ भगवति संसक्तया भक्त्या समः कल्याणकारी कश्चिदन्यो मार्गो नास्ति—

न युज्यमानया भक्त्या भगवत्यखिलात्मनि ।
सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये ॥३।२५।१६ ।

समाधिसुखस्येव भक्तिसुखस्यापि स्वतन्त्रपुरुषार्थत्वाद् भक्तियोगोऽपि परमपुरुषार्थोऽभिप्रेतः । अत एव जीवनमुक्तानामपि ज्ञानिनां श्रीमद्भागवते भक्तिरावश्यकत्वेन प्रतिपादिता—

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ॥१।७।१०।

एवं पुराणानुसारं भगवतः प्राप्त्यै कर्म-भक्ति-ज्ञानानि त्रीण्यपि साधनानि श्रेष्ठानि सन्ति, किन्तु तत्र भक्तिः सर्वसुलभा सुगमा च प्रोक्ताऽस्ति । नवविधासु भक्तिषु एकविधया अपि भक्त्या भक्तः संसारसागरादुत्तर्तुं शक्नोति । किं पुनः यत्र प्रह्लाद इव नवधाऽपि भक्तिर्भवेत् । अत एवोक्तम्—

निखिलभुवनमध्ये निर्धनास्तेऽपि धन्या
निवसति हृदि येषां श्रीहरेर्भक्तिरेका।
हरिरपि निजलोकं सर्वथाऽतो विहाय
प्रविशति हृदि तेषां भक्तिसूत्रोपनद्धः ॥ ३।७३

'रसो वै सः, इति श्रुत्यनुसारं भगवानस्ति रसरूपः प्रेममयो वा, तदंशत्वाज्जीवोऽपि तदभिन्न एव, परन्त्वविवेकेन मानवः स्वीयान्तः करणप्रेमरसं सांसारिके पुत्रकलत्रस्वजनादौ नियोजयति। तत्समागमेन सुखी तद्वियोगेन च दुःखी जाजायते। यदा जन्मान्तरीयपुण्योपचयेन मानव आत्मीयजनसम्बन्धमसारं मत्वा नैजमन्तःकरणं परमप्रेमास्पदे आनन्दघनसच्चिदानन्दरससागरे परमात्मनि प्रवाहयति, तदा तदेव भक्तिशब्दवाच्यतां प्रपद्यते। भक्त्यैव भक्तो भगवन्तं याथातथ्येन विज्ञातुं प्रभवति। विशेषतः कलिकालेऽल्पप्राणायुर्मेधसां मानवानां भगवद्भक्तिरेवैकं सरलं सुगमं सुखसाध्यं चावलम्बनमस्ति। भक्त्या भगवतो वास्तविकं स्वरूपं विज्ञाय परमपुरुषार्थं निर्वाणपदं प्राप्तुं शक्यते। अत एव भगवता श्रीकृष्णेन श्रीमद्भागवद्गीतायां विश्वरूपदर्शनावसरे वेदाध्ययन-तपः-यज्ञ-दानादिभिः साधनैः मम विश्वरूपदर्शनयोग्यता न सम्भवति, अपितु अनन्यया भक्त्यैव सा सम्पद्यते इति स्पष्टं प्रतिपादितम्।

अपि च मानवानां कल्याणाय सत्ययुगादौ ज्ञानवैराग्ययोर्मोक्षसाधकत्वेऽपि कलियुगे भक्तेरेव प्राधान्यमस्ति! तदुक्तं पद्मपुराणीय श्रीमद्भागवतमाहात्म्ये—

सत्यादित्रियुगे बोधवैराग्यौ मुक्तिसाधकौ।
कलौ तु केवलं भक्तिर्ब्रह्मसायुज्यकारिणी ॥ २।४।

भगवद्भक्तौ न तपस आवश्यकता, न वेदाध्ययनमनिवार्यमस्ति, न च योगानुष्ठानमपेक्षितमस्ति, न वा ज्ञानमनिवार्यतया कारणमस्ति, किन्तु भगवत्यनन्यानुरागमात्रमेवापेक्षितं विद्यते। अतो व्रत-तीर्थ-योग-याग-ज्ञानादीनामपेक्षया मुक्तौ भक्तेरेव प्राशस्त्यमुक्तमस्ति—

अलं व्रतैरलं तीर्थै रलं योगैरलं मखैः।
अलं ज्ञानकलालापै र्भक्तिरेकैव मुक्तिदा ॥ २।२१

किञ्च जन्मजन्मान्तरानन्तरमेव मनुष्याणां मुक्तिं प्रति कलिकाले प्रीत्यात्मकं भक्तिरेवोत्तमं साधनं विद्यते। भक्त्यैव भगवान् भक्तहृदयेषु निरन्तरं विराजते। तथाचोक्तं पद्मपुराणस्य श्रीमद्भागवतमाहात्म्ये—

नृणां जन्मसहस्रेषु भक्तौ प्रीति र्हि जायते।
कलौ भक्तिः कलौ भक्ति र्भक्त्या कृष्णः पुरः स्थितः॥ २।१६

तस्माद्भगवद्भक्तौ रूपस्यायुषश्च न मूल्यमस्ति। न च विद्याया धनस्य जातेश्चोत्कर्षोऽपेक्ष्यते। नवा सदाचारसद्गुणयोः प्राधान्यमस्ति। नापि वलं मुख्यं विद्यते, किन्तु अनन्यं प्रेमैव प्रतीक्षते प्रेममयो भगवान्। तथा चोक्तं जीवगोस्वामिना—

व्याधस्याचरणं ध्रुवस्य च वयो विद्या गजेन्द्रस्य का?
का जातिर्विदुरस्य यादवपतेरुग्रस्य किं पौरुषम्?
कुब्जायाः कमनीयरूपमधिकं किं तत्सुदाम्नो धनम्?
भक्त्या तुष्यति केवलं न च गुणैर्भक्तिप्रियो माधवः॥

अतोऽनन्यया भक्त्या भावितहृदया अम्बरीषप्रभृतयो राजानो भगवन्तमर्चयित्वा परमं पदं प्रापुः। सुदामा हि केवलैः पृथुकतण्डुलैः, गजेन्द्रः किल केवलेन पुष्पेण, शवरी च वदरीफलैरेव भगवन्तं तर्पयित्वा स्वं स्वं मनोरथमवापुः। अत एवोक्तं श्रीमद्भगवद् गीतायाम्—

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥—९।२६

भगवतो भक्तेन समः कोऽपि प्रियो नास्ति। ध्रुव-प्रह्लादादीनां भक्तप्रवराणां प्रगाढया भक्त्या प्रसन्नो भगवान् सर्वमपि कार्यं परिहाय भक्तस्य कृतेऽलौकिकं कर्म निर्वर्तयति, असम्भवंचमपि सम्भावयति, प्रदर्शयति च लोकोत्तरं चमत्कारम्, प्रकाशयति चात्मनोऽघटितघटनापटीयस्त्वम्। महाभारते सभापर्वणि द्रौपद्याश्चीरहरणप्रसङ्गे तदार्तनादं निशम्य सहसोपस्थाय तस्या लज्जां निवारितवान्—

याज्ञसेन्या वचः श्रुत्वा कृष्णो गह्वरितोऽभवत्।
त्यक्त्वा शय्यासनं पद्भ्यां कृपालुः कृपयाभ्यगात्॥ ६।४५॥

कृष्णं च विष्णुं च हरिं नरं च
त्राणाय विक्रोशति याज्ञसेनी ।
ततस्तु धर्मोऽन्तरितो महात्मा
समावृणोद्धै विविधैः सुवस्त्रैः ॥ ६८।४६ ॥

यथाऽक्षिविहीनाः पक्षिशावकाः प्रतिक्षणं मातरं प्रतीक्षन्ते, बुभुक्षिता वत्सा मातुदुग्धं पातुमातुरा भवन्ति, यथा वा वियोगिनी वनिता प्रवासिनं प्रियतमं परिरब्धुमुत्कण्ठिता भवति, तथैव स्वाराध्यदेवं भगवन्तं प्राप्तुं भक्तानां हृदयं विह्वलं भवति । तदुक्तं श्रीमद्भागवते—

अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्ताः ।
प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविन्दाक्ष ! दिदृक्षते त्वाम् ॥
(६ । ११ २३ ।)

भगवतो नारायणस्य समाराधनाय केवलं धनाभिजनरूपतपोबलप्रभाव-पौरुषबुद्धियोगादयो न सन्ति पर्याप्ताः, किन्तु भगवान् भक्त्यैव परं प्रसीदति । सर्वसाधनहीनस्य ग्राहग्रस्तस्य गजराजस्यानन्यशरणया भक्त्या केवलया तुतोष—

मन्ये, धनाभिजनरूप-तपः-श्रुतौज-
स्तेजःप्रभावबलपौरुषबुद्धियोगाः ।
नाराधनाय हि भवन्ति परस्य पुंसो
भक्त्या तुतोष भगवान् गजयूथपाय ॥ ७।६।६

वाञ्छाकल्पतरुर्भगवान् भक्तानां मनोरथानवश्यं पूरयति । भगवतः श्रीकृष्णस्य सन्देशमादाय वृन्दावनमुपगम्य तत्र तद्वियोगविह्वलानां गोपीनाम् पूर्वं प्रेम पर्यालोच्य, उद्धवस्य मनसि शङ्काऽजायत; यत् किं भक्तानपि परित्यजति भगवान् ? इति । सर्वज्ञो भगवान् श्रीकृष्ण इमामुद्धवशङ्कामपनेतुमेव तेन सह कुब्जागृहे गत्वा प्रादर्शयद् यद् यदाहं भक्तिमतीं कुब्जामपि न परित्यजामि, तदा मदर्थं त्यक्तसर्वस्वानां परमभक्तानां गोपीनां परित्यागं कर्तुं कथमहं शक्नुयाम् । तथा चोक्तं गर्गसंहितायाम्—

सैरन्ध्रीमपि संत्यक्तुमहं शक्तोऽस्मि नोद्धव !
किमुत व्रजलोकांस्तानिति व्यञ्जनिमामगात् ॥ ५।३ ।

श्रीमद्भागवतानुसारेण केवलं शारीरिकं सान्निध्यं नास्ति, किन्तु मनस एव मुख्यं सान्निध्यमपेक्षितम्। यत्र हार्दिकं प्रेम विद्यते तत्रैव सान्निध्यमस्ति। प्रेम विना शारीरिकं सान्निध्यं व्यर्थमेवास्ति। परमभक्तानां गोपीनां हृदयेषु श्रीकृष्णविषयकं सत्यं प्रेमासीत्। अतस्तत्र सत्यं सान्निध्यमप्यासीत्। संयोगापेक्षया वियोगेऽधिकं सुखं जायते, यतो हि संयोगे प्रियतमसान्निध्यं सीमितं भवति, किन्तु वियोगे सर्वदैव प्रियतमस्य स्मरणं चिन्तनं दर्शनेच्छा च, जायते। दूरे वर्तमानस्य भगवतः श्रीकृष्णस्य हृदये गोपिका आसन्, तासां हृदये च सोऽहर्निशं विराजमान आसीत्। अत अतएव निरन्तरं परमप्रेमास्पदभगवच्चिन्तया निर्धूतसकलकल्मषाणां श्रीकृष्णप्रेमपयोधिनिमग्नानां भक्तिमतीनां गोपिकानां हृदयपटले प्रसृतमपूर्वं प्रेम पर्यालोच्य तासां चरणसरोरुहरेणुकणस्पृहया वृन्दावनस्थानां गुल्मलतौषधीनां मध्ये किमपि जन्म वाञ्छता ज्ञानिनाप्युद्धवेन प्रेमगद्गदया वाचाऽवोचि—

आसामहो चरणरेणुजुषामहं स्यां
बृन्दावने किमपि गुल्मलतौषधीनाम्।
या दुस्त्यजं स्वजनमार्यपथं च हित्वा
भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्या॥

(श्रीमद्भागवते १०।४७।६१)

गर्गसंहितायामपि गोपीनां सौभाग्यवैभवं सूचयता देवर्षिणा नारदेन राजानं बहुलाश्वं प्रति प्रोक्तम्—

तासां तपः किं कथयामि राजन्!
पूर्णे परे ब्रह्मणि वासुदेवे।
याश्चक्रिरे प्रेम हृदिन्द्रियाद्यै
र्विसृज्य लोकव्यवहारमार्गम्॥ ४।४।१८।
योगेन सांख्येन शुभेन कर्मणा
न्यायादिवैशेषिकतत्त्ववित्तमैः।
यत् प्राप्यते तच्च पदं विदेहराट्
सम्प्राप्यते केवलभक्तिभावतः॥ ४।४।१४

भक्त्यैव वश्यो हरिरादिदेवः
सदा प्रमाणं किल चात्र गोप्यः ।
साङ्ख्यं च योगं न कृतं कदाऽऽभिः
प्रेम्णैव यस्य प्रकतिं गताः स्युः ॥ ४।४।१५

श्रीकृष्णसमर्पितप्राणाभिः गोपिकाभिर्लोकलज्जां कुलमर्यादां गार्हस्थ्यधर्मं श्चापि परित्यज्य भगवन्तं श्रीकृष्णमानन्दकन्दसच्चिदानन्दस्वरूपं परं ब्रह्म ज्ञात्वा तस्य परमपवित्रे प्रेमपयोधौ स्वीया जीवनौका निर्भयं प्रवाहिताऽऽसीद् यदर्थं भगवता श्रीकृष्णेनापि आत्मनि गोपीनां लोकोत्तरं निष्कपटभावमालक्ष्य ताः स्व-स्व-गृहेषु प्रत्यावर्तयता स्पष्टमुद्घोषितम्—

न पारयेऽहं निरवद्य संयुजां सुसाधुकृत्यं विबुधायुषापि वः ।
या मा भजन् दुर्जरगेहशृङ्खलाः संवृश्च्य तद्वः प्रतियातु साधुना ॥ १०।३२।२२ ।

भगवान् भक्तानां हृदयेषु जातानहङ्काराङ्कुरांश्छित्त्वा भक्तमनांसि नूनं निर्मलानि कुरुते । रासोत्सवप्रसंगे यदा भगवान् श्रीकृष्णो गोपीरभिमानवतीर्ज्ञात्वा तासामहङ्कारदूरीकरणाय रासमध्य एव ताः परित्याज्यान्तर्हितो जातस्तदानीं ताः तद्विरहे व्याकुलतया तं मार्गमाणाः तन्मयतामवाप्य तस्य तास्ता लीला अनुचक्रुः—

इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणतत्पराः ।
लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः ॥ १०।३०।१४ ।

"नारदस्तु तदर्पिताखिलाचारता तद्विस्मरणे व्याकुलतेति" (१६) इति नारदसूत्रानुसारं यदा भक्तस्य हृदयं भगवतोऽसानिध्याद् अत्यन्तमशान्तिं व्याकुलतां चानुभवति, तदा भक्तेरुत्कर्षो जायते । यथा पतिप्राणायाः पतिव्रतायाः पत्युरसान्निध्ये प्रेम तीव्रत्वं भजते तथैव प्रेमपात्रे भगवति चक्षुर्विषयातिक्रान्ते प्रेमासक्तस्य भक्तस्य हृदयं विरहयन्त्रणाव्याकुलं जायते । भक्तहृदया दुद्वेलितेन विरहाग्निनाऽहर्निशं भक्तहृदयकाननं दन्दह्यते । 'तीव्रसंवेगानामासन्नः (१।२१) इति योगसूत्रद्वारा महर्षिणा पतञ्जलिनाप्येतदेवानुमोदितम् । गोपीनां प्रचुरं प्रेम पर्यालोच्यापि मध्ये-मध्ये श्रीकृष्णातिरोधानकारणमेतदेव यद् विरहे न्यूनमपि प्रेमाधिक्यमवाप्नुयाद्, येन गोप्यो मोक्षप्रदं पूर्णं प्रेम

अधिगच्छेयुः। तासां तदप्राप्तौ जायमानानामन्तरायाणां विरहाग्निना दहन-मत्यावश्यकम्। तथा चाह भगवती श्रुतिः 'अतप्ततनुर्नाश्नुते'।

भक्त्या भक्तो यावत् पुलकिताङ्गो द्रवीभूतमानसो विगलितानन्दाश्रुर्न भवति तावदान्तरिकीं पवित्रतां नासादयति। यथा समाधिद्वारा चेतसः समताधिगमाद् मानसिको वैषम्यभावः समूलमपसरति, तथैव भगवद्भक्त्या परमानन्दसम्बन्धसत्त्वात् पापराशिः प्रणश्यति। धर्मशास्त्रानुसारेण प्रबलं पापकर्म प्रचुरेण प्रायश्चित्तेनापनोद्यते। अतस्तत्तत्स्मृतिषु पातकमहापातकोपपातकातिपातकानां पृथक् पृथक् प्रायश्चित्तव्यवस्था निर्धारिताऽस्ति। परं भक्तेरयमसाधारणो महिमा यत् सामान्ययाऽपि भक्त्या महीयांस्यपि पापनि प्रणश्यन्ति। भगवद्भक्तिमासादयितुं विचारकाठिन्यं योगपरिश्रमं ज्ञानशक्तिशैलित्वं किमपि नापेक्षितम्। तदर्थं केवलं भगवन्तं प्रत्यनन्यानुराग एवापेक्षितोऽस्ति। भगवद्भावभावितो भक्तः किमचारः कीदृगधिकारः किंश्रेणीकः किंजातीयः कोऽपि कथं न स्याद्, यदि जन्मान्तरीयार्जितपुण्यपुञ्जप्रभावात् तस्य चेतसि भगवदनुरागोदयो जायेत, तर्हि तं भक्तेः पथश्च्यावयितुं न कोऽपि समर्थः स्यात्। अतः स्वयमेव भगवता गीतायां प्रोक्तम्—

मां हि पार्थ ! व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्॥ ६।३२।
अपि चेत् सुदुराचारो भजते मामनन्यभाक्।
साधुरेव न मन्तव्यः सम्यग्व्यवसितो हि सः॥ ६।३०।

भक्तेर्भेदाः

भक्तिस्तावद् द्विविधा गौणी पराभेदात्। गौणी पुनर्द्विधा वैधी[1] रागात्मिका[2] च। तत्र वैधी श्रवणादिभेदेन नवधा[3] सा पुनर्द्विविधा, एकाङ्गा अनेकाङ्गा[4] च। रागात्मिका खलु दास्यासक्ति-सख्यासक्ति—वात्सल्यासक्ति-कान्तासक्ति-

---

१. यत्र रागानवाप्तत्वात् प्रवृत्तिरुपजायते।
शासनेनैव शास्त्रस्य सा वैधी भक्तिरुच्यते॥ (भ. र. सि० २।३)

२. विराजन्तीमभिव्यक्त ब्रजवासिजनादिषु।
रागात्मिकामनसृता या सा रागात्मिकोच्यते॥ (भ० र० सि० २।७८)

आत्मनिवेदनासक्ति-गुणकीर्तनासक्ति-तन्मयासक्तिभेदात्सप्तधा विभज्यते। द्विविधापि सा भक्तिः साधनावस्थायां गौणी, सिद्धावस्थायां च पराऽभिधीयते। गौण्या भक्तेरङ्गसाधनद्वारा साधकोऽभ्यासवृद्धिं कुर्वाण आत्मानं जगत् परमेश्वरं च पृथक पृथग्निभालयति। अवसानेऽभ्यासपूर्णतायां सत्यां भक्तिपारावारे निमग्नो द्वैतभावरहितो भक्तः सर्वत्रैव स्वकीयं प्रियतमं परमेश्वरमेवावलोकयति। इयमेव भक्तेरद्वैतावस्था परा भक्तिरुच्यते। अस्यामवस्थायां भक्त आनन्दमयं परात्मानं परिपश्यन् परमानन्दसागरे निमज्जति। तथा चोक्तं श्रीमद्भागवते भगवद्भजनायासुरबालकान् प्रेरयता प्रह्लादेन—

तदा पुमान् मुक्तसमस्तबन्धनः तद्भाव-भावानुकृताशयाकृतिः।
निर्दग्धबीजानुशयो महीयसा भक्तिप्रभावेण समेत्यधोक्षजम्॥ ६।६।३६
अधोक्षजालम्भमिहाशुभात्मनः शरीरिणं संसृतिचक्रशातनम्।
तद् ब्रह्म निर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम्॥ ७।७।३७

तथा च गुरूपदेशाद्—विधिनिषेधानुकूलं साधनम् कुर्वतो भक्तस्य हृदये प्रथमं या भक्तिरुदेति सा वैधी भक्तिरुच्यते। ततो निरन्तरं भगवच्चरणा-

---

३. श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवम्
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥
इति पुंसार्पिता विष्णोः भक्तिश्चेन्नवलक्षणा॥ (श्री० भ०० ७।५।२३)

४ सा भक्तिरेकमुख्याङ्गाश्रितानैकाङ्गिकाऽथवा।
स्ववासनानुसारेण निष्ठातः सिद्धिकृद्भवेत्॥

एकाङ्गा यथा—भक्तिरसामृतसिन्धौ रूपगोस्वामी—

श्रीविष्णोः श्रवणे परीक्षिदभवद् वैयासकिः कीर्तने
प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने।
अक्रूरस्त्वभिवादने कपिपतिर्दास्येऽथ सख्येऽर्जुनः
सर्वस्वात्मनिवेदने बलिरभूत्कृष्णाप्तिरेषां परम्॥

अनेकाङ्गा यथा श्रीमद्भागवते राज्ञोऽम्बरीषस्य दिनचर्या दर्शयति अमलात्मा व्यासपुत्रः श्रीशुकाचार्यः—

सर्वं मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने।
करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये॥ ९।४।१८

रविन्दविषयिणी रागात्मिका भक्तिरुदेति, यया भक्तहृदये आनन्दशान्तिसञ्चारो भवति। तस्य मनोमधुपः प्रभुपादमकरन्दपानमत्तः सर्वत्र प्रभुमेव पश्यन्नानन्द-निमग्नस्तिष्ठति। अस्यामवस्थायामेव भवन्तं श्रीकृष्णमुक्तवत्यो व्रजवाला रासलीलावसरे—

चित्तं सुखेन भवतापहृतं गृहेषु
यन्निर्विशत्युत करावपि गृह्य कृत्ये।
पादौ पदं न चलतस्तवपादमूलाद्
यामः कथं व्रजमथो करवाम किम्वा॥ १०।२६।३४।

रागात्मिकायां भक्त्यां भगवत्प्रेमविह्वलो भूत्वा भक्त उन्मन्तवन्नृत्यति, रोदिति, गायति, हसति च सर्वदा। तथाचोक्तं स्वयमेव भगवता श्रीकृष्णेनोद्धवं प्रति—

वाग् गद्गदा द्रवते यस्य चित्तं
रुदत्यभीक्ष्णं हसति क्वचिच्च।
निर्लज्ज उद्गायति नृत्यते च
मद्भक्तियुक्तो भुवनं पुनाति॥ ११।१४।२४।

एवं गुरुशास्त्रानुसारं वैधीं भक्तिमभ्यस्यतो भक्तस्य हृदये सा रागात्मिका भक्तिरुदेति, यस्यां भक्तहृदयं सांसारिकविषयेभ्य उपरतं भूत्वा भगवति लीनं भवति। एतत् परिपक्वदशायाः परिणामः, परा भक्तिरुच्यते, यस्यामहङ्कार-देहात्मभावौ नश्यतो भक्तस्य सर्वात्मदृष्टिश्चोज्जृम्भते। तथाः चोक्तं श्रीशङ्कराचार्यपादैः।

सम्पूर्णं जगदेव नन्दनवनं सर्वेऽपि कल्पद्रुमा
गाङ्गं वारि समस्तवारिनिवहः पुण्याः समस्त ताः क्रियाः।
वाचः प्राकृतसंस्कृताः श्रुतिगिरो वाराणसी मेदिनी
सर्वावस्थितिरस्य वस्तुविषया दृष्टे परे ब्रह्मणि॥

पराभक्तिस्वरूपज्ञानेयोरैक्यम्

यथाग्निना ध्मातं सुवर्णं निर्मलं सत् स्वीयं स्वाभाविकं स्वरूपं प्रतिपद्यते तथैव जीवोऽपि भगवद्भक्त्या मलिनसंस्कारपरिच्युतोऽध्यात्ममार्गेऽग्रेसरन् अञ्जनसम्प्रयुक्तं चक्षुः सूक्ष्मं वस्तु इव स्वकीयं वास्तविकं स्वरूपमासादयति।

परमात्मनः स्वरूपज्ञानं परा भक्तिश्चैकमेव तत्त्वम्। तटस्थस्वरूपभेदेन ज्ञानं द्विविधम्। तटस्थे ज्ञाने ज्ञातृज्ञेयज्ञानरूपिणी त्रिपुटी तिष्ठति। दशायामस्यां ज्ञेयस्य परमात्मनः, ज्ञातुः साधकस्य, ज्ञानव्यापारस्य, च सत्त्वे एवात्मन उपलब्धिर्जायते, किन्तु स्वरूपज्ञानदशायां ज्ञातृज्ञेयज्ञानरूपिण्यास्त्रिपुट्याः पूर्णतो विलयेनैकमात्रमद्वितीयं सच्चिदानन्दस्वरूपं परं ब्रह्मैवावशिष्यते। सच्चिदानन्दभावनिमग्नचेताः साधको भक्तेः प्रकृष्टायामस्यां दशायां सर्वत्रैवानन्दरूपस्य परमात्मनः साक्षात्कारं कुर्वन् तमेवाद्वैतभावमधिगच्छति।

यथा ब्रह्मसद्भावस्योदयेन स्वरूपज्ञाने जाते कार्यकारणब्रह्मणोरैक्याद् अद्वैतभाव उदेति, तथैव पराया भक्तेरुदयेन भक्तः केवलं परमात्मानमेवानुभवति, न तस्य हृदि परः कश्चन पदार्थः परिस्फुरति। तदानीं भक्तः कार्यब्रह्मस्वरूपं जगत्प्रपञ्चं कारणब्रह्मस्वरूपे परमात्मन्येव विलीनमनुभवति। दशायामस्यां जलाशये जलबिन्दुरिव भक्तमानसं रससागरे परमात्मनि विलयैकरूपतां प्रतिपद्यते। तदानीं साधकस्य चेतसि ब्रह्मव्यतिरिक्तं न किमप्यवभासते। अतः पराभक्तेः स्वरूपज्ञानस्य चैकत्वे न काप्यनुपपत्तिः तथोक्तं देवीभागवते—

भक्तेस्तु या परा काष्ठा सैव ज्ञानं प्रकीर्तितम्।
यस्यां तदतिरिक्तं हि न किञ्चदपि भाव्यते॥

(२।३७।२८)

दशायामस्यां साधको भगवत्येवात्मानं निवेदयन् अहं भावशून्यो देहाध्यासरहित आत्मारामतां प्रतिपद्यते। तदानीं तस्य चेतसि ब्रह्मातिरिक्तं न किमपि अवभासते। इयमस्ति पराख्यभक्तिदशा, निर्विकल्पकसमाधिः, परवैराग्यवस्था, ब्रह्मप्राप्तिदशा च। अस्यामेव परिस्थितौ तत्त्वमस्यादिमहावाक्यानां भवति चरितार्थता।

पराया भक्तेर्दशायां स्वरूपज्ञानस्याविर्भावे तटस्थज्ञानस्य लयो जायते। वैधीरागात्मिक्योर्ध्यातृध्येययोः सम्बन्धः पृथक्-पृथक् तिष्ठति। परायाश्च भक्तेर्दशायां स्वरूपज्ञानस्योदयेन सर्वत्राद्वितीयं सच्चिदानदं ब्रह्मैवावभासते तदानीं ध्यातृध्येययोरेकत्वेन साधकः स्वस्वरूपे एव तिष्ठति। यावत् तटस्थापरनामकं द्वैतज्ञानं तिष्ठति तावद् द्रष्टृदृश्ययोर्भेदो जायते। यदा च स्वरूपज्ञानमुदेति,

२

तदा द्वैतभावे विनष्टे साधकोऽद्वितीयपरमब्रह्मभाव एव तिष्ठति। इयमेव परा भक्ति र्भक्तैः काम्यते, इयमेव हि जीवन्मुक्तावस्था प्रोच्यते। एवं भक्तेर्ज्ञानरूपतया भक्त्यैव मुक्तिमभीप्सवः "ऋते ज्ञानान्न मुक्तिः" इत्यादि विरोधं न कलयन्ति।

अपि च—अखिलं खलु भगवत्स्वरूपं न तदतिरिक्तं किमपीति धारणां कुर्वतो भक्तस्य हृदि जगतो भानं न भवति। जगद्भानप्रणाशपूर्वकं नैजमस्तित्वमपि विलयमेति। तथा चोक्तं कालिकापुराणे—

मत्परा भक्तिनिष्णाता मद्भक्ता योगिनाम्वराः।
ब्रह्मैवास्ते जगत् सर्वमितिधारणयाऽनिशम्॥ २२।७॥
महात्मानो निरीक्षन्ते विश्वस्मिन् सूरसत्तमाः॥

देवीभागवते परा-भक्तिमनुभवतो भक्तस्यावस्थास्वरूपमेवं वर्णितम्—

परानुरक्त्या मामेव चिन्तयेद् यो ह्यतन्द्रितः।
स्वाभेदेनैव मां नित्यं जानाति न विभेदतः॥ ७।३७।११।
इति भक्तिस्तु या प्रोक्ता परा भक्तिस्तु सा स्मृता।
यस्यां देव्यतिरिक्तं तु न किञ्चिदवभासते॥ ६।३७।२६
इत्थं जाता परा भक्तिर्यस्य भूधरतत्त्वतः।
तदेव तस्य चिन्मात्रे मद्रूपे विलयो भवेत्॥ ७।३७।२७

भक्तिदर्शनयोः फलैक्यम्

अतो दार्शनिकतत्त्वज्ञानोदयेन यत् फलमवाप्यते, तत् फलं परया भक्त्यापि प्राप्यत इति निर्विवादम्। 'रसो वै सः' रसं ह्येवायं लब्ध्वा आनन्दी भवति' (तै० उ० २।६) इति श्रुत्यनुसारेण भगवतो रसरूपत्वाद् ब्रह्मानन्दप्रदायिनं भक्तिरसमेव द्वारीकृत्य रसरूपस्य भगवतः सान्निध्यमवाप्तुं शक्यते। अत एव स्वामिवर्यैः श्रीमधुसूदनसरस्वतीभि र्भक्तिरसायने सोपष्टम्भं भक्तेः रसरूपता चाङ्गीकृता।

यथा पदार्थवादिनी न्यायवैषिकदर्शने पदार्थज्ञानद्वारा निःश्रेयसाधिगमं प्रदर्शयतः, योगदर्शनञ्च जीवेश्वरयोरेकत्वप्रतिपादनपूर्वकं समाधिना कैवल्यपथं

प्रकटयति। सांख्यदर्शनं तु त्रिविधदुःखात्यन्तनिवृत्तिमभिलक्ष्य प्रकृतिपुरुषयोर्विवेकज्ञानेन मुक्तिमार्गमुपदिशति, मीमांसादर्शनमपि वैदिकैः कर्मभिः संस्कारशुद्धया निर्वाणोपलब्धिं निर्दिशति, वेदान्तदर्शनं ब्रह्मज्ञानेन मोक्षप्राप्तिमुद्भावयति, तथैव भगवत्सान्निध्योपलब्धिभूता भक्तिरपि भगवत्तत्त्वसाक्षात्कारद्वाराऽपावर्गद्वारमुद्घाटयतीत्यत्र नास्ति कश्चन सन्देहः। स्थावरजङ्गमात्मकेविशालेऽस्मिन् भूमण्डले उच्चावचेषु संख्यातीतेषूद्भिज्जस्वेदजाण्डजजरायुजेषु योनिषु परिभ्रमन् प्रकृतिमातुरनुकम्पया जीवो निर्बाधं क्रमोन्नतिं लभमानोऽन्ते मानवदेहमाश्रयति। मानवशरीरमधिगत्यापि वासनाजालनिगडितो जन्ममृत्युप्रवाहेऽनारतं प्रवहन् तापाद् दुःखचक्रं चङ्क्रामति, यावद् भगवद्भक्त्या आत्मसाक्षात्कारं कृत्वासौ न परमानन्दस्वरूपं मुक्तिपदमधिगच्छति।

यत्तु श्रीमद्भागवतस्य कपिलदेवहूतिसंवादे भगवद्भक्ता मुक्तिमपि नेच्छन्ति।[1] तस्य भगवद्भक्तप्रशंसामात्रपरत्वं ज्ञेयम्, भक्तिमोक्षयोः समानार्थत्वे मोक्षेच्छाया अप्रसङ्गान्निषेधस्यासङ्गत्यापत्तेः। यद्वा मुक्तावपेक्षितः सर्वः दुरतक्षयः, भोगनिवृत्तिः, आत्मज्ञानादि वा भक्तिप्रभावादेव निष्पद्यन्ते। अर्चनपादसेवनयोर्मोक्षस्वरूपे भगवत्सान्निध्येऽपि सम्भवेन मुक्ता अपि भक्ता भवन्तीतिबधकाभावाच्च। अपि च भक्तशिरोमणिना देवर्षिणा नारदेनापि भक्तेर्मुक्तिप्रदत्वं स्पष्टमभिहितम्। लोककल्याणकामनया महर्षिभिरुपदिष्टा विविधा मार्गाः सन्ति श्रमसाध्या स्वर्गादिफलप्रदा वा;[2] भगवत्प्राप्तिकरी भक्तिस्तु सर्वतः सुगमा। तथाचोक्तम्—

श्रमसाध्याश्च ते सर्वे प्रायः स्वर्गफलप्रदाः॥ १।५६

सर्वमिदं मानवयोनावेव संभवति नान्यत्र। विधातुः सृष्टेर्वैचित्र्याद् मानव एव केवलमेतादृगस्ति यो विचिन्त्य स्वशुभाशुभे विमोक्तुमर्हत्यात्मानं

---

१. सालोक्य-सार्ष्टि-सामीप्य-सारूप्यैकत्वमप्युत।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः॥ ३।२९।१३

२. ऋषिभिर्बहवो लोके पन्थानः प्रकटीकृताः।
श्रमसाध्याश्च ते सर्वे प्रायः स्वर्गफलप्रदाः॥ २।५६

मृत्योः पाशात्। अत एव सृष्टिनिर्माणादेव ब्रह्मदेवस्य सन्तोषोऽजायत। तथा चोक्तं श्रीमद्भागवते—

सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या
नानासरीसृपपशून् खगदंशमत्स्यान्।
तैस्तैरतुष्टहृदयः पुरुषं विधाय
ब्रह्मावलोकधिषणं मुदमाप देवः॥ ११।९।२८॥

तस्मात् समवाप्य मानवशरीरं नूनं विज्ञेयमात्मतत्त्वम्। अयमेव परमः पुरुषार्थः, उत्कृष्टा सिद्धिः, श्रेष्ठा च सम्पदस्ति। अनेनैव मानवजन्मनः साफल्यम् एतेनैव कृतार्थोऽयं लोकः, अमुनैव वसुन्धरा वस्तुतो वसुन्धरा। मानवजनिं लब्ध्वापि य आत्मज्ञानपूर्वकं मोक्षार्थं न यतते, तस्य भवति महती विनष्टिः दुर्गतिश्च। तदुक्तं पूज्यापादैः श्रीशङ्कराचार्यैर्विवेकचूडामणौ—

लब्ध्वा कथञ्चिन्नरजन्दुर्लभं
तत्रापि पुंस्त्वं श्रुतिपारदर्शनम्।
यस्त्वात्ममुक्तौ न यतेत मूढधीः
स आत्महा स्वं विनिहन्त्यसद्ग्रहात्॥

अतोऽतिदुर्लभं मानवशरीरमासाद्य योऽहर्निशं भगवच्चरणचिन्तनपरायणः सन् संसारसागरादात्मानमुद्धर्तुं न प्रयततेऽस श्रीमद्भागवते आत्महा प्रोक्तः—

नृदेहमाद्यं सुलभं सुदुर्लभं
प्लवं सुकल्पं गुरुकर्णधारम्।
मयानुकूलेन नमस्वतेरितं
पुमान् भवाब्धिं न तरेत् स आत्महा॥ (११।२०।१७)

भक्तिदर्शनानुसारं श्रद्धया भगवच्चरणाश्रयाणां भागवतानां सर्वा आपतयो दूरीभवन्ति, गोपदमिवेमं संसासागरमनायासेन समुत्तीर्य ते परमं पदं लभन्ते—

समाश्रिता ये पदपल्लवप्लवं
महत्पदं पुण्ययशो मुरारेः।
भवाम्बुधिर्वत्सपदं परं पदं
पदं पदं यद् विपदां न तेषाम्॥ (१०।१४।५८)

पाञ्चरात्रमपि एकं स्वतन्त्रं दर्शनरूपेण विकसितमागमशास्त्राणां मुख्योऽस्ति विषयः। पाञ्चरात्रस्य सिद्धान्ता अपि अनेकेषु पुराणेषूपलभ्यन्ते। वैष्णवपुराणेषु पाञ्चरात्रपरम्परा धार्मिकविकाशरूपेण प्रस्तुता विद्यते। महाभारतान्तर्गतस्य शान्तिपर्वणो नारायणीपर्वणि पाञ्चरात्रस्य व्यापकानां सिद्धान्तानां दर्शनं वोभवीति। कूर्मपुराणे पाञ्चरात्रं पूर्णतो विकसितावस्थायां दृष्टिगोचरी भवति (४१।६५) ब्रह्मपुराण-पद्मपुराणयोः चतुर्व्यूहरम्परायाः पालनं दृश्यते। श्रीमद्भागवतेऽक्रूरद्वारा कृतायां श्रीकृष्णस्तुतौ च चतुर्व्यूहस्य सिद्धान्ताः स्वीकृताः सन्ति यथा—

नमस्ते वासुदेवाय नमः सङ्कर्षणाय च।
प्रद्युम्नायानिरुद्धाय सात्त्वतां पतये नमः॥ (१०।४०।२१)

एवं पुराणेतिहासयोर्दर्शनस्य प्रमुखोपयोगिनामङ्गानां ज्ञानमीमांसा-तत्त्वमीमांसा-आचारमीमांसानां सामान्यं समीक्षणं कृतमस्ति। तत्र स्पष्टास्पष्टरूपेण ज्ञानोपकरणेषु प्रमा-प्रमातृ-प्रमेय-प्रमाणानां तत्त्वसम्बन्धिनां सर्वेश्वरवाद-सृष्टि-प्रलय-कालमानादीनां, वर्णाश्रम-धर्माचारविचारणामष्टाङ्गयोगादीनां च विवरणमुपलभ्यते, येनापेक्षितं तात्त्विकं ज्ञानं सिद्धान्तरूपेण जायते एवेति निश्चप्रचम्। अतः एव मोक्षादिसर्वकामनया भगवद्भजनस्यावश्यकत्वममलात्मना वैयासकिना शुकेन स्पष्टतया प्रतिपादितं श्रीमद्भागवते—

अकामः सर्वकामो वा मोक्षकाम उदारधीः।
तीव्रेण भक्तियोगेन भजेत पुरुषं परम्॥ २।।१०।

अपि च महाभारतस्य शान्तिपर्वणि मोक्षधर्मे धर्मराजं प्रति भीष्मपितामहेन भगवदाराधनाद् महर्षीणां मुक्तिनिर्देशपूर्वकं तच्छरणागतये उपदेशो दत्तः। किञ्चानादिर्भगवान् विष्णुरेवास्ति परं ब्रह्मऽपरमं च धाम, तं प्राप्य प्रणिनः कालगतेर्मुक्ताः सन्तो नूनं मोक्षं लभन्ते—

समाराध्यैव गोविन्दं गता मुक्तिं महर्षयः।
तस्माद्भज हृषीकेशं कृष्णं देवकिनन्दनम्॥
तद् ब्रह्म परमं प्रोक्तं तद्धाम परमं पदम्॥
तद् गत्वा कालविषयाद् विमुक्ता मोक्षमाश्रिताः २०६।१४

शिवपुराणानुसारं तु निष्कामकर्मणा भगवति भक्ति जायते, भक्त्या च ज्ञानसूर्यस्योदयान्मुक्तिर्भवतीति निश्चप्रचं प्रतिपादितम्—

कर्मणा जायते भक्तिर्भक्त्या ज्ञानं प्रजायते।
ज्ञानात् प्रजायते मुक्तिरिति शास्त्रेषु निर्णयः ॥ (उ० सं० ४१।१०)

अतः पुराणेतिहासयोर्भारतीयदर्शनविषयकविवेचनीयतत्त्वानामुपलब्धौ न काचिदस्ति संशीतिः। यथा-'तस्माद्वेतस्माद्वा आत्मनः आकाशः सम्भूतः,' इति श्रुत्या वेदान्तिनो मायासम्वलितस्य ब्रह्मणः प्रथममाकाशस्योत्पत्तिमङ्गीकृत्य तस्मात् सर्वप्रपञ्चो जायत इति निर्विवादं स्वीकुर्वन्ति तथैव पौराणिका अपि मायाया माध्यमेन जगत ईश्वरकर्तृत्वं मन्यते इत्युभयोः साम्ये न विद्यते कश्चन निषेधः

तस्मात् सर्वदर्शनानां लक्ष्यभूता आनन्दघनसच्चिदानन्दपरमात्मतत्त्वोपलब्धिरिव भक्तिदर्शनद्वारा परमतत्त्वपुरुषोत्तमप्राप्तावेव पुराणानां परमं प्रयोजनमवसीयते। श्रीमद्भागवतं संश्राव्य श्रीशुकेन सिद्धान्ततया एवं राजा परीक्षिदुद्बोधितः—

अहं ब्रह्म परं धाम ब्रह्माऽहं परमं पदम्।
एवं समीक्षन्नात्मानमात्मन्याधाय निष्कले ॥
दशन्तं तक्षकं पादे लेलिहानं विषाननैः।
न द्रक्ष्यसि शरीरं स्वं विश्वं च पृथगात्मनः ॥

ततः परीक्षताऽपि तथैवाचरितम्—

परीक्षिदपि राजर्षिरात्मन्यात्मानमात्मना।
समाधाय परं दध्यावस्पन्दासु र्यथा तरुः ॥
प्राक्कूले बर्हिष्यासीनो गङ्गाकुल उदङ्मुखः।
ब्रह्मभूतो महायोगी निःसङ्गश्छिन्नसंशयः ॥ (१२।६।६,१०)

वस्तुतो भगवत्पादाब्जसमासक्तमानसः साधको न पुनर्जन्ममरणचक्रे चङ्क्रमितो भवति। तथा चोक्तं देवकीगर्भे समाविष्टं भगवन्तमादिपुरुषं नारायणं स्तुवद्भिर्ब्रह्मादिभिर्देववर्यैः—

शृण्वन् गृणन् संस्मरयंश्च चिन्तयन्
नामानि रूपाणि च मङ्गलानि ते ।
क्रियासु यत्त्वच्चरणारविन्दयो—
राविष्टचेता न पुनर्भवाय ॥ (१०।२।३६)

अत एव श्रीमद्भागवतं समापयता श्रीशुकाचार्येण सिद्धान्तितम्-

संसारसिन्धुमतिदुस्तरमुत्तितीर्षो—
र्नान्यः प्लवो भगवतः पुरुषोत्तमस्य ।
लीलाकथारसनिषेवणमन्तरेण
पुंसो भवेद् विविधदुःखदवार्दितस्य ॥ (१२।४।४०)

भक्ति-ज्ञान-कर्मवादसमीक्षा

भारतीयधार्मिकदार्शनिकक्षेत्रे त्रिपथगाया गङ्गाया धारावद् भक्ति-ज्ञान-कर्मणां तिस्रः चिन्तनधाराः चिरकालतः प्रचलन्त्यो दरीदृश्यन्ते । मानवानां विकासपथे उपस्थितान् विघ्नान् निराकर्तुं लोककल्याणकामनया भारतीयैर्मनीषिभिः त्रयाणां भक्ति-ज्ञान-कर्मणां विचारः साधनरूपतया समुपस्थापितः । अतः त्रयाणामेषामस्ति अन्योऽन्यसम्बन्धः ।

वैदिकसंहितासु एकेश्वरवादेन सह भक्तिमार्गस्य प्राधान्यमुलभ्यते । वैदिककालिकी उपासनात्मिका भक्ति ब्राह्मणकाले कर्मकाण्डरूपेण अभिव्यक्ता । कर्मकाण्डमपि उपनिषत्काले बहिर्मुखी प्रवृत्तिं परित्यज्य अन्तर्मुखीं प्रकृतिमवलम्ब्य ज्ञानरूपेण परिणतम् । आरण्यकसाहित्येन बाह्यं कर्मकाण्डं मानसव्यापारसाध्यं विधाय ज्ञानस्य मार्गः प्रशस्तीकृतः । यत्परिणामे विशुद्धज्ञानप्रधानमुपनिषत्साहित्यं ज्ञानस्य डिण्डिमघोषमुदघोषयत् ।

एवं वैदिकवाङ्मयकाले भक्तेः, ब्राह्मणकाले कर्मकाण्डस्य, उपनिषत्काले च ज्ञानस्य प्राधान्यं विलोक्यते । पुनः पुराणकाले च भक्तेरेव प्रामुख्यं जातम् । एवं त्रिभिरेभिः साधनैर्यथाधिकारं मानवो मोक्षमवाप्य शाश्वतीं शान्तिमुपलभते ।

वैदिकं काण्डत्रयमनुसृत्य मीमांसात्रयमपि परस्परसम्बद्धं विद्यते। मीमांसात्रयज्ञानभूमयोऽपि परस्परनैकट्यभावोपेताः सन्तिः। एवं सत्यपि तेषां परमपुरुषार्थमोक्षसाधनेषु महानस्ति मतभेदः। यद् यथा-कर्ममीमांसा-दर्शनं कर्मकलापं, ब्रह्ममीमांसापरनामकं वेदान्तदर्शनं ज्ञानं, भक्तिदर्शनञ्च भक्तिमेव मुक्तिकारणमामनन्ति। इत्थञ्च विभिन्नज्ञानभूमिविज्ञानानुसारेण पुरुषार्थसाधनभेदानाकलय्योपासकैर्विचलितैर्न भाव्यम्, यतोऽन्नमयकोषपोषण-विषये शारीरिकयन्त्रेषु मुखस्य प्राधान्यं प्रतिपादयतां, पाकस्थाल्याः प्रामुख्यं निरूपयतां हृदययन्त्रस्य च वैशिष्ट्यं वदतां त्रिविधानां मानवानां विचाराः सत्यतामावहन्ति, यतो ह्यन्नं, मुखेन पाकस्थलीमुपढौकते, ततो रसतामापन्नं हृदयन्त्रमाश्रित्य रुधिरं सत् सर्वशरीरे सञ्चरति, शरीरस्य रक्षां पुष्टिञ्च विदधाति। एकत्र प्रविष्टमन्नमन्यत्र गत्वा स्वीयं समुचितं कार्यं सम्पादयति। अतो यन्त्रत्रयप्रशंसनं कुर्वतां त्रिविधानां पुंसां वचांसि यथा न सन्त्यसत्यानि तथैव कर्म-ज्ञान-भक्तियोगा अपि परस्पराश्रयसम्बन्धनिबन्धनाः सन्ति। सुतरामेतादृशे मतभेदे सत्यपि लक्ष्यहानिसम्भावना नास्ति। ज्ञानयोगिनः कर्मयोगिनो भक्तियोगिनश्च स्वस्वोपासनानुसारं कृत्यकृत्याः सन्तः ब्रह्मसा-युज्यं लभन्ते। अतो दर्शनशास्त्रेषु साधनविषये परस्परं मतभेदे विद्यमानेऽपि लक्ष्यसिद्धौ नास्ति मतभेदः। यथा सौधनिर्माणायेष्टिका-जल-चूर्णानां समान-भावेनास्ति उपयोगः, एकस्याप्यभावे सौधनिर्माणमसम्भवं भवति तथैव निःश्रेय-साधिगमाय कर्मोपासनाज्ञानानां त्रयाणामप्यावश्यकता विद्यते, अतो भगवद्वा-क्यस्वरूपो वेदः-कर्मोपासनाज्ञानकाण्डैस्त्रिधा विभक्तो विद्यते। वेदस्य काण्ड-त्रयमनुसृत्य मीमांसादर्शनत्रयी अपि स्वतः सिद्धा भवति।

'ऋते ज्ञानान्न मुक्तिः, 'ज्ञानादेवतु कैवल्यम्,' नहि ज्ञानेन सदृशं पवित्र-मिह विद्यते, इत्यादिसिद्धान्तानुसारं मोक्षोपलब्धिसाधनस्य ज्ञानस्यापि साधकोऽन्ते सर्वात्मनाऽऽत्मानं श्रीभगवते समर्पयति। एवमिदं समर्पणमपि शरणागतिः भक्तिरेव। अस्या भक्तेः प्राप्तये उभे अपि ज्ञानकर्मणी साधने भवतः। तथा च भक्ति र्भगवता सहात्मनः साक्षाद् सम्बन्धं स्थापयति। अतो ज्ञानकर्मणोर्द्वयोरुपरि भक्तेः स्थानं सिद्ध्यति।

ज्ञान-कर्म-भक्तीनां मार्गेऽग्रेसरन् साधकः आत्मनोऽभीष्टां सिद्धिं लभते। केचन आचार्यास्तु एषु किमप्येकमेव साधनं स्वीकृत्य तेनैव स्वाभिलषितां सिद्धिं साधयितुं प्रयतन्ते तेऽपि सन्ति स्थाने एव स्थिताः।

वस्तुतः त्रयाणामेषां भक्तिज्ञानकर्मणां समन्वयद्वारा सम्यक्सिद्धिप्राप्तिः प्रशस्ता प्रोच्यते। एषां त्रयाणां समन्वयः पूततमः त्रिवेणीसंगम इव जीवं परमात्मानमुपस्थाप्य संसारसागराद् विमोचयति। अतो मानवजीवनस्य साफल्याय मनुष्योनिजन्मलाभस्य च चरमलक्ष्यमोक्षोपलब्धये त्रयाणामप्येषामनुष्ठानमत्यावश्यकम्। त्रिषु एषु एकस्य कस्यापि अभाव इष्टसिद्धेः प्रतिरोधकः। अतएवैषां समन्वयमार्ग एव सर्वेषां श्रेयस्कर इति मुख्यो वैदिकः सिद्धान्तः।

एतद्विषये पूर्वं महान् संघर्षः प्राचलत्। दर्शनेषु मीमांसादर्शनं मुख्यतया कर्मकाण्डस्य समर्थकमासीत्। वेदान्तदर्शनं च प्रधानतया ज्ञानमार्गस्य प्रतिपादकं बभूव। मीमांसकाः कर्म साक्षाद् मुक्तिसाधकं मत्वा ज्ञानं तदङ्गं मन्यन्ते। वेदान्तिनश्च ज्ञानमेव मोक्षस्य मुख्यं साधनं मत्वा कर्म केवलं बुद्धिशुद्धिप्रयोजकं गौणं साधनं स्वीकुर्वन्ति स्म। एवं कुमारिलभट्टः कर्ममार्गस्य प्रमुख आचार्यः, श्रीशङ्कराचार्यश्च ज्ञानमार्गस्य प्रवर्तक आचार्यः, देवर्षिनारद-महर्षि-शाण्डिल्यादयश्च भक्तेः प्रतिष्ठापकाचार्या बभूवुः।

त्रिषु एषु ज्ञान-कर्म-भक्ति-मार्गेषु ज्ञानमार्गः कृपाणधारासमः तीक्ष्णोऽतिदुर्गमश्चेति, न सर्वैः तत्र सहसा गन्तुं शक्यते, कर्म तु ऐहिकजीवनस्य सुखसामग्र्या स्वप्नदर्शने सक्तं सत् त्यागवैराग्ययोः उच्चतमायाभूमेः स्पर्शमकुर्वाणं नानन्दानुभूतिसमर्थं जायते, तस्य कष्टसाध्यत्वात्। पारिशेष्याद्भक्तिमार्ग एव सर्वसाधारणः सुलभः सुगमश्चास्ति, यत्र भक्तवत्सलस्य भगवतोऽनुकम्पया शरणागतो भक्तोऽनायासेन संसारसागरादुत्तरितुं समर्थो भवति।

अत एव महामुनिना कपिलेन स्वमातरं देवहूतिं प्रति श्रीमद्भागवते भक्तेर्महिमानं वर्णयता सा श्रेष्ठा प्रतिपादिता। देवर्षिणा नारदेनापि भक्तेः प्रधानत्वमाम्नातम्। तथाहि नारदभक्ति सूत्रम्-सा तु कर्म-ज्ञानयोगेभ्योऽप्यधिकतरा (२५) तस्मात् सैव ग्राह्या मुमुक्षुभिः (३३) अन्यस्मात् सौलभ्यं भक्तौ (५८) शान्तिरूपात् परमानन्दरूपाच्च (६०)।

स्वयं भगवता श्रीकृष्णेनापि उद्धवं प्रतिबोधयता भक्तिमतो न ज्ञानं न वा वैराग्यं कल्याणाय प्रभवति, किन्तु मम प्राप्तेः सुलभः पन्था भक्तिरेवास्तीति सिद्धान्तितम्—

यत्कर्मभि र्यत्तपसा ज्ञानवैराग्यतश्च यत् ।
योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥
सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा ।
स्वर्गापवर्गं तद्धाम कथञ्चिदपि वाञ्छति ॥
(श्री० भा० ११।२०।३२-३३)

नारदभक्तिसूत्रे शाण्डिल्यभक्तिसूत्रे च श्रीमद्भागवतानुसारमेव ज्ञानयोगात् कर्मयोगाच्च भक्तियोगः श्रेयानभिमतः, भगवत्कृपा-महत्कृपयोरेकः कणोऽपि भक्तियोगस्य परमं साधनं वर्णितमंविद्यते ।

साधकः प्रभुपादद्मोपस्थितये येषां साधनानामवलम्बनं करोति, तेषु एषां भक्ति-ज्ञान-कर्मणां त्रयाणां सामञ्जस्यमस्ति, न तु भक्त्या ज्ञानकर्मणी तिरस्क्रियेते, योग-याग-जप-तपोव्रतादीनामपि तत्र मान्यतास्ति । त्रयाणामेषां परस्परं साहाय्यापेक्षितत्वाद् योगदर्शने भगवता पतञ्जलिनाऽपि यमनियमादिषु ज्ञानकर्मभक्तानां स्थानं स्वीकृतप्रायमेवास्ति ।

परमार्थत एषु एकोऽन्यतमस्य पूरको भूत्वा पारस्परिकसहयोगद्वारा साधकं प्रकाशपुञ्जं सुधासिन्धुमानन्दागारं भगवन्तमुपस्थापयति ।

ज्ञानकर्मणोः पर्यवसानं भक्तावेव भवति । विकासक्रमे ज्ञानकर्मणोरूर्ध्वं भक्ति र्विराजते । उभे अपि ज्ञानकर्मणी भक्त्युपलब्धये स्तः समाने साधने । प्रभुपादपद्मप्राप्तये भक्तिः स्वयं साधनरूपास्ति । भक्तो यदा साधने एव रसमनुभवति तदा तत्फलात् स उदासीनो जायते तदा तदेव साधनं साध्यं भवति । भक्तिर्हि साधकानां कृते प्रभुपादपद्मप्राप्तये मधुरं फलं प्रदत्ते । साधकः स्वाध्यायादुत्पन्नस्य सदाचारस्य सौन्दर्यस्य मननस्य निदिध्यासनस्य च अन्तिमं लक्ष्यकेन्द्रं भगवन्तमेव मन्यमानः परोपकारकार्येषु, कलाकारकृतिषु दर्शनचिन्तनेषु आदर्शबलिदानेषु देशभक्तौ, समाजसेवायाञ्च प्रभुरूपमेव पश्यन् तदुपासको भवति ।

एकनिष्ठया कृता भगवद्भक्तिः चाण्डालमपि पुनाति गद्गदया वाण्या द्रवितचित्तः जातवेपथुः सरोमोद्गमो भक्तः कदाचिद् रुदन् कदाचित् हसन् कदाचिल्लज्जमानः कदाचिच्च नृत्यन् समस्तं विश्वं पवित्रयति।

यथाग्निना ध्मातं सुवर्णं स्वकीयं मलं विधूय निर्मलं सत् स्वरूपं प्राप्नोति तथैव भक्त्या स्वकं कर्मविपाकमपहाय भगवन्तमेव प्राप्नोति भक्तः। भगवच्चरितलीलादीनां श्रवणकीर्तनादिना विशुद्धात्मा भक्तोऽञ्जनाञ्जितचक्षुरिव सूक्ष्मं परमात्मतत्त्वं पश्यति। तस्माद् भगवत्प्राप्तौ भक्तिरेवैकमात्रं सुलभं साधनमित्यत्र नास्ति कश्चन विवादः।

भक्तिग्रन्थेषु श्रीमद्भागवते च प्रतिपादिताया भक्तेः ज्ञानकर्मणोः अवरत्वप्रतिपादनं युगमान्यताभिव्यक्तिमात्रं प्रतीयते। अतः त्रयाणामेषां परस्परं पूरकत्वस्वीकार एव श्रेयान् मार्गोऽस्ति। ज्ञानं लक्ष्यं बोधयति, कर्म लक्ष्यपर्यन्तमुपस्थापयति, भक्तिश्च भक्तं लक्ष्ये लीनं करोति। अपि च ज्ञानं भक्तिकर्मणी द्वे अपि प्रदीप्ते करोति, भक्तिः ज्ञानकर्मणो उद्रेकं विधत्ते, कर्म च द्वयोः निष्पादने साहायकं भवति। अतः त्रयाणामेषां न क्रमपरत्वं, प्रत्युत लक्ष्यप्राप्तये समन्वितिः अनिवार्या स्वीकृताऽस्ति।

बहूनामाचार्याणां मतेन ज्ञान-कर्म-भक्तीनामस्ति अन्योऽन्यसम्बन्धः। भक्तिः ज्ञानादुत्पद्यते भक्तेश्च ज्ञानमुपजायते। वल्लभाचार्येण ब्रह्मसूत्रस्याणुभाष्ये (३।३।२९) ज्ञानमार्गो भक्तिमार्गश्च भिन्नो भिन्नोऽभिमतः। तन्मते उभयोः फलमपि पृथक्-पृथक् अस्ति। ज्ञानमार्गस्य फलं केवलमक्षरब्रह्मणः स्वरूपज्ञानं ततश्च मोक्षः, परन्तु भक्तेः फलं पुरुषोत्तमे प्रवेशः। भक्तिमार्गो ज्ञाननिरपेक्षः, परन्तु प्रेमभक्त्या समुत्पन्नं पुरुषोत्तमस्य ज्ञानं तल्लीलाप्रवेशस्यास्ति साधकम्। प्रत्येकं युगः कतिपयान् स्वीयान् सिद्धान्तानादायैवाग्रे प्रवर्तते, ये तस्य युगस्य चिन्तापद्धतिमाचारप्रणालिञ्च प्रभावयन्ति। ब्राह्मणग्रन्थैः विशेषतया कर्मकाण्डस्य, उपनिषद्भिः ज्ञानकाण्डस्य, पाञ्चरात्रैः पुराणैश्च भक्तेरेव प्राधान्यमभिहितम्। अतो युगानुसारं तेषां त्रयाणामपि प्राधान्यस्वीकारात् सर्वं समञ्जसं भवितुमर्हति।

नहि भाववद् भक्तिः स्वत उत्पद्यते, किन्तु तदुत्पादनाय साधनमप्यपेक्ष्यते। तदुक्तं श्रीमद्भागवते देवर्षिणा नारदेन युधिष्ठिरं प्रति—

तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत्। (७।१।३१)

साधनमन्तरापि यदा कदा प्राक्तनसंस्काराणां प्रभावेण क्वचिद् भक्तिर्जन्मजातापि सम्भवति, किन्तु तत्प्राचुर्यं साधनाजन्यमेव भवति। साधकस्य येन क्रमेण भक्तेरुदयो भवति, तस्य क्रमस्य निर्देशः अधस्तनपद्याभ्यां रूपगोस्वामिना भक्तिरसामृतसिन्धौ कृतो वर्तते—

आदौ श्रद्धा ततः साधुसङ्गमो भजनक्रिया।
ततोऽनर्थनिवृत्तिः स्यात्ततो निष्ठा रुचिस्तथा॥
अथासक्तिः ततो भावस्ततः प्रेमाभ्युदञ्चति।
साधकानामयं प्रेम्णः प्रादुर्भावे भवेत् क्रमः॥

अत्र निष्ठापर्यन्तं साधनावस्था, रुचिः आसक्तिश्च मध्यवर्तिन्यौ अवस्थे, ततो भाव उद्भवति, तदनन्तरं प्रेम प्रजायते। अत्र भाव एव रतिरुच्यते, प्रेम च भक्तिरभिप्रेतास्ति।

अस्यैव क्रमिकविकासस्य विवेचनं श्रीमधुसूदनसरस्वतीस्वामपादै श्चचतुर्षु भागेषु कृतं विद्यते—कर्मयोगः, अष्टाङ्गयोगः, ज्ञानयोगः, भक्तियोगश्च। यत्तु श्रीमद्भागवते नृणां कल्याणाय योगत्रयस्यैव वर्णनमुपलभ्यते तत्राष्टङ्गयोगस्य कर्मयोगे एव संन्निवेशो ज्ञेयः। यद्यपि शृङ्गग्राहिकयाऽष्टङ्गयोगस्तत्र नोक्तः तथापि ज्ञानान्तर्गतत्वेनोक्तप्राय एव। वस्तुतस्तु व्यञ्जनलवणन्यायेनानुक्तोऽपि स नान्तरोपकतयाऽवगम्यत एव!

कर्मयोगः शास्त्रविहितो वर्णाश्रमधर्म एव कथ्यते, यत्र भगवत्परिचर्याविषयकं कर्मापि संनिवेश्यते। भक्तिशास्त्रीयपरिभाषायामयं कर्मयोगो वैधी भक्तिः भण्यते। कर्मयोगस्य फलमस्ति अन्तःकरणस्य शुद्धिः। अतः अन्तःकरणशुद्धयर्थं कर्मानुष्ठानं विधेयम्। हृदयं भगवद्वासनावासितं जायते। ततो भगवत्कथाश्रवणादिना चित्तस्य द्रवत्वात् सहसा भक्तिरुदेति। ज्ञानयोगस्यापि अन्तिमं लक्ष्यं भक्तियोग एवास्ति। यदि ततो भक्तियोगो नोदीयात् तर्हि

ज्ञानयोगो व्यर्थः। श्रीमद्भागवतोक्तवचनानुसारं सांख्योक्तानां पञ्चविंशति-तत्त्वानामनुलोमक्रमेण जगदुत्पत्तिचिन्तनं प्रतिलोमक्रमेण च प्रलयचिन्तनं तावदेव कर्तव्यम्, यावत् मनो निर्लिप्तं सत् भक्तियोगं न भवेत्। तत्त्वानां चिन्तनेन यदा मनो निर्विषयं भवति, तदा तस्य दौरात्म्यं स्वत एव तिरोहितं भवति—

निर्विण्णस्य विरक्तस्य पुरुषस्योक्तवेदिनः।
मनस्त्यजति दौरात्म्यं चिन्तितस्यानुचिन्तया॥ श्री०भ० ११।२०।२३

भक्तियोगेन निरन्तरं भगवन्तं भजतां भक्तानां हृदयेषु प्रविश्य भगवान् तद्गताः सर्वावासनाः समूलमुन्मूलयति। एवञ्च कर्मयोगस्येव ज्ञानयोगस्यापि अन्तिमं लक्ष्यं भक्तियोग एव। यत्तु क्वचिद् भक्तियोगः ज्ञानस्य साधनमप्युक्तं तस्यायमाशयः—यद्यपि साधनभक्तिः ज्ञानयोगस्य भवति कारणं, किन्तु प्रेम-भक्तिस्तु ज्ञानयोगादेवोद्भवति। श्रीमद्भागवते स्पष्टमुक्तमस्ति यद् भक्तस्य वास्तविकं श्रेयो न ज्ञानेन भवति, न वा वैराग्येण। कर्म-ज्ञान-वैराग्यदान-धर्मादिभिर्यत् फलमवाप्यते तत्सर्वं भगवद्भक्तो भक्तिमहिम्नैव प्राप्नोति। ऐकान्तिको भगवद्भक्तो न किमपि वाञ्छति तद्भक्त्या भगवता दीयमानां मुक्तिमपि न स्वीकरोति, किन्तु स निरन्तरमनन्येन मनसा चिन्त्यमानां भक्तिमेव कामयते। अतो भक्तियोग एव श्रेयान् सर्वसुलभश्चेति निश्चप्रच-तथ्याहि श्रीमद्भागवते—

विद्या-तपः-प्राणनिरोध-मैत्री-तीर्थाभिषेक-व्रत-दान-जप्यैः।
नात्यन्तशुद्धिं लभतेऽन्तरात्मा यथा हृदिस्थे भगवत्यनन्ते॥१२।३।४८

यत्र ज्ञानकर्मणोः द्विजातिमात्रस्यास्त्यधिकारः तत्र भक्तौ मानवमात्रस्या-धिकार उद्घोषितः पुराणेषु। भक्तौ मानवमात्रस्याधिकारं विवृण्वता महर्षिणा वसिष्ठेन पद्मपुराणे प्रोक्तं यत् यथा हरिभक्तौ मनुष्यमात्रस्यास्ति अधिकारः तथैव माघस्नाने स्वाभाविकः सर्वस्याधिकारो वर्तते—

सर्वेऽधिकारिणो ह्यत्र हरिभक्तौ यथा नृप। स्व० ख० २५।२१

यथा स्वकर्तव्यपालनं गुणः तथैव तदुल्लङ्घनमपि दोषः। भक्तिमार्गानु-

यायिनां भक्तिमार्गस्य पालनं गुणः तद्विपरीताचरणं च दोषो निगद्यते। अत एवोक्तं श्रीमद्भागवते देवर्षिणा नारदेन महर्षि व्यासं प्रति—

त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजत्यपक्वोऽथ पतेत्ततो यदि।
यत्र क्व वा भद्रमभूदमुष्य किं को वार्थ आप्तोऽभजतां स्वधर्मतः॥

श्री० भा० १।५।१७

भक्तेः साध्यसाधनोभयत्वविवेचनम्

भक्तिः साध्यरूपा साधनरूपा चास्ति। यथा प्रसादमधिरोढुमिच्छुना मानवेन अन्तिमस्य सोपानस्य प्राप्तये प्राथमिकानि सोपानानि लङ्घनीयानि भवन्ति तथैव प्रभुपादपद्मं प्राप्तुमिच्छुना साधकेन साध्यरूपां भक्तिं प्राप्तुं भक्तेरङ्गानि अनुष्ठेयान्येव भवन्ति नूनम्।

नारदभक्तिसूत्रानुसारं सनकादयो मुक्तेः फलं भक्तिमेव मन्यन्ते। यतो हि तन्मते भक्तिः स्वयमेवास्ति फलम्—"स्वयं फलरूपेति ब्रह्मकुमारः" (३०)। भगवत्सेवार्थं मोक्षमपि उपेक्षमाणा निर्गुणा भक्ता भगवद्भक्तिमेव स्वकीयं परमं पुरुषार्थं मन्यन्ते। भक्तेरियं साध्यावस्थास्ति। अवस्यामवस्थायां भक्ता गुणत्रयमतिक्रम्य भगवद्भावमुपढौकन्ते। एवंभूता भक्ता देवर्षिणा नारदेन एकान्तिनः श्रेष्ठाश्च प्रोक्ताः "भक्ता एकान्तिनो मुख्याः" (६७)। गीतायां यत्र भगवता श्रीकृष्णेन नैस्त्रैगुण्याय भक्तप्रवरः पार्थः प्रोक्तः, तत्र तस्यायमभिप्रायो यदस्या एव साध्यरूपाया भक्तेः प्राप्तिरवश्यं विधेया।

अतएव भक्तिः साधनसाध्योभयरूपा सिध्यति। तत्र साध्यावस्थायां ज्ञान-कर्मयोगादीनि भक्तेः साधनानि साधनरूपेण च भक्तेः साध्यः परमानन्द-स्वरूपः परमात्मैव। भक्ताचार्यैः भक्तिं साध्यां मत्वैव प्रेमसाधनस्य प्राधान्यं प्रदत्तम्। देवर्षिणा नारदेन परमप्रेमरूपा भक्तिः स्वीकृता, शाण्डिल्येन महर्षिणा तु ईश्वरे पराकाष्ठाया अनुरक्तिरेव भक्तिः प्रोक्ता।

भगवानस्ति प्रेमस्वरूपः। यथा समुद्रजलं वाष्प-मेघादिरूपेण परिणतं सत् पुनः वृष्टि-नद-नदी-द्वारा समुद्रमेवोपगच्छति तथैव प्रेमप्रभवस्य भगवतः प्रेमधारा निःसृत्य भक्तहृदयं सिञ्चन्ती पुनः प्रेमस्रोतःस्वरूपं परमात्माभिमुखं व्रजन्ती तत्रैव निलीयते।

भारतीयप्रेमपद्धतौ प्रेम अनेकेषु रूपेषु अभिव्यक्तं भवति—मित्रयोः परस्परं प्रेम, पतिपत्न्योरन्योन्यं प्रेम, पितापुत्रयोरितरेतराश्रयं प्रेम। यथा प्रेमप्रेरितः पित्रादिः स्वसन्ततिं पालयति पोषयति तथैवेश्वरोऽपि भक्तप्रेमाभिभूतो भक्तान् पालयति तेषां हितं विधत्ते, निरन्तरञ्च तदर्थं चिन्तयति।

यथा मेघात् पर्वतीयोच्चावचप्रदेशेषु विसृष्टं वर्षाजलं शिलाखण्डैः संघट्टमानमितस्ततो निपतत् प्रपतच्च यावत् समतलभूमौ नोपतिष्ठते तावत् निर्मलं स्थिरं च न भवति तथैव जीवोऽपि प्रभुतः पृथक् भूत्वा विभिन्नासु योनिषु वम्भ्रम्यमाणोऽनेकान् क्लेशान् सहमानो विविधाश्च यातना अनुभवन् यावत् प्रभुपादपद्मं नोपतिष्ठते तावत्तस्य पापतापयोः शान्तिर्न जायते। अतो जीव आनन्दधामानं परमात्मानमुपस्थायैव आनन्दमनुभवितुमर्हति, नान्यथा। अतो भगवत्प्राप्तये भक्तिरेवास्ति अतिसरलो मार्गः। भगवद्भक्त्या नूनं सर्वविधं सुखमुपलभ्यते, मोक्षोऽपि सुलभायते। तथाचोक्तं हरिवंशपुराणे—

अपत्यं द्रविणं दारा हर्म्यं हारा हया गजाः।
सुखानि स्वर्गमोक्षौ च न दूरे हरिभक्तितः॥

यद्यपि वैष्णवसम्प्रदायानुसारं श्रीमद्भागवतं श्रीमद्भगवद्गीतेति ग्रन्थद्वयं प्रधानमस्ति, यत्र भक्तिज्ञानकर्मणां समन्वितिरूपेण दर्शनं बोभवीति तथापि ज्ञानकर्मभ्यां भिन्ना भक्तेरेका स्वतन्त्रा सत्ता स्थिरा कृताऽस्ति, यत्र नारदभक्ति-सूत्र-शाण्डिल्यभक्तिसूत्रसिद्धा भक्तिः अप्यन्तर्भवति। गीतायामयं ध्वनिः श्रोत्राध्वनीनो भवति यद् ज्ञानद्वारा मोक्षस्य सम्भवेऽपि ज्ञानप्राप्तिर्भक्तिद्वारैव शक्या। भगवता श्रीकृष्णेन स्वयं प्रोक्तमस्ति यद् यः साधको भक्त्या मां तत्त्वतो ज्ञात्वा ज्ञानाय प्रयतते स मां साधु जानाति। अतएव भक्तिः साध्या। भक्तेः प्रत्येकावस्था परस्परापेक्षितास्ति। प्रत्येकं प्राथमिकसोपानारोहणमन्तिमसोपानप्राप्तिसाधनमस्ति। अन्तिमसोपानप्राप्तिश्च पूर्वेषां साध्यास्तीत्यतो भक्तेरुभयरूपता युक्तियुक्तैव। नारदेन भक्ताचार्याणां मान्यतानुसारं भक्तेः साध्यसाधनरूपतया विवेचनं कृतम्। भक्तानां सर्वस्वं भक्तिरेव। अतो नारदेनेयं फलरूपा प्रोक्ता। साधनरूपाया भक्तेरपि लक्ष्यं भक्तेः परा-

वस्था। अहैतुकी भक्तिः लक्ष्यलक्षणरूपत्वात् फलरूपा सिद्ध्यति, तदर्थं फलान्तकल्पनानुपादेया।

श्रीमता वल्लभाचार्येण भक्तिज्ञानयोः पार्थक्यं स्वीकृत्य तयोः परिणामेऽपि पार्थक्यमङ्गीकृतम्। तदनुसारं ज्ञानमार्गस्य फलं ब्रह्मज्ञानं तद्द्वारा च मोक्षावाप्तिः। भक्तिमार्गस्य फलं तु पुरुषोत्तमतत्त्वस्याधिगमः। एतेन ज्ञानापेक्षया भक्तिमार्गोऽति सरलो राजमार्गः। साध्यप्राप्तौ साधकः तत्साधनाद्विरमति। साधनौदासीन्यात् कालान्तरे साध्यरूपफलादपि कदाचिद् विरतिः सम्भवति। वैधीरागानुगे द्वे अपि भक्ती ऐकान्तिकभक्तेः साधने स्तः। नारदानुसारमियमेव पराभक्तिः यत्रोपस्थाय भक्तशिरोमणिर्मानवमणिः प्रभुभावे एवं तल्लीनो भवति येन निरन्तरं तं पश्यन् नान्यत् किञ्चिदवगच्छति।

भक्तिस्तावद् द्विविधा फलरूपा साधनरूपा च। तत्र भजनं भक्तिरिति भावव्युत्पत्त्या भक्तिशब्देन फलमभिधीयते, तस्य च निरतिशयपुमर्थत्वात्। भज्यते सेव्यत भगवदाकारमन्तःकारणं क्रियतेऽनयेति करणव्युत्पत्त्या भक्तिशब्देन श्रवणादिसाधनमभिधीयते।

यथा विज्ञप्तिर्विज्ञानमिति भावव्युत्पत्त्या बृहदारण्यके-विज्ञानमानन्दो ब्रह्म (३।९।२८) इत्यत्र विज्ञानशब्दो ब्रह्मणि वर्तते। विज्ञायतेऽनेनेति करणव्युत्पत्त्या तैत्तिरीयोपनिषदि—विज्ञानं यज्ञं तनुते (२।५।१) इत्यत्र विज्ञानशब्दश्च करणव्युत्पत्त्या अन्तःकरणे प्रयुज्यते तथैव —

स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम्।
भक्त्या सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम्॥ श्री० भा० ११।३।३१

इति योगीश्वरेण प्रबुद्धेन प्रोक्ते श्रीमद्भागवतीयपद्ये प्रथमभक्तिशब्दः करणव्युत्पत्त्या भागवतधर्मेषु प्रयुक्तो द्वितीयस्तु भावव्युत्पत्त्या फले निगदितोऽस्ति। तस्मात् साधनफलभेदेन भक्तेर्द्वैविध्योपपत्तौ न कापि बाधा।

भक्तिचन्द्रिकायां नारायणतीर्थेन भक्तिर्न सेवामात्रं समानेऽपि राजसेवाकर्मणि अयं भक्तः, अयमभक्त इति भेदव्यपदेशदर्शनात्। तस्माद्भक्तिर्भावविशेष इति प्रोक्तम्। एतत्सर्वमभिप्रेत्यैव महर्षिणा शाण्डिल्येन "सा परानुरक्तिरीश्वरे" (शा० भ० सू० २) इति भक्तिलक्षणं कृतम्।

देवर्षिणा नारदेन, महर्षिणा शाण्डिल्येन च स्वस्मिन् स्वस्मिन् सूत्रे गोपीभां भक्तिः आदर्शभक्तिः स्वीकृताऽस्ति—यथा व्रजगोपिकानाम् (नारदभक्तिसूत्रे २१) 'अत एव तद्भावाद् वल्लवीनाम (शाण्डिल्यभक्तिसूत्रे १।२।५)। वस्तुतो गोपीनामादर्शप्रेम्णः तुलना विश्वप्रेमपरम्परायां भवितुं नार्हति। साधनायां प्रेममात्रा यावती अधिकतरा भवति तीव्रा तावत्येव श्रेष्ठतमा भक्तिर्भवति। गोपिकानां प्रेम्णः केन्द्रविन्दुः षोडशकलः पुरुषः साक्षाद् भगवान् श्रीकृष्ण एवासीद्, यस्मिन् ताभिः सकलाः शारीरिक्यः चेष्टाः, मानसा व्यापाराः सर्वविधानि सुखानि, दुःखानि च समर्पितान्यासन्। क्षणमात्रमपि श्रीकृष्णविरहे तासां जीवनं जलविहीनमीन इव व्याकुलमासीत् केवलं तत्समागमलालसायामेव ताभि. प्राणधारणं कृतम्। इदमेवास्ति विशुद्धस्य प्रेम्णः सत्यं स्वरूपं, यतो हि तत्र न लौकिकरागजन्यवन्धनस्य वासनाया वा सत्ता तिष्ठति। अतएव भक्तिसम्प्रदाये विशुद्धस्य प्रेम्णोऽपूर्वं स्थानमङ्गीकृतमस्ति। विशुद्धं प्रेमैव भक्तिभूमिकाया आधारस्तम्भः प्रोच्यते। समस्तानि साधनानि इदमेव लक्ष्यीकृत्य भक्तेरैकान्तिकव्यवस्थापर्यन्तमुपस्थापयितुं मार्गं प्रशस्तं कुर्वन्ति। भगवति अनन्यं प्रेमैव भक्तिमार्गस्य प्राणरूपमस्ति, यस्याभावे भक्तिः निष्प्राणा आडम्बरमात्रमेव भवति। महत्त्वमेतत्स्वीकुर्वता देवर्षिणा नारदेन भक्तिलक्षणेऽस्य निवेशः श्रेयस्करोऽभिमतः—सा त्वस्मिन् परमप्रेमरूपा (२) इति।

योगिराजस्यारविन्दस्य मतेनापीश्वरप्राप्तिमार्गे प्रेमैव पाथेयमस्ति, येनावश्यमेव प्रभुः प्राप्तुं शक्यते। "अनिर्वचनीयं प्रेमस्वरूपम्" (५१) इति सूत्रानुसारं देवर्षिणा नारदेन प्रेमस्वरूपस्यानिर्वचनीयत्वमुपस्थापयता प्रोक्तं यद् अस्यामवस्थायां भक्तो यद् भगवत्स्वरूपामृतमास्वादयति, न तद्वाणीद्वारा विशदीकर्तुं कोऽपि प्रभवति। "तत्प्राप्य तदेवालोकयति, तदेव शृणोति, तदेव चिन्तयति च" (५५)। भक्तो यदाऽऽत्मानमसहायं मत्वा प्रेममयस्य परमात्मनश्चरणयोरात्मानं समर्प्य तदिच्छानुसारी, जायते, तदा स एव तस्य योगक्षेमं निर्वहति। इयमेव गीतोक्ता मुख्या शरणागतिः, इयमेव भवसागरसन्तरणाय सुगमं साधनमस्ति, सर्वाश्रयाणामप्याश्रये सच्चिदानन्दस्वरूपे परमात्मनि तल्लीनतासम्पादनाय च श्रेयस्करः पन्थाः।

अथैकदा जरठभूताभ्यां ज्ञानवैराग्याभ्यां निजपुत्राभ्यां सह वृन्दावनमुपगतामपि विस्मयाविष्टमानसामनुशोचन्तीमत्यन्तं खेदञ्चानुभवन्तीं भक्तिमाश्वासयन् वीणापाणिर्भगवन्तं कीर्तयन् दयालु र्देवर्षिर्नारद उपस्थाय प्रोवाच—देवि ! वृथा खेदमनुभवसि, भगवतः श्रीकृष्णस्य च चरणाम्भोजं संस्मर, नूनं स ते दुःखं दूरयिष्यति, येनार्तत्राणकेन दीनानाथेन दीना द्रौपदी कौरवकस्मलात् सद्यः संरक्षिता, गोपसुन्दर्यश्च कंसभयात् परिपालताः, तस्य त्वं तु प्राणतोऽधिका ब्रह्मसायुज्यकारिणी असि। सत्ययुगादौ मुक्तिसाधकाविमौ ते ज्ञानवैराग्यनामानौ तनयौ, कलौ ग्राहकाभावादेवं जातौ स्तः। अतः खेदो मा विधेयः।

पुरा अञ्जलिं वद्ध्वा त्वं परमानन्दचिन्मूर्तिं भगवन्तं श्रीकृष्णं यदा किं करोमीत्यप्राक्षीः, तदा स त्वामाज्ञायपद् यत् त्वं मे भक्तान् परिपोषय। त्वदङ्गीकरणानन्तरं प्रसन्नो भूत्वा स तुभ्यं मुक्तिं दासीमिमौ ज्ञान-वैराग्यौ तनयौ द प्रदत्तवान्। अतस्त्वं स्वेन रूपेण वैकुण्ठं परिपोषयसि भूमौ च भक्तविशेषान् परिपासि। कलियुगे ग्राहकाभावादिमौ ते तनयौ दुर्वलावचेनतां गतौ स्तः। अथाप्यहमुपायं चिन्तयामि, खेदमावह। कलावपि येषां हृदये त्वं निवससि, ते हि यमलोकं न गच्छन्ति। अपितु ते भगवद्भक्ता भगवद्रूपाः सन्तोऽन्ते वैकुण्ठे निवसन्ति।

भक्तावतंसरसिकोतंसकृतप्रेमत्तानानुसारं भक्तैर्दृढं परिगृहीतो भवति अमन्दानन्दकन्दो भगवान् नन्दनन्दनो मुकुन्दः। तस्य वर्तेते द्वे युवती रतिर्मतिश्च। तयो र्ललनाललामभूता युवतीरत्नं रतिरस्ति, लोकोत्तरलावण्यापूरपूर्णा प्रेमाकाररूपा ह्लादिनीसारसंवित् श्रीराधैव। मतिस्तु भगवतः परमपुरुषस्य, ऐश्वर्यानुसन्धानरूपा, या ज्ञप्तिपदेनाभिधीयते। रतेर्लावण्यातिशयेनाकृष्टचेतसा भगवता शृङ्गारमूर्तिना मतिर्नातितरामादृता, अपितु अवहेलनदिनावमानिता च। माधुर्यरूपया भगवत्तया भृशमावर्जितो भगवान् श्रीकृष्णः ऐश्वर्यरूपां तां नातितरामादृतवानित्यर्थः। इदमत्र रहस्यम्—ऐश्वर्यरूपायाः, माधुर्यरूपायाश्च भगवत्ताया द्वैविध्यात् तद्विषययो र्ज्ञानभक्त्योरपि द्वैविध्यं वर्तते। तत्रैश्वर्यं—नरलीलामपेक्ष्य परमैश्वर्याविर्भावः। यथा श्रीमद्भागवतस्य दशम स्कन्धे स्वजन्मप्रसङ्गे पितरौ प्रत्यैश्वर्यं प्रदर्श्य—

एदद् वां दर्शितं रूपं प्राग्जन्मस्मरणाय च।
नान्यथा मद्भवं ज्ञानं मर्त्यलिङ्गेन जायते ॥ १०।३।४४

गीतायाञ्च विराट्रूपप्रदर्शनावसरे भक्तप्रवरमर्जुनं प्रति भगवान् श्रीकृष्णः–

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ११।८

माधुर्यं तु पारमैश्वर्यस्य प्रकाशने चाप्रकाशने नरलीलानतिक्रमः। यथा पूतनाप्राणहर्तृत्वे स्तनचूषणरूपनरबालकचेष्टात्वम्, यथा चातिकठोर—शकटोत्पातनेऽप्यतिकोमलाङ्घ्रिदलहतिसिद्धत्वम्, दामबन्धेनेऽपि मातृभीति-वैक्लव्यम्, ब्रह्मादिमोहने, गोवर्द्धनोद्धारे च अद्भुतकार्यकरणम्, परमैश्वर्ये सत्यपि दधि-नवनीतादिस्तेय-व्रजवनिताजनलोलुपत्वादि। अथैश्वर्यज्ञानं पारमैश्वर्यानुसन्धानेऽपि हृत्कम्पहेतुसंभ्रमलवस्यानुदयात् स्वभावातिशैथिल्य-कृद् धर्मविशेषो यथा----

'युवां न नः सुतौ साक्षात् प्रधानपुरुषेश्वरौ।' यथा वा 'सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण! हे यादव! हे सखेति।' इत्यादौ वात्सल्यसख्यात्मक-स्वभावशैथिल्यम्। माधुर्यज्ञानं तु परमैश्वर्यानुसन्धानेऽपि हृत्कम्पहेतु-संभ्रमलवस्यानुदयात् स्वभानातिस्थैर्यकृद् धर्मविशेषः—

त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च सात्त्वतैः।
उपगीयमानमाहात्म्यं हरिं सा मन्यतात्मजम् ॥

माधुर्यनिष्ठानामैश्वर्यज्ञानं त्रिवेण्यां सारस्वतप्रवाहवद् गौणतयाऽस्ति, हृत्कम्पहेतोः सादरसभ्रमस्याभावात्। न च तद्भावसंकोचकृत्, प्रत्युत तत्पोष्य इव मत्सुतो मत्सखो मत्प्रियो वा सर्वेश्वर इत्युल्लाससम्भवात्। इत्यादि सिद्धान्तरत्ने द्रष्टव्यम्।

नित्यवृन्दावनधामरहस्यवर्णनप्रसंगे पद्मपुराणस्य पातालखण्डे प्रोक्तम-स्ति यत्----

अत्यूर्ध्वमपि वैकुण्ठात् पञ्चाशत्कोटियोजनम्।
शून्ये स्थितं निराधारं ध्रुवमेवेश्वरेच्छया ॥

नित्यं वृन्दावनं नाम रहस्यं परमं परम्।
कृष्णमंत्रोपासकाश्च भारतास्थाश्च वैष्णवाः ॥
एभिर्दृष्टश्च गोलोको नान्यै र्दृष्टः कदाचन।

तस्माद्वैकुण्ठादूर्ध्वं वर्तमानोऽद्भुतो गोलोको वैष्णवैरेव द्रष्टुं शक्यो नान्यैः। यथाऽवतारिणो भगवतः पूर्णरूपेणावतरणं विश्रुतचरं तथैव तन्नगरास्याप्यवतार इति न किमप्यसमञ्जसम्। तदुक्तं प्रकारान्तरेण स्कन्दपुराणेऽपि—

या यथा भुवि वर्त्तन्ते पूर्यो भगवतः प्रियाः।
तास्तथा सन्ति वैकुण्ठे तत्तल्लीलर्थमादृताः ॥

आधुनिका यथा कथञ्चित् प्रविष्टा अपि तादृशदृष्ट्यभावात् प्रपञ्चसदृशमेव तत्पुरं पश्यन्ति। ये पुनर्भगवदनुगृहीता भगवति दृढां रतिं बिभ्रति, ते तथैव तन्नगरमहिमानं पश्यन्ति।

मधुरः शृङ्गाररसमयः श्यामसुन्दरतनुः भगवान् श्रीकृष्णः। तस्य शृङ्गारमयत्वं विल्वमङ्गले यथा शृङ्गारः सखि! मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति।'

मत्स्य-कूर्म-वराहादयोंऽशावतारा यस्यांशाः सन्ति कृत्स्नशक्तिव्यञ्जी अंशिरूपी स भगवान् शृङ्गारमूर्तिः श्रीकृष्णोऽस्ति प्रेमपत्तनस्य नगराधिपतिः। सर्वत्र पदे पदे विततोऽस्ति तस्य महिमा। न कोऽपि तं साकल्येन वक्तुं शक्नोति। अत एवोक्तं पद्मपुराणे—

यदङ्घ्रिनखचन्द्रांशुमहिमान्तो न विद्यते।
तन्माहात्म्यं कियद्देवि! प्रोच्यते त्वं मुदा शृणु।
अनन्तकोटिब्रह्माण्डे अनन्तत्रिगुणोच्छ्रये ॥
तत्कलाकोटिकोट्यंशा ब्रह्म-विष्णु-महेश्वराः।
तत्प्रिया प्रकृतिस्त्वाद्या राधिका प्राणवल्लभा ॥
तत्कला कोटि कोट्यंशा दुर्गाद्यास्त्रिगुणात्मिकाः।
तस्या अङ्घ्रिरजःस्पर्शाद् विष्णुकोटिः प्रजायते ॥

भक्तानन्दप्रदाता सौन्दर्यमूर्तिः भगवान् श्रीकृष्ण एवास्ति मुख्यं भगवत्तत्त्वम्, अन्ये मत्स्य-कूर्म-वाराहादयोंऽशांवतारा: । कृत्स्नशक्तिव्यञ्जिनः तस्य विलासांशाः कलापदेनाभिधीयन्ते । अत एवोक्तं श्रीमद्भागवते---

एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥
केचिद्वदन्ति तस्यांशं ब्रह्म चिद्रूपमव्ययम् ।
तद्दशासं महाविष्णुं प्रवदन्ति मनीषिणः ॥
न तस्य प्राकृता मूर्तिर्मेदोमज्जास्थिसंभवा ।
यो योगित्वादीश्वरत्वात् सत्यरूपोऽच्युतो विभुः ॥

शृङ्गाररसामृतमूर्तेः सौन्दर्यसारसर्वस्वस्य माधुर्यैकरसः तस्य भगवतः श्रीकृष्णस्य सौन्दर्य-माधुर्ये अपि वर्णनातीते स्तः । अत एव स माधुर्यनिधिः, तमपरिकलितपूर्वं स्वकीयं माधुर्यपुरं मणिमुकुरे प्रतिविम्बितं विलोक्य स्वयं राधिकेव सरभसमुपभोक्तुं कामयते । उक्तं चात्र विषये—

माधुर्यैको नाधुनावर्णनीयं रूपं यूनोरीहते यत् समीक्ष्य ।
रत्नादर्शे हन्त कृष्णः सतृष्णं राधाभावं राधिका कृष्णभावम् ॥

गोपाङ्गनामेकीभूतप्रेम्णो निर्यासस्य तस्य माधुर्यं वर्णनातीतमस्ति । तस्य नामाक्षरयोरपि यन्माधुर्यमनुभवन्ति सन्तः, तस्य तुला नास्ति लोकत्रयेऽपि । अत्र विषये पण्डितराजस्य जगन्नाथस्येयं पदावली समेषां विपश्चितां रसनारङ्गे नरीनृत्यति—

मृद्वीका रसिता सिता समशिता स्फीतं निपीतं पयः
स्वर्यातेन सुधाप्यधायि कतिधा रम्भाधरः खण्डितः ।
सत्यं ब्रूहि मदीय जीव ! भवता भूयो भवे भ्राम्यता
कृष्णेत्यक्षरयोरयं मधुरिमोद्गारः क्वचिल्लक्षितः ॥

अत एव ब्रह्मवैवर्तपुराणस्य प्रकृतिखण्डे सत्यं सिद्धान्तितम्—

पुराणेषु च वेदेषु चेतिहासेषु सर्वतः ।
निरूपितं सारभूतं कृष्णपादाम्बुजार्चनम् ॥ (२७।१४१।१४२)

तद्वर्णनं च तद्ध्यानं तन्नामगुणकीर्तनम् ।
तत्स्तोत्रं स्मरणं चैव वन्दनं जप एव च ॥

अतो राधाकृष्णयोरैक्याद् राधारूपधारिणं भगवन्तं श्रीकृष्णं तथा श्रीकृष्णरूपधारिणीं श्रीमतीं राधिकाञ्चावलोक्य कः पुरुषरूपः, का च स्त्रीरूपा-इत्येवं निर्णयमकृत्वैव ब्रह्मा ध्यानेऽसमर्थो जातः—

राधारूपधरं कृष्णं कृष्णरूपकलत्रकम् ।
किं स्त्रीरूपं च पुरुषं विधाता ध्यातुमक्षमः ॥
तेन त्वां स वृणोत्येष यतस्तद्देहसम्भवा ।
स्त्रीपुंसौ वै तथैवाङ्गौ यथा प्रकृतिपुरुषौ ॥

अत एव भगवतः श्रीकृष्णस्य तस्याह्लादिनीशक्तेः श्रीराधायाश्च भक्तप्रवराः तद्युगलं सततं समाराधयन्ति ।

यथा दुग्धे धवलिमा, अग्नौ दाहकता, चन्द्रे चन्द्रिका, पद्मे शोभा सूर्ये च प्रभा शाश्वतिकी वर्तते तथैव भगवत आद्या शक्तिः प्रकृतिरूपा श्रीराधाऽपि परमात्मनि भगवति श्रीकृष्णेऽभिन्नतया गोलोके नित्यं विराजते । यथा स्वर्णकारः सुवर्णं विना कुण्डलं कर्तुं न क्षमते, न वा कुलालो मृदमन्तरा गृहं निर्मातुं न प्रभवति, न च विधाता स्वशक्त्या रहितो विश्वं विधातुं समर्थो भवितुमर्हति तथैव राधाशक्तिमन्तरा भगवान् श्रीकृष्णोऽपि न किमपि चिकीर्षति । अतः सर्वशक्तिस्वरूपया तया राधिकया सहित एव स सर्वं विदधाति । तथाहि—

यथाऽग्नौ दाहिका चन्द्रे पद्मे शोभा प्रभा रवौ ।
शश्वद्युक्ता न भिन्ना सा तथा प्रकृतिरात्मनि ॥
विना स्वर्णं स्वर्णकारः कुण्डलं कर्तुमक्षमः ।
विना मृदा कुलालो हि घटं कर्तुं नहीश्वरः ॥
नहि क्षमस्तथा ब्रह्मा सृष्टिं स्रष्टुं तया विना ।
सर्वशक्तिस्वरूपा सा तया च शक्तिमान् सदा ॥

(ब्र० वै० प्र० ख० २।७-६)

अतएव राधोपासनामन्तरा श्रीकृष्णोपासना न सम्भवतिऽ तदुक्तं राधासुधानिधौ—

अनाराध्य राधा पदाम्भोज युग्मं—
मनासेव्य बृन्दाप्वी तत्पदाङ्काम्।
असंभाव्य तद्भावगम्भीरचित्ताम्
कथं श्यामसिन्धोः रसस्यावगाहः।

लेखकेन ग्रन्थेऽस्मिन् मधुकर इव भक्तिरसायन-हरिभक्तिरसामृतसिन्धु-उज्ज्वलनीलमणि-प्रेमपत्तन-राधासुधानिधिप्रभृतीन् ग्रन्थनालोक्य स्थले स्थले तल्लक्षणोदाहरणानि च संगृह्य संक्षेपतो मञ्जुलसंस्कृतभाषया साङ्गोपाङ्गं भक्ते र्विवेचनं कृतमस्ति। आशाशे ग्रन्थेनानेन भक्तशिरोमणीनां मानवणीनां भक्तेः समुपयोगि सामान्यं ज्ञानमवश्यं भविष्यति।

तस्मात् सर्वविधसाधनमार्गेऽग्रेसरतां समेषां साधकानां सफलताप्राप्तये समपेक्षितत्वाद् भगवद्भक्तिरवश्यं समाश्रयणीया, आदरणीया, मनोवाक्काय-कर्मभिः संमाननीया च। अत एव सर्वत्र भक्तेरावश्यकत्वादेवोक्तमस्ति यत—

यथा समस्तलोकानां जीवनं सलिलं स्मृतम्।
तथा समस्तसिद्धीनां जीवनं भक्तिरुच्यते॥

श्रीकृष्णमणित्रिपाठी
निर्देशकः
भारतीय-साहित्य-शोधसंस्थानस्य
वाराणस्याम्।

दिनाङ्कः
१५-११-७७

लेखकस्यात्मनिवेदनम्

अथैकदा राहूपरागे सिद्धाश्रमे स्नानं कर्तुं गतानां व्रजवासिनीनां गोपीनां द्वारकास्थानां श्रीकृष्णपत्नीनां च परस्परं संगमे प्रेमवार्ताप्रसङ्गे प्रमुदिता भीष्मकनन्दिनी रुक्मिणी श्रीराधिकाया भगवति श्रीकृष्णेऽपूर्वं भक्तिभावं पर्यालोच्यात्यन्तं प्रसन्ना सती सहर्षं प्रोवाच—

धन्यासि राधे ! वृषभानुपुत्रि !
त्वद्भक्तिभावेन वशीकृतोऽयम् ।
वदत्यलं यस्य कथा. त्रिलोकी
स एव वार्तां वदति त्वदीयाम् ॥

(ग० सं० द्वा० ख० १७।१४)

भक्तिचन्द्रिकायामहं मधुकरवत् तत्तद्भक्तिशास्त्रकाराणामाचार्याणां दुरूहतरग्रन्थेभ्योऽतिरुचिकरमावश्यकः प्रसङ्गः संगृहीतवानऽस्मि । मन्येऽनेन भगवद्भक्तिरसास्वादनसंल्लीनमानसानां भक्तप्रवराणां नूनमुपकारः स्यात् । भक्तिरसिकानां जनानां सौविध्याय झटिति भक्तिसिद्धान्तावगतये मया सरलया सुबोधया संस्कृतभाषया श्रीमधुसूधनसरस्वती-रूपगोस्वामि-वोपदेव-पूज्यपादकरपात्रस्वामिमहाराजानां भक्तिग्रन्थेभ्यः पर्याप्तः सहयोगो गृहीतोऽस्ति, तदर्थं ते सन्ति धन्यवादार्हाः ।

श्रीमतामाचार्यवर्याणां पं० श्रीकृष्णमणित्रिपाठिमहोदयानामहं नितरामुपकृतोऽस्मि, यैः स्वभावसुलभं सौजन्यं विधाय महत्त्वपूर्णामत्यन्तोपयोगिनीं भूमिकां विलिख्य भक्तेरत्यावश्यका ज्ञातव्या विषयाः सम्यग् विवेचिताः सन्ति । तेषामनुग्रहं कैः शब्दैः प्रकाशयामीतिविषये शब्ददारिद्रयमनुभवन् केवलं मौनावलम्बनमेवात्मनः श्रेयः पश्यामि ।

भारतीय-साहित्य-शोधसंस्थानस्य व्यवस्थापकमहोदयानामपि नितरामहमुपकृतोऽस्मि, यैः सहजेनौदर्येणातिशीघ्रं प्रकाशनव्यवस्थां विधायेयं भक्तिचन्द्रिका पाठकानां हस्तयोरुपस्थापिता ।

विदुषां वशम्वदः
विश्वनाथपाण्डेयः

अथ भक्तिचन्द्रिका प्रारभ्यते

श्रीगणेशं नमस्कृत्य प्रणम्य पार्वतीपतिम्।
स्मृत्वा सारस्वतं तत्त्वं ध्यात्वा गुरुपदाम्बुजम्॥
हरिभक्तिरसास्वाद - जिज्ञासूनां सतां मुदे।
श्रीविश्वनाथपाण्डेयः कुरुते भक्तिचन्द्रिकाम्॥

अनादिवासनावशाद् द्रुतचित्ताद्रुतचित्तशालितया द्विविधेषु जनेषु अधिकारिभेदन प्रपत्तिरपि द्वैविध्यं भजते। तत्र तावदद्रुतचेतसोऽद्वैतचिन्तया तत्र संभूयशोकं तरन्ति, अपरे पुना रुचिपरतन्त्रा भगवद्भक्त्या द्रुतचित्ता द्रवप्रयोजकसत्त्वप्राधान्यात् तदानी मुद्भूत सात्त्विकप्रकाशवृत्तिप्रतिविम्बोद्हिण्यामप्राकृतयां भक्तौ यतन्ते।

तत्रादौ नित्यकर्मानुष्ठानाद् विशुद्धेऽन्तःकरणे वैराग्योपोद्वलिते चेतसि अद्रुतचेतसां तत्त्वोज्ञानोदवान्मुक्त्यधिगमः, यद्वा श्रवणादिसाधनसहायकाद् द्रुते चित्ते रुच्यनुसारं भवति भगवति प्रेमोदयः। इत्थमधिकारभेदेन व्यवस्था निर्णीता शास्त्रकारैः। एतदनुसारक्रमेण विपश्चिदग्रेसरा विद्वन्मूर्धन्या भक्तशिरोमणयो मानवमणयः श्रीमन्तो रूपगोस्वामिवर्या हरिभक्तिरसामृतसिन्धुं निर्मातुकामा सन्दर्भसौकर्यायात्र सिन्ध्वारोपस्वारस्यात् पूर्व दक्षिण-पश्चिमोत्तारात्मनि विभागचतुष्टयेऽभिमते प्रथमे सामान्यसाधनाभाव-प्रेम लक्षणाभक्तिलहरीचतुष्केणोपपाद्य द्वितीये रसनीयतीपयिकान् विभावानुभावसात्त्विकसञ्चारिस्थायिनोभावान् पञ्चलहरीभिः क्रमशः प्रदर्श्य, तृतीये च शान्त-प्रीतप्रेयोवत्सल-मधुराख्यान् पञ्च मुख्यरसान् तत्ताल्लहरिभिस्तथैवोपपाद्य शेषे तु सप्त गौणरसान् हास्याद्भुतवीरकरुणरौद्रभयानकवीभत्सान् लहरीसप्तकेनोपवर्ण्य सपरिकरं भक्तिरसं व्यवातिष्ठपन्। तदनुसारक्रमेणात्रापि प्रधानतयोपपाद्यस्य भक्तिरसस्य समासतस्तत्त्वमधिजिगमीषूणां विदुषामुत्कण्ठाविनोदायैतत्सम्वद्धमावश्यकं संकलनं प्रस्तूयते।

श्रीमता रूपगोस्वामिना हरिभक्तिरसामृतसिन्धौ भक्तिभेदनिरूपके पूर्वविभागे चतुर्षु लहरीषु क्रमशः सामान्यभक्ति-साधनाभक्ति-भावभक्ति प्रेमभक्तीनां सम्यग्विवेचनं कृतमस्ति। तत्रादौ उत्तमाया भक्तेरिदं लक्षणं कृतमस्ति—

अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृत्तम्।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा॥

नारदपाञ्चरात्रेऽपि— सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम् ।
हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते ।।

श्रीमद्भागवतस्य तृतीयस्कन्धेऽपि स्वमातरं देवहूतिं प्रत्युक्तवान् भगवान् कपिलो महामुनिः—अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ।
सालोक्य-सार्ष्टि - सामीप्य - सारुप्यैकत्वमप्युत ।।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ।
स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः ।।
वासुदेवे भगवति भक्तियोगः प्रयोजितः ।।
जनयत्याशु वैराग्यं ज्ञानं च तदहैतुकम् ।।

भक्तिरसविमर्शः—

वस्तुतो भक्तिरससंप्रदायानुसारं विभावदिभिः रसास्वाद्यतामानीता श्रीकृष्णविषयकरतिरेव स्थायीभावो रसरूपतया परिणमते । एवं रतेः परमानन्दतादात्म्यात् स्वप्रकाशोऽखण्डो भक्तिरसो द्विविधः, एको मुख्यः, द्वितीयश्चास्ति गौणः । तत्र मुख्यो भक्तिरसो रतेरैक्यात् पञ्चविधोऽप्येक एव गौणस्तु सप्तधा विभज्यते । एवमुभयोः मेलने एक एव भक्तिरसोऽष्टप्रकारः भवति (१ × ७ = ८) तथाहि ।

परमानन्दतादात्याद् रत्यादेरस्य वस्तुतः ।
रसस्य स्वप्रकाशत्वमखण्डत्वं च सिध्यति ।।
भवेद् भक्तिरसोऽप्येष मुख्यगौणतया द्विधा ।
पञ्चापि रतेरैक्यान्मुख्येक इहोदितः ।।
सप्तधऽत्र तथा गौण इति भक्तिरसोऽष्टधा । ५।९३–९४½)

यद्वा भक्तशिरोमणिना श्रमिता रूपगोस्वामिना हरिभक्तिरसामृतसिन्धोः दाक्षिणविभागे पञ्चसु लहरीषु भक्तिरससामान्यस्य विस्तृतं विवेचनं विहितम् । ततः पश्चिमविभागे मुख्यानां पञ्चानां (१) शान्तभक्तिरस- (२) प्रीतभक्तिरस- (३) प्रेयोभक्तिरस- (४) वत्सलभक्तिरस- (५) मधुरभक्तिरसानां पञ्चसु लहरीषु सोदाहरणं निरूपणं विद्यतेतराम् । तदनन्तरं च उत्तारविभागे सप्त संख्याकानां (१) हास्यरस- (२) अद्भुतरस- (३) वीररस- (४) करुणरस- (५) रौद्ररस- (६) भयानकरस- (७) वीभत्सरसानां सप्तसु लहरीषु मनोहारि निरूपणं कृतमस्ति । एवभुभयोः संकलनया भक्तिरसस्य द्वादश (५ × ७ = १२) भेदा निगद्यन्ते ।

तथाचोक्तम्—

एवं भक्तिरसो भेदाद् द्वयो र्द्वादशधोच्यते । = ५।९८ ॥

यस्मिन् भवति यस्य वस्तुनोऽभावः स तदर्थं निरन्तरं यतते । यथा धनाभावाद् धनार्थी धनाय प्रयतते, पुत्राभावात् पुत्रार्थी पुत्रप्राप्त्युपायं प्रकुरुते, विद्याभावाद् विद्यार्थी गुरुं शुश्रूषते, ज्ञानाभावाच्च ज्ञानार्थी तल्लाभायोद्योगं विधत्ते तथैव सर्वान्तर्यामिनोऽखिललोकाधिष्ठातुरानन्दघनस्य सच्चिदानन्दस्य परमेश्वरस्य सत्तामधिगन्तुमजस्रं विविधानुपायान् विदधाति साधकवर्गः । तत्रानपायिन्या भक्त्या भक्तोऽचिरमेवानन्दघनं भगवन्तमुपलभ्य कृत्यकृत्यो जायते । तथाचोक्तं भगवता श्रीकृष्णेन गीतायाम्—

माञ्च योऽव्यभिचारेण भक्तियोगेन नित्यशः ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ = १४।२६ ॥

जडचेतनौ द्वौ पदार्थौ सर्वत्रैव संसारे प्रत्यक्षमुपलभ्येते । तत्र चेतनपदार्थो जडसञ्चालको ज्ञानस्वरूपश्च, जडपदार्थो हि चेतनेनैव सञ्चाल्यते । अतो जडश्चेतनव्यतिरिक्त एव भवितुमर्हति । तस्मान्निश्चीयते यज् जडपदार्थोऽज्ञानरूपिण्या मायाया एवास्तिविलासः । आनन्दस्वरूपस्य चेतनस्य परमात्मनः आनन्दसत्तायाः सर्वत्रैव विद्यमानत्वात् तदीयानन्दस्तदंशै र्जीवैरधिगन्तुं नूनं प्रयत्यते । तथाहि श्रुतिः—**एषोऽस्य परमानन्दः एतस्यैवान्यानि भूतानि मात्रामुपजीवन्ति** । स्मृतिरपि—

एषोऽस्य परमानन्दो योऽखण्डैकरसात्मकः ।
अन्यानि भूतान्येतस्य मात्रामेवोपभुञ्जते ॥

माया हि भ्रमोत्पादिका । अतो मायावद्धोऽज्ञानी जीववर्गो वैषयिकं सुखमेव वास्तविकमानन्दमवधार्य तत्र सज्जते । यथा किल कस्तूरीमृगो निजनाभौ विद्यमानेन कस्तूरीकागन्धेनैवोन्मत्तः तं गन्धमजानन् तदन्वेषणे इतस्ततो वम्भ्रम्यते तथैव सर्वत्र व्यापकस्यानन्दस्वरूपस्य परमात्मनः आनन्दसत्तामात्मनि अननुभवन् जीवो वैषयिके सुखे प्रवर्तते । तथा च परमात्मन आनन्दसत्तामधिगन्तुमखिलजीवप्रवृत्तिरित्यत्र भगवती श्रुतिरेव प्रमाणम्—**यदा वै करोति सुखमेव करोति, नासुखं लब्ध्वा करोति, सुखं त्वेव विजिज्ञासस्व** ।

एवं शब्दमायातीतस्य ज्ञानस्वरूपस्य शोकरहितस्य पूर्णानन्दस्य परमात्मनो मायायाश्च पार्थक्यात् सर्वव्यापको विकाररहितः सच्चिदानन्दस्वरूपः परमात्मा एकोऽद्वितीयश्च । तथाहि श्रुतिः—**एकमेवाद्वितीयं ब्रह्म, एको देवः सर्वभूतेषु गूढः** इत्यादि ।

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्येवि छन्दोग्यश्रुत्याऽऽत्मनो दर्शन-श्रवण मनन-निदिध्यासनानामुपदेशात् स कथं द्रष्टव्यःकथं लब्धव्यइति

जिज्ञासायामुच्यते, **यो बुद्धेः परतस्तु स** इति गीतावचनानुसारं बुद्धेः परः प्रकृत्यतीतः परमात्मा बुद्ध्यापि न लब्धुं शक्यः, अपितु उपनिषत्सु, **भक्तिरेवैनं दर्शयति, भक्तिवशः पुरुषः भक्तिरेव भूयसी** इत्यादिना परमात्माऽनन्यभक्तिगम्यः प्रतिपादितः। गीतायां च भगवता श्रीकृष्णेन स्वयं प्रोक्तमस्ति यदहं वेदेन, तपसा, यज्ञेन, केनाप्यन्येन प्रकारेण नाधिगतुं शक्यः, केवलमनन्यया भक्त्यैव मदीयस्वरूपसाक्षात्कारोऽनायासेन भवितुमर्हति नान्यथा[1]। अत एव श्रीमद्भागवतेऽपि स्वां मातरं देवहूतिं प्रति भक्तेः सर्वश्रेष्ठत्वमभिहितं भगवता कपिलेन[2]। अत एव जीवनमुक्तानाममलात्मनां ज्ञानिनामपि भगवद्भक्तिरावश्यकत्वेनानिवार्या सिद्धान्तिता भगवता वैयसकिना शुकाचार्येण[3]। तथा च भक्तिमत्यन्तः करणे एव परमात्माऽचिरं चकास्ते। भगवद्भक्तियुक्तेन चेतसा साधकेनानन्यया भक्त्या आत्मसाक्षात्कारं विधाय निःश्रेयसपदमधिगन्तुं शक्यमिति निश्चप्रचम्।

आनन्दरसस्वरूपे भगवति एकान्तानुरक्ता भक्ता भगवच्चरणारविन्दपरागरसलुब्धाः समस्तानपि विषयभोगान् परिहृत्य कृपासिन्धो र्भगवतः कृपापरवशतां प्रपद्यन्ते। तांश्च परमकारुणिको भगवान् स्वीयं परमं सच्चिदानन्दस्वरूपं प्रत्याययति, येन जन्ममरणात्मकक्लेशरहितास्ते मुक्तिपदमासादयन्ति। तथाचोक्तं स्वयमेव भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायाम्—

भक्त्या मामभिजानाति यावन् यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥ = १८।५५

मध्ये समुद्रं तरन्त्याः तरङ्गमालाकुलायाःतरण्याश्चालका यथाध्रुवं निरीक्षमाणाःकदापि भ्रान्तदिशो न भवन्ति, अपितु गन्तव्यस्थलमासादन्त्येव तथैव संसारसागरे कोटि-कोटि-जन्मभ्य वम्भ्रम्यमाणाः स्वजीवनतरणिसञ्चालका भक्तप्रवरा स्वहृदयाकाशे प्रकाशमानं ध्रुवतारारूपं भगवद्भक्तिरसमास्वादयन्तः कदापि संसारसागरे दिग्भ्रान्ताः कुपथगामिनो वा न भवन्ति, प्रत्युत उत्तरोत्तरमुन्नमन्तोऽन्ते सच्चिदानन्दमयं भगवत्परं धाम प्राप्ताः

१. नाहं वेदैर्न तपसा न दानेन न चेज्यया।
शक्य एवंविधं द्रष्टुं दृष्टवानसि मां यथा॥
भक्त्या त्वनन्या शक्य अहमेवंविधोऽर्जुन!
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप॥ ११।५३,५४

२. न युज्यमानया भक्त्या भगवत्यखिलात्मनि।
सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये॥ ३।१५।१९

३. आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे।
कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हि सः॥ = १।७.१०

निर्वृतिमासादयन्ति । तस्माद् भगवानेव ध्येयोज्ञेयश्चास्त्रजम्, स हि भक्तानां हृदयगुहायां स्थितः सूर्योऽन्धकारमिव सर्वविधं दुर्व्यसनं वारयति निवारयति, च भय-क्लेश-शोक-मोहादीन्[1] । भक्तेरिदमत्यन्तं वैशिष्ट्यं विद्यते यद् यथा साधनान्तरेषु योगे, ज्ञाने, कर्मकाण्डे च क्रमविधि निर्दृष्टो न तथा भक्तावस्ति साधनक्रमः । अत्र केवलमानन्द-कन्दस्य सच्चिदानन्दस्य नन्दनन्दनस्य भगवतः श्रीकृष्णस्य कृपामात्रमेवापेक्ष्यते ।

सकलशास्त्रमूलभूते वेदे कर्मोपासनाज्ञाननामकानि त्रीणि काण्डानि विद्यन्ते । तत्र यथा कर्मकाण्डे चातुवर्ण्य-चतुराश्रम-स्त्री-पुरुषादिभेदमनुसृत्याधिकारनिर्णयः, यथा वा ज्ञानकाण्डे साधनचतुष्टयस्यापेक्षा, तथोपासनाकाण्डान्तर्गते भक्तिविषये न किमपि विधानमस्ति । समदर्शिनः करुणावरुणालयस्य भगवतश्चरणकमलाश्रयणे ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राः श्वपचाः स्त्रियः पुंमांसः बाला वृद्धा आर्या अनार्या ज्ञानिनो ऽज्ञानिनो वा सर्वे सन्ति समानाधिकाराः ।

गुरुचरणप्रतिपातेन, गुरुसेवया, गुरुभ्यो जिज्ञासया, तेभ्यश्च श्रवण-मनन-निदिध्यासनादिना, सत्सङ्गस्वाध्यायप्रभृतिभिः सत्पुरुषार्थैर्वा यथा शनैः शनैः तत्त्वज्ञानं समुदेतिऽन तथा पुरुषार्थसाध्या भक्तिः, यतः सा ईश्वरे परानुरागरूपत्वाद् विलक्षणा विद्यते । अतः सुतरां भक्तिः प्राणिमात्रस्य समानरूपेण समाश्रयणीया सुखदा शुभदा चास्ति । तथाचोक्तं श्रीमद्भागवते—

भक्त्याऽहमेकया ग्राह्यः श्रद्धाऽऽत्मा सतां प्रियः ।
भक्तिः पुनाति मन्निष्ठा स्वपाकानपि सर्वथा ॥

अपिच— यथा समस्तलोकानां जीवनं सलिलं स्मृतम् ।
तथा समस्तसिद्धीनां जीवनं भक्तिरुच्यते ॥

तथा च तत्त्वदर्शिना ज्ञानिना, कर्मासक्तेन अज्ञेन, प्रवृतिमार्गसेविना गृहस्थेन, निवृतिमार्गाश्रयिणा सन्यासिना, सर्वविधसाधकवर्गेण च साधनमार्गे सफलतावाप्तये साधनमूलत्वाद्भक्तिरवश्यं समाश्रयणीया भवति। तस्मात् समेषां साधकानां समपेक्षितत्वाद् सा भक्तिः सर्वश्रेष्ठाऽवगन्तव्या । सर्वाश्रयां भक्ति द्वारीकृत्यैव सर्वे साधकाः समुदयं लभन्ते । सा किल निखिलानां धर्माङ्गानां सहायिका वर्तते, यतोहि सा कर्मोपासना-तपोदानादिधर्मस्य सकलानामङ्गानां परिपूर्तये भगवद्भक्तिरपेक्षितास्ति । अनुरागमन्तरा

---

१. सङ्कीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसाम् ।
प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवातिवातः ॥ = १२।१२।४४
तस्मिन् महन्मुखरिता मधुभिच्च चरित्रपीयूषशेषसरितः परितः स्रवन्ति ।
ता ये पिवन्त्यतृषो नृप ! गाढ़कर्णैस्तन्न स्पृशत्यशनतृड्भयशोकमोहाः ॥=४।२९।४०

न कस्यापि धर्मानुष्ठाने प्रवृत्तिर्जायते। गुर्वाचार्यपुरोहितादिषु विनानुरागं तदाज्ञा-परिपालने धर्मानुष्ठाने कदापि प्रवृत्तिर्न भवितुमर्हति। अतोऽनुरागसम्बर्द्धनार्थं धार्मिकमानवचेतस्सु धर्मसम्बर्द्धनार्थञ्च भगवद्भक्ति र्भवति प्रधानरूपेण सहायिकेति भक्तेरसाधारणो धर्मः। अपि च स्वल्पाया भक्तेरुदयेन महापापिनोऽपि भगवद्भक्ति-माश्रित्य पापरहिताः सन्तः पुण्यमयेऽध्यात्मराज्येऽग्रेसरा भवन्तीत्येषोऽपूर्वो भक्तिमहिमा। पूर्वजन्मार्जितपुण्यपुञ्जप्रभावाद् यदि कस्यापि अन्त्यजस्यापि चेतसि भगवदनुरागोदयो जायते तर्हि कस्तं भक्तेः पथो वियोक्तुं शक्नुयात्? तथा च स्वयमेवोक्तं भगवता श्रीकृष्णेन श्रीमद्भगवद् गीतायाम्—

अपि चेत् सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः॥ =

सर्वान्तर्यामी समदर्शी भगवान् निजान् समस्तानपि भक्तान् समानयैव दृशा पश्यति। अत ईश्वरानुरागरूपिणी भक्तिरवश्यं समाश्रमणीया स्पृहणीया समादरणीया च।

भक्तिः किल गौणी परा चेति भेदात् द्विविधाऽवगन्तव्या। साधनावस्थायां गौणी च सिद्धावस्थायां परा प्रोच्यते। गौण्या भक्तेरवस्थायां साधको नैजमात्मानं स्वप्रियतमं परमेश्वरं दृश्यमानञ्च जगत् पृथक्-पृथक् निभालयति। अभ्यासपरिपूतायां सत्यां भक्तिपारावारे निमग्नो द्वैतभावविरहितो जगति सर्वत्रैव स्वकीयं प्रियतमं परमेश्वरमेवावलोकयति। इयमेव भक्तेरद्वैतावस्था परा भक्तिरुच्यते। पराभक्तेर्दशायां भक्तो यदा सर्वव्यापिनं पूर्णस्वरूपमानन्दमयं परमात्मानं परिपश्यति तदा पूर्णज्ञानी भवन् परमानन्दसागरे निमज्जति। आत्मसाक्षात्कारं कुर्वता पराभक्तेः साधकेन ज्ञानिना भक्तेन परमपदमधिगम्यते, न तस्य किञ्चित् कर्तव्यमवशिष्यते। तेन योऽसौआनन्दो-धिगम्यते नासौ वाचा वर्णयितुं शक्यः। सच्चिदानन्दमहासागरे निमग्नस्य मानवमणे-र्भक्तशिरोमणेः समस्तमपि संसारबन्धनं विच्छिद्यते। परां भक्तिं प्राप्तो भक्तः सम्पूर्णं जगद् ब्रह्ममयं पश्यन् सर्वत्र भगवदानन्दसत्तामधिगम्य संसारचक्र-जन्म-मरणभया-द्विमुच्यते। तथा चोक्तं श्रीमद्भागवतेऽसुरबलकान् प्रति प्रह्लादेन—

तथा पुमान् मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशयाकृतिः।
निर्दग्धबीजानुशया महीयसा भक्तिप्रभावेण समेत्यधोऽक्षजम्॥
अधोऽक्षजालम्भमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनम्।
सद् ब्रह्म, निर्वाणसुखं, विदुर्बुधा स्ततो भजध्वं हृदये हृदीश्वरम्॥७।७।३६

एवं साधनेन लभ्या गौणी भक्तिः, वैधी रागात्मिका चेति द्विविधभेदमापन्ना। परा भक्तिः सिद्धावस्थायाः परिणामस्वरूपा, तस्याः प्राप्तये या साधनावस्था सैव गौणीत्युच्यते। साधनेन गौणीभक्तिः परिपोषमेति। विधिनिषेधौ मन्यमानो भक्तः

यदा भगवद्भावकानि श्रवणादीनि साधानानि कुर्वाणो भक्तः भक्तिभूमिमग्रेसरति तदानीं तादृशी भक्तिरेव वैधी प्रोच्यते । यतो भक्तिदशायामेतस्यां विधेः कर्तव्या-कर्तव्ययोश्च नियमास्तिष्ठन्त्येव, किन्तु यदा साधकस्यैवंविधां वैधीभक्तिमनुतिष्ठतश्चित्ते भगवन्तं प्रत्यलौकिकोऽनुरागः समुत्पद्यते येनाहर्निशं भावसागरं निमग्नोऽपूर्वमानन्दं लभते । तदानीं तच्चेतसि तैलधारावदानन्दामृतसिञ्चनकरः सदाऽनवच्छिन्नो भक्ति-रस प्रवाहो विजृम्भते । इयमेव दशा रागात्मिका भक्तिः प्रोच्यते । गुरुशास्त्रोपदेशद्वारा निषिद्धसाधनपरित्यागपूर्वकं विहितसाधनाभ्यासेन प्रथमदशायां बिधानेनानुष्ठीयमाना वैधी किल सोपानरूपा समाम्नाता ।

यथा सोपानेन मानवः प्रासादमधिरोहति तथैव गुरूपदेशेन वैध्या भक्तेर्नवविधानि अङ्गनि साधनानि समाचरन् साधकः शनैः शनैः भक्तेरन्ताराज्ये प्रविशति । वैध्या भक्तेः विष्णोः श्रवणम्, कीर्तनम्, स्मरणम्, पादसेवनम् अर्चनम्, वन्दनम्, दास्यम्, सख्यम्, आत्मनिवेदनं चेत्येतानि नवान्यङ्गानि[1] अनुसृत्य साधको यदा स्वजीवनचर्यां भगवत्सेवायां समर्पयति तदानीं तदीयं चित्तं सकलकलुषविमुक्तं निर्मलं सत् हृदय-मन्दिरविहारिण उपास्यदेवस्य चरणसरसीरुहे भ्रमरायते । एवमनन्यभावेन स्मरतो भक्तस्य भवति भगवान् सुलभः तथा चोक्तं भगवता श्रीकृष्णेन भगवद्गीतायाम्—

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थः नित्ययुक्तस्य योगिनः ॥ = ११।१४ ॥

वैधीं भक्तिमभ्यस्यतो भक्तस्य सकलेन्द्रियव्यापारो भगवतो विविधासु सेवासु प्रवर्तते । वैध्याः भक्तेः साधकः श्रवणादीनामङ्गानां साधनमनुतिष्ठन् पवित्रचित्तो भूत्वा दास्यसख्यादीन्यङ्गानि साधयन् तदन्ते रागात्मिकां भक्ति समासादयति । भक्तो यदा वैधीभक्तेः परां काष्ठामधिगच्छति तदा भगवत्कृपया तस्य चित्ते भगवत्यपूर्वा प्रीतिरुत्पद्यते यदा अहर्दिवम् अविरलधारावाहिभक्तिस्रोतस्तन्मानसे प्रवहति[2] ।

अस्यामेवावस्थायां रागात्मिकाया भक्तेरुदयो भवति । परमात्मस्वरूपानुभावयित्री आनन्दशक्तिप्रदात्री किल रागात्मिकाभक्तिः, यस्याः समुदयेन साधकः निरन्तरं भगवच्चरणारबिन्दचिन्तनपरायणचित्तोऽपूर्वं प्रीतिरसमनुभवति । भक्तिरसास्वादनोन्मत्तः

---

१. श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवेलक्षणा ॥ = श्री० भा० ७।५।३।

२. मद्गुण - श्रुति - मात्रेण मयि सर्वं गुहाशये ।
मनोगति रविच्छन्ना यथा गङ्गाम्भसोऽबुधौ ॥ = ३।२९।११॥ ।

भक्तिरसोद्रेकद्रवीभूतहृदयः क्षणमात्रमपि भगवच्चरणारविन्दचिन्तनविरक्तो न भवति । तस्य हृदये आनन्दातिरेकात्परमानन्दज्योतिः शान्तिश्च समुदेति[१] ।

भगवति रागात्मिका भक्तिसमुदयेन साधकस्य हृदयं द्रवति, अङ्गानि पुलकितानि जायन्ते, नेत्राभ्यां निरवच्छिन्ना आनन्दाश्रुधारा प्रहवति, सकलसाधनफलस्वरूपा च परमा शान्तिरुपलभ्यते आत्मविस्मरणं च जायते—

भक्तिं हरौ भगवति प्रवहन्नजस्र-
मानन्दबाष्पकलया मुहुरर्द्यमानः ।
विक्लिद्यमानहृदयः पुलकाचिताङ्गो-
नात्मानमस्मरदसाविति मुक्तलिङ्गः ॥ = ४।१२।१८ ॥

वैध्या भक्तेरवस्थायां यथा साधको विधिनिषेधौ स्वीकुर्वन् वहिर्लक्ष्यपरायणो भवति तथास्या रागात्मिकाया भक्तेर्दशायां न भवति । अत्र तु वहिर्लक्ष्यं प्रणश्यति, अन्तर्जगत्येव विचरन् तेषु तेष्वनुरागेषु निमज्जनोन्मज्जनं कुर्वाणः तिष्ठति । रागात्मिकायां भक्तौ निमग्नमानसो भक्तः कदाचिद् रागामृतपानेन मत्तो भवति, कदाचिदपि पूर्णकुम्भवत् स्तब्धो निःशब्दश्च जायते । कदाचिच्च हृदयकमले विराजमाने परमात्मनि अपूर्वामानन्दधारामवगाहमानः आत्मारामतां प्रतिपद्यते । एतदेव रागात्मिकायाः भक्तेश्चरमं फलं प्रदर्शितं विदेहं पति भागवतान् धर्मान् शिक्षयता भगवता प्रबुद्धेन श्रीमद्भागवतस्य एकादशस्कन्धे—

क्वचिद्रुदत्यच्युतचिन्तया क्वचिद्
हसन्ति नन्दन्ति वदन्त्यलौकिकाः ।
नृत्यन्ति गायन्त्यनुशीलयन्त्यजं
भवन्ति तूष्णीं परमेत्य निर्वृताः ॥ = ११।३।३२॥

रागात्मिकायामवस्थायां स्थितस्येव भक्तस्य दशां वर्णयति भगवान् श्रीकृष्णः उद्धवं प्रति श्रीमद्भागवतस्यैकादशे स्कन्धे—

वाग् गद्गदा द्रवते यस्य चित्तं
रुदत्यभीक्ष्णं हसति क्वचिच्च ।
विलज्ज उद्गायति नृत्यते च
मद्भक्तियुक्तो भुवनं पुनाति ॥ = ११।१४।२४॥

यद्यपि स्वरूपाधिगमेन भक्तः परायां भक्तौ आत्मारामदशामधिगच्छति तथापि रागात्मिकायां भक्तौ अपि भगवद्भावाप्लुतो भावसाहाय्येन आत्मारामतां प्रतिपद्यते ।

---

१. इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः ।
भवन्ति वै भागवतस्य राजन् ! ततः परां शान्तिमुपैति साक्षात् ॥ ११।२।४३

भगवद्भावेषु कमप्येकं भावमाश्रित्य भावसागरे निमज्जनोन्मज्जनमेव रागात्मिकाया: भक्तेः यथार्थं स्वरूपम् ।

ईश्वरो भावनागम्यः, वाङ्मनसोरगोचरं बुद्धेश्चातीतमपि भगवन्तं भावुकः साधको भावद्वारैव साक्षात्करोति । तटस्थज्ञानभूमितः स्वरूपज्ञानभूमिमासादयितुं कस्यचिदालम्बनस्यावश्यकत्वात् साधकेन भावस्यैवाश्रयः क्रियते । अहमस्मि सच्चिदानन्दस्वरूपं ब्रह्मेत्युच्चभावाश्रयेण साधकः परमात्मनः स्वानुभवानुगत्या कृतकृत्यतामापद्यते । अत एव भावस्य महिमा बहुशः श्रूयते शास्त्रेषु—

भावेन लभते सर्वं भावेन देवदर्शनम् ।
भावेन परमं ज्ञानं तस्माद् भावावलम्बनम् ॥

अतो भगवद्भक्तौ भावोऽत्यावश्यकः, भावमन्तरा न किमपि सिद्धं कार्यं भवति । गङ्गायां निवसन्तो मत्स्या मन्दिरे वर्तमानाश्च खगा भावं विना न फलं लभन्ते । तथाचोक्तम्—

गङ्गाजले किन्न वसन्ति मत्स्या देवालये पक्षिगणा वसन्ति ।
भावोज्झितास्ते न फलं लभन्ते तीर्थाच्च देवायतनाच्च मुख्यात् ॥

भक्तिवर्गीकरणम्

भक्ते वर्गीकरणमतिकठिनमस्ति, यतो हि भक्तिर्भवति अनेकविधा, तदाधारा अपि सन्ति विविधप्रकाराः । अथापि विभिन्नानां स्रोतसामाधाररेण भक्तेर्विभागः सम्भवति । शास्त्रीयदृष्ट्या भक्तेर्विभागस्य विवरणं विभिन्नेषु ग्रन्थेषु तत्तदाचार्यैः कृतमुपलभ्यते । तत्र मुक्ताफले वोपदेवेन कृतं विभाजनं वैज्ञानिकदृष्ट्या सर्वाङ्गपूर्णमस्ति, तन्मते भक्तिस्तावाद् द्विविधा, विहिताविहितभेदात् । भगवति मनोनिवेशो विहिता भक्तिः कथ्यते । मर्यादायां ध्यानमदत्त्वा भगवति मनोऽतत्र वेदविहितमर्यादापालनपूर्वकं भिनिवेशोऽविहिता भक्तिरुच्यते । तत्र विहिताया भक्तेः सर्वे प्रकाराः सगुणभक्तिनाम्नाभिधीयन्ते। केवलं ज्ञानमिश्रा निर्गुणा भक्तिः प्रोच्यते। शुद्धार्थं निष्कामता, अविच्छिन्नता चात्यावश्यके। रजोगुण-तमोगुणरहितो यो वा को वाऽपि भक्तः एनामवगन्तुं शक्नोति । अविहिताया भक्तेः चतुर्णां कामज-द्वेषज-भयज-स्नेहजानां भेदानां क्रमशः चत्वारोऽधिकरिणः प्रोक्ताः सन्ति —गोप्यः, कंसः, चैद्यादयो राजानः, वृष्णिवंशीया यादवाश्च । तथाचोक्तं श्रीमद्भागवते भक्तिशिरोमणिना देवर्षिणा नारदेन धर्मराजं युधिष्ठिरं प्रति—

कामाद्द्वेष्याद् भयाद् स्नेहात् यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥
गोप्यः कामाद् भयात् कंसो द्वेष्याच्चैद्यादयो नृपाः ।
सम्बन्धात् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभो ॥ = ७।१।२९-३०



भक्तिमीमांसायामपि प्राय एवादृश मेव भक्तिप्रयोगस्य वर्गीकरणं कृतमस्ति । नारदभक्तिसूत्रानुसारं तु भक्तिः त्रिधा विभक्तास्ति—गौणीभक्ति-पराभक्ति-प्रेमभक्ति भेदात् । तत्र-प्रमभक्तिरेकापि एकादशधा विभक्तास्ति । तथाहि—(१) गुण-महात्म्यासक्तिः (२) रूपासक्तिः (३) पूजासक्तिः (४) स्मरणासक्तिः (५) दास्यासक्तिः (६) सख्यासक्तिः (७) कान्तासक्तिः (८) वात्सल्यासक्तिः (९) आत्मनिवेदनासक्तिः (१०) तन्मयासक्तिः (११) परमविरहासक्तिश्च । शाण्डिल्यभक्तिसूत्रे च मुख्येतरमदाद् द्विधा भक्तेर्विभागो दृश्यते । तत्र मुख्या परा-भक्तिरभिप्रेता, इतरा च गौणीभक्तिः, या मुख्यभक्तिप्राप्तये साधकस्य कृते सोपानरूपा प्रोक्ताऽस्ति ।

रूपगोस्वामिना स्वकीये भक्ति मामृतसिन्धौ पूर्वविभागे द्वितीयलहर्यां भक्तेः त्रयो भेदाः कृताः (१) साधनभक्तिः (२) भावभक्तिः (३) प्रेमभक्तिश्च । तत्राद्या साधनभक्तिः पुनर्द्विधा विभज्यते वैधी[1] रागानुगा च[2] । रागानुगाऽपि पुनः द्विधा

१. तत्र रागानवाप्तत्वा प्रवृतिरुपजायते ।
शासनेनैव शास्त्रस्य सा वैधी भक्तिरुच्यते ॥ पू० वि० २।३ ।

२. विराजन्तीमभिव्यक्तं ब्रजवासि जनादिषु ।
रागात्मिकामनुसृता या सा रागानुगोच्यते ॥ पू० वि० २।७९ ।

कामानुगा सम्बन्धानुगाभेदात् । तत्र कामानुगायां भक्तौ कामतृष्णाद्वारा केवलं श्रीकृष्णस्य सुखार्थमेव यत्नः क्रियते, न तु स्वसुखार्थम् । भक्तिरियं ब्रजगोपिकासु प्रसिद्धा । सम्बन्धानुगायां भक्तौ तु श्रीकृष्णं प्रति पितृत्व-मातृत्व-भ्रातृत्वाद्यभिमानं दृश्यते । भक्तेरस्या उदाहरणं नन्द-यशोदा-देवकी-वसुदेवादयो गृह्यन्ते । नन्दादीनां भगवति श्रीकृष्णे नेश्वरत्वबुद्धिरासीद्, अपितु तेषु पितृत्व-मातृत्वादिरूपेण रागस्यैव प्राधान्यमासीत् । सम्बन्धरूपा भक्तिः भगवतो भक्तस्य च सम्बन्धदृष्ट्या चतुः प्रकाराः दास्य-सख्य-वात्सल्य-दाम्पत्यभेदात् । कामानुगापि द्विधा दृश्यते-सम्भोगेच्छामयी तद्भावेच्छामयी च । तन्मतेन एवमस्ति भक्तेः भेद-प्रभेद-प्रपञ्च-पुञ्जम् ।



शास्त्रानुमोदिता भक्तिः वैधी । आस्या अलम्बवनम् ऐस्वर्यमयो विभुः भगवान् विष्णुः । इयं कूलद्वयावरुद्धा नदीव मर्यादामयी, किन्तु अनुरागप्रधाना रागानुगा भक्तिः कूलद्वयप्रभेदिनी स्वेच्छया प्रवहन्ती आपगा इव मर्यादाविहीना । रागानुगा भक्तिरेव मधुरभावस्यास्ति मूलधारः । अत्रत्यं रागशब्दं विवृण्वता रूपगोस्वामिना प्रोक्तं यद् यथा विषयिणां पुंसां स्वभावत एव विषयान् प्रति आकर्षणमुत्पद्यते तथैव यदा भक्तानां भगवन्तं प्रति यदाकर्षणमुत्पद्यते तदेव रागः प्रोच्यते । यत्रायं रागः प्रबलो जायते सैव रागानुगा रागात्मिका भक्तिरपि कथ्यते । रागात्मिका भक्तिश्चोत्तमकोटिका भक्तिः प्रोक्ता[1] हरिभक्तिरसामृतसिन्धे ।

१. अन्याभिलाषिता शून्यं ज्ञानकर्माद्यनावृतम् ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ॥ =पू० वि० १।११

यद्यपि आपाततो भक्तेः भेदत्रयं प्रदर्शितं तथापि मुख्यतया भक्तेः द्विविध भेदौ स्तः। एका साधनरूपा द्वितीया च साध्यरूपा। साध्यरूपाया भक्तेरपि पुनः भदेद्वयं भावभक्तिः प्रेमभक्तिश्च। तत्र भावभक्तिः प्रारम्भिकदशास्ति, प्रेमभक्तिश्च तत उच्चतरदशाऽस्ति। एवमपि (१) साधनभक्तिः, भावभक्तिः प्रेमभक्तिश्चेति त्रिधा भेदः पर्यवस्यति। तिसृभिः आभिः भक्तिभिः साकं षण्णां गुणानां सम्बन्धो विद्यते। ते यथा–

क्लेशघ्नी शुभदा मोक्षलघुतनकृत् सुदुर्लभा।
सान्द्रानन्दविशेषात्मा श्रीकृष्णकर्षणी च सा॥

तत्र प्रथमायां साधनभक्तौ केवलं क्लेशघ्नत्वं शुभदत्वं चेति गुणद्वयमेव तिष्ठति। द्वितीयायां भावरूपाया भक्तौ पूर्वोक्ताभ्यां गुणाभ्यां सह मोक्षलघुताकृत्त्वं-सुदुर्लभत्वञ्चेति गुणद्वयं वर्द्धते। अतोऽत्र द्वयोः स्थाने चत्वारो गुणा गृह्यन्ते। तदनन्तरं तृतीयायां प्रेमरूपायां भक्तौ पूर्वोक्तैः चतुर्भिर्भेदैः सह सान्द्रानन्दविशेषत्वं श्रीकृष्णाकर्षणत्वञ्चेति अधिकयोः द्वयोः गुणयोः समावेशात् अत्र षड् गुणा जायन्ते। एवं द्वयोर्द्वयोर्गुणयोः वृद्ध्या तिसृष्वपि आसु भक्तिषु षण्णां गुणानां भवति समान्वेशः। तथा च साधनरूपायां भक्तौ द्वौ गुणौ, भावरूपायां भक्तौ चत्वारो गुणाः, प्रेमरूपायां च भक्तौ षडपि गुणाः

हरिभक्तिरसामृतसिन्धोः परिशिष्टरूपे उज्जवलनीलमणिनामके भक्तिग्रन्थे एका हार्दरूपापि भक्तिः स्वीकृतास्ति, यस्यां भावरूपा प्रेमरूपा चेति भक्तिद्वयमपि अन्तर्भूतं भवति। सेयं हार्दरूपा भक्तिः अष्टधा विभक्तास्ति-भाव-प्रेम-प्रणय-स्नेह-राग अनुराग-महाभावभेदात्। तासु केवलं भावस्य प्रेम्णश्च ग्रहणं विद्यते, परमिमे द्वे भावप्रेमभक्ती अन्येषामप्युपलक्षणे विदितव्ये इति दुर्गसंगमिनीकारमतम्।



एवं सनातनधर्मकल्पद्रुमे श्रीज्ञानानन्दस्वामिना तु सरलतमोऽप्येको भक्तिभेदप्रकारः प्रदर्शितोऽस्ति । तद्यथा भक्तिस्तावद द्विविधा गौणी पराभेदात् । गौणी पुनर्द्विधा वैधी रागात्मिका च । तत्र वैधी श्रवणादिभेदान्नवधा रागात्मिका चासक्तिभेदात् सप्तधा विभज्यते, किन्तु ज्ञानस्वरूपा पराभक्तिस्तु एकधैवास्ति ।

पद्मपुराणस्य पातालखण्डे भक्तिविवरणप्रसङ्गे भक्तिस्तावत् त्रिविधा प्रोक्ता-मानसी, वाचिकी, कायिकी च । तत्र ध्यान-धारणादिभिः वेदार्थस्मरणपूर्वकं भगवतो विष्णोः प्रीतये या भक्तिः क्रियते, सा मानसी भक्तिरुच्यते[1] । वेदमन्त्रसमुच्चारणपूर्वक-महर्निशं जपादिद्वारा या भक्तिर्विधीयते, सा वाचिकी भक्तिः कथ्यते[2] । इन्द्रियनिरोध-पुरस्सरं व्रतोपवासनियमादिभिर्याऽनुष्ठीयते, सा किल सकलकल्याणकारिणी कायिकी भक्तिर्निगद्यते[3] ।

एनमग्रे लौकिकवैदिकाध्यात्मिकभेदादपि भक्तेस्त्रैविध्यं प्रपञ्चितमस्ति[4] । इष्टदेवं समुद्दीश्य पाद्यार्धाचमनीय गन्ध-पुष्प-धूप-दीप नैवेद्यादिभिर्विविधैरुपचारै गीत-वाद्य-नृत्यपूर्वकं श्रद्धया या भक्तिर्विधीयते सा खलु लौकिकी भक्तिरुच्यते[5] । वेदमन्त्र-जपपुरस्सरं तदध्ययनाध्यायपनाग्निहोत्रादिभिवैदिकैः कर्मकलापैः क्रियमाणा भक्तिर्वैदिकी भक्तिः प्रोच्यते[6] । आध्यात्मिकी च भक्ति 'भविति द्विबिधा सांख्याख्या' योगजा च तत्र चेतनानि प्रधानादीनि चतुर्विशतितत्त्वानि भोग्यानि, पञ्चविंशकः पुरुषश्चेतनो नित्योऽव्ययोऽसङ्गश्च । पुराणानुसारं तयोरुपरि षड्विंशतिकं तत्त्वान्तरं परमात्मेति ज्ञात्वा या

---

१. ध्यान-धारणया बुद्धया वेदनां स्मरणेन च ।
विष्णु-प्रीतिकरी चैषा मानसो भक्तिरुच्यते ॥ = ८५।५
२. वेदमन्त्रसमुच्चारैरविश्रान्तं दिवानिशम् ।
जपैश्चारण्यकैश्चैव वाचिकी भक्तिरिष्यते ॥ = ८५।६
३. व्रतोपवास-नियमैः पञ्चेद्रिय - जयेन च ।
कायिकी भक्तिरुद्दिष्टा सर्वसिद्धिविधायिनी ॥ = ८५।७
४. त्रिविधा भक्तिरुद्दिष्टा मनोवाक्कायसम्भवा ।
लौकिको वैदिकी चापि भवेदाध्यात्मिकी तथा ॥ = ८५।७
५. पाद्यार्घ्युपचारैश्च नृत्यवादित्रगीतकैः ।
वलिभि र्जागरार्चाभि र्लौकिकी भक्तिरीरिता ॥ = ८५।८
६. ऋग्यजुः सामजाप्यैश्च संहिताध्ययनादिभिः ।
हवि र्होमक्रियाभिश्च या भक्तिः सा तु वैदिकी ॥ = ८५।९
७. आध्यात्मिकी तु द्विविधा ब्रह्मभक्तिःस्थिता नृप !
सांख्याख्या योगजा चान्या विभागं तत्र मे श्रृणु ॥ = ८५।१७

भक्तिर्विधीयते सा सांख्याख्या आध्यात्मिकी भक्तिर्गण्यते[८] । यत्र च प्राणायामपरायणै-र्भिक्षाभक्षिभिः योगिभिः सर्वतः इन्द्रियाणि नियम्य हृत्कर्णिकायां समासीनो वरदाभय-हस्तकः देदीप्यमानमुखाम्भुजः सुलोचनो ब्रह्मसूत्रकटीतटो रक्तवक्त्रश्चतुर्भुजो विष्णु-र्ध्यायते सा योगजा भक्तिर्जेगीयते । सा योगजा विष्णुभक्तिर्मानसी सिद्धिः सर्वोत्कृष्टा च कीर्त्यते ।[९] एवं सात्त्विकी-राजसी-तामसी भेदादपि अनन्तस्य भगवतो भक्तयोऽप्यनन्ता विहिताः । इत्थमेव स्कन्दपुराणे प्रभासखण्डस्य सप्तोत्तरशततमेऽध्यायेऽपि २-१६ श्लोकैः त्रिविधभक्ते र्विवरणं प्रस्तुतमस्ति ।

पद्म-स्कन्दपुराणीयभक्तिभेदः

भक्तिः

- मानसी, वाचिकी, कायिकी
- लौकिकी, वैदिकी, आध्यात्मिकी
  - सांख्याख्या
  - योगरूपा

यथा प्रकाशस्योदयेनान्धकारो विनश्यति तथैव निर्मलपरमपूतभगवद्भावोदयेन पापानां स्वत एव विनाशः संभवति । एकदापि भगवत्संस्कारसंस्कृतमन्तःकरणं नूनमेव विषयमजाद् विमुच्यते । यथा ज्ञानोदयेनाज्ञानस्य लेशोऽपि न दृश्यते, सत्त्वगुणोदयेन तमो विलीयते तथैव भगवत्पवित्रानुरागोदयात् पापानि समूलं विनाशमापद्यन्ते । बहुशः उद्घोषितमस्ति यद् यथा प्रज्वलितोऽग्निः शुष्कानि काष्ठानि भस्मसात् कुरुते तथैव भगवद्भक्त्या पापराशिर्दह्यते । यथा वा अग्निना सुवर्णं निर्मलं सत् स्वकीयं स्वाभाविकं स्वरूपं प्रतिपद्यते तथैव जीवो भगवद्भक्त्या मलिनसंस्कारपरिच्युतो अध्यात्ममार्गे अग्रेसरीभवति । भक्त्या भक्तो यावत् पुलकिताङ्गो द्रवीभूतमानसः विगलितानन्दाश्रुर्न भवति तावदान्तरिकी पवित्रतां नासादयति । यथा वा समाधिद्वारा चेतसः समताधिगमः समाधेरुदयेन च मानसिको वैषम्यभावः समूलमपसरति तथैव भक्त्या सह परमानन्दपदसम्बन्धसत्त्वात् लघूदितायामपि तस्यां निरानन्दमयः पापराशिः प्रणश्यति ।

---

८. ब्रह्मतत्त्वादिकं चापि ज्ञात्वा तत्त्वं विदुर्बुधाः ।
संख्याकृता भक्तिरेषा सद्भिराध्यात्मिकी मता ॥ = ८५।१८

९. योगजा मानसी सिद्धिः विष्णुभक्तिः परा स्मृता ॥ = ८५।२२

१०. सात्त्विकी राजसी चेति तामसी भेदतस्त्विमाः ।
भक्तयो विविधा ज्ञेया विष्णोरमिततेजसः ॥ = ८५।२४

भगवद्भक्तिमास्वादयितुं विचारकाठिन्यं योगपरिश्रमः ज्ञानशक्तिशालित्वं किमपि नापेक्षितम्, किन्तु तदर्थं भगवन्तं प्रति चित्तनुराग एवापेक्षितः । भगवद्भावभावितो भावुको भक्तः कीदृगधिकारोऽपि कीदृक्श्रेणिकोऽपि किंजातीयोऽपि नापेक्ष्यते, किन्तु भगवदनुरागमयचित्तसाम्यविमर्शतः सर्वोऽपि जनः समान एव । परमकृपालुः समदर्शी भगवान् स्वीयान् समस्तानपि भक्तान् समानयैव दृशा परिपश्यति । भक्तेर्वैध्या अवस्थायां शीलादिकं द्वारीकृत्य, रागात्मिकायां दशायां प्रेमसाम्यद्वारा, परायाः भक्तेरवस्थयां समत्वबुद्धिद्वारेण च समता समदर्शिता विद्यते ।

भक्तिभूभावग्रेसरन् साधकोऽन्ते यदा परायाः भक्तेः दशामधिगच्छति तदा विधिनिषेधदशामतिक्रामति । रागात्मिकाया भक्तेः तीव्रावस्थायामेव विधिनिषेधयोः तिरोधानारम्भो जायते । वैधी भक्तिदशायां तु विधिनिषेधौ तिष्ठतः । विधिनिषेधौ कर्तव्याकर्तव्ये च त्रिगुणामय्याः प्रकृतेः विषयीभूते स्तः । आरम्भे विधिनिषेधाववश्यकौ, किन्तु पराभक्तौ प्राप्तायां निस्त्रैगुण्यां पदवीं लभमानो भक्तः प्रकृतिराज्यकतिक्रामति । अत एव तदा जीवनमुक्तदशायां धर्माधर्मौ विधिनिषेधौ न तिष्ठतः । एतादृशस्य भक्तस्य समस्तं कर्तव्यं समाप्तमेति । तथाचोक्तम्—

भेदाभेदौ सपदि गलितौ पुण्यपापे विशीर्णे
मायामोहौ क्षयमधिगतौ नष्टसन्देहवृत्तेः ।
शब्दातीतं त्रिगुणरहितं प्राप्य तत्त्वावबोधं
नैस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥

श्रीमद्भागवते स्पष्टमुपदिष्टमस्ति यद् यावत् सर्वभूतेषु ब्रह्मसद्भवना न भवेत् तावत् मनसा वाचा कर्मणा कायेन च परमेश्वरोपासना अवश्यमेवानुष्ठेया—

यावत् सर्वेषु भूतेषु मद्भावो नोपजायते ।
तावदेवमुपासीत मानोवाक्कायर्मभिः ॥११।२९।१७॥

अस्यां दशायां बुद्धिभेदं दूरयितुं लोकशिक्षार्थं वर्णाश्रिमधर्माचरणानां गीतोक्तदिशा भक्तशिरोमणिः नैषापलापम् अनुतिष्ठति, परन्तु समाधिदशायामसौ परमानन्दसमभावविरोधिनः कस्यापि वैषम्यभावस्यासत्वाद् विधिनिषेधौ सर्वाथाऽतिक्रामत्येव । अत एव जीवनमुक्तो ज्ञानी भक्तः स्वान्तःकरणे भेदभावमपि लोकशिक्षणार्थं द्वैतभावानुकूलं कुर्यादित्येव । जीवनमुक्तो ज्ञानीभक्तः संसारेऽव सर्वानपि स्वस्वाधिकारानुसारं समुनयन् क्रियाद्वैततामनुपालयन्नपि भावे सर्वदैवाद्वैततामवलम्बमानो विधिनिषेधौ विजहाति ।

भक्तेरिदमत्यन्तं वैशिष्ट्यं यत् यथा साधनान्तरेषु योगे, कर्मकाण्डे, ज्ञानकाण्डे च क्रमविधिर्निर्दिष्टो न तथा भक्तावस्ते साधनक्रमः । अत्र केवलं व्रजेन्द्रस्यानन्दकन्दस्य

सच्चिदानन्दस्य नन्दनन्दनस्य भगवतः श्रीकृष्णस्य कृपामधिगतो भक्तः लोकोत्तरभावेन विधिवन्धनमतिक्रमन् आनन्दसागरे निमज्जति । यद्यपि वैध्यां भक्तौ गुरुदेवता परीक्षिताधिकारनिर्णयापेक्षितया क्रमोऽप्यक्षितः, परन्तु रागात्मिकायां पराभक्तौ च नैव कश्चन क्रमोऽपेक्षितः । भगवद्भक्तिमधिगच्छन्नपि अपक्वभक्तिः भक्तः प्रारब्धवशात् कारणान्तरेण वा यदि परां भक्तिं नासादयदि तथाप्ययं न पततीत्यत्र भक्तेरेव विशिष्टो महिमा । तत्र प्रलयपर्यन्तं निवसन् भक्तोऽन्ते परमपदे विलीयते—

ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥

यो हि भगवति स्वीयं चित्तमर्पयन् क्रमशः समुन्नतिं लभमानोऽन्ते पराभक्तिदशामवाप्नोति सः संसारे वर्तमानोऽपि वन्धनाद् विमुच्यते । दैवयोगाद् येन भक्तेन सहजगतिर्नाधिगम्यते तेन शरीरत्यागकाले स्वकीयभावस्य दाढ्र्यात् श्रेष्ठो देवलोकः समासाद्यते । कश्चन भक्तः स्वस्वर्भावानुसारं शिवलोकं कोऽपि विष्णुलोकं कश्चन शक्तिलोकं कश्चिच्च ब्रह्मलोकं प्राप्नोति । यदि अपक्वभक्तिः भक्तोऽन्तिमं सीमानं पराभक्तिरूपं कैवल्यं नासादयति, तदा सालोक्यादि गतिमवश्यमधिगच्छति । यथा च भक्ता निःश्रेयसाधिगमाभावेऽपि सालोक्यादि गतिरवश्यं प्राप्यत एव ।

भक्तेरवस्थात्रयम्

१—केचिद्भक्ता भक्तिमैश्वर्यपरां मन्यन्ते, केचन आत्मरामङ्गीकुर्वन्ति, अपरे चोभयपरामामनन्ति । तत्र भक्तेः समुन्नतदशायामपि तन्मयतां प्राप्ता भृगुकश्यपनारदादयः अनेके महात्मानो भेदबुद्धयो भगवन्तमुपास्य आत्मानन्दपरायणाः आनन्दमधिगच्छन्ति । ते किल परमात्मनोऽलौकिके ऐश्वर्ये दृष्टिपातं कुर्वाणाः तद्भावमाविता भेदभावमालम्बमाना भगवद्गुणगणान् वर्णयन्त आनन्दसागरे निमज्जन्ति । इयमवस्था ऐश्वर्यपरा भक्तिरित्युच्यते ।

१—अपरे अङ्गिरोवसिष्ठव्यासादयो महर्षयः भक्तिमात्मकपरां मन्यन्ते, यतःतेषां विशुद्धा बुद्धिः वेदभावं परित्यजन्ती अभेदभावमाश्रयते । एतेषा मते निर्विकल्पकसमाधिदशायां यदा पराभक्तिर्लभ्यते तदा अद्वैतभावसमुदये साधकः परां भक्तिं लभमानोऽद्वितीयं सच्चिदानन्दमनुभवन् आनन्दसागरे निमज्जति । पराभक्तेरन्तिमावस्थायामस्यां परमात्मव्यतिरिक्तमननुभवन् कार्यकरणब्रह्मणोरैक्ये विश्वसति । सर्वमपि दृश्यजातं परमात्ममयं ज्ञात्वा अहमस्मि ब्रह्म इत्यनुभवति । दशायामेतस्यां भगवतो भक्तस्य चाभेदः ।

३—इतरे शाण्डिल्य-वाल्मीकि-याज्ञवल्क्यादयो महर्षयः कार्यकारणविमर्शपूर्वकं भेदाभेदसम्बन्धेन भक्तिमुभयपरामामनन्ति । कार्यदशायां भेदे विद्यमानेऽपि ऐश्वर्यपरया भक्त्या कारणदशायां भेदतिरोधाने सच्चिदानन्दभावेन सहैकत्वं प्राप्त्या आत्मैकपरया

भक्त्या च भवति परमानन्दस्योपलब्धिः । कार्यकारणयोर्भेदमनुसृत्य उभयदशायामेवैते महर्षय आनन्दमनुभवन्ति । ऐश्वर्यपरामात्मैकपरामित्यवस्थाद्वयीमवगन्तुं सौकर्याय उदाहरणानि कतिपयानि प्रस्तूयन्ते यद्वा बद्धमुक्तावस्थयोर्द्वयोर्भेदादेव ऐश्वर्यपरा आत्मैकपरा चेत्यवस्थाद्वयं निर्णीतम् । यद्वा—सृष्टिदशायामैश्वर्यपरायाः जीवन्मुक्तदशायामात्मैकपरायाः भक्तेः सद्भावो युक्तियुक्तः प्रतिभाति ।

अथवा—रागात्मिकाया भक्तेः अन्तिमावस्थायां यदा भक्तो रससागरे निमज्जनमुन्मज्जनं च विधत्ते तदा ऐश्वर्यपरावस्था, अनन्तरं पराया भक्तेः अन्तिमायां स्थितौ अद्वैतरूपस्य ब्रह्मसद्भावस्य समुदयेन आत्मैकपरा दशा वेदितव्या । आहोस्वित् भक्तेरुन्नतावस्थायां यदा भक्तस्य मानसं व्युत्थानदशां प्राप्नोति तदा ऐश्वर्यपरा, यदा च भक्त्येतः परं स्वरूपावस्थामधिगच्छति तदात्मैकपरा भक्तिः अवगन्तव्या । समुन्नतदशामधिगतस्य भक्तस्य प्रकृति-प्रवृति-संस्काराननुसृत्य ऐश्वर्यपराया आत्मैकपरायाश्चावस्थाया सद्भावो युक्तियुक्तः । जीवन्मुक्तो भक्तो यदा जगता सह स्थापितसम्बन्धो व्युत्थानदशामधिगच्छति तदानीमैश्वर्यपराया भक्तेरधिकारी भवति । अतः रससागरे निमग्नस्य पराभक्तिपरायणस्य भक्तस्य भक्तिः किल उभयपरा निर्णीता । निवृत्तिमार्गाश्रयेण साधकः परां भक्ति लभमानः निःश्रेयसपदमधिगच्छति । निवृत्तिमार्गस्य चरमं फलं परायाभक्तेः प्राप्तिः कैवल्यञ्चेतिनि निर्यातम् ।

मुक्तिमार्गस्य साक्षात्सम्बन्धनिबन्धना परा भक्तिरपि तदैवोदेति यदा भक्तानामन्तः करणमेकतानतासंयुक्तं सत् प्रतिक्षणमेव भगवत्स्वरूपं परिपश्यति । भगवद्भावातिरिक्तो न कोऽपि भाव तदा उत्तिष्ठते । पराभक्तेरधिकारिणो भक्तशिरोमणेरन्तःकरणस्यैकान्तिक्यवस्थैवैकतत्वमूलिकेत्यत्र न मनागपि सन्देहः ।

भक्तिमार्गमधिकुर्वन् भाग्यवान् भक्तः वैध्याः भक्तेः रागात्मिकायाश्च भक्तेरधिकारमासाद्य मलविक्षेपावरणतः शुद्धः सन् अन्ते पराभक्तेः समधिकारमवाप्य सर्वोत्तमामवस्थामधिकुर्वन् एकतत्त्वयुक्तान्तःकरणस्वभावसिद्धगत्या निःश्रेयसमधिगत्य कृतकृत्यतामासादयति ।

परायाः भक्तेरुदयेन सर्वस्य द्वैतप्रपञ्चस्य विलयो जायते । अनन्तरं जीवन्मुक्तो ज्ञानी भक्तः ब्रह्मसायुज्यमधिगच्छन् ब्रह्मस्वरूपतामेति । रागात्मिकाया भक्तेर्दशायां भक्तस्य ब्रह्मरससागरे निमज्जनोन्मज्जनदशा अपि तिरोदधाति । पराभक्तेरुदयसमकालमेव द्वैतभावः विनाशमेति, तेन च द्वैतप्रपञ्चस्य सर्वथा तिरोभावो जायते । शास्त्रेषु विभिन्नेषु इयमवस्था निर्विकल्पकसमाधि - जीवन्मुक्ति - ब्रह्मसद्भाव - विदेहलयादीनामभिव्यक्ता । एकतत्त्वप्रतिष्ठां विना पराभक्तिर्न सिध्यतीत्यनवद्यम् ।

मुक्तिमुक्त्यपेक्षया भक्तेः प्राशस्त्यम्

भगवद्भक्तानां चेतस्सु यावद् मुक्ति-विषयिणी भोगविषयिका च अभिलाषा जागर्ति न तावद्भक्तिविषयकं सुखमुत्पद्यते। अतो भगवतः पादपद्ममकरन्दलोलुपानां हृदयेषु कदापि मोक्ष-भोगविषयिका स्पृहा न कथमपि प्रवर्तते। तस्मादविनाशिनि परमात्मनि भक्तिं लब्धवान् ज्ञानी भक्तो न मुक्तिमभिवाञ्छति। तदुक्तं पद्मपुराणस्य पातालखण्डे-

भुक्तिमुक्तिस्पृहा यावत् पिशाची हृदि वर्तते।
तावद्भक्तिसुखस्यात्र कथमभ्युदयो भवेत्॥ =७७।६२
श्रीकृष्णचरणाम्भोज सेवा निर्वृत्त चेतसाम्।
एषां मोक्षाय भक्तानां न कदापि स्पृहा भवेत्॥ २।११

यथा लोके कस्याश्चिन्महाराज्ञ्याश्चेट्यादयोऽनुव्रजन्ति तथैव भक्तिरूपाया महादेव्या मुक्त्यादयो दासीवदनुगता भवन्ति—

हरिभक्तिमहादेव्याः सर्वा मुक्त्यादिसिद्धयः।
भुक्तयश्चाद्भुता स्तस्याश्चेटिकावदनुव्रताः॥

ज्ञानतो मुक्तिः सुलभा भवति, भुक्तिश्च पुण्यादिकर्मणा जायते, किन्तु भक्तिः साधनसहस्त्रैरपि सुदुर्लभा भवति। तथाचोक्तम्—

ज्ञानतः सुलभा मुक्ति भुक्तिर्यज्ञादिपुण्यतः।
सेयं साधन साहस्रैः हरिभक्तिः सुदुर्लभा॥

अतएव निम्नाङ्कितं पद्यं संगच्छते।

नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत।
भक्तिं परां भगवति लब्धवान् पुरुषेऽव्यये॥

अतएव श्रीमद्भागवतस्य दशमस्कन्धे ब्रह्मणा कृतायां स्तुतौ भक्तिं परिहाय ज्ञानाय यतमानस्य पुंसः प्रयासः तन्दुलार्थं तुलावघातिनः उद्यम इव व्यर्थोऽभिहितः—

श्रेयः स्रुतिं भक्तिमुदस्य ते विभो!
क्लिश्यन्ति ये केवल बोध हेतवे।
तेषामसौ क्लेशल एव शिष्यते।
नान्यद्यथा स्थूल तुषावघातिनः॥ = १०।१४।४

अपि च—

ज्ञाने प्रयासमुदपास्य नमन्त एव
जीवन्ति सन्मुखरितां भवदीयवार्ताम्।
स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभिः
ये प्रायशोऽजित! जितोऽप्यसि तैस्त्रिलोक्याम्॥= १०।१४ ३

पद्मपुराणस्य कार्त्तिकमहात्म्येऽपि भगवद्भक्तो भक्तिमन्तरा न किमपि वाञ्छतीति स्पष्टमुद्घोषितम्—

वरं देवमोक्षो न मोक्षावधिं वा न चान्यं वृणेऽहं वरेशादपीह।
इदं ते वपुर्नाथ ! गोपालबालं सदा मे मनस्याविरास्तां किमन्यैः॥
कुवेरात्मजौ बद्धमूर्त्यैव यद्वा त्वया मोचितौ भक्तिभाजौ कृतौ च।
तथा प्रेमभक्तिं स्वकां मे प्रयच्छ न मोक्षाग्रहो मेऽस्ति दामोदरेह॥

हयशीर्षश्रीनारायणव्यूहस्तवेऽपि—

न धर्मं काममर्थं वा मोक्षं वा वरदेश्वर !
प्रार्थये तव पादाब्जे दास्यमेवाभिकामये॥

तत्रैव पुनर्भक्तराजस्य प्रह्लादस्य भक्तशिरोमणेर्हनुमतोऽनुमतं निशम्य तयोः नमस्कारं कुरुते कविः—

पुनः पुनर्वरान् दित्सु र्विष्णुर्मुक्तिं न याचितः।
भक्तिरेव वृता येन प्रह्लादं तं नमाम्यहम्॥
यदृच्छया लब्धमपि विष्णोर्दाशरथेस्तु यः।
नैच्छन् मोक्षं विना दास्यं तस्मै हनुमते नमः॥

अत एव प्रसिद्धं श्रीहनुमद्वचनम्—

भवसिन्धुच्छिदे तस्मै स्पृहयामि न मुक्तये।
भवान् प्रभुरहं दास इति यत्र विलुप्यते॥

नारदपाञ्चरात्रेऽपि जितन्ते स्तोत्रे—

धर्मार्थकाममोक्षेषु नेच्छा मम कदाचन।
त्वत्पादपङ्कजस्याधो जीवितं दीयतां मम॥
मोक्षसालोक्य-सारूप्यान् प्रार्थये न धराधर !
इच्छामि हिं महाभाग ! कारुण्यं तव सुव्रत !

श्रीमद्भागवतस्य षष्ठस्कन्धे च—

मुक्तानामपि सिद्धानां नारायणपरायणः।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ! = ६।१४।५

तत्रैव श्रीसूतोक्तौ—

आत्मारामश्च मुनयो निर्ग्रन्था अप्युरुक्रमे।
कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः॥ = १।७।१०

अतएव हरिभक्तिरसामृतसिन्धोः पूर्वभागस्य द्वितीयलहर्याम्—

किन्तु प्रेमैकमाधुर्यभुज एकान्तिनो हरौ।
नैवाङ्गी कुर्वते जातु मुक्तिं पञ्चविधामपि॥ १६

तत्र प्रथमा मुक्तिर्भगवत्सेवा साधनरूपा, द्वितीया मुक्तिस्तु सिद्धरूपा, भगवदीय सेवयैव लब्धपरमानन्दाः भगवद्भक्ता आनुषङ्गिकया प्राप्तमपि सालोक्यादि चतुष्टय तद्गतसुखैश्वर्यादि च नेच्छन्तीत्यर्थः। नन्वेवं भुक्तिमुक्ति स्पृहारहिता श्रद्धालवः शुद्ध--भक्त्यधिकारिण इत्यायातम् , तत्र त्रैवर्णिका एवाधिकारिणः किम्बा सर्वे इत्यत्रोच्यते— यथा माघस्नाने सर्वेषां वर्णानां समान एवाधिकारः तथैव भक्तौ समेषामधिकार इत्यत्र न संशीतिः । अतएवोक्तं हरिभक्तिरसामृतसिन्धोः पूर्वभागे द्वितीयलहर्या—

तत्राप्येकान्तिनां श्रेष्ठा गोविन्दहृतमानसाः ।
येषां श्रीशप्रसादोऽपि मनो हर्तुं न शक्नुयात् ॥ २।१७

एवं भक्तेः वैशिष्ट्यवर्णनप्रसङ्गे तस्याःषड्विधत्वमुक्तं हरिभक्तिरसामृतसिन्धोः पूर्व-विभागे प्रथमलहर्याम्—

क्लेशघ्नी शुभदा मोक्षलघुताकृत् सुदुर्लभा ।
सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षणी च सा ॥ १।१३

(१) क्लेशघ्नी भक्तिर्यथा—

भगवद्भक्ति र्हि भक्तस्य सर्वविधं क्लेशं निहन्ति यथा श्रीमद्भगतस्यैकादशे स्कन्धे स्वयमेवोद्धवं प्रति प्रोक्तवान् भगवान् श्रीकृष्णो यत्—हे उद्धव ! यथा सम्यक् प्रज्वलितोऽनलः इन्धनानि भस्मसात् करोति तथैव मद्विषयकोऽऽनुरागो भक्तस्य सर्वविधं पापापनोदं कृत्वां विपदं वारयति—

यथाग्निः सुसमिद्धार्चिः करोत्येधांसि भस्मसात् ।
तथा मद्विषया भक्ति रुद्धवैनांसि कृत्स्नशः ॥

पद्मपुराणे च भगवद्भक्तिद्वारा प्रारब्धफलपापनाशकत्वमुपदिष्टमस्ति। तथाहि—

अप्रारब्धफलं पापं कूटं बीजं फलोन्मुखम् ।
क्रमेणैव प्रलीयन्ते विष्णुभक्तिरतात्मनाम् ॥

अपि च— न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्म मृत्युजराव्याधिभयं वाप्युपजायते ॥

भक्तेः अविद्याहरत्वं यथा—

यत्पादपङ्कजपलाशविलाशभक्त्या—
कर्माशयं ग्रथितमुद्ग्रथयन्ति सन्तः ।
तद्वन्न रिक्तमतयो यतयो निरुद्ध—
स्रोतोगणास्तमरणं भज वासुदेवम् ।

अपि च— कृतानुयात्रा विद्याभिर्हरिभक्तिरनुत्तमा ।
अविद्यां निर्दहत्याशु दाहज्वालेव पन्नगीम्॥

(२) शुभदा भक्तिर्यथा—

येनार्चितो हरिस्तेन तर्पितानि जगन्त्यपि ।
रज्यन्ति जन्तवस्तत्र जंगमाः स्थावरा अपि ॥

सद्गुणादिप्रदत्वं यथा

यस्यास्ति भक्ति र्भगवत्यकिञ्चना
सर्वैं र्गुणैस्तत्र समासते सुराः ।
हरावभक्तस्य कुतो महद्गुणाः
मनोरथेनासति धावतो बहिः ॥

शृण्वतां स्वकथाः कृष्णः पुण्यश्रवणकीर्तनः ।
हृद्यन्तस्थो ह्यभद्राणि विधुनोति सुहृत्सताम् ॥
नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया ।
भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी ॥
तदा रजस्तमोभावाः कामलोभादयश्च ये ।
चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति ॥
एवं प्रसन्नमनसो भगवद्भक्तियोगतः ।
भगवत्तत्त्वविज्ञानं मुक्तसङ्गस्य जायते ॥
भिद्यते हृदयग्रन्थि श्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि दृष्टे एवात्मनीश्वरे ॥

अपि च— यस्य प्रसन्नो भगवान् गुणमैंत्र्यादिभिर्हरिः ।
तस्मै नमन्ति भूतानि निम्न आप इव स्वयम् ॥

तन्त्रे यथा— सिद्धयः परमाश्चर्या भुक्तिर्मुक्तिश्च शाश्वती ।
नित्यं च परमानन्दो भवेद्गोविन्दभक्तितः ॥

हरिभक्तिसुधोदये च—

भूयोऽपि याचे देवेश ! त्वयि भक्तिर्दृढास्तु मे ।
या मोक्षान्तचतुर्वर्गफलदा शुखदा लता ॥

(३) मोक्षलघुताकृद् यथा—

अपिच येषां भक्तानां हृदयेषु भक्तिः विजृम्भते तेषां कृते पुरुषार्थचतुष्टयं तृणवत्तुच्छं भवति—

मनागेव प्ररूढायां हृदये भगवद्रतौ ।
पुरुषार्थास्तु चत्वारः तृणायन्ते समन्ततः ॥

(४) भक्तेः सुदुर्लभत्वं यथा —

ज्ञानतो मुक्तिः सुलभा भवति भुक्तिश्च पुण्यादिशुभकर्मणा जायते, किन्तु भक्तिस्तु साधनसहस्त्रैरपि सुदुर्लभा भवति ।

यथा —

राजन् ! पति गुंरुरलं भवतां यदूनां दैवं प्रियः कुलपतिः क्वच किङ्करो वः ।
अस्त्येवमङ्ग ! भजतां भगवान् मुकुन्दो मुक्तिं ददाति कर्हिचित् स्म न व्यक्तियोगम् ।

(५) सान्द्रानन्द विशेषात्मा यथा—

ब्रह्मानन्दो, भवेदेष चेत् परार्द्धगुणीकृतः ।
नैति भक्तिसुखाम्भोधेः परमाणु तुलामपि ॥

यथा हरिभक्तिसुधोदये

त्वत्साक्षात् करणाह्लादादविशुद्धाब्धि स्थितस्य मे ।
सुखानि गोष्पदायन्ते ब्रह्मण्यपि जगद्‌गुरो ! ॥

भावार्थदीपिकायां यथा

त्वत्कथामृत पाथोधौ विहरन्तो महामुदः ।
कुर्वन्ति कृतिन. केचिच्चतुवर्गं तृणोपमम् ॥

(६) श्रीकृष्णाकर्षिणी यथा—

कृत्वा हरिं प्रेमभाजं प्रियवर्ग समन्वितम् ।
भक्तिर्वशी करोतीति श्रीकृष्णाकर्षिणी मता ॥

यथा श्रीमद्भागतस्यैकादशे स्कन्धे

न साधयति मां योगो न सांख्यो धर्म उद्धवः ।
न स्वाध्यस्तस्वपस्त्यागो यथा भक्ति र्ममोर्जिता ॥

श्रीमद्भागवतस्य सप्तमस्कन्धे च नारदोक्तौ यथा

यूयं नृलोके वत भूरिभागा
लोकं पुनाना मुनयोऽभियन्ति ।
येषां गृहानावसतीति साक्षाद्
गूढं परं ब्रह्म मनुष्यलिङ्गम् ॥

भगवद्‌भक्तेर्भेदाः—

भगवन्तमुद्दिश्य शास्त्रेषु या या क्रिया प्रतिपादिताऽस्ति सैव भक्तिः तयाच परा सिद्धिर्जायते । तदुक्तं —

सुरर्षे ! विहिता शास्त्रे हरिमुद्दिश्य या क्रिया ।
सैव भक्तिरिति प्रोक्ता तया सिद्धिः परा भवेत् ॥

सा च भक्तिः त्रिधा विभज्यते-साधनरूपा, भावरूपा, प्रेमरूपा च-

सा भक्ति साधन भाव, प्रेमा चेति त्रिधोरिता ।
कृतिसाध्या भवेत् साध्यभावा सा साधनाभिधा ।
वैधी रागानुगा चेति सा द्विधा साधनाभिधा ॥ २।१
शुद्ध सत्त्वविशेषात्मा प्रेमसूर्यांशु साम्यभाक् ।
रुचिभिश्चित्तमासृण्य कृदसौ भाव उच्यते ॥ ३।१
सम्यङ्मसृणितस्वान्तो ममत्वातिशयाङ्कितः ।
भाव एव स सान्द्रात्मा बुधैः प्रेमा निगद्यते ॥ ४।१

रागात्मिका भक्तिर्यथा—

तन्मयी या भवेद्भक्तिः साऽत्र रागात्मिकोदिता ।
सा कामरूपा सम्बन्धरूपा चोति भवेद्द्विधा ॥

इति हरिभक्तिरसामृतसिन्धोः पूर्वविभागे द्वितीयेलदर्यनुसारं

रागात्मिका भक्ति द्विधा भवति कामरूपा सम्बन्धरूपा च । कामेनानुरागविशेषेण रूप्यते = क्रियते इति कामरूपा, तत्सम्बन्धेन तद्धेतुकेन रागविशेषेण रूप्यते क्रियते इति सम्बन्धरूपा सम्बन्धहेतुका तत्तत्प्रेरितेत्यर्थः । तथादि श्रीभद्भागतस्य सप्तमस्कन्धे—

कामाद् द्वेषाद् भयाद् स्नेहाद् यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥
गोप्यः कामाद् भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ।
सम्बन्धाद् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभो ! ॥ = ७।१।२९,३०

पाण्डवानां य स्नेहः स सख्यरूपरागात्मिकायामेवा पर्यवस्यति ! तादृशव्यवहारश्रवणात् दर्शनाच्च । श्रीनारदेन त्वनयोः भीति द्वेषयोरुपादानं कौमुतिकन्यायोपपादनायैव । तदुक्तं—

वैरेण यं नृपतयः शिशुपाल शाल्व-
पौण्ड्रादयो गतिविलासविलोकनाद्यैः ।
ध्यायन्त आहृतधियः शयनाशनादौ
तत्साम्यमापुरनुरक्तधियां पुनः किम् ॥ = ११।५।४८

यदरीणां प्रियाणां च प्राप्यमेकमिवोदितम् ।
यद्ब्रह्म कृष्णयोरैक्यात् किरणार्कोपमायुष ।
ब्रह्मण्ये लयं यान्ति प्रायेण रिपवो हरेः ।

अनयोः ब्रह्मकृष्णयोरैक्यात् किरणार्कोपमाने ब्रह्मसंहितायामुक्तमस्ति—

यस्य प्रभाभगवतो जगदण्डकोटि-
कोटिष्वशेषवसुधादिविभूतिभिन्नम् ।
तद्ब्रह्मनिष्कलमनन्तमशेषभूतं
गोविन्दमादिपुरुषं तमहं भजामि ॥

गीतायामपि 'ब्रह्मणो हि प्रतिष्ठाहम्, प्रतिष्ठा = आश्रयः । अत एवात्मारामाणामपि भगवदनुगुणेनाकर्षणमुपपद्यते ।

पति-पुत्र-सुहृद्भ्रातृ-पितृवन्मित्रवद्धरिम् ।
ये ध्यायन्ति सदोद्युक्ता तेभ्योपीह नमो नमः ॥

तथा च ब्रह्माण्डपुराणे

सिद्धिलोकास्तु तमसः पारे यत्र वसन्ति हि ।
सिद्धा ब्रह्मसुखे मग्ना दैत्याश्च हरिणा हताः ॥
सा कामरूपा संभोगतृष्णां या नयति स्वताम् ।
यदस्यां कृष्णसौख्यार्थमेव केवलमुद्यमः ॥
इयं तु व्रजदेवीषु सुप्रसिद्धा विराजते ।
आसां प्रेमविशेषोऽयं प्राप्तः कामपि माधुरीम् ॥
तत्तत् क्रीडानिदानत्वात् काम इत्युच्यते बुधैः । ६९, ७०

तथा च तन्त्रे—

प्रेमैव गोपरामाणां काम इत्यगमत् प्रथाम् ।

भक्त्यधिकारिणः

शास्त्रतः श्रूयते भक्तौ नृमात्रस्याधिकारिता ।
सर्वाधिकारितां माघस्नानस्य ब्रुवता यतः ॥

पद्मपुराणेऽप्येवमुक्तमस्ति—**सर्वेऽधिकारिणो ह्यत्र हरिभक्तौ तथा नृप !** ननु भवन्तु एव भक्तौ सर्वेऽधिकारिणः स्वस्वधर्मयुक्ता एव युज्यते तं विना प्रत्यवायश्रवणात् । अत एव गीतायां '**स्वकर्मणः तमभ्यर्च्य सिद्धिं विन्दति मानवः** ।

स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः ।
विपर्ययस्तु दोषः स्यादुभयोरेष निश्चयः ॥

अपिच—

त्यक्त्वा स्वधर्मं चरणाम्बुजं हरे र्भजत्यपक्वोऽथ पतेत्ततो यदि ।
यत्र क्व वा भद्रमभूदमुष्य किं को वार्थ आप्ता भजतां स्वधर्मतः ॥

अगस्त्यसंहितायामपि प्रोक्तं विद्यते यद् यथा विधिनिषेधौ मुक्तं साधकं नोपसर्पतः तथैव रामोपासकं नोपस्पृशतः—

यथा विधिनिषेधौ तु मुक्तं नैवोपसर्पतः ।
तथा न स्पृशतो रामोपासकं विधिपूवकम् ॥

स्वापादमूलं 'भगतः प्रियस्यत्यक्त्वान्यभावस्य हरिः परेशः ।
विकर्म यच्चेदपतितं कणश्चिद् धुनोति सर्वहरि संनिविष्टः ॥

भक्तानां त्रिविधोऽनुभवः

पराया भक्तेरधिकारिणो ज्ञानिनो भक्तस्य त्रिधा भवत्यनुभवः । तत्र परां भक्तिमधिगतवतो ज्ञानिनो भक्तस्य प्राथमिकोऽनुभव इत्थं जायते, यद् द्वैतप्रपञ्चरूपं जगद् भगपत्स्वरूपमेव । तदानीं सर्वमिदमद्वैतरूपेण निभालयन् भक्तो जगद् भगवद्रूपमेव पश्यति । स्थितावस्थां स्वीयमस्तित्वमपि भगवत्स्वरूपे जगति प्रविलीयते । प्रतिक्षणं च तेनेदमनुभूयते यत् सर्वमपि दृश्यप्रपञ्चं भगवत्स्वरूमेव । स्थितिमिमां लक्ष्यी कृत्यैवोक्तम्—

भावयन्तः कर्मतत्त्वं पराभक्त्याधिकारिणः ।
अस्त्येतज् जगद् ब्रह्म धारणामिदृशी मम ॥
सर्वथा सर्वदा देवाः कुर्वते कर्मयोगिनः ।

द्वितीयेऽनुभवे भगवान् जगत्स्वरूप एव । पूर्ववास्थायां प्रथमं जगद्धारणा, अत्र तु पूर्वं भगवद्धारणा समापतति । अखिलं खलु खस्वरूपं तदतिरिक्तं न किमपीति धारणां कुर्वतो भक्तस्य जगतो भानं नश्यति । जगद्भानप्रणाशपूर्वकं नैजमस्तित्वमपि विलयमेति । तथाचोक्तम् =

मत्परा भक्तिनिष्णाता मद्भक्ता योगिनां वराः ।
ब्रह्मैवास्ते जगत्सर्वमिति धारणया ऽ निशम् ॥
महात्मनो निरीक्षन्ते विश्वस्मिन् सुरसत्तमाः

अन्तिमावस्थायां 'अहं ब्रह्मास्मि' इत्यनुभवो भवति तृतीयः । भक्तस्य पूर्वोक्तदशाद्वयेऽद्वैतभावसिद्धौ सत्यामपि पुरतः पृष्ठतश्च जगत्प्रपञ्चभानसत्ता निरीक्ष्यते । तदानीमद्वैतभाननाशपुरस्सरं स्वकीयास्तित्वस्य अपि भगवत्स्वरूपे विलयो वोभवीति । अतएवोक्तम्—

अहं ब्रह्मास्मि भो देवा इति धारणयाऽस्ति मे ।
जीवनमुक्ता महात्मानस्तदा तां प्राप्तुमीशते ।

अमुमेवान्तिमं सर्वाभ्यर्हितमधिकारं लक्ष्यीकृत्य भगवती श्रुतिरप्याह—

पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।

भक्तौ माहात्म्यविज्ञानमत्यावश्यकम्

ननु भगवद्भक्तौ किमपेक्ष्यमिति चेद् अत्रोच्यते भगवद्भक्तौ भगवतो महात्म्यज्ञानमेव मौलिकं कारणमपेक्षितमस्ति । साधकबुद्धौ यावद् मननीयभगवन्माहात्म्यदार्ढ्यं न स्यात् तावद् भक्तचिन्तानुरागो भक्तिपदवाच्यो भवितुं नार्हति । अतो भगवत्प्रेम्णि भगवन्माहात्म्यविज्ञानमत्यावश्यकमास्ते । माहात्म्यज्ञानपूर्वकं समुत्पन्नेनानुरागेणैव साधकः साधनराज्ये समुन्नतिमनुष्ठातुं प्रभवति । यथा लोके प्रियपात्रस्य गुणावलोकनेन योऽनुरागः समुत्पद्यते स प्रायः क्षणभङ्गुरो न भवति, अपितु गुणज्ञानस्वरूपपरिचयादिना दैनन्दिनं प्रवर्धमानो विलोक्यते तथैव भगवतस्तल्लीलाविग्रहस्य वा लोकोत्तरं पवित्रं रुचिरं चरित्रचित्रं हृदयपटले प्रतिष्ठितं विधाय तत्र च साधकसमुत्पन्ना प्रीतिः भगवद्गुणस्वरूपपरिज्ञानेन साकमेव क्रमशः प्रगाढ़तामापन्ना भगवद्राज्यसमुन्नतपदे भगवद्भक्तं प्रतिष्ठापयति । श्रीमद्भागवतस्य रासपञ्चाध्यायां भगवतः श्रीकृष्णचन्द्रस्य माहात्म्यपरिज्ञानादेव गोपिकानामेतादृशी प्रेमवृद्धिरभूद् यथा ताः भगवतः कृपामधिगत्य मुक्ता अभूवन् ! अतएव ता अवोचन् ।

न खलु गोपिकानन्दनो भवान् अखिल देहिनामन्तरात्मदृक् ।
विखनसार्थितो विश्वगुप्तये सख उदेजिवान् सत्वतां कुले ॥ = १०।३१।४

नैवं विभोऽर्हति भवान् गदितुं नृशंसं सन्त्यज्य सर्वविषयांस्तवपादमूलम् ।
भक्ता भजस्व दुरवग्रह मात्यजास्मान् देवो यथादिपुरुषो भजते मुमुक्षून् ॥१०।२९।३१

रासोत्सवे गोपीनामभिमानमर्दनाय सहसान्तर्निहितस्य भगवतः श्रीकृष्णस्य विरहे विह्वला गोप्यो दूर्वादलश्यामलां वसुन्धरां सम्बोध्य 'किन्ते कृतमित्यादि यदुक्तं तेन एतत्परिज्ञायते यत्तासां सम्यक् श्रीकृष्णचन्द्रमाहात्म्यज्ञानमासीदिति । एवं किल भगवतः श्रीकृष्णस्य महत्त्वपरिज्ञानं गोपिकानामासीद् येन ता भगवदनुकम्पामासाद्य भक्तिप्रेमबलेन तदानन्दमयं दिव्यलोकमध्यगच्छन् । स्त्री-पुरुषयोः पारस्परिकं प्रेम स्वाभाविकम् । अत एव दाम्पत्ये यदन्योन्यमाकर्षणं परिदृश्यते, न तथान्यत्रावलोक्यते । पूर्णावतारे भगवति श्रीकृष्णे प्रेमविह्वलानां व्रजवनितानां जगत्प्रसिद्धं प्रेम वात्सल्यमाधुरीप्रभावविलसितमासीत् । गोपिकानां प्रेम भगवन्माहात्म्यज्ञानपरिपूर्णमासीत् । अन्यथा तासां प्रेम, भक्तिशब्दवाच्यतां नागमिष्यत् । सर्वदर्शनसिद्धान्तसिद्धोऽस्ति यद् जीवस्य निम्नगामिनी इन्द्रियविषयसम्बद्धा गतिरेव पतनहेतुभूता, आत्माभिमुखीना तु तदीयाभ्युदयमुक्तिहेतुरेवास्ते । भगवन्माहात्म्यज्ञानशून्यं प्रेम, पतनस्य कारणम् । यतः तस्य प्रणयिनोऽ-

न्तःकरणगतिर्वैषयिकसम्बन्धदूषिता जायते, परन्तु यदि प्रणयिनश्चित्ते भगवन्माहात्म्यस्य विकासो भवेत् तर्हि तदन्तःकरणं विषयरागरञ्जितमपि नाधःपतितं भवितुमर्हति । यदि भक्तस्य निजेष्टदेवतामाहात्म्यपरिज्ञानं न स्यात्तर्हि नासौ भक्तिराज्ये समुन्नतिमधिगन्तुमर्हेत् । अतो हि भगवदनुरागमूलं भगवन्माहात्म्यज्ञानं नितरामपेक्षितमस्ति ।

भजनीयमाहात्म्यपरिज्ञानाभावे दोषः

यथा लोके उपपतिसम्बन्धः स्त्रीणामधोगतिकारणं भवति तथैव भक्तिरपि भगवन्माहात्म्यपरिज्ञानाभावे साधकस्याधोगतिहेतुर्जायते । सात्त्विकभावेन भक्तिस्यामन्तःकरणं द्रुतमेव भावगुणादुन्नतिसोपानमर्हति । तामसिकेनाधमभावेन भक्तस्यन्तःकरणं भावाधमतया शीघ्रमेवावनतेः अधस्तनकूपे पातयतीत्यत्र नास्ति कश्चन सन्देहः । सद्भावितेनान्तःकरणेन कृतमसत् कर्मापि अभ्युदयनिःश्रेयससुकरं बोभवीति । अतो यदा कस्यचन प्रणयिनोऽन्तःकरणे भगवन्माहात्म्यपरिज्ञानभावाभावः स्यात् केवलं कामासक्तिर्भवेत्तर्हि यथा जारबुद्धिसम्पन्नस्य प्रेमिकस्योन्नतिर्न जायते तथैव भगवन्माहात्म्यज्ञानशून्यस्यापि प्रणयिनो दशा भविष्यतीत्यत्र नास्ति सन्देहावसरलेशः ।

कुत्रचित् जारबुद्धिजनितप्रेम्णापि समुन्नतिर्दृश्यते । तादृशी घटनावली साध्यसाधकासाधारणाधिकारसम्बद्धैव भवति । यथा श्रीमद्भागवतस्य रासपञ्चाध्यायीवर्णनप्रसङ्गे रासलीलावसरे या याः किल गोविन्दवेणुनिनादमुग्धा ब्रजाङ्गना नैजैः पतिभिर्निरुद्धा न श्रीकृष्णमुपढौकिरेऽताः सर्वा अपि भगवत्प्रेमरसाकृष्टा भगवन्महिमाज्ञानाभावेऽपि भगवद्विरहतीव्रतापेन निर्मलान्तः करणाः सत्यो मुक्ता बभूवुः—

अन्तर्गृहगताः कश्चिद गोप्योऽलब्धविनिर्गमाः ।
कृष्णं तद्भावनायुक्ता दध्युर्निमितलोचनाः ॥
दुःसह - श्रेष्ठ - विरह - तीव्रताप - धुताशुभाः ।
ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमंगलाः ॥
तमेव परमात्मानं जारबुद्ध्यापि संगताः ।
जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ॥
(श्रीमद्भागवते १०।२९।१०,११)

अतएव राज्ञः परीक्षितो भगवतः शुकदेवस्य च प्रश्न उत्तरं चोभयमपि सङ्गतं भवति । यदा—"तमेवपरमात्मानं जारबुद्ध्यापि सङ्गताः, इति शुकमुखाच्छ्रुतं राज्ञा परीक्षिता तदा तेन तत्कालं पृष्टो भगवान् वैयासिकिः शुकदेवमुनिः—प्रभो ! गोप्यस्तु केवलं भगवन्तं श्रीकृष्णमात्मप्रेमास्पदमेवामन्यन्त, नतु परं ब्रह्म परमात्मानम्, तत्कथं तासां गुणप्रवाहरूपादस्मात् संसारात् निवृत्तिः सम्भवति—

कृष्णं विदुः परं कान्तं न तु ब्रह्मतया मुने !
गुणप्रवाहोपरमस्तासां गुणधिा कथम् ॥ १०।२९।१२ ॥

प्रश्नमेनमाकर्ण्य भगवान् शुकः सस्नेहं पूर्वोक्तं स्मारयन् राजानं परीक्षितमुत्तरयत्-राजान् ! किं त्वं व्यस्मार्षीः ? यथा भगवन्तं श्रीकृष्णं द्विषन्नपि शिशुपालोऽहर्निशं तन्मयतया मुक्त इति तु मया पूर्वमेवोक्तम् । यदा द्विषतोऽपि तन्मयतया मुक्तिर्जायते, तर्हि अनन्येन प्रेम्णा सततं तं ध्यायमानानां गोपीनां तन्मयताया गुणप्रवाहात् मुक्तौ का बाधा ? कामासाक्त्या क्रोधावेशेन भयेन स्नेहानुरागेण सौहार्देन च भगवता सहैक्यात्तन्मयतया नराणां मुक्तौ न कोऽप्यस्ति सन्देहलेशः । यतो जगतः कल्याणायैवाजस्यापि भगवतोऽवतारो जायते । अतो योगेश्वरे भगवति श्रीकृष्णे न त्वया किमप्याश्चर्यं कार्यम्, केनापि भावेन भगवता सह दृढतां सम्बन्धमात्रमपेक्षितमस्ति—

उक्तं पुरस्तदेतत्ते चैद्यः सिद्धिं यथा गतः ।
द्विषन्नपि हृषीकेशं किमुताधोजप्रियाः ॥
कामं क्रोधं भयं स्नेहमैक्यं सौहार्दमेव च ।
नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ॥
नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप !
अव्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः ॥
न चैवं विस्मयः कार्यो भवतां भगवत्यजे ।
योगेश्वरेश्वरे कृष्णे यत एतद्विमुच्यते ॥
(श्री० भा० १०।२९।१३. १४. १५. १६.)

अपिच रासक्रीडायाः समाप्तौ आप्ताकामस्यैकमात्रजगत्स्वामिनो धर्मपालकस्य धर्मविपरीतः-परस्त्रीस्पर्शः कथं सम्भव इत्यभिसन्धाय —

संस्थापनाय धर्मस्य प्रशमायेतरस्य च ।
अवतीर्णो हि भगवानंशेन जगदीश्वरः ॥
स कथं धर्मसेतूनां वक्ता कर्ताभिरक्षिता ।
प्रतीपमाचरेद् ब्रह्मन् ! परदाराभिमर्शनम् ॥
आप्तकामो यदुपतिः कृतवान् वै जुगुप्सितम् ।
किमभिप्राय एतं नः संशयं छिन्धि सुव्रत ॥ १०।३३।२७-२९ ।

इत्येवं राज्ञः परीक्षितः प्रश्ने सोदाहरणं समाहितवान् भगवान् शुकाचार्यः—

धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम् ।
तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥
नैतत् समाचरेज्जातु मनसापि ह्यनीश्वरः ।
विनश्यत्याचरन् मौढ्याद् यथारुद्रोऽब्धिजं विषम् ॥

अतः—ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित् ।
तेषां यत् स्ववचो युक्तं बुद्धिमांस्तत्समाचरेत् ॥१०।३३।१०-३२

तस्माद् बुद्धया तर्कवितर्कादिकं विहाय तत्कर्माचरणापेक्षया तदाज्ञा एव पालनीया, तेनैव शाश्वतं कल्याणं भवितुमर्हति, नान्यथा । सूर्याग्नीश्वरा अपि कदाचिद् धर्मस्योल्लंघनादि साहसं कुर्वाणा दृश्यन्ते, परन्तु न तद्दोषैः ते लिप्यन्ते । येषु तादृशं सामर्थ्यं न विद्यते, तैस्तु न कदाप्यनुष्ठेयमीश्वरस्याचरणम् । यदि अज्ञतावशाद् अनुतिष्ठेत् तदा नूनं विनश्येत् । आशुतोषेण भगवता शिवेन हालाहलं विषं पीतमिति कृत्वा मयाप्यवश्यं पेयमिति मत्वा यदि कश्चित् पिवेत्तर्हि सद्य एव स भस्मसात् स्यात् । अतः स्वाधिकारानुसारं तदुपदेश एवानुष्ठेयो न तदाचरितं सर्वमनुष्ठेयम्, किन्तु धर्मानुकूलमेवेश्वरस्य आचरणमनुष्ठायात्मकल्याणं कर्तव्यमिति साधीयानस्ति मार्गः ।

यथा अज्ञात्वापि अमृतं सेवमानो मानवोऽमरतां प्रतिपद्यते तथैव परमेश्वरविषयकज्ञानाभावेऽपि सर्वशक्तिमति अप्रमेये परमेश्वरे कामक्रोधभयस्नेहैक्यसौहार्दादिभावेषु केनाप्येकेन भावेन समाकृष्टहृदयो भक्तः भगवदसाधारणशक्तिबलेन योग्यसंस्कारसंयुक्तो भगवत्तान्मयतां प्राप्तो मनोविलयेन मनःप्रसूतकामक्रोधमोहादिवृत्तिविरहितो नूनं मुक्तो जायते ।

यद्यपि श्रीकृष्णं प्रति तासां गोपीनां कामबुद्धरासीत्, न ताः तं श्रीकृष्णं परमात्मानं मन्यन्तेस्म तथापि प्राक्तनेनासाधारणसंस्कारेण श्रीकृष्णं प्रत्यसाधारणी प्रीतिः तासां समुदपद्यत, यया भगवान् श्रीकृष्णः स्वकीयसर्वशक्तिमत्ताबलेन ताः सर्वाः स्वस्मिन् तन्मया विधाय पूर्वं तासां मानसिककामादिवृत्तीर्नाशयित्वा तदनन्तरं च शुभाशुभोमयविधकर्मणां क्षयमनुष्ठाय ता मुक्तिपदं प्रापयामास । अत्र भगवतः श्रीकृष्णस्यासाधारणी शक्तिः गोपीनाञ्चासाधारणः प्राक्तनसंस्कार एव निदानमितिनात्र जारसम्बन्धिनी प्रीतिः कारणकोटिमाटीकते । साधारणानां नारीणां तादृशोऽधिकारो भवितुं नार्हति, यतः साधारणे पुरुषे भगवच्छक्तेरभावात् आसक्तप्रेमिकायाः तादृशं तन्मयत्वमशुभकर्मणां नाशश्च न भवितुमर्हतः ।

जारबुद्धिसंपन्नानां गोपीनामूर्ध्वगतित्वे तदीयचित्तजनितजारप्रेम कारणं नास्ति, किन्तु भगवतः पूर्णावतारस्य आनन्दकन्दस्य श्रीकृष्णचन्द्रस्य भागवतं तेज एव प्रधानं कारणम् । सूर्यतेजो यथा स्वभावत एव पृथ्वीतले स्थितं रसमात्माभिमुखमाकर्षति तथैव जारबुद्धयापि संगताः श्रीकृष्णप्रेमाकृष्टचित्ता भगवत्समर्पितान्तःकरणा गोप्योऽपि भगवत्तेजसा समाकृष्टाः सत्यो मुक्तिपदं प्रापुः । जारबुद्धयापि संगता इत्यत्राऽपि शब्दबलेनैतत्सिद्यति, यद् जारबुद्धिप्रेम पतनस्यैव कारणं, जारबुद्धिः गोपीनां मुक्तेः कारणं नास्तीत्यपि सिद्धम् । जारबुद्धिजनितप्रेमविषयेऽत्र प्रियसर्वशक्तिमत्ता प्रणयिनीनामसाधारणः प्राक्तनकर्मसंस्कार एव समुन्नतेः कारणम् ।

इष्टदेवे भगवद्विग्रहे गुरौ विभूतौ वा माहात्म्यपरिज्ञानपूर्वं प्रेमैव अभ्युदय-निःश्रेयसयोः कारणम् । भगवन्माहात्म्यपरिज्ञानरहितायां प्रीतौ भगवच्छक्तिसंयुक्तोऽसाधारणशक्तिशाली पुरुष एव साधकं भगवत्पदं प्रापयितुमर्हति । साधारण्येन तु सर्ववादि-सम्मतो दार्शनिकसिद्धान्तोऽयं यद् माहात्म्यज्ञानरहिता प्रीतिर्न भवितुमर्हति भक्तिशब्द-वाच्या, न वा तया भवितुं शक्नोति साधकस्याभ्युदयः ।

माहात्म्यज्ञानपूर्वकप्रीतौ सत्या साधकस्य पतनं न जायते । भक्तहृदये भगवन्महत्त्व-ज्ञानजनितस्योच्चभावस्य विद्यमानतया तद्बलेनैव भक्तः समुन्नतिपदमधिगच्छति । भक्ति-मत्यो गोप्यो हि भगवन्महिमज्ञानोत्पन्नभावोन्नतिबलेन दुश्छेद्यं संसारपाशं विच्छिद्य विच्छिद्य साधनमार्गेसमुत्थितान् विविधान् विघ्नान् निराकुर्वन्त्यः सर्वत्रैव विराजमान-मानन्दकन्दं सच्चिदानन्दं भगवन्तमधिगन्तुं समर्था अभूवन् । ताश्च महता तपसापि मुनिजनदुर्लभेषु भगवच्छ्रीकृष्णचरणसरसीरुहेषु नैजं शरीरं मनः प्राणान् आत्मनं चेति सर्वं समर्पयन्त्य एव कृतकृत्यतामगुः ।

समुन्नतमपि प्रेम भगवन्महात्म्यपरिज्ञानरहितं भयशून्यं नास्ति । लौकिकावलम्बनं प्रथमतो दुर्निवारा विषयबुद्धिः, द्वितीयस्तु साधकवृत्तीनामुत्कर्षाय कर्षन्ता बहुविधाः परिणामा भवितुमर्हन्ति । अतो महिमज्ञानरहिते प्रेम्णि भयानामनेकत्वं जायते । पूर्णावतारे भगवति श्रीकृष्णचन्द्रे माहात्म्यपरिहीनमपि प्रेम कुर्वतीनां गोपाङ्गनानां कल्याणं सम्भवति, किन्तु तादृशी पूर्णता सर्वत्र नास्ति । अतो महात्म्यपरिज्ञानशून्या भक्तिर्भयरहिता भवितुं नार्हति । भगवन्माहात्म्यज्ञानमासाद्य भक्तो यदि भक्तिसाधने तत्परो भवेत् तर्हि तदीया साधनरीतिः सर्वथैव भयरहिता स्यात् । अतो महिमज्ञान-संवलिता भक्तिरेव भयरहिता गरीयसी च । भक्त्या सह माहात्म्यपरिज्ञातत्यावश्यकम् । महात्म्यज्ञानसहिता समनुष्ठिता भक्तिर्भक्तं निर्बाधं भगवच्चरणारविन्दं प्रापयत्येव—

त्वय्यम्बुजाक्षाखिलसत्त्वधाम्नि
समाधिनावेशितचेतसैके ।
त्वत्पादपोतेन महत्कृतेन
कुर्वन्ति गोवत्सपदं भवाब्धिम् ॥ =११।२।३० ॥

श्रीमद्भगवद्गीतायामपि चैतदेव समर्थयति भगवान् श्रीकृष्णः—

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ =४।९

भक्तेरधिगमस्य प्रकारपर्यालोचमम्

(१) भक्तिर्हि भगवतोऽनुकम्पयैव लभ्यते इति देवर्षेः नारदस्यास्ति मतम् । एतन्मते भगवत्पदप्राप्तये भगवानेवैकमात्रमलम्बनम् । जीवोऽल्पशक्तिः अल्पज्ञोऽव्यापकश्चेति

भगवता स्वतेजसा गुरुशक्त्या साधकः स्वाभिमुखमाकृष्यते। यथा भगवान् भास्करो भूमिस्थं वाष्पराशिं स्वाभिमुखमाकर्षति तथैव परमेश्वरोऽपि भक्त्या स्वीयोपासनायां संलग्नस्य साधकस्यान्तः करणमाकर्षति येन स तदुन्मुखीभूतः तद्वास्तविकं स्वरूपमवगन्तुमर्हति। अतो भगवत्प्राप्तौ भगवत्कृपैव प्रधानं कारणम्। भागवतानां भगवद्भक्तानां कृपया भगवत्कृपापि जायते। भगवत्कृपामन्तरेण च भागवतानां कृपापि नासादयितुं शक्यते। तस्माद् भगवतो भागवतानां च कृपया भक्तिः समाधिगम्यते इति निर्विवादम्।

(२) भक्तिज्ञानयोर्महदन्तरमास्ते। ज्ञानं तथा पुरुषार्थसापेक्ष्यं, न तथा भक्तिः पुरुषार्थसापेक्ष्या, विलक्षणः किल भक्तेः पन्थाः। विलक्षणगतिशालिनी भक्तिर्हि भागवतानां भगवतश्च कृपया अधिगम्यते। येषां मनांसि भगवदुन्मुखानि जायन्ते यैर्वा स्वकीयानि हृदयानि भगवन्मन्दिराणि कृतानि। त एव महापुरुषा भागवताः कथ्यन्ते। एवंविधानां महात्मनां कृपया भक्तानां हृदये भक्तिरसमन्दाकिनी निरन्तरं प्रवहति। भक्तेरलौकिकत्वादलौकिकया रीत्या एव तदधिगमो भवति तदधिगमाय च तत् प्रकारः स्वयमेव भगवता श्रीकृष्णेन गीतायामुक्तः-तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। इति। प्रथमं तावद् भगवद्भक्तानां प्रणामेन अहङ्कारो ह्रसति, तेषां सेवनेन मलविक्षेपौ दूरीभवतः श्रद्धापूर्वकं परिप्रश्नेन बुद्धेरावरणमपसरति ततोऽन्त, करणं निर्मालयते, ततो जिज्ञासुना कृतकृत्येन भूयते—

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन् सर्वभूतानि, यन्त्रारूढानि मयया॥

इति गीतोक्त्यनुसारं भगवान् भक्तानां हृदयमन्दिरे सततं विराजते। अतो भगवत्कृपैव भागवतकृपेति वक्तुं शक्यते। नरो सर्वान्तर्यामिनो भगवतः प्रेरणामन्तरेण न भक्तिराज्येऽग्रे सर्तुं शक्नोति, न वा भगवन्तं स्मर्तुमधिकारवान् जायते, नापि तस्मिन् भागवतसंगप्रवृत्तिरुदेति। अतो भक्तिः भगवत्कृपा सापेक्ष्येति निश्चप्रचम्। भगवतोऽनुकम्पयैव भागवतानां दर्शनं जीवैरवाप्यते। भगवतस्वरूपतः प्रकटीभूय सत्संगसदुपदेशादिना जीवानां कल्याणं विधत्ते भगवान् भवानीपतिः। महाजनो हि गुरुस्वरूपं दधानो भक्तं भगवत्सान्निध्यं प्रापयति। अतः साधकानां कृते सतां संगतिरेव मुख्या। सत्संगमहत्त्वविषये शास्त्रेषु बहूनि वचनानि समुपलभ्यन्ते—

सतां समागमः सद्भि र्निष्फलो जायते क्वचित्?
विमुक्तं नरकात् पश्य नृगं साधुसमागमात्॥
निमज्जतामत्र घोरे भवाब्धौ परमाश्रयाः।
सन्तो ब्रह्मविदः शान्ता नौर्जले मज्जतामिव॥

अतएवोक्तम्– वाञ्छा सज्जनसङ्गमे परगुणे प्रीति र्गुरौ नम्रता।
विद्यायां व्यसनं स्वयोषिति रति र्लोकापवादाद्भयम् ॥
भक्तिः शक्तिनि शक्तिरात्मदमने संसर्गमुक्तिः खले ।
एते येषु वसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः ॥

यदा मानवस्यान्तः करणे रजस्तमसी अभिभूय सत्त्वगुणः समुदेति तदानीमसौ- सद्भि राद्रियते तत्संगे च प्रवर्तते । अतः अन्तं सद्रूपेण निश्चेतुं सत्संगं च विधातुं निजान्तः करणं निर्मलं सत्त्वगुणमयं च विधातव्यम् । यथा दिवारस्योदयेन नैशोऽन्धकारोऽपैति तथा सम्मुखीने साधुजने भक्तस्य पापराशिः प्रणश्यति, भगवदुन्मुखी भवति तस्य प्रवृत्तिः, सतामन्तः करणं निरन्तरं भगवच्चरणारविन्दे मधुकरायमानं तिष्ठति । अतएव साधूनां संगमोऽमोघो दुर्लभश्च प्रतिपादितः । इति भरद्वाजस्य महर्षेरस्ति मतम् ।

(३) शाण्डिल्यस्य हर्षेः मतेंऽहङ्कारसंनिरोधादेव भगवद्भक्तिरधिगम्यते । अहङ्कार एव जीवेषु अनर्थहेतुः । यावदहङ्कारः तिष्ठति तावदेव जीवो भगवदुन्मुखो न भवति । अहङ्कारस्य निरोधे तु भगवद्भावोदयेन भक्तेरधिगमो नूनं भावी । तस्मादहङ्कारनिरोध एव भक्तेरुदयस्य प्रधानो हेतुः ।

(४) महर्षेः व्यासस्य मतेन स्वस्मिन् दीनतोत्पत्त्या साधको भवति भगवद्भक्ति- प्राप्तेरधिकारी । दैन्योदयादहङ्कारनाशो जायते । अभ्याससद्विचारद्वारा साधको यथा यथा नैजमात्मानं दीनं मन्यते, तथा तथा तदन्तःकरणाद् अहङ्कारो ह्रासतामुप- गच्छति । ततो भवति भगवदुन्मुखीना चित्तप्रवृत्तिः । शरीरेण मनसा वचसा बुद्ध्या च दैन्यभावमासादयन् साधकः शीघ्रं भगवन्तनुपलभते ।

(५) महर्षियाज्ञवल्क्यमतेन योगाभ्यासं द्वारीकृत्य भक्तिरधिगम्यते । स्वस्थे शरीरे प्राणसञ्चार इव योगाभ्यासेन साधकीयोपसनाशरीरे प्राणरूपिणी भक्तिः स्वतः सञ्चरति । भक्तिमन्तरेण योगो न योगशब्दवाच्यो भवितुमर्हति । अत आस्तिको योगी भक्तिमन्दाकिन्यां स्नानाधिकारी जायते इति निश्चप्रचम् ।

(६) भक्तिशास्त्रोपासनाकाण्डयोः परमाचार्यस्य महर्षेः भृगोः संमत्या भक्तानां कृपयैव भक्तिरवाप्यते । अयं हि महर्षिः भक्तिहेतवे प्रधानं कारणं भक्तानां कृपामेव मनुते । भक्तजनहृदयं भगवन्मन्दिरम्, भक्ता हि सदैव भगवच्चरणारविन्दे मधुकरायन्ते । भक्तान् द्वारीकृत्यैव निर्गुणो निराकारोऽपि परमात्मा साकारं सगुणं च रूपं बिभर्त्ति । अत एतद् सिध्यति यद् भक्तानां कृपयैव भक्तिरधिगम्यते । तस्माद्रसरूपस्य भगवतो रसरूपिण्या भक्तेरधिगमाय भगवद्रससागरे सदैवोन्मज्जन् निमज्जंश्च भक्त एवास्ति स्वाभाविको हेतुः ।

भक्तिसमुन्नतेःसाधनविमर्शः

१—अस्मिन् वैरञ्चे प्रपञ्चे दैवी आसुरी चेति द्विधा सम्पत्तिर्दृष्टिगोचरतामायाति । एतत्सम्पत्तिद्वयप्रतिद्वन्द्वतैव संस्कृतवाङ्मये देवासुरसंग्रामनाम्ना समाम्नाता। तत्र पुण्यमयी दैवी सम्पत् जीनमुन्नमयति पापमयी चासुरी सम्पद् अधो गमयति । आसुरी सम्पद् विनाशपूर्वकं दैवीसम्पद् विकासेन साकं साधके भक्तेरुदयो वोभवीति, क्रमशः समुन्नतिश्च जायते इति महर्षेः अङ्गिरसो मतमस्ति । अतएव श्रीमद्भगवद्गीतायां दैवासुरसंपद्विवेचनपुरस्सरं दैवीसम्पदः प्राशस्त्यनं स्पष्टं निवेदितवान् भगवान् श्रीकृष्णः अर्जुनं प्रति—

दैवी सम्पद्विमोक्षाय निवन्धायासुरी मता ।
मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव ।। = १६।५ ।

२—भगवत पूजादौ अनुराग एव साधकस्य चेतसो गतिं कल्याणकरीं कुर्वन् तमध्यात्मिकमार्गे समुन्नमयति । अतो भगवतः पूजायामनुराग एव साधकस्य समुन्नतिकर इति महर्षेः वेदव्यासस्य मतमस्ति ।

वहिःपूजा अन्तःपूजा चेति भेदेन पूजा तावद द्विविधा । तत्र स्थूलभूते पुष्पधूपदीपनैवेद्यादिवाह्यार्चनीयद्रव्यादिना वहिःपूजा सम्पद्यते । भक्तद्वारा हृदयकमले भगवतो मनोमयीं मूर्तिं संस्थाप्यान्तः करणेनैव समनुष्ठिताऽन्तःपूजा च प्रोच्यते । द्विविधापीयं पूजापद्धतिः साधनमार्गे साधकमग्रेसारयति तथा च वहिःपूजायामन्तःपूजायाञ्च अनुरागोदयेन भगवद्भक्तिः । समुज्जृम्भत इत्यत्र नास्ति काचित् संशीतिः ।

३—भगवत्कथादिषु अनुराग एव साधकं भक्तिमार्गे अग्रेसारयति । अतो भगवतः कथायामनुराग एव भक्तसमुन्नतिकर इति गर्गाचार्यस्य मतमस्ति । तथा चोक्तं श्रीमद्भागवतस्य द्वादश स्कन्धे—

संसार - सिन्धुमतिदुस्तरमुत्तीर्तिर्षो-
नान्यः प्लवो भगवतः पुरुषोत्तमस्य ।
लीला - कथा - रस - निषेवणमन्तरेण ।
पुंसो भवेद्विविधदुःखदवार्दितस्य ।। = १२।४।४० ।

तस्मादेतादृशी भगवत्कथारतिरवश्यमेव साधकस्य समुन्नयित्रीति नास्ति कश्चन सन्देहलेशः ।

४—बाधामन्तरेण परमात्मनि रतिरेव साधकमध्यात्मराज्येऽग्रेसारयति । अतो भगवति बाधाभावमूलिकाया धारणायाः समुन्नतिरेव भक्तेरुदयस्य कारणमिति महर्षेः शाण्डिल्यस्यास्ति मतम् । यदा साधकस्य भक्तिभावपूर्णं चेतः जाह्नव्या अविरलप्रवाह इव सच्चिदान्दसमुद्रे प्रधावेत् सांसारिकी कापि बाधा तदीयचित्तप्रवाहगतिरोधं नैव विदध्यात् तदा साधके आत्मरतिः समुन्नतिप्रकाशमापन्नेति ज्ञेयम् । आसक्त्या वन्धनं

भावेन च मोक्ष इति विज्ञानमनुसृत्य विषयासक्तिं त्यजतः साधकस्य चेतोः अध्यात्मभावसंयुक्तं सत् आत्मरतियुक्तमुपैति । यदा साधको वहिर्मुखमात्मनश्चित्तमध्यात्मभावयुक्तं कृत्वा मनोवाक्कायकर्मभिः सर्वमपि कार्यं भगवद्भावाश्रितं कुर्यात् तदा तत्र दृढाया भक्तेरुदयो जायते । तथाचोक्तं प्रह्लादेन —

या प्रीति रविवेकानां विषयेष्वनपायिनी ।
त्वामनुसरतः सा मे हृदयान् मापसर्पतु ॥ १।२० ।

५–यदा साधकस्य चेतसि लोकातीतमेऽनुपमे भगवतो माहात्म्यवर्णने समीहा जायते तदा भगवत्तो महत्त्ववर्णनं कुर्वाणः साधकः समुपन्नतिमार्गाभिमुखमग्रे सरतीति महर्षेः भरद्वाजस्य मतम् । भगवतो महिमाख्याने भगवत्प्रेमप्रमुग्धः साधको भगवदीयगुणगणान् कीर्तयन् समस्तमपि भुवनं पवित्रयति । साधकस्य चित्ते भगवतो महत्त्वे प्रतिष्ठिते तस्य हृदयसरोजं भगवत्प्रेममाधुर्येण विजृम्भितं भवति । अहर्निशं स भगवदीयं महत्त्वं प्रकाशयितुं प्रवर्तते । अतो भगवन्महत्त्वकीर्तनपरायणः साधकोऽचिरादेव समुन्नतिमार्गमधिरोहतीत्यत्र नास्ति काचित्संशीतिः । तथाचोक्तं श्रीमद्भागवद्गीतायां भगवता श्रीकृष्णेन स्वयमेव—

मच्चिता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥ = १०।९ ।

६ —जगत्सेवायां प्रवृत्तिरेव साधनराज्ये समुन्नतिकर्त्रीति महर्षेः वसिष्ठस्यास्ति सम्मतिः । जगद् ब्रह्मस्वरूपमवधार्य जगवत्सेवैव भगवत्सेवेति मन्यमानं साधकं जगत्सेवाप्रवृत्तिरेव, अवश्यमेव साधनमार्गे अग्रे सारयति सर्वत्रैव संसारे भगवत्स्वरूपं निरीक्षमाणो भक्तो यथासंभवं द्रव्येण, विद्यया, ज्ञानादिना च भगवत्स्वरूपस्य जगतः सेवायां प्रवर्तमानो भगवद्भक्तिं लभते । साधकस्य परमोपकारसेवाकार्येण भगवद्भक्तेरवाप्तिः स्वाभाविकी । यस्मिन् भक्तेः जगत्सेवायाः प्रवृत्तिर्दृश्यते स किल नूनमेव मुक्तिप्रदाया भक्तेरधिकारी परमात्मस्वरूपपरिज्ञानपूर्वकं जागतिकहितसाधनपरायणो भक्तः विशिष्टं महत्त्वं बिभर्ति, विश्वस्मिन् समादरभाक् च भवति । तथाचोक्तम्—

अथ मां सर्वभूतेषु भूतात्मानं कृतालयम् ।
अर्हयेद्दानमानाभ्यां मैत्र्याभिन्नेन चक्षुषा ॥ = श्री०भा०३।२९।२७॥

अपि च— मनसैतानि भूतानि प्रणमेद् बहु भावयन् ।
ईश्वरो जीवकलया प्रविष्टो भगवानिति ॥ = श्री०भा०३।२९।३४

७—परमात्मनि समर्पिताखिलाचरणो भक्तः समुन्नतिमार्गेऽग्रे सरतीति महर्षेः कश्यपस्यास्ति मतम् । यो हि साधकः निखिलान्यपि कर्माणि भगवते समर्प्य फलाफलभागवच्चरणारविन्दे स्वीयानि सर्वाण्यपि कर्माणि समर्पयतः साधकस्य चिरात

कर्तृत्वाभिमानः समूलनाशं नश्यति । एवमहङ्कारे विनष्टे स शीघ्रमेव परमात्मनि आत्मानं विलीय स्वरूपोपलब्धिं कुरुते । अतः कश्यपस्य मतेन भगवदर्पिताखिलचरणं समुन्नतिलक्षणमित्यत्र नास्ति सन्देहलवोऽपि । तथाचोक्तं भगवताश्रीकृष्णेन गीतायाम्—

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय ! तत् कुरुष्व मदर्पणम् ॥ ९।२७ ॥

८—भगवतो विस्मरणेन व्याकुलताप्राप्तिरेव साधकस्य समुन्नतेः लक्षणम् । यदा भगवतो विरहेण भक्तस्य मनो नितरां व्याकुलतामनुभवति तदा स साधनमार्गेऽग्रे सरतीति देवर्षेः नारदस्य मतमस्ति । यदा साधकस्य चित्तं भगवदभिमुखं भवति तदैव देवर्षिनारदमतेन साधके भक्तेः प्राकट्यमापद्यते । यथा पतिपरायणायाः पतिव्रतायाः पत्युरसान्निध्ये प्रेम तीव्रत्वं भजते तथैव भगवतो विरहे भगवत्प्रेमासक्तस्य भक्तस्य हृदयं विरहेण व्याकुलं भवति । प्रेमपात्रे चक्षुर्विषयातिक्रान्ते न्यूनमपि प्रेम प्रचुरं भवति । पूर्णप्रेममार्गे सर्वविधानामन्तरायाणां विरहाग्निना दहनमत्यावश्यकमित्यवधार्य रासोत्सवे भगवान् श्रीकृष्णो मध्ये मध्ये अन्तर्दधौ, गोपीभिश्च भगवतो विरहे पूर्णा यन्त्रणा अनुभूताः । श्रीमद्भगावते भगवता श्रीकृष्णेन गोपीनां प्रश्नस्योत्तरे विरहमहत्त्वं स्पष्टमुद्घोषितम्—

नाहं तु सख्यो भजतोऽपि जन्तून् भजाम्यमीषामनुवृत्तिवृत्तये ।
यथाऽधनो लब्धधने विनष्टे तच्चिन्तयाऽन्यन्निभृतं न वेद ॥ = १० ३२।२०॥
एवं मदर्थोज्झितलोकवेदस्वानां हि वो मय्यनुवृत्तयेऽबलाः ।
मया परोक्षं भजता तिरोहितं मासूयितुं मार्हथ तत् प्रियं प्रियाः ॥=१०।३२।२१॥

रासोत्सवप्रसङ्गे भगवदन्तर्धान-तद्विरहव्याकुला गोप्यः समस्तेऽपि वने दैन्यं दधानाः महता परिश्रमेण अन्तर्हितस्य प्रेष्ठस्य भगवतः श्रीकृष्णचन्द्रस्यान्वेषणमकार्षुः दीनवत्प्रार्थयामासुश्च । तथा हि श्रीमद्भागवते—

अन्तर्हिते भगवति सहसैव व्रजाङ्गनाः ।
अतप्यंस्तमचक्षाणाः करिण्य इव यूथपम् ॥१०।३०।१॥
गायन्त्य उच्चैरमुमेव संहता
विचिक्युरुन्मत्तकवद् वनाद् वनम् ।
पप्रच्छुराकाशवदन्तरं बहि—
र्भूतेषु सन्तं पुरुषं वनस्पतीन् ॥१०।३०।५॥
हा नाथ ! रमणप्रष्ठ ! क्वासि क्वसि महाभुज !
दास्यास्ते कृपणाया मे सखे ! दर्शय सन्निधम् ॥१०।३०।४०॥

अतो देवर्षेः नारदस्यमतेन भगवद्विरहव्याकुलताप्राप्तिः साधनसमुन्नतेरुत्तमं

लक्षणमित्यत्र न मनागप्यस्ति सन्देहलेशः । इत्यमेवामष्टानां भक्तेराचार्याणां भक्त-समुन्नतिसाधनविषये परस्परमस्ति सूक्ष्मो भेदः ।

भक्तानां चातुर्विध्यम्

भगवद्भक्तः तमोरजोऽभिवपुरसरं यथा यथा सत्त्वगुणमासादयति तथा तथाऽसौ समुन्नतेः भक्तिमार्गेऽग्रेसरति । गीतायां भगवता श्रीकृष्णेन चतुर्विधा भक्ता उक्ताः-आर्तः, जिज्ञासुः, अर्थार्थी ज्ञानी च । तत्रार्तः तामसः, जिज्ञासुः राजसः, अथार्थी च सात्त्विकः । तामसिकादार्त्तभक्ताद् राजसिको जिज्ञासुः ततश्च सत्त्विकोऽर्थार्थी उक्तः श्रेष्ठः । त्रयाणामेषामपक्षया शुद्धसत्त्वप्रधान. चतुर्थो ज्ञानी सर्वश्रेष्ठः समाम्नातः । तत्राद्यास्त्रयो भक्ताः त्रिगुणात्मकाः सकामाश्च । अत एषां त्रयाणां गौण्या भक्त्या सहास्ति सम्बन्धः, परं चतुर्थो ज्ञानीभक्तो निष्कामत्वाद्भवति पराया भक्तेरधिकारवान् समदर्शी च ।

यद्यपि आर्तो जिज्ञासुः अथार्थी च भक्ता भवन्ति कामनापरायणाः तथापि ज्ञानिनि भक्ते न भवति कामनाया गन्धोऽपि । श्रीस्वामिना नारायणतीर्थेनापि शाण्डिल्य-भक्तिसूत्रस्य व्याख्यायां भक्तिचन्द्रिकाख्यायामयमर्थः स्पष्टीकृतः । तथाहि-तत्रार्त-स्यार्तिनिवृत्तिः, जिज्ञासोर्ज्ञानम्, अर्थार्थिनस्तु अर्थः फलमिति निश्चीयते सामर्थ्यात् । ज्ञानिनो भक्तस्य तु फलकाङ्क्षायां निष्कामत्वेन उक्तफलानामसम्भवः । अतो भगवता श्रीकृष्णेन गीतायां चतुर्ष्वेतेषु भक्तेषु ज्ञानिनो भक्तस्य प्राशस्त्यं स्पष्टमुद्घोषितम्—

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन !
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च पुरुषर्षभ !
तेषां ज्ञानी नित्ययुक्त एकभक्ति र्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥ =७।१६,१७॥

भक्तिमार्गे त्रिविधोऽधिकारः

भक्तिमार्गेऽग्रेसरतो भक्तस्य स्वेष्टदेवताविषये भवति त्रिविधोऽधिकारः । तत्र (१) ममैवासाविति प्रथमः (२) तस्याहमिति द्वितीयः (३) स एवाहमिति तृतीयः । (१) ममैवासौ वर्तते इति प्रथमेऽधिकारे सांसारिकस्नेहः-प्रेम-श्रद्धाधिक्ये एतद् दृश्यते यत् तदधिकारिणो मानवस्य प्रथमं ममैसासविति अनुभवः समुदेति । मदीयः पुत्रः, मामकः पिता, मम स्त्रीः मामकीनः पतिश्चेत्येवंविधस्वाभिमानयुक्तात्मीयता-गुम्फितोऽनुरागोऽनुरागवतो मनसि यदा उत्पद्यते तदैवासौ प्रेमपात्रसुखदुःखयोः स्वकीये सुखदुःखे मेलयन् तान् आत्मीयान् विदधाति । एवंविधस्वाभिमानयुक्तेऽनुरागे जातेऽनु-रागपात्रेऽनुरागकर्तरि च एकत्वं जायते । वैध्या रागात्मिकायाश्च भक्तेः साहाय्येन यदा भक्तः कृतकृत्यतामासादयति तदासौ इदमनुभवति यद् भगवान् ममैवास्ते । अधिकारस्यास्य प्राथमिकतया तत्राहङ्कारसम्बन्धः तिष्ठति । मदीयाः पुत्रादयो

ममेच्छानुरूपं प्रवर्तन्तामिति समीहा यथा पित्रादीनां हृदयेषु समुत्पद्यन्ते तथैव स्वाभिमानयुक्तवासनाधिकारेऽत्र भक्तहृदयेऽपि जागर्ति ।

(२) द्वितीयेऽधिकारे भाग्यवता भक्तेन इदमनुभूयते यद् अहं तदीय एवास्मि । प्रथमेऽधिकार मदीयोऽसावित्यभिमानत. स्वार्थःस्वाधीनता, स्वाभिमानश्च सन्तिष्ठन्ते, परमत्र द्वितेयेऽधिकारे स्वार्थसम्बन्धस्यात्यन्ताभावः । यतः तदीयोऽहमिति अनुभवे मदीयं सर्वस्वमेव तदीयतामाद्यते । मदीयस्वार्थस्तु तदीयसमीहायां विलीयते । एवमेव भक्तेः सुमधुरदशायामत्र स्वाधीनतावृत्तिरपि विलयं याति । यदा स्वकीयानि प्राणमनांसि जीवनोद्देश्यस्वाधीनत्वादीनि न तिष्ठन्ति तदा स्वीयायाः स्वतन्त्रसताया अभाव एव भवति । एवमलौकिकायां प्रेमदशायामस्यां स्वाभिमानं निजाहङ्कारास्तित्वं च सहैव स्वकीये हृदयनाथे विलयमभ्युपगच्छतः । तस्याहमिति धारणायां दृढीभूतायां समूलमुच्छिद्यते स्वाभिमानः । आत्मीयं सर्वस्वमपि स्वेष्टदेवस्यैव, न स्वकीयमिति अन्तर्वहिः प्रकृतिः भक्तस्य जागरुकतामापद्यते । अत्र समुन्नतेऽधिकारे भाग्यशालिनो भक्तस्य मानसिकी दशा स्वयमेवं विलयं जायते ।

(३) तृतीयेऽधिकारे सोऽहस्मीति भवति अनुभवः । निर्विकल्पसमाधिदशामुपगतोऽत्राधिकारे भागवतः भक्तः स्वस्मिन् भगवति च अभेदमनुभवति । त्रिषु अपि एतेषु अधिकारेषु उत्तरोत्तरं जैवाहङ्कारमूलकास्तित्वपरित्याग एवावगन्तव्यः । त्रिविधानुरागमूलकेऽधिकारविषये स्पष्टमुक्तमस्ति यत् तृतीयेऽधिकारे आत्मपरमात्मनोरैक्येन भेदाभावाद्वैततत्त्वमात्रमेवावशिप्यते । तथा चोक्तमभियुक्तैराचार्यवर्यैः—

> प्रेम्णोऽस्ति त्रिविधो भेदस्तत्राद्यः स ममेत्ययम् ।
> अहं तस्येत्ययं मध्यः सोऽहमस्मीति चान्तिमः ॥
> इहाद्वैतदशायां हि स्वानुभूत्यैकगोचरः ।
> ब्रह्मणस्तस्य शक्तेश्च भेदाभावः प्रसिध्यति ॥

भक्तेः भूमिकाभेदः

सप्तविधानां ज्ञानभूमिनामवलम्बनेन उपसनाभूमयोऽपि सप्तविधा भवन्ति ।

(१) तत्र भक्तिरसरसिकः साधको यदा भक्तिमार्गेऽग्रेसरति तदासौ भगवद्दिव्यनाम्नामवम्बनेन भगवत्सत्तामनुभवितुं क्षमते । अत उपासनाकाण्डस्याचार्यैः प्रथमा भूमिः तामपरा प्रोक्ता । जगदिदं नानरूपात्मकमिति विज्ञानानुसारं शिष्यो गुरुदेवस्योपदेशतो यदा मन्त्ररूपं दिव्यं भगवन्नामावगच्छति तदा वैध्या रागात्मिकायाश्च भक्तेः सोहाय्येन तस्य प्रेम भगवन्नाम्नि तिष्ठति, तदानीं तन्नामावलम्बनेन स्वेष्टदेवतायाः स्मरणं जायते । तथा च साधको नाम्नः श्रवण-कीर्त्तनादिना स्वीयमन्तः करणं भगवद्भावमयमनुष्ठातुं सामर्थ्यं लभते । इयमेव प्रथमावस्था प्रथमा भक्तिभूमिका ।

(२) उपासनामार्गस्य द्वितीयभूमौ साधको नानादिव्यरूपावलम्बनेन भगवद्भावानुभवसामर्थ्यमासादयति । यथा दैवराज्यसम्बद्धः शब्दो मन्त्रः तथैव दैवराज्यसम्बद्धं रूपमपि दिव्यं समाम्नातम् । नामापेक्षया रूपाधिकारः सूक्ष्मः । यतो नाम्ना वहिर्जगत्रः अधिकः सम्बन्धः, परन्तु रूपे ध्यानभूमेरधिकः सम्बन्धो वेद्यः । साधको नामापेक्षया दिव्यरूपस्मरणमात्रेण भगवदभक्तिमये रससागरे निमज्जमानो द्वितीयांभक्तिभूमिमासादयति ।

(३) तृतीयभूमौ भगवतो विभूतीनामानन्त्येऽपि शास्त्रेषु तन्निर्देशकाले अश्वत्थो वृक्षणाम्, गरुडोऽण्डजानाम्, ब्राह्मणो वर्णानाम्, राजा मानवानाम्, सन्यास आश्रमाणाम्, सामवेदो वेदानामित्याद्युक्तरीत्या यत्र यत्रैश्वर्यसौन्दर्यौदार्यशक्तिप्रभावविशेषा मनांसि समाकर्षेयुः तत्र तत्र तदानीं भगवद्भावादयो जायते । भक्तिमान् साधकः प्रतिक्षणं भगवद्विभूतिसाहाय्येन भगवद्भावनिमग्नो भवितुमर्हति । भगवति संलग्नचेता भाग्यवान् भक्तः यत्रैव स्थूलप्रपञ्चं सूक्ष्मं विलोककयति तत्रैव विभूतेरवलम्बधारणया भगवन्तं स्मरति । दिवसे सूर्यं, रात्रौ निशानाथं नक्षत्राणि वा पुरुषेषु तेजः, स्त्रीषु शोभाः, वृक्षलतौषधिप्रमृतिषु पुष्पफलपल्लवादीनि इन्द्रियेषु मनः जीवमात्रे चैतन्यमित्यादीनि भगवद्विभूतिभूतानि एव निमालयति । तृतीयभूम्यधिकारी भक्तशिरोमणिः । एवं च साधको भक्तिभूमिमिमां तृतीयामासाद्य यत्रैव नैजं मानसं नियोजयति तत्रैव भगवद्विमूत्यवलम्बनेन भगवन्तमेव विलोकयति ।

(४) भक्तिमार्गस्य चतुर्थभूमिकामासाद्य भगवद्भक्तः स्थूलायाः सूक्ष्माया-वा शक्तेराश्रयेण भगवद्भावं भजमानः समाधिभूमिमासादयति । अत्र साधकान्तः-करणे सूक्ष्मतरतामापद्यमाने स्थूलोऽपि पदार्थः सूक्ष्मायते । तदानीं स्थूलां सूक्ष्मां वा शक्तिमासृत्य साधकः कृतकृत्यतामापद्यते । स्थूलेषु सूक्ष्मेषु वा प्रपञ्चेषु न तादृशं किमपि स्थानं यत्र भगवच्छक्तिविकाशो न विद्यते । यथाग्नौ दाहकता, दीपादौ च प्रकाशिका शक्तिः मनसः, सर्वगामिनो शक्तिः, प्रणानां च सर्वसंचालिका शक्तिः सर्वप्रसिद्धैवास्ते । तथा च चतुर्थीं भूमिकामुपगतः साधकः सर्वत्र भगवतो व्यापकतामनुभवति ।

(५) भक्तिमार्गस्य पञ्चमीं भूमिमासादयतः साधकस्य भक्तिमयदार्शनिकदृष्टिः नितरां सूक्ष्मायते । तदानीं कवलं प्रकृतेः सत्त्वरजस्तमोगुणानां दर्शनेन कृतकृत्यतामासादयति साधकः । भक्तेर्भूमिकामिमामासादयन् साधकः केवलं गुणदर्शनसाहाय्येन भगवद्भावमनुभवति । तदानीं त्रिगुणानां तद्वन्धनेऽसामर्थ्यं जायते । साधकश्च सर्वदैव भगवत्सत्तामनुभवन् निर्विकल्पकं ज्ञानं लभते, शास्त्रानुसारं च कार्यं कुरुते ।

तथा चोक्तं श्रीमद्भागवतगीतायां स्वयमेव भगवता श्रीकृष्णेनार्जुनं प्रति—

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥ = १६।२३ ।

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि। = १६।२४।

वास्तविकं धर्माधर्मयोः स्वरूपज्ञानं न साधारणमानवबुद्धिगम्यमस्ति। अपितु श्रीमद्भागवतानुसारं धर्मः साक्षाद् भगवता प्रणीतोऽस्ति। अतः तस्य वास्तविको ज्ञाता बोद्धा संरक्षकश्च भगवानेवास्ति, न ऋषयः, न वा देवाः, न च सिद्धाः, नापि विद्याधरादयो देवयोनयःऽकुतो मनुष्याः? धर्मस्य वास्तविकं रहस्यागन्तुमर्हन्ति?

धर्मं तु साक्षाद् भगवत्प्रणीतं न वै विदुः ऋषयो नापि देवाः।
न सिद्धमुख्या असुरा मनुष्याः कुतश्च विद्याधरचारणादयः॥ ६।३।१९

अत एवोक्तं महाभारते—

धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः॥

तस्मात् शास्त्रैकगम्यो वैदिकःस्वधर्मः सर्वेषां सर्वथा श्रेयस्कर इत्यत्र नास्ति कोऽपि सन्देहलेशसंसर्गः।

(६) भक्तिमार्गस्य षष्ठीं भूमिकामुपगतो भक्तो भगवतः सच्चिदानन्दमयभावाननुभवन् सर्वदैव भावसमुद्रे निमज्जति उन्मज्जति च। गुणदर्शनदशायां विशेषरीत्या द्रष्टृ-दृश्ययो पार्थक्यं विलोक्यते भावदर्शनदशायामत्र तु तत् शिथिलायते। गुणापेक्षया भावाधिकारः समुन्नतोऽस्ति, यतो हि त्रिभिः गुणैरेव सृष्टिस्थितप्रलयाः, भावेन च तदनुभवः। इयं भावदशा स्वरूपस्थेन महापुरुषेण व्युत्थानदशायामासाद्यते।

(७) भक्तिमार्गस्य सप्तमी भूमिमुपगतेन ज्ञानिना भक्तशिरोमणिना स्वस्वरूपावस्थानाधिकारः समासाद्यते। ब्रह्मभावमयो ज्ञानी भक्तो यदा जगत्कल्याणाय यां व्युत्थानावस्थामवाप्नोति सा किल षष्ठी भूमिका समाख्याता। अत्रान्तिमायामस्यां सप्तमभूमिकायां तु परिपूर्णमद्वैतभावमधिगत्य स्वस्वरूपावस्थानं निरूपितमिति उभयोरस्ति सूक्ष्मो भेदः। तथा च प्रकृतेः प्रवृत्तेः शक्तेश्च भेदादेते सूक्ष्माः प्रकाराः प्रदर्शिताः

ननु भक्तिसम्बन्धिभेदेषु एतेषु सत्स्वपि लक्ष्यभेदो न भवति, साक्षात् परम्परया वा सर्वेऽपि साधकाः परां भक्तिमासादयन्त्येव तर्हि कथं। कल्पनाभेद इति चेत्?

अत्रोच्यते-विश्वस्य त्रिगुणात्मकत्वात् मानवीया प्रकृतिरपि त्रिगुणात्मिका। विशेषतो मानवदेहस्य पाञ्चभौतिकतया प्रत्येकमनुष्ये तत्त्वभेदोऽवश्यं भावी। अतः त्रिगुणतन्दर्भावभेदाननुसृत्य पञ्चभूतभेदतः साधकानां प्रकृतिः विभिन्नतां भजते। तस्माद् भक्तप्रकृतिभेदत एते भेदा निर्णीताः। किञ्च पूर्वजन्मार्जितानां प्रारब्धकर्मणाम् इहजन्मार्जितानां च क्रियमाणसंस्काराणां भेदानुसारेण प्रवृत्तिभेदोऽपि निश्चप्रचः। सर्वेषु अधिकारेषु ज्ञान-क्रिया-शक्तिप्रभृतयो न सन्ति समानाः। अतो भक्तेराचार्यैः

भक्तानां प्रकृति-प्रवृति-शक्तितारतम्यानुसारं पूर्वोक्ताधिकारभूमिकाभेदानां कल्पना कृताऽस्ति । योगवासिष्ठे तु महर्षि वंसिष्ठो भगवन्तं रामं प्रति सप्तभूमिका एवमुक्तवान्—

इमां सप्तपदां भूमिं त्वं समाकर्णयानघ !
नानया ज्ञातया भूयो महापङ्के निमज्जसि ॥
ज्ञानभूमिः शुभेच्छाख्या प्रथमा समुदाहृता ।
विचारणा द्वितीया स्यात् तृतीया तनुमानसा ॥
सत्त्वापत्ति श्चतुर्थी स्यात्ततोऽसंसक्तिनामिका ।
पदार्थभाविनी षष्ठो सप्तमी तुर्यगा स्मृता ॥

यथा वैदिकानां ब्राह्मणानां वेदाध्ययनमत्यन्तं प्रियं वर्तते, कवीनां सरसकाव्य-वर्णनमतीवरुचिकरं भवति, वैष्णवानां भगवतो विष्णोः दासत्वञ्चातिश्रद्धेयं भवति तथैव वैष्णवानां विष्णुभक्तिरसः परमः प्रियो भवति । अतो वैणवा भक्ता भक्ति-मन्तरा मुक्तिमपि न वाञ्छन्ति । तथाहि ब्रह्मवैवर्तस्य पुराणस्य श्रीकृष्णजन्मखण्डे प्रोक्तं भगवता व्यासदेवेन—

वेदाभ्यासो वैदिकानां कवीनां काव्यवर्णनम् ।
विष्णुदास्यं वैष्णवानां विष्णुभक्तिरसं परम्॥
विष्णुभक्तिं विना नैव मुक्तिं वाञ्छन्ति वैष्णवाः । = ५९।६३½

अखिलब्रह्माण्डनायको भगवान् आदिनारायणः स्वकीयाया आदिशक्तेः मायाया माध्यमेन सृष्टिं प्रकुरुते । तथाच मायायां प्रतिविम्बितं चैतन्यं जीवसंज्ञां लब्ध्वा कारण-सूक्ष्म-स्थूलशरीरैःसम्बद्धं सद् उद्भिज्ज-स्वेदज-अण्डज-जरायुजयोनीरतिक्राम्यन् मानवशरीरमुपढौकते—

अविद्यायां तु यत् किञ्चित् प्रतिविम्बं नगाधिप !
तदेव जीवसंज्ञं स्यात् सवदुखाश्रय च यत् ॥
ममैवांशो जीवलोके जीवभूतः सनातनः ।

मानवेतरासु योनिषु स्वाभाविकसंस्कराराश्रयेण जीव. क्रमोन्नतिं लभते, किन्तु मानवयोनौ जीवः स्वतन्त्रः सन् स्वसंस्काराधीनो जायते । अतोऽसौ क्रमोर्ध्वगतिमप्राप्तः निजकर्मानुसारेण कदाचिदुन्नतः कदापि अवनतः सन् भिन्नां-भिन्नां योनिमासादयति ।

तथाच सृष्टे विभिन्ना जीवाः प्रकृतेरुर्ध्वगामिना प्रवाहेण उद्भिज्ज-स्वदेज-अण्डज-जरायुज योनिषु क्रमशः समुन्नतां योनिं नीयन्ते । तदानीं प्रकृतिमातुरधीनत्वात् जीवानां निर्बाधं क्रमोन्नति र्जायते, किन्तु यदा मानवयोनिमुपगते जीवे पूर्णरूपेण पञ्चकोषाणां विकाशात् तत्राहङ्कार-बुद्ध्योरपि विकाशो जायते तदा जीवः प्रकृतौ स्वामित्वं स्थापयति, प्रकृतिमातुरधीनत्वं परित्यजति, स्वकृतकर्मणा दायित्वं च भजते । अतो मानवयोनौ एव धर्माधर्मयोरधिकारः समाम्नातः शास्त्रकृद्भिः—

मनुष्येषु महाराज ! धर्माधर्मौ प्रवर्तते ।
इयं हि योनिः प्रथमा यां प्राप्य जगतीपते !
आत्मा वै शक्यते त्रातुं कर्मभिः शुभलक्षणैः ॥

मानवयोनिव्यतिरिक्तासु उद्भिज्जादियोनिषु जीवः स्वकर्मणा स्वतन्त्रसंस्कारार्जनं कर्तुमपारयन् निर्बाधं क्रमोन्नतिमासादयति । तत्र केवलं प्रकृतिरेव माता शिशुमिव स्वाभाविकान् संस्काराननुसृत्य क्रमशो जीवान् संवर्द्धयति । यथा नद्यां प्रवहमाणः काष्ठखण्डो वेगेन समुद्राभिमुखं नीयते तथैव विश्वास्मिन् जायमानो जीवोऽपि संस्काराभिमुखमेवे प्रधावति । विश्वस्मिन् अस्मिन् संसारे समेषां पदार्थानां धारको धर्म एवास्ति । न केवलं मानवीयसमाजस्य, प्रत्युत समस्तस्यापि संसारस्य प्रतिष्ठा धर्म एव । तथा चोक्तम्—धर्मो विश्वस्य जगतः प्रतिष्ठा इति । यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः इति धर्मस्य स्वरूपं प्रतिपादयता महर्षिणा कणादेन यानि कर्माणि इह लोकेऽभ्युदयसाधकानि, यानि च परलोके कैवल्यप्रदानि, तानि निखिलान्येव धर्म एव स्वीकृतः । धर्माधर्मयो व्यवस्थायां वेदस्यैव प्रामाण्याद् वेदे यानि कर्माणि विधिरूपेण विहितानि, तानि धर्म प्रोच्यते, यानि च हेयतया तत्र निषिध्यन्ते, तानि अधर्म इति कथ्यते । अतोहि वेदोक्तो धर्मो वेदव्यासेन श्रीमद्भागवते महापुराणे साक्षात् स्वयम्भुनारायणस्वरूपोऽङ्गीकृतोऽस्ति—

वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ।
वेदो नारायणं साक्षात् स्वयम्भूरिति शुश्रुमः ॥ = ६।१।४० ॥

अतएव महाभारतस्य शान्तिपर्वणि तेन तथैव धर्मो धराधारकत्वेन प्रोक्तः—

धारणाद्धर्म इत्याहु धर्मेण विधृताः प्रजाः ।
यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः ॥ १०९।११ ॥

अतो धर्मस्य आश्रयेण अस्मिन् लोके प्राणिनां सर्वविधोऽभ्युदयः संजायते, परलोके च परमात्मप्राप्त्या शाश्वती शान्तिरवाप्यते । धर्माधर्मयो निर्णये न केवलं मानवीया बुद्धिरेवास्ति पर्याप्ता, अपितु तदर्थं शास्त्राश्रयणमपि अनिवार्यतयापेक्षितं भवति ।

मनुष्ययोनौ मानवः कर्मानुष्ठानाधीनत्वात् स्वीयपुरुषार्थद्वारा स्वीयां समुन्नतिमनुष्ठातुमर्हति स्वकीयेन च पापकर्मणा नीचयोनिमप्यासादयितुं शक्नोति । अत एव शास्त्रेषु विद्वद्भिः सर्वापेक्षया मानवजन्मनः सर्वाभ्यर्हितत्वमुपपादितम् । अहङ्काराक्रान्तो जीवः प्रकृतेरूर्ध्वगामिनं प्रवाहं परित्यजन् प्रकृतेरधीनत्वं विहाय स्वेच्छाचारी सन् विपरीतगतिस्वरूपामवनतिं लभते । तदानीं धर्मो हि मानवसाहाय्यमाचरन् शास्त्रीयविधानद्वारा तस्यावनतिं निरूध्य तं क्रमोन्नतिमार्गे परिचालयति । तथाचोक्तम्—

उन्नतिं निखिला जीवा धर्मेणैव क्रमादिह ।
विदधानाः सावधाना लभन्तेऽन्ते परं पदम् ॥

वेदोक्तः प्रकृत्यनुकूलो धर्म एव वर्णाश्रमविहितः मनवस्योच्छृंखलगतिं निरुध्य क्रमशः मानवमुन्नमयति । धर्मसाहाय्येनैव मानवः सांसारिकीं विविधां वासनां विहाय भक्त्या आत्मतत्त्वं विज्ञाय आत्मारामतारूपं परमानन्दमवाप्तुं शक्नोति।

आनन्दोपलब्धिरेव जीवस्य जीवनशक्तेरखिलपुरुषार्थानां च मौलिक आधारः । अतो नित्यानन्दप्रवासी जीव आनन्दघन-सच्चिदानन्द-परमपुरुषोत्तम-चरणसरसीरुह-माश्रन् क्रमशो वैध्या रागात्मिकायाश्च भक्तेः आनन्ददायिनीं समुन्नतां कक्षामति-क्रमन् परां भक्तिमासाद्य कृतकृत्यतामधिगच्छति । पराया भक्तेः पदमारूढो जीवन-मुक्तो महात्मा भक्तो ज्ञानमधिगम्य आत्मना साकं व्यापकस्य परमात्मनः साहाय्यमुप-लभते । परां भक्तिं द्वारीकृत्य परमात्मनः स्वरूपावगतौ सत्यां श्रुतिः समुद्घोषयति—

भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥
यदा सर्वे प्रमुच्यते कामा येऽस्य हृदि स्थिताः ।
अथ मर्त्योऽमृतो भूतो भक्त्या ब्रह्म समश्नुते ॥

मनुष्यजीवनं हि वाहुल्येन दुःखमयमेवास्ति । अत एव भारतीयदर्शनेषु दुःख-स्यास्तित्वमङ्गीकृत्य तदपाकरणाय अनेके उपायाः प्रतिपादिताः सन्ति । भगवता बुद्धेन दुःखदूरीकरणाय सम्यग्दर्शन-सम्यक्संकल्प-सम्यग्वचन-सम्यक् कर्मान्त-सम्यग्जीव-सम्यग्व्यायाम-सम्यक्स्मृति-सम्यक्समाधिरूपा अष्टावुपाया प्रदर्शिताः । योगवासिष्ठं तु रामस्य दुःखापनोदनायैव निर्मितम् । राज्ञा दशरथेन यदा श्रुतं यद्रामोऽहर्निशं जगद्-दुःखानि चिन्तयन् सदोदासीनस्तिष्ठति, तदा तेन तदपाकरणाय कुलगुरवे वसिष्ठाय समर्पितो रामः । तेन दुःखकारणं जगति राग एव । अज्ञानेन दुःख जायते, ज्ञानेन च तन्निवृत्तिरित्यादिकमाध्यात्मिकं तत्त्वमुपदिश्य रामस्य विषादो दूरीकृतः, यस्य विवरणं योगवसिष्ठे विस्तृतं गुम्फितमस्ति । श्रीमद्भगवद्गीताया आरम्भोऽपि अर्जुनविषादस्य अपनोदनायैव जातः । पूर्वमीमांसामते संसारो दुःखमयः, सुखस्य धाम तु स्वर्ग एवास्ति । अतएव तत्प्राप्तये तत्र 'स्वर्गकामो यजेत' इत्यादिना यज्ञायोपदेशः संगच्छते । न्यायदर्शननये संसारो दुःखबहुल एवास्ति । मिथ्याज्ञानमेवास्ति दुःखस्य मूलं तन्निवृत्तये एकमात्रमुपायश्च प्रमाणप्रमेयादीनां षोडशपदार्थानां तत्त्वज्ञानोपलब्धिरेव । वैशेषिक-दर्शननये तु दुःखस्यात्यन्तिकनिवृत्तिरेव निःश्रेयः; तत्प्राप्तिश्च तत्त्वज्ञानादेव भवति । सांख्यदर्शनं तु प्राणिमात्रम् आध्यात्मिकादि त्रिविधदुःखाभिभूतमेव मनुते । तन्मते दुःखात्यन्तनिवृत्तिरेव परमपुरुषार्थः तत्साधनन्तु प्रकृतिपुरुषमहदहङ्कारादिपञ्चविंशति-तत्त्वानां ज्ञानमेवास्ति ।[1]

१. पञ्चविंशतितत्त्वज्ञः यत्र कुत्राश्रमे वसन् ।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥ = मा० वृ०

योगदर्शनं तु सांख्यस्य पञ्चविंशतितत्त्वानि स्वीकुर्वन् षड्विंशतितममीश्वरतत्त्वं स्वीकरोति । तन्मते प्रकृतिपुरुषसंयोगाद् दुःखं च तद्वियोगाच्च कैवल्यं भवति । योग-मतानुसारमात्मा स्वच्छस्फटिक इव निर्मलोऽस्ति, न तत्र दुःखादि संभवति; किन्तु जपाकुसुमसान्निध्यात् स्वच्छे स्फटिके रक्तोपराग इव स्वचित्तवृत्त्या सह सम्बन्धेन तत्र दुःखं भवति । अतो योगप्रक्रियया चित्तवृत्तेर्निरोधात् पुरुषस्य स्वरूपेऽवस्थानं जायते । वेदान्तदर्शनमते जीवब्रह्मणोः पार्थक्यज्ञानमज्ञानं भ्रमो वोच्यते । वस्तुतः तयोः पार्थक्यं नास्ति; किन्तु भ्रमात् पार्थकयं प्रतीयते । मायैव दुःखस्य मूलं तन्निवारणं ब्रह्मज्ञानादेव भवति । वेदान्ते ब्रह्मज्ञानाय चत्वारि साधनानि निर्दिष्टानि, नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, साधनतुष्ट्यसंपत्तिः, मुमुक्षुत्वञ्च । एभिः साधनैर्ब्रह्मज्ञान-मुपलभ्य जीवः कृतकृत्यो भवति, न तस्य किमप्यवशिष्यते कर्तव्यं नवा विद्यते किमपि कार्यम् । एवञ्च यथा सर्वेषु दर्शनेषु दुःखस्यापनोदनाय विभिन्ना उपायाः प्रदर्शिताः तथैव श्रीमद्भागवतेऽपि दुःखनिवृत्तये भक्तिज्ञानविरागदीनि साधनानि निर्दि-ष्टानि सन्ति ।

अद्वैतवेदान्तदर्शनस्य प्रधानाचार्याणां भगवत्पूज्यपादश्रीशङ्कराचार्याणां मते केवलं ब्रह्मैव सत्यमस्ति, तदतिरिक्तं सर्वं दृश्यप्रपञ्चं मायिकं भ्रमोऽसत्यं वा । ब्रह्मज्ञानो-दयेन दृश्यप्रपञ्चस्य निषेधादखण्डं चिन्मयमेकरसमद्वितीयं ब्रह्मैवावशिष्यते । तददृश्य-अग्राह्य-अलक्ष्य-अचिन्त्यादिशब्दैर्व्यवह्रियते । ते परमार्थदृष्ट्या ब्रह्म निर्गुणं व्यवहा-रिकदृष्ट्या च सगुणं स्वीकुर्वन्ति । विशिष्टाद्वैतसंप्रदायप्रवर्तका श्रीरामानुजाचार्याः सगुणमेव ब्रह्म मन्यन्ते, न निर्गुणम् । तन्मते ब्रह्म चिदचिद्विशिष्टमस्ति । जीवजगती ब्रह्मण एव शरीरे स्तः । अतो हि ब्रह्मणः तत्कार्यञ्च भिन्नं नास्ति । अत एव ब्रह्म विशेष्यं, ते च विशेषणे स्तः । विशेष्यञ्च विशेषणेन सहैव सम्बद्धं तिष्ठति, नासम्बद्धम् । अतश्चिदचिद्विशेषणाभ्यां सम्बद्धतया ब्रह्म विशिष्टा-द्वैतमुच्यते । ते हि जीवो जगच्च ब्रह्मणो भिन्ने स्वीकुर्वन्ति । चिदचिदीश्वराणां संयोग एव ब्रह्म । अत एव "एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातः परं वेदितव्यं हि किञ्चित् । भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्" (१, १२) इति श्वेताश्वरोपनिषत् संगच्छते । द्वैतसंप्रदायाचार्याः श्रीमध्वाचार्या द्वे एव तत्त्वे स्वीकुर्वन्ति, एकं स्वतन्त्रं तत्त्व द्वितीयञ्चास्वतन्त्रम् । अशेषकल्याणगुणगणाकरो भगवान् विष्णुः स्वतन्त्रं तत्त्वमस्ति, जीवो जगच्चास्वतन्त्रे स्तः तत्त्वे । अतो जीवजगती भगवदधीने एव स्तः । श्रीरामानुजचार्यमते ईश्वर एव जगद्रूपेण परिणमते, परं मध्वाचार्यमते जीवजगद्भगवतां पार्थक्यं नित्यमस्ति । तन्मते भगवान् नियामकः नियम्यश्च जीवः । द्वैताद्वैतसंप्रदाचार्याणां श्रीनिम्बार्काचार्याणां मते जीवजगती उभे अपि ब्रह्मपरिणामभूते स्तः । ब्रह्मैव जीवजगतोरुपादानं निमित्तञ्च कारणम् ।

ते ब्रह्म सगुणं निर्गुणञ्च मन्यन्ते। विशुद्धाद्वैतप्रवर्तकानां श्रीवल्लभाचार्याणां मते नित्यसच्चिदानन्दस्वरूपो भगवान् सर्वविरुद्धधर्माणामाश्रयः स्वीकृतोऽस्ति।

तन्मते निर्गुणोऽपीश्वरः सगुणः, निराकारोऽपि साकारः, अगम्योऽपि सुगमः स्वीक्रियते। न यत्र किञ्चित्परिणामो भवति। स शुद्धः सच्चिदानन्दस्वरूप एवास्ते। तथाचोक्तम्–"मायासम्बन्धरहितं शुद्धमित्युच्यते बुधैः। (शु.मा.)" श्रीवल्लभाचार्यमते सांसारिकदुःखनिवृत्तये सर्वोत्तमः सरलश्चोपायो भगवद्भक्तिरेवास्ति। एवं विभिन्नदर्शनेषु जगत्कर्तृत्वस्वरूपमपि विभिन्नं स्वीकृतमस्ति। न्यायदर्शनं वैशेषिकदर्शनं च ईश्वरं जगत्कर्तारमङ्गीकुरुतः, योगदर्शनं सेश्वरसांख्यञ्च पुरुषविशेषमेव संसारोत्पादकं स्वीकुरुतः, निरीश्वरसांख्यमते प्रकृतिरेव कर्त्री पुरुषस्तु पुष्करपलाशवन्निर्लेपः, वेदान्तदर्शनन्तु ब्रह्मण एव विवर्तं जगदिति मनुते। वेदान्तस्य ब्रह्म, श्रीमद्भगवद्गीतायाः पुरुषोत्तमः, श्रीमद्भागवतस्य श्रीकृष्णश्च एकमेव परमं तत्त्वमस्ति—

वदन्ति तत्तत्त्वविदः तत्त्वं यज्ज्ञानमद्वयम्।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते॥ = १।२।११

कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्।
जगद्धिताय सोऽप्यत्र देहीवाभाति मायया॥ = १०।१४।५५

श्रीमद्भागवतं हि परमविरक्तानाममलात्मनां परमहंसानां प्रियतमो विष्णुभक्तिप्रतिपादकः सर्वश्रेष्ठो वैष्णवदर्शनग्रन्थोऽस्ति। तत्र मुख्यतया सख्य-वात्सल्य-माधुर्यरसलीलायाः सविस्तरं वर्णनं विद्यते। अखिलब्रह्माण्डाधिपतिः श्रीकृष्णः गोपगोपीप्रेमपरवशः गोपालबालकैः सह क्रीडति, नृत्यति, गायति, गाश्चारयति, क्रीडायां पराजितो भूत्वा गोपालबालकान् स्व पृष्ठे आरोप्य समुद्वहति च। अत एवोक्तम्—

पुञ्जीभूतं प्रेम गोपाङ्गनानाम् एकीभूतं गुप्ततत्त्वं श्रुतीनाम्।
मूर्तीभूतं भागधेयं यदूनां श्यामीभूतं ब्रह्म मे सन्निधत्ताम्॥

वेदान्तसिद्धान्तानुसारं अविद्यानाशात् कैवल्यमुक्तिर्भवति। अविद्यानाशश्च जायते पराविद्यया ज्ञानेन वा ज्ञानस्योदयो भवति, अन्तःकरणशुद्धया। अन्तःकरणशुद्धिश्च निष्कामकर्मणा, निष्कामकर्मप्रवृत्तिश्च श्रवणमननादिभिर्जायते। अतोऽविद्यानिवृत्तिपूर्वकं ब्रह्मोपलब्धये श्रवणमननादीनामनुष्ठानमत्यावश्यकम्। आनन्दघनं सच्चिदानन्दं भगवन्तं लब्ध्वा न पुनर्जीवः पुनर्जन्ममरणचक्रे परिवर्तते। तथा च श्रुतिः—'न स पुनरावर्तते, न स पुनरावर्तते। श्रीमद्भगवद् गीतायाञ्च—

यद् गत्वा न निवर्तन्ते तद्धाम परमं मम। = १५।६

श्रीमद्भागवते पुराणलक्षणे प्रधानतया दशानां तत्त्वानां वर्णनमस्ति। तत्र मुख्यतमं

तत्त्वम्, आश्रयतत्त्वमेवास्ति । आश्रयतत्त्वञ्च शरणागतवत्सलो भगवान् श्रीकृष्ण एवास्ति । तदुपलब्धये एवान्येषां नवानां तत्त्वानां वर्णनं जातमस्ति ।

यद्यपि प्रतिस्कन्धं श्रीमद्भागवते आश्रयतत्त्वस्य निरूपणं दृश्यते, तथापि सगुणं साकारमाश्रयतत्त्वं दशमस्कन्धे, निर्गुणनिराकारमाश्रयतत्त्वञ्चैकादशे स्कन्धे विशेषतो निरूपितं वर्तते ।

श्रीमद्भागवतस्य श्रुतिभिः यावान् घनिष्ठः सम्बन्धो वर्तते, न तावान् अन्येषां पुराणानाम् । कतिपयशब्दपरिवर्तनपूर्वकं बहूनां श्रुतीनां तदर्थानाञ्च तत्र स्पष्टतयोल्लेखोऽस्ति। बहूनि श्रीमद्भगवद्गीतापद्यानि ब्रह्मसूत्राणि चापि श्रीमद्भागवते मिलन्ति । प्रस्थानत्रये यत् किमपि तत्त्वं प्रतिपादितमस्ति, तत् सर्वं श्रीमद्भागवते उपनिबद्धमुपलभ्यते । अतएव श्रीमद्भागवतं श्रुतीनां सारः महाभारततात्पर्यनिर्णायकं ब्रह्मसूत्रभाष्यञ्चोच्यते । श्रीमद्वल्लाभाचार्यचरणास्तु श्रीमद्भागवतं चतुर्थं प्रस्थानं स्वीकुर्वन्ति । सर्ववेदान्तसारे श्रीमद्भागवते समासक्तचेतसो विदुषो नान्यत्र मनः सज्जते । तथाचोक्तं भगवता व्यासदेवेन श्रीमद्भागवते—

सर्ववेदान्तसारं हि श्रीमद्भागवतमिष्यते ।
तद्रसामृततृप्तस्य नान्यत्र स्याद् रतिः क्वचित् ॥ = १२।१४।१५

यथा पक्षविहीनाः पक्षिशावका मातरं प्रतीक्षन्ते, बुभुक्षिता वत्सा मातुर्दुग्धं पातुमातुरा भवन्ति, यथा वा वियोगिनी वनिता प्रवासिना प्रियतमेन मिलितुमुत्कण्ठिता भवति तथैव भगवन्तं द्रष्टुं भक्तहृदयं विह्वलं भवति[1] तदुक्तं श्रीमद्भागवते—

वाञ्छाकल्पतरुर्भगवान् भक्तानां मनोरथानवश्यं पूरयति । श्रीकृष्णसन्देशमादाय वृन्दावनमुपगम्य तत्र तद्वियोगविह्वलानां गोपीनामपूर्वं प्रेम पर्यालोच्योद्धवस्य मनसि शङ्काऽजायत यत् किं भगवान् स्वभक्तानपि परित्यजति ? इमामुद्धवस्याशङ्कामपनेतुमेव तेन सह कुब्जागृहे गत्वा भगवान् श्रीकृष्णः प्रादर्शयत् यद् यदाहं भक्तिमतीं कुब्जामपि न परित्यजामि तर्हि मदर्थं त्यक्तसर्वस्वानां परमभक्तानां प्रियतमानां गोपीनां परित्यागं कर्तुं कथमहं शक्नुयाम्—

सौरन्ध्रीमपि संत्यक्तुमहं शक्तोऽस्मि नोद्धव !
किमुत व्रजलोकांस्तानिति व्यञ्जन्निमामगात् ॥ = ७।१।५

श्रीमद्भागवतानुसारं केवलं शारीरिकं सान्निध्यं नास्ति; किन्तु मनस एव मुख्यं सान्निध्यमपेक्षितम्, यत्र हार्दिकं प्रेम विद्यते अत्रैव सान्निध्यमस्ति । प्रेम विना

१. अजात पक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्ताः ।
प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविन्दाक्ष ! दिदृक्षते त्वाम् ॥ = ६।११।२६

शारीरिकं सान्निध्यं व्यर्थमेव प्रतीयते । गोपीनां हृदयेषु सत्यं प्रेम आसीत् । अतस्तत्र सत्य सान्निध्यमासीत् । संयोगापेक्षया वियोगेऽधिकं मानसं सान्निध्यं जायते । यतो हि संयोगे प्रियतमसान्निध्यं सीमितं भवति; किन्तु वियोगे सर्वदैव प्रियतमस्य स्मरणं चिन्तनं दर्शनलालसा च जाजायते । दूरे वर्तमानस्य श्रीकृष्णस्य हृदये गोपिका आसन्, तासां हृदये च स आसीत् । इति गोपीनां परमभक्तिमत्त्वं स्पष्टमेव ।

कीर्तनभक्तिशिरोमणिः श्रीचैतन्यमहाप्रभुः स्वगौडीयसम्प्रदायप्रचारं श्रीमद्भागवतानुसारमेव समारब्धवान् । तस्य मुख्यमुद्देश्यमासीद् यद् भगवन्नामगुणकीर्तनद्वारा भगवद्भक्तिप्रचारः संभवति । तेन द्वैताद्वैतयोः समन्वयाय महान् प्रयासो विहितः । तदनुसारं भगवन्नाम एवं संकीर्तनीयं येन नेत्राभ्यामश्रुधारा प्रवहेत्, वणीगद्गदा भवेत्, सर्वाङ्गञ्च पुलकितं स्यात् ।

चैतन्यमहाप्रभुणा हि ब्रह्मगुनिर्दिष्टभागवतश्लोकसिद्धान्तानुसारमेवात्मनो मत प्रचारितम् प्रसारितं च भक्तिरससमासक्तचेतसां मनः मधुरभावातिशयम्—

चैतन्यमतानुयायिनो विष्णुपुरीजीमहाराजा अपि श्रीमद्भागवते श्रद्धानाः तत्रत्यान् भक्तिपरकान् श्लोकान् भक्तिरत्नावल्यां संगृह्य भक्तसमाजस्य महान्तमुपकारं कृतवन्तः । तन्मतानुसारं निर्गुणमेव ब्रह्म भक्तानामभिलाषपूरणाय विभिन्नेषु रूपेष्व-वतीर्य लोकानानन्दयति शिक्षयति च सर्वान् । भगवतोऽचिन्त्या शक्तिरघटितघटना-पटीयसी, कर्तुमकर्तुमन्यथा कर्तुं चस्ति समर्थाऽमहामाया स्वप्रभावेण जीवान् मोहयित्वा सततं भगवतोऽन्तरयति । अतो मायासन्तरणाय भगवद्भक्तिरेव परमं साधनम् ।

तस्मादात्मकल्याणकामनया मानवैर्मायासन्तरणपूर्वकं भगवत्स्वरूपसाक्षात्कारात्मकः मुक्तिप्राप्तये तत्साधकत्वेनात्यन्तोपयोगिनी भगवद्भक्तिरवश्यमनुष्ठेया, समादरणीया मसाश्रयणीया, श्रद्धेया, प्रचारणीया, प्रसारणीया च निरन्तरम् ।

विदितचरमेवास्ति धर्मधुरीणानामास्तिकजनानां यदिह जगतीतले चतुरशीतिलक्ष-योनिषु जन्ममरणपरम्परामनुभूयानेकजन्मार्जितपुण्यपुञ्जप्रभावैर्मनुष्यशरीरमासादयति जीवलोकः—'कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् ।'[1] तदिदमतिदुर्लभं मानव-शरीरमवाप्यापि न सर्वे जीवा जन्ममरणपरम्परानुभवदुःखसागरमुत्तरतुं प्रभवन्ति, किन्तु तत्राधिकतराः पुनरपि तासु चतुरशीलक्षतियोनिषु बंभ्रम्यमाणाः कठिनतरां दुःखपरम्परामनुभवन्तो भूयो भूयो जन्ममरणचक्रे चङ्क्रमन्ते एव । तादृग्विधे च वैषम्ये नान्यदुपलभ्यते मूलम्, ऋते अनन्यभगवद्भक्तेः । अनन्या भक्त्या भगवन्तं प्राप्य भक्तः संसारे आवागमनचक्राद् विमुक्तः शाश्वतं सुखमुपलभते । तस्माद् भगवत्प्राप्तिरूप-शाश्वतसुखसाधनं भक्तिरेवास्तीति सा समादरणीया समाश्रयणीया च निरन्तरम् ।

---

१. गरुडपुराणस्य प्रेतकल्पे १५।२५

यद्यपि 'अपाम सोममममृता अभूम'[१] इति श्रुत्या सोमपानादिभिर्लभ्यस्य स्वर्गादेरपि सुखसाधनत्वं प्रतीयते, तथापि 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति'[२] इति गीतावचनानुसारं भोगेन पुण्यक्षयानन्तरं स्वर्गाच्च्युतिदर्शनान्न तदत्यन्तिकं सुखं मन्यन्ते विद्वांसः। वेदान्तशिद्धान्तानुसारमभेदोपासनया निरतिशयानन्दरूपं पूर्णसुखस्वरूपं च ब्रह्म साक्षात्कृत्यैव जीवः सर्वदुःखविनिर्मुक्तो भूत्वा परमानन्दं विन्दतेऽशाश्वतीं च शान्ति लभते। पुराणानानुसारं भेदोपासनया परमात्मनः साक्षात्कारं सम्पाद्य जन्ममृत्युबन्धनक्लेशरहितो जीवः सगुणस्य भगवतो नित्यलीलाधाम्नि अप्राकृतेन शरीरेण निवसन् भगवत्सान्निध्यसुखमनुभवति। अतो भगवत्स्वरूपसाक्षात्कारमन्तरा न विद्यते किमप्यस्त्यन्यद् वास्तविकं सुखम्।

'रसो वै सः रसं ह्येवायं लब्ध्वा आनन्दी भवति'[३] इति श्रुत्यनुसारं भगवतो रसरूपत्वाद् ब्रह्मानन्दप्रदायिनं भक्तिरसमेव द्वारीकृत्य रसरूपस्य भगवतः सान्निध्यमवाप्तुं शक्यते। यथा पदार्थवादिनी न्यायवैशेषिकदर्शने पदार्थज्ञानद्वारा निःश्रेयसपथं प्रदर्शयतः। योगदर्शनं च जोवेश्वरयोरेकत्वाधिगमपूर्वकं समाधिना कैवल्यप्राप्तिं प्रतिपादयति। सांख्यदर्शनं तु त्रिविधदुःखात्यन्तनिवृत्तिमभिलक्ष्य प्रकृतपुरुषयोर्विवेकात्मकज्ञानेन मुक्तिमार्गमुपदिशति। मीमांसादर्शनमपि वैदिकैः कर्मभिः संस्कारशुद्धया निर्वाणोपलब्धिं निर्दिशति। वेदान्तदर्शनं चाद्वयब्रह्मज्ञानेन मोक्षाधिगममुद्बोधयति तथैव भगवत्सान्निध्योपलब्धिहेतुभूत भक्तिदर्शनमपि भगवत्तत्वसाक्षात्कारद्वारा अपवर्गद्वारमुद्घाटच परमं पदं प्रापयति भक्तप्रवरानिति तत्त्वम्।

अतो भक्त्या भगवतो वास्तविकं स्वरूपं विज्ञाय परमपुरुषार्थं निर्वाणपदं प्राप्तुं शक्यते, इत्यत्र नास्ति कश्चन सन्देहलेशः।

पुराणानुसारं समाधिसुखस्येव भक्तिसुखस्यापि स्वतन्त्रपुरुषार्थत्वाद् भक्तियोगोऽपि परमपुरुषार्थोऽभिप्रेतः। अतएव जीवनमुक्तानाममलात्मनां ज्ञानिनामपि भक्तिरावश्यकत्वेन अनिवार्या प्रतिपादिता श्रीमद्भागवते।[४]

अत एवाद्रुतचित्तस्य निर्वेदपूर्वकं तत्त्वज्ञानं, द्रुतचित्तस्य च भगवल्लीलाकथाश्रवणादिश्रद्धापूर्विका भक्तिरिति द्वयमप्युपात्तम्। श्रीमद्भागवते।[५]

---

१. छा० उ० ५।३।११, २. गीता ९।२१ ३. तै० उ० २।७

४. आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे।
कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हि सः॥ = १।७।१०

५. तावत् कर्माणि कुर्वीत न निर्विद्येत यावता।
मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते॥ = ११।२०।९

तस्मात्पुराणेषु भगवतो भक्तिर्भक्तान् दुःखबहुलादस्मात् संसारात् परमानन्दपूर्ण-परिस्थितौ समुपस्थापयितुमेकमात्रं सर्वसुगमं साधनं निर्दिष्टमस्ति । तत्त्वस्यास्य प्रतिपादनं तु प्रायः प्रतिपुराणं प्राप्यत एव, अथापि पुराणमूर्धन्ये सर्ववेदान्तसारे वैष्णवतिलके श्रीमद्भागवते महापुराणे भक्तितत्त्वस्य सर्वाङ्गीणं विश्लेषणं प्रस्तुतमस्ति । तदनुसारं प्रेमपयोधौ पूर्णात्मनि परमात्मनि संसक्तया भक्त्या समः कल्याणकारी कश्चन अन्यो मार्गो न दृष्टिगोचरतामायाति ।[1]

भक्त्या भक्तो यावत् पुलकिताङ्गो द्रवीभूतहृदयो विगलितानन्दाश्रुश्च न भवति तावद् आन्तरिकीं पवित्रतां नासादयति । यथा समाधिद्वारा चेतसः समताधिगमाद् मानसिको भावो विषयेभ्यः समूलमपह्नियते, तथैव भगवद्भक्त्या साकं परमानन्दसम्बन्धसत्वात् पापराशिः प्रणश्यति । तदनन्तरं यथाऽग्निना सुवर्णं निर्मलं सत् स्वकीयं स्वाभाविकं स्वरूपं प्रतिपद्यते, तथैव जीवोऽपि भगवद्भक्त्या गलितमलिनसंस्कारः सन् नैजं स्वाभाविकं स्वरूपमासाद्य शाश्वतीं शान्तिमनुभवति । अत एवोक्तं श्रीमद्भागवते भगवद्भजनायासुरबालकान् प्रेरयता प्रह्लादेन ।[2]

परमस्य तत्त्वस्य प्राप्तये पुराणानुसारं भक्तेर्महद् किमपि साधनं नास्ति । भक्तितुलनायां धर्मार्थकामानां किमपि मूल्यं नास्ति । यदा भक्तिसाधनद्वारा सर्वश्रेष्ठं परमतत्त्वमपि सर्वतोभावेन साधकस्याधिकारे समागच्छति तदा किं पुनरवशिष्यते । तस्मात् पुराणानां मतेन भक्तिः परमपदप्राप्तये सर्वश्रेष्ठमस्ति साधनम् ।[3]

सर्वमिदं मानवयोनावेव सम्भवति नान्यत्र । विधातुः सृष्टेर्वैचित्र्याद् मानव एव केवलमेतादृगस्ति, यो विचिन्त्य स्वशुभाशुभे विमोक्तुमर्हत्यात्मानं मृत्योः पाशात् ।

---

१. न युज्यमानया भक्त्या भगवत्यखिलात्मनि ।
सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये ॥ = ३।२५।१९

२. कोऽति प्रयासोऽसुरबालका हरेरुपासने स्वे हृदि छिद्रवत् सतः ।
स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ॥
रायः कलत्रं पशवः सुतादयो गृहा मही कुञ्जर कोशभूतयः ।
सर्वेऽर्थकामाः क्षणभङ्गुरायुषः कुर्वन्ति मर्त्यस्य कियत् प्रियं चलाः ॥
एवं लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सातिशया न निर्मलाः ।
तस्माददृष्ट-श्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये ॥
(श्री. भा. ७।७।३८-४०)

३. धर्मार्थकामैः किं तस्य मुक्तिस्तस्य करे स्थिता ।
समस्तजगतां मूले यस्य भक्तिः स्थिरा त्वयि ॥ = वि० पु० १।२०।२७

अत एव सृष्टिनिर्माणावसरे ब्रह्मदेवस्य मानवनिर्माणादेव परमः सन्तोषोऽजायत । तथा चोक्तं श्रीमद्भागवते[1] । यो मानवजन्म लब्ध्वा मुत्यर्थं न यतते स आत्महास्ति ।

अत एव सम्प्राप्य मानवं शरीरं नूनं सम्पादनीयमात्मतत्त्वविज्ञानम् । अयमेव परमः पुरुषार्थः, उत्कृष्टा सिद्धिः, श्रेष्ठा च सम्पदस्ति । अनेनैव मानवजन्मनः साफल्यम्, एतेनैव कृतार्थोऽयं लोकः, अमुनैव वसुन्धरा वस्तुतो वसुन्धरा। मानवजन्म लब्ध्वा य आत्मज्ञानाय न प्रयतते तस्य महती हानिर्भवति । अत एवोक्तं पूज्यपादैः श्रीशङ्कराचार्यैः ।[2]

एतदेव श्रीमद्भागवतेऽपि उद्धवं प्रति भगवान् श्रीकृष्णः—

नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम् ।
मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महा ॥
= श्री० भा० ११।२०।१७

राजा मुचुकुन्दोऽपि भगवन्तं श्रीकृष्णं स्तुवन् प्रोक्तवान्—

लब्धा जनो दुर्लभमत्र मानुषं कथञ्चिदव्यङ्गमयत्नतोऽनघ !
पादारविन्दं न भजत्यसन्मतिर्गृहान्धकूपे पतितो यथा पशुः ॥
श्री० भा० १०।५१।४७

एतत्सर्वं लक्ष्यीकृत्यैव श्रुत्यापि स्पष्टमुद्घोषितम्—

तमेवैकं जानथ आत्मानमन्यथा वाचो विमुञ्चथामृतस्यैव सेतुः ।
इह चेदवेदीथ सत्यमस्ति नो चेदवेदीन्महती विनष्टिः ॥ = १।५

अत एव श्रीमद्भागवते सर्वकामनया भगवद्भजनमेव सिद्धान्तितं वैयासकिना शुकेन[3] । श्रीमद्भागवतानुसारं मुक्तेः प्रधानानि त्रीणि साधनानि सन्ति—निष्कामकर्म, ज्ञानं, भक्तिश्चेति । तेषु ज्ञानस्य कृपाणधारासमानत्वेन-सर्वसुलभत्वाभावात्-निष्काम-

---

१. सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या
नानासरीसृपपशून् खगदंशमत्स्यान् ।
तैस्तैरतुष्टहृदयः पुरुषं विधाय
ब्रह्मावलोकधिषणं मुदमाप देवः ॥ = श्री० भा० ११।९।२८

२. लब्ध्वा कथञ्चिन्नरजन्मदुर्लभं तत्रापि पुंस्त्वं श्रुतिपारदर्शनम् ।
यस्त्वात्ममुक्तौ न यतेत मूढधीः स आत्महा स्वं विनिहन्त्यसद्ग्रहात् ॥
विवेकचूडामणौ ४

३. अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन भजेत पुरुषं परम् ॥ = श्री० भा० २।३।१०

कर्मणश्च कष्टसाध्यत्वाद् भक्तिरेव सर्वसाधारणी सुभगा सुलभा च प्रतीयते[१] । सत्वयुगादौ ज्ञानवैराग्ययोर्मोक्षसाधकत्वेऽपि कलियुगे भक्तेरेव प्राधान्यमस्ति । तथाचोक्तं पद्मपुराणीये श्रीमद्भागवतमहात्म्ये[२] ।

किञ्च पद्मपुराणनुसारं भगवन्तं स्वानुकूलं कर्तुं न तपस आवश्यकतास्ति, न वा वेदाध्ययनमनिवार्यं विद्यते, नापि ज्ञानोपार्जनं श्रेष्ठं वर्तते, न च कर्मणः कर्तव्यत्वं भवति, किन्तु भगवत्साधनाय भक्तिरेव सर्वोत्कृष्टं साधनमस्ति । एतत्सत्यत्वे गोपिका एव सन्ति प्रमाणभूताः । नहि ताभिस्तपस्तप्तं, न च वेदाध्ययनं विहितं, न वा ज्ञानमुपार्जितं, नापि किञ्चित्कर्तव्यानुष्ठानं कृतम्, अपि तु भक्त्यैवैताः श्रीकृष्णं वशीचक्रुः[३] । यथा वृक्षस्य पूर्णता फलेनास्ति, तथा भक्तेः पूर्णता कलिकाले भगवत्यनन्यप्रेम्णैवास्ति[४] ।

यद्यपि भगवद्भक्तौ जीवमात्रस्यास्त्यधिकारो न्याययुक्तो हनुमज्जाम्बवद्गरुडगजेन्द्रकाकभुशुण्डिजटायुःप्रभृतीनां पशुपक्षिप्लवङ्गमादीनां भगवद्भक्त्या परमपदप्राप्तिदर्शनात्, तथापि सर्वसाधारणपशुपक्षिषु ज्ञानसाधनयोरभावादीश्वरभक्तिं कर्तुमसमर्थतया शास्त्रकारा ईश्वरभक्तौ प्रधानतया मनुष्याणामेवाधिकारं वदन्ति। तथा ह भगवान् वादरायणः-'शास्त्राधिकारत्वान्मनुष्यस्य। भगवद्भक्तौ रूपस्यायुषश्च न मूल्यमस्ति, न च विद्याया उत्कृष्टत्वम्, नहि धनस्य जातेश्चोत्कर्षोऽप्यपेक्ष्यते, न वा सदाचारस्य सद्गुणस्य च प्राधान्यं वर्तते, नापि बलं मुख्यं विद्यते, किन्तु प्रेमैवानन्यं प्रतीक्षते भक्तिप्रियो भगवान् माधवः । तथोचोक्तं जीवगोस्वामिना[५] ।

---

१. यागास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया ।
ज्ञानं कर्म चभक्तिश्च नोपायोऽन्योऽन्योऽस्ति कुत्रचित् । =श्री० भा० ११।२०६

२. सत्यादित्रियुगे बोधवैराग्यौ मुक्तिसाधकौ ।
कलौ तु केवलं भक्तिर्ब्रह्मसायुज्यकारिणी ॥ =श्री० भा० मा० २।४

३. न तपोभिर्न वेदैश्च म ज्ञानेनापि कर्मणा ।
हरिर्हि साध्यते भक्त्या प्रमाण तत्र गोपिकाः ॥ =श्री० भा० मा० २।१८
अलं व्रतैरलं तीर्थैरलं योगैरलं मखैः ।
अलं ज्ञान कथालापैं भक्तिरैवैक मुक्तिदा ॥ =श्री. भा. मा. २।२१

४. नृणां जन्म सहस्त्रेण भक्तौ प्रीतिर्हि जायते ।
कलौ भक्तिः कलौ भक्ति र्भक्त्या कृष्णः पुरः स्थितः ॥ =श्री. भा. मा २।१९.

५. व्याधस्याचरणं ध्रुवस्य च वयो विद्या गजेन्द्रस्य का ?
का जातिर्विदुरस्य यादवपतेरुग्रस्य किं पौरुषम् ।
कुब्जायाः कमनीयरूपमधिकं किं तत् सुदाम्नो धनम् ?
भक्त्या तुष्यति केवलं न च गुणैर्भक्तिप्रियो माधवः ॥ हृ० भ० र० २।५

भक्तिर्भगवतः प्राणतोऽप्यधिका प्रियाऽस्ति । भक्त्या प्रार्थितो भगवान् नीचगृहेष्वपि गच्छति । तथाचोक्तं नारदेन भक्तिं प्रबोधयता पद्मपुराणीयश्रीमद्भागवतमहात्म्ये ।[1]

प्रगाढया भक्त्या प्रसन्नो भगवान् सर्वमपि स्वीयं कार्यं परित्यज्य एकस्य भक्तस्य कृतेऽलौकिकं कर्म कर्तुंकर्तुमन्यथाकर्तुंसमर्थोऽपि भगवान् श्रीकृष्णः पाण्डवकुलनन्दनस्य धर्मराजस्य युधिष्ठिरस्य भक्तिगुणगरिम्णा उत्कृष्टं कौरवकुलं दूरे परित्यज्य पाण्डव-कुलस्य मङ्गलचिन्तायां नियतं व्यापृतो बभूव, अर्जुनस्य च भक्त्याकृष्टचेताः सन् । तद् रथे हीनकर्म सारथ्यमपि स्वीचकार

प्रह्लादस्य भक्त्याऽऽकृष्टो यत्र भगवान् यत्र यत्र तस्य विपदमभिलक्षितवान् तत्र तत्र तां वारयितुं प्रवृत्ते । मदोन्मत्तस्य करिणः पादतलेन मर्दितः, शैलशिखराद् भूमौ प्रक्षिप्य पातितः, जीवापहारकं च विषलड्डूकं मधुरमोदकत्वेन परिणामय्य भगवता पालितः प्रह्लादः । हरिनामस्मरणामात्रेण भक्तिरसाभिप्लुतः प्रह्लादः 'क्व ते नारायणः'?' इति पित्रा हिरण्यकशिपुना यदा पुष्टस्तदा सर्वत्रैव बर्तते मे नारायणः' इत्युक्तवान् । तदुत्तरे यदि 'सर्वत्रैव वर्तते वे नारायणस्तदत्र स्तम्भे अपि वर्ततां नाम' इत्युक्तवति पितरि 'बाढम्' इति यदा प्राह प्रह्लादः, तदैव तेन हिरण्यकश्यपुना सवेगमभिहतात् स्तम्भान्नारायण उत्कृष्ट नृसिंहरूपेणाविर्भूय भक्तस्य प्रतिकूलाचारिणं हिरण्यकशिपुं नखैर्विदार्य पञ्चत्वं प्रापयामास । प्रह्लादं च तस्यैव राज्येऽभिषिच्य भक्तस्य भगवच्चिन्तनपरस्य साहाय्यं सम्पादयामास । तथा चाह श्रीमद्भागवते व्यासदेवः ।[2]

एवं पञ्चवर्षवयस्कस्य ध्रुवस्य हिंस्रश्वापदसमाकीर्णेऽरण्ये रक्षां चकार । तस्य च परमया भक्त्या सुतरां सन्तुष्टो भगवान् स्वकीयवैकुण्ठलोकस्याप्युपरि कञ्चिन्नूतनं स्थायिनं ध्रुवलोकं तदर्थं निर्माय दर्शितवान् भक्तजनेऽपूर्वस्नेहातिरेकसौहार्दम् ।

द्वापरे दुष्टो दुःशासनः कौरवसभायां बलाद् द्रौपद्या वस्त्रं समाक्षिप्य यदा तां नग्नां कर्तुं प्रचक्रमे तदा सा श्रुत वसिष्ठोपदेशानुसारं भगवतः स्मरणे मनो दधे[3] । तदनुसारमेव आपत्तिकालेऽभयदातारं भगवन्तं श्रीकृष्णं सस्मार[4] । अनन्यशरणया आर्तया तया

---

१. त्वं तु भक्ति ! प्रिया तस्य सततं प्राणातोऽधिका ।
त्वयाहूतस्तु भगवान् याति नीचगृहेष्वपि ॥ = २।३

२. सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः ।
अदृश्यतात्यद्भुतरूपमुद्वहन् मध्ये सभायां न मृगं न मानुषम् ॥ = ७।८।१७

३. ज्ञातं मया वसिष्ठेन पुरा गीतं महात्मना ।
महत्यापदि सम्प्राप्ते स्मर्तव्यो भगवान् हरिः ॥

४. गोविन्द ! द्वारिकावासिन् ! कृष्ण ! गोपीजनप्रिय !
कौरवैः परिभूतां मां किं न जानासि केशव !

समभ्यर्थित आर्तत्राता भगवान् श्रीकृष्णः तस्या अनन्यया भक्त्या वसनरूपेण परिणतो भूत्वा लज्जां परिरक्ष्य दर्शितवान् भक्तिमर्यादातिरेकं प्रचरितवांश्च द्रौपद्याः पातिव्रत्यधर्मप्रकर्षमहिमानम्।[1]

भक्तेः प्रणयस्य हृदयानुरागरूपस्य स्नेहस्य च दृश्यते समुत्कर्षो वृन्दावनलीलायाम्। तत्र हि गोपगोपीनां परमया भक्त्या प्रणयदिना वा समाकृष्टो भगवान् श्रीकृष्णः सर्वेषामेव काम्यं फलं सम्पादयामास। बालोऽपि स शिशुजनैरसाध्यानि कानिचित् कर्माणि सम्पाद्यात्मन ईश्वरतां च दर्शितवान्।

अम्बरीषप्रभृतयो राजानः प्रेम्णा भगवन्तमर्चयित्वाऽनायासेन तं प्रापुः। सुदामा केवलैः पृथुकतण्डुलकणैः, गजेन्द्रः केवलेन पुष्पेण, शबरी च बदरीफलैरेव भगवन्तं सन्तर्प्य स्वीयां स्वीयामभिलाषां पूरितवन्तः, प्राप्तवन्तश्च तत्कृपया परमं पदम्। एतत्सर्वं पर्यालोच्येदं वक्तुं शक्यते यत्सत्यमुक्तं भगवता श्रीमद्भगवद्गीतायाम्।[2]

एवमुत्कृष्टया भक्त्या सन्तुष्टो भगवान् भक्तस्य सर्वविधां विपदं वारयति, मनोरथं च सर्वं पूरयति। भगवत्पादपद्मपरागसमासक्तचेता भक्तो भुवाम्बुधिं वत्सपदमिवोलङ्घ्य सहसा परमं पदं प्राप्नोति।[3]

एवं सर्वदा कल्याणकरं भगवतो नामोच्चारयन्, रूपं चिन्तयन् सर्वलीलामाकर्णयन् तद्यशश्च चिन्तयन् भगवति समासक्तो भक्तो मुक्तिं लब्ध्वा नच पुनः जन्ममरणचक्रे चङ्क्रमितो भवति। तथोक्तं श्रीमद्भागवते देवताभिर्देवकीं प्रति।[4]

भगवन्नामममहिमप्रकाशः तत् कीर्तनमहत्त्वं च।

अखिलब्रह्माण्डनायकस्य भगवतो नाम्नां गुणानां च याथातथ्येन महिमानं वर्णयितुं

कौरवार्णवमग्नां मामुद्धरस्व जनार्दन!
प्रपन्नां पाहि गोविन्द! कुरुमध्येऽवसीदतीम्॥
(म० भा० सभापर्वणि ६८।५१-४३)

१. कृष्णं च विष्णुं च हरिं नरं च त्राणाय विक्रोशति याज्ञसेनी।
ततस्तु धर्मोऽन्तरितो महात्मा समावृणोद्वै विवधैः सुवस्त्रैः॥
(म० भा० सभापर्वणि ६८।४६)

२. पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥

३. समाश्रिता ये पदपल्लवप्लवं महत्पदं पुण्ययशो मुरारेः।
भवाम्बुधिर्वत्सपदं परं पदम्, पदं पदं यद्विपदो न तेषाम्॥
(श्रीमद्भागवते १०।१४।५८)

४. शृण्वन् गृणन् संस्मरयंश्च चिन्तयन् नामानि रूपाणि च मङ्गलानि ते।
क्रियासु यात्त्वच्चरणारविन्दयोराविष्टचेता न भवाय कल्पते॥ = १०।२।३७

न कोऽपि भवितुमर्हति समर्थः। यतो हि यथा भगवानस्ति अनन्तः तथैव तस्य गुणानां नाम्नां च नास्त्यन्तः। श्रीमद्भागवते भगवत्स्वरूपवर्णनप्रसंगे विदेहेन निमिना पृष्ठो द्रुमिलः प्रोक्तवान्-राजन् ! यो मानवोऽनन्तस्य भगवतोऽनन्तान् गुणान्-गणयितुमीहते, सोऽस्ति बालबुद्धिरज्ञो मानवः। कश्चिद् विचक्षणमतिः कदाचित् समस्तस्यास्य विश्वस्य रजःकणान् कथंचित् गणयेदपि, परं सत्त्वगुणसम्पन्नस्यानन्तस्य भगवतः गुणानां गणनया अन्तः सर्वथाऽस्ति असम्भवः—

यो वा अनन्तस्य गुणाननन्तान्
अनुक्रमिष्यन् स तु बालबुद्धिः ।
रजांसि भूमे गंणयेत् कथञ्चित्
कालेन नैवाखिल सत्त्वधाम्नः ॥ = श्री भा० ११।४।२

अतो ध्रुवप्रह्लादवद् दृढेन विश्वासेन स्वरुच्यानुसारं भगवतोऽनन्तस्यानन्तेषु नामसु एकं किमपि नाम निश्चित्य तस्यैव भक्त्या निरन्तरं श्रवणं मननं निदिध्यासनं च कर्तव्यमित्येवायमस्ति भागवतधर्मो मोक्षप्रदायकः।[1]

अनन्तस्य भगवतः कतिपयानि नामानि तु तस्योदात्तानां गुणानामाधारेण निश्चितानि सन्ति, कियन्ति च नामानि तस्य विशिष्टानि कर्माणि अभिलक्ष्य महात्मभिः निर्दिष्टानि। यथा भगवत्रो भक्तवत्सल इति नाम भक्तेषु तस्व स्नेहातिरेकादजायत। मधुसूदन इति नाम पापाचारिणो मधुनामकस्यासुरस्य निषूदनादेव जातम्। दामोदर इति नाम तु जनन्या श्री यशोदया दाम्ना (रज्वा) ऊलूखले उदरे बद्धे सति जातम्। एवं मुख्यतया गुणकर्मणोराधारेणैव भगवतः तत्तन्नामानि शास्त्रेषु लोकेषु च व्यवह्रियन्ते। स्वयमेव भगवता श्रीकृष्णनेनार्जुनस्य प्रश्ने उत्तरयता महाभारतस्य शान्तिपर्वणि मोक्षधर्मे प्रोक्तस्ति यत् मम कियन्ति गुणनामानि कतिपयानि च कर्मनामानि महर्षिभिः ऋग्यजुःसमाथर्वसु चतुर्षु वेदेषु पुराणेषु उपनिषत्सु ज्यौतिषे शास्त्रे सांख्यशास्त्रे योगदर्शने आयुर्वेदे च गीतानि सन्ति[2]—

एणं पुराणेषु महता विस्तरेण भगवतो नामोच्चारणस्यापूर्वं महत्वमुपवर्णितं विद्यते। भगवतो नामोच्चारणं नवधाभक्तेरेकं प्रमुखमङ्गमुक्तमस्ति।

---

१. शृण्वतः श्रद्धया नित्यं गृणतश्चः स्वचेष्टितम् ।
नातिदीर्घेण कालेन भगवान् विशते हृदि ॥

२. गौणानि तत्र नामानि कर्मजानि च कानिचित् ।
ऋग्वेदे च यजुर्वेदे तथैवाथर्व सामसु ॥
पुराणे सोपनिषदे तथैव ज्यौतिषेऽर्जुन !
सांख्ये च योगशास्त्रे च आयुर्वेदे तथैव च ॥
बहूनि मम नामानि कीर्तितानि महर्षिभिः । = ३४१।१०

भक्त्या भगवन्नामोच्चारणेन भक्तानां मानसपटले तस्य सात्त्विकं स्वरूपं सहसा प्रतिबिम्बितं भवति, यदनुभूय भक्ता आनन्दनिमग्नाः सन्तो भक्तिरससमुद्रे निमज्जनोमज्जनं कुर्वाणा लोकोत्तरं सुखमाश्रयन्ते ।

भगवता पतञ्जलिना स्वकीये योगदर्शने 'तज्जपस्तदर्थभावनम् (१।२६) इति योगसूत्रद्वारा इदमुपदिष्टं वर्तते यद् भगवन्नामजपसमये तत्प्रतिपाद्यस्यार्थस्यापि भावः स्मर्तव्यः, यतोहि शब्दार्थयोरिव नामनामिनोरस्ति अविभाज्यः सम्बन्धः ।

यथा भिन्न-भिन्न-भाषाभिज्ञान् मानवान् सर्वभाषाभिज्ञः पुमान् तंतमर्थजातमुद्बोधयति तथैव स्वोच्चारितनामद्वारा भक्तो भगवतो वास्तविकं स्वरूपस्य ज्ञानं कारयति । एवं स्वोच्चारितनामद्वारा साधको स्वेष्टदेवताया वास्तविकं ज्ञानं प्रतिपद्य कृतकृत्यो जायते ।

विष्णुपुराणेऽङ्कितमस्ति यद् यथा वायुना प्रक्षिप्तः उद्गतज्वालोऽग्निः शुष्कं तृणकक्षं सहसा भस्मसात् कुरुते तथैव नामस्मरणद्वारा सद्यः साधकानां हृदये विराजमानो भगवान् विष्णुरपि भक्तानां समस्तान् दोषान् निर्दहति—

यथाग्निरुद्धतशिखः कक्षं दहति सानिलः ।
तथा चित्तस्थितो विष्णुः योगिनां सर्वकिल्विषम् ॥ = वि. पु. ६।७५

भगवतोऽनन्तस्य नाम्नामस्ति अनन्तो महिमा । भगवतो नामसु पापराशेरपनोदनाय यावती शक्तिरस्ति, न तावन्ति पापानि कर्तुं प्रभवति महापातकी अपि पुरुषाधमः—

नाम्नोऽस्ति यावती शक्तिः पापनिर्हरणे हरेः ।
तावत् कर्तुं न शक्नोति पातकं पातकी नरः ॥

एकवारमपि भगवन्नामोच्चारणेन मानवानामनेकजन्मभिः सञ्चितानि पापानि तथैवापनोद्यन्ते यथाऽनलस्तुलराशिमनायासेन प्रदहति—

सकृत् स्मृतोऽपि गोविन्दो नृणां जन्मशतैरपि ।
पापराशिं दहत्याशु तूलराशिमिवानलः ॥ = प० पु० २।१।७५

भगवन्नामोच्चारणेन भगवतो गुणानां ज्ञानं जायते, येन भक्तमानसं तत्र लीनं सद् रमते । अतो भगवन्नामोच्चारणं भगवतो गुणलीलास्वरूपेषु तन्मयतावात्प्यै एकमात्रमस्ति सुलभं साधनम् । प्राणप्रयाणसमये दैवादपि समुच्चारितेन भगवन्नाम्ना उच्चारयितुः कल्याणमेव जायते, इत्यत्र नास्ति कश्चित् सन्देहः । श्रीमद्भागवतेऽजामिलोपाख्यानमनायासेन भगवन्नामोच्चारणविषयेऽस्ति अतिप्रसिद्धं, यस्य सार्वभौमप्रावेण सन्ति सर्वेऽपि प्राणिनः पूर्णपरिचिताः । अन्तकाले समायतेऽतिभयङ्करान् तं समानेतुमुपस्थितान् यमदूतान् विलोक्य सञ्जातवेपथुना मूत्रं प्रस्रवता पुरीषमुत्सृजता भयभीतेन

तेन दुश्चरित्रेणाजामिलेन विक्लवया वाचा नारायणाख्यं स्वकीयं प्रियं कनिष्ठं तनयमाह्वातुमिच्छया हेनारायण इत्ययं शब्दः समुच्चारितः। अथापि अन्यव्याजेनोच्चारितेन भगवान्नाम्ना तस्य कल्याणमेवाजायत । अत एव भगवता वेदव्यासेन भगवतो नामगुणकर्मणां कीर्तनं पापिनां मानवानां पापनाशनार्यंकं महौषधमुक्तमस्ति श्रीमद्भागवते—

सकृन्मनः कृष्णवदारविन्दयो
निवेशितं तद्गुणरागि यैरिह ।
न ते यमं पाशभृतश्च तद्भटान्
स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः ॥ = ६।१।१९ ॥

यथोत्तमं रसायनं तद्गुणनामहत्त्वमजानतोऽपि रोगिणो रोगं निहन्ति तथैव भगवन्नामहिमानमजानतोऽपि पुंसः पापं निर्दहत्येव। तस्मात् तदर्थमज्ञात्वाऽपि संकीर्तितं भगवन्नाम अग्निरिन्धनमिव कीर्तयितुरघं निर्दहत्येव—

अज्ञानादथवा ज्ञानादुत्तमश्लोक नाम यत् ।
संकीर्तितमघं पुंसो दहेदेधो यथानलः ॥ ६।२।१८

एतावतालमघनिर्हरणाय पुसां
संकीर्तनं भगवतो गुणकर्मनाम्नाम् ।
विक्रुश्य पुत्रमघवान् यदजामिलोऽपि
नारायणेति म्रियमाण इयाय मुक्तिम् ॥ = ६।३।२४

भगवतो नाम्ना विशिष्टं माहिमानं बोधयता यमराजेनापि स्वदूतवान् प्रति प्रोक्तम्, ते चाश्चर्यचकिताः सन्तः तदनुसारमद्यापि तथैवानुतिष्ठन्ति—

जिह्वा न वक्ति भगवद्गुणनामधेयं
चेतश्च न स्मरति तच्चरणारविन्दम् ।
कृष्णाय नो नमति यच्छिर एकदाऽपि
तानानयध्वमसतोऽकृतविष्णुकृत्यान् ॥ = ६।३।२९

इत्थं स्वभर्तृगदितं भगवन्महित्वं
संस्मृतविस्मितधियो यमकिङ्करास्ते ।
नैवाच्युताश्रयजनं प्रतिशंकमाना
द्रष्टुं च विभ्यति ततः प्रभृतिस्म राजन् ! ॥ = ६।३।३४

विष्णुधर्मोत्तरे प्रोक्तमस्ति यद्यस्य वाचि कृष्णेति मङ्गलं नाम वर्तते तस्य कोटयोऽपि महापातकानि भस्मीभवन्ति । तथाहि—

भस्मीभवन्ति राजेन्द्र ! महापातककोटयः ॥

स्कन्दपुराणेऽपि—

श्रीकृष्णनाम रत्नौघैं येषां जिह्वात्वलङ्कृता ।
नमस्या मुनिसिद्धानां वन्दनीया दिवौकसाम् ॥

अत एव परं ज्ञानं तेन च जायमानं परमपदमिप्सुना पुंसा भगवतो गोविन्दस्य संकीर्तनमत्यावश्यकमुक्तमस्ति--

यदीच्छसि परं ज्ञानं ज्ञानाच्च परमं पदम् ।
तदा यत्नेन कर्तव्यं कुरु गोविन्द कीर्तनम् ॥

ये च भगवतोऽग्रे तालिवादनपूर्वकं नृत्यन्ति गायन्ति च तेषां भक्तप्रवराणां शरीरतो महापातकानि तथैव पलायन्ते यथा कुतश्चित् स्थानादेकीभूय पक्षिण उड्डीयन्ते-

नृत्यतां श्रीपतेरग्रे तालिवादनपूर्वकम् ।
उड्डीयन्ते शरीरस्था महापातकपक्षिणः ।

कीर्तनलक्षणं च भगवता व्यासदेवेन पद्मपुराणे प्रोक्तमस्ति यद् भगवन्नाम लीलागुणादीनामुच्चैरुच्चारणं कीर्तनमस्ति । अकृतपुण्यैः कुटिलैः मूढैः नरैः न भगवद्भक्तिः न वा तस्य स्मरणं न च नामकीर्तनं क्रियते ।

भगवतो वासुदेवस्य संकीर्तनेन सर्वविधं मङ्गलं जायते, आयुर्वर्द्धते, व्याधे र्नाशनं च भवति । सत्ययुगे ध्यानेन, त्रेताया यज्ञैः, द्वापरे च हरिचर्जया यत् फलमुपपद्यते तदेव फलं कलियुगे भगवतः केशवस्य संकीतनेन संभवति—

तस्मादभयमिच्छता पुंसा सात्त्वतां पतिर्भगवान् श्रीकृष्णः सर्वदा श्रवणीयः, कर्तनीयः, स्मरणीयश्चेति भक्तिशास्त्रस्यास्ति रमणीयः पन्थाः । तथाहि—

नाम-लीला-गुणादीनामुच्चैर्भाषा तु कीर्तनम् ।
नह्यपुण्यवतां लोके मूढानां कुटिलात्मनाम् ।
भक्ति र्भवति गोविन्दे स्मरणं कीर्तनं तथा ॥
सर्वमङ्गलमाङ्गल्यमायुष्यं व्याधि - नाशनम् ।
भुक्तिमुक्तिप्रदं दिव्यं वासुदेवस्य कीर्त्तनम् ॥
ध्यायन् कृते यजन् यज्ञैः त्रैतायां द्वापरेऽचर्यन् ।
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥
तस्मादेकेन मनसा भगवान् सात्त्वतां पतिः ।
श्रोतव्यः कार्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम् ॥

अतिसरलो भक्तिमार्गः—

यथा दातृत्वे धनैश्वर्यादीनाम्, तपस्वित्वे शरीरशक्तिप्रभृतीनाम्, ज्ञानित्वे साधनचतुष्टयस्य, यज्ञे च प्रचुरसामग्र्या आवश्यकत्वं जायते, न तथा भगवद्भक्तावस्ति कस्यचन

-वाह्यस्य साधनस्यापेक्षा, किन्तु भक्तौ केवलं भक्तमनोमन्दिरविहारिणो भगवतश्चरणारविन्दयोरनुरागपूर्वकं तत्र मनोमधुपस्य नियोजनमेवास्ति आवश्यकं कार्यम् । अतो भक्ति मार्गस्यातिसारल्ये नास्ति कश्चन विवादः ।

सामान्तया भक्ता भवन्ति त्रिविधाः—साधारणः, विधेरनुगामीः, निषेधपरकश्च । तेषु साधारणो भक्तः केवलं प्रथानिर्वाहार्थं दैनिकाचाररूपेण भक्तिं करोति । विधेरनुगामी भक्तो नियते समये निश्चिते स्थाने शास्त्रीयविधिविधानानुकूलभावेन अभीष्टदेवस्यार्चनध्यानादिकं विधत्ते । निषेधपरकश्च भक्तो प्रतिकूलाचारपरित्यागपूर्वकं दुःसङ्गाद्युपेक्षको भवति ।

भक्तानां हृदयपटलेषु भगवन्तं प्रति त्रिप्रकारको भावोऽपि परिस्फुरति वाचनिकः, आलोकदानः, हार्दश्च । तत्र भक्तानामभ्यर्थनापूर्वकं भगवदुन्मुखो यो भक्तिप्रवाहो वर्द्धते सोऽस्ति वाचनिको भाव । एष हि भावो देवर्षिनारद-भीष्मपितामह-भरद्वाजादिषु परिस्फुरति । यान् भक्तान् हि स्वयं प्रभुरात्मीयान् सेवकान् विधत्ते, तेषामस्ति अवलोकदानभावः । अस्योदाहरणभूताः सन्ति-ध्रुव-प्रह्लाद-हनुमदङ्गदोद्धवादयः । हार्दभावश्च शुक-शिव-सनकादीनामन्तः करणेपु स्वभाविकतया स्वत एव परिस्फुरीत ।

यथा गङ्गाप्रवाहोऽखण्डरूपेण समुद्राभिमुखं प्रवहति तथैव भगवद्गुणश्रवणमात्रेण येषां मनसो गतिरविच्छिन्नतया हृदयगुहायां विराजमानं भगवन्तं पुरुषोत्तमं प्रति प्रवर्तते । ते अमन्दमानन्दमनुभवन्तो निष्कामा भक्ता भगवत्सेवातिरिक्तं मोक्षमपि न वाञ्छन्ति, सततं भगवत्सेवासुखमेवानुभवन्त परमानन्दं लभन्ते । अत एवोक्तं श्रीमद्भागवते सूतेन प्रश्नकर्तॄन् शौनकादीन् ऋषीन् प्रति—

अतो वै कवयो नित्यं भक्तिं परमया मुदा ।
वासुदेवे भगवति कुर्वन्त्यात्मप्रसादिनीम् ॥ = १।२।२२

गोपगोपीजनवल्लभस्य लीलापुरुषोत्तमस्य राधाविलासरसिकस्य वृन्दावनविहारिणो भगवतः श्रीकृष्णस्यानुपमयाऽनुकम्पया श्रीगोस्वामी विष्णुपुरीजी महाराजः भगवत्तत्त्वजिज्ञासूनां भगवद्भक्तानां मनसो विनोदकारकं भक्तिरत्नावलीनामकं सङ्कलाविष्णुपुरीजीमहाराजेन चैतन्यमहाप्रभवे सादरं समर्पित्ता यद्वा भगवतो जगन्नाथस्यादेशं लब्ध्वैकं ग्रन्थं प्रणीतवान् । चैतन्यमहाप्रभूणामादेशानुसारं हरिभक्तिसुधोदयं श्रीमद्भागवतं च निर्मथ्य गोस्वामिना तत्रत्यं भक्तिपरकमेकैकं पद्यरत्नं समुद्रस्य रत्नमिव प्राप्य भक्तिरत्नावलीं निर्माय च तदङ्घ्रिसरोजयोः सबहुमानमुपहारीकृता सा ।

एवमस्ति भगवद्भक्तेर्महासागरो भक्तिरत्नावली श्रीमद्भागवतस्य तत्तत्स्कन्धाध्यायेषु प्रसिद्धानां भक्तिविषयकश्लोकानां सङ्ग्रहरूपो ग्रन्थः, यस्यानुशीलनेन भगवद्भक्तेः साङ्गोपाङ्गं स्वरूपं सहसा समुपतिष्ठते । अत्र विष्णुपुरीप्रणीता दश श्लोकाः, द्वौ

श्लोकौ हरिभक्तिसुधोदयस्य, अवशिष्टाः सप्तनवत्युत्तरत्रिंशतानि सन्ति श्रीमद्भागवतस्य पद्यानि । एवं समष्टौ तत्र ४०९ श्लोकानामस्ति सङ्कलनम् ।

सेयं भक्तिरत्नावली त्रयोदशसु विरचनेषु विभक्ता वर्तते । तत्र प्रथमे विरचने श्रीमद्भागवतस्य दशमस्कन्धीयेनामुना श्लोकेन—

जयति जननिवासो देवकीजन्मवादो
यदुवरपरिषत्स्वै दोर्भिरस्यन्नधर्मम् ।
स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन
व्रजपुरवनितानां वर्द्धयन् कामदेवम् ॥

मङ्गलाचरणान्तरं पुरीप्रणीतैः श्लोकैः ग्रन्थप्रणयनप्रयोजनमभिधाय भगवन्नारायणेऽनन्यया भक्त्या मनसः प्रसादात्तद्भजनमेव कल्याणत्करमित्यभिप्रेत्य तत्र प्रवृत्यर्थं समुद्बोधाय च तावद् भक्तिसामान्यं निरूपयितुं विविधानां श्रीमद्भागवतीयश्लोकानामस्ति सङ्कलनम्, । द्वितीये सत्सङ्गस्य महिमानं दर्शयितुं तद्विषयकश्लोकानां, तृतीये नवधाभक्तिप्रतिपादकानां पद्यानां, चतुर्थे श्रवणभक्तिपरकपद्यानां, पञ्चमे भगवद्गुणकीर्तन परकपद्यानां, षष्ठे स्मरणभक्तिविषयकश्लोकानां, सप्तमे पादसेवनभक्तिपद्यानां, अष्टमेऽर्चनभक्तिविषयकानां, नवमे वन्दनभक्तिपरकपद्यानां, दशमे दास्यभक्तिविषयकश्लोकानाम्, एकादशे सख्यभक्तिपरकपद्यानां, द्वादशे आत्मनिवेदनविषयकश्लोकानां, त्रयोदशे च विरचने शरणागतिभक्तिपोषकाणां पद्यानां संग्रहानन्तरं सङ्कलयितुः पुरीमहाराजस्यात्मनिवेन-सङ्कलनस्थान-समयादिकञ्चाङ्कितमस्ति ।

इतः पूर्वं द्वादशशताब्द्यां वोपदेवेनापि श्रीमद्भागवतीयपद्यानि संगृह्य मुक्ताफलेति नाम्ना प्रसिद्ध एको भक्तिग्रन्थः सङ्कलितोऽस्ति । परमुभयो सङ्कलनायामस्ति पार्थक्यम् । मुक्ताफले रसवैशिष्ट्यमवलम्ब्य श्रीमद्भागवत श्लोकानामस्ति सङ्कलनम्, किन्तु भक्तिरत्नावल्यां भक्तिवैशिष्ट्यमनुरुध्य वर्तते श्रीमद्भागवत पद्यानां सङ्ग्रहः ।

पद्मपुराणस्य

आनन्दाश्रमपूनासंस्करणे ५।१५।१६४–१९१ पर्यन्तं प्रथमं भक्तिः आध्यात्मिक–लौकिक वैदिकभेधात् त्रिविधा प्रोक्ता । पुनः सा वैदिकी-वाचकी-मानसीभेदात् त्रिधा विभज्यते । भूयऽपि एषा द्विविधा सांख्या-योगजाभेदात् भिद्यते । तथाहि—

त्रिविधा भक्तिरुद्दिष्टा मनोवाक्कायसम्भवा ।
लौकिकी वैदिकी चापि भवेदाध्यात्मकी तथा ॥१६४॥
ध्यानधारणया बुद्ध्या वेदार्थस्मरणं हि यत् ।
ब्रह्मप्रीतिकरी चैषा मानसी भक्तिरुच्यते ॥१६५॥

मन्त्रवेदनमस्कारैरग्निश्राद्धादिचिन्तनैः ।
जाप्यैश्चारणकैश्चैव वाचिकी भक्तिरुच्यते ॥१६६॥
व्रतोपवासनियमैश्चित्तेन्द्रियनिरोधिभिः ।
कृच्छ्रैः सान्तपनैश्चान्यैस्तथा चान्द्रयणादिभिः ॥१६७॥
ब्रह्मकृच्छ्रोपवासैश्च तथा चान्यैः शुभव्रतैः ।
कायिकी भक्तिराख्याता त्रिविधा तु द्विजन्मनाम् ॥१६८॥
गोघृतक्षीरदधिभी रत्नदीपकुशोदकैः ।
गन्धैर्माल्यैश्च विविधैर्धातुभिश्चोपपादितैः ॥१६९॥
घृतगुग्गुलधूपैश्च कृष्णागरुसुगन्धिभिः ।
भूषणैर्हेमरत्नाद्यैश्चित्राभिः स्रग्भिरेव च ॥१७०॥
नृत्यवादित्रगीतैश्च सर्वैर्वन्योपहारकैः ।
भक्ष्यभोज्योपहारैश्च या पूजा क्रियते नरैः ॥१७१॥
पितामहं समुद्दिश्य भक्तिः सा लौकिकी मता ।
ऋग्यजुःसामजाप्यानि संहिताध्यापनानि च ॥१७२॥
क्रियते ब्रह्म उद्दिश्य सा भक्तिर्वैदिकी स्मृता ।
वेदमन्त्रहविर्योगैर्या क्रिया वैदिकी स्मृता ॥१७३॥
दर्शे वा पौर्णमास्यां वा कर्तव्यमग्निहोत्रकम् ।
प्रशस्तं दक्षिणादानं पुरोडाशचरुक्रिया ॥१७४॥
इष्टिर्धृतिः सोमपानं यज्ञीयं कर्म सर्वशः ।
अग्निभूम्यनिलाकाशानिशाम्बुकरभास्करम् ॥१७५॥
समुद्दिश्य कृतं कर्म तत्सर्वं ब्रह्मदैवतम् ।
आध्यात्मिकी तु द्विविधा ब्रह्मशक्तिः स्थिता नृप ॥१७६॥
सांख्याख्या योगजा चान्या विभागं तत्र मे श्रृणु ।
चतुर्विंशतितत्त्वानि प्रधानादीनि संख्यया ॥१७७॥
अचेतनानि भोग्यानि पुरुषः पञ्चविंशकः ।
चेतनः पुरुषो भोक्ता न कर्ता तस्य कर्मणः ॥१७८॥

आत्मा नित्योऽव्ययश्चैव अधिष्ठाता प्रयोजकः ।
अव्यक्तः पुरुषो नित्यः कारणं च पितामहः ॥१७९॥
तत्त्वसर्गो भावसर्गो भूतसर्गश्च तत्त्वतः ।
संख्यया परिसंख्याय प्रधानं च गुणात्मकम् ॥१८०॥
ज्ञात्वा साधर्म्यवैधर्म्ये सततं च पृथक् पृथक् ।
प्रधानपुरुषेशानां सामर्थ्यमिदमुच्यते ॥१८१॥
अजो नित्यमयोनित्वं चैतन्यं वा गुणात्मकम् ।
साधर्म्यमानमैश्वर्यं प्रधानं च विधर्मि च ॥१८२॥
कारणत्वं च ब्रह्मत्वं कामित्वमिदमुच्यते ।
प्रयोज्यत्वं प्रधानस्य वैधर्म्यमिदमुच्यते ॥१८३॥
सर्वत्र कर्तृता ब्रह्म पुरुषस्याप्यकर्तृता ।
चेतनत्वं प्रधाने वा समत्वमिदमुच्यते ॥१८४॥
तत्त्वान्तरं च तत्त्वानां कार्यकारणमेव च ।
प्रयोजनं च वै योज्यं ज्ञात्वा तत्त्वं च संख्यया ॥१८५॥
संख्यास्तीत्युच्यते प्राज्ञैर्विनिश्चित्यार्थचिन्तकैः ।
इति तत्त्वस्य संभारं तत्त्वसंख्या च तत्त्वतः ॥१८६॥
ब्रह्मतत्त्वादिकं चापि ज्ञात्वा तत्त्वं विदुर्बुधाः ।
संख्याकृता भक्तिरेषा सद्भिराध्यात्मिकी मता ॥१८७॥
योगजामपि मे भक्त्या शृणु भक्तिं पितामहे ।
प्राणायामपरो नित्यं ध्यानवान् नियतेन्द्रियः ॥१८८॥
भैक्ष्यभक्षी व्रती चापि सर्वप्रत्याहृतेन्द्रियः ।
धारणं हृदये कृत्वा ध्यायमानः प्रजेश्वरम् ॥१८९॥
हृत्पद्मकर्णिकासीनं रक्तवस्त्रं सुलोचनम् ।
परितो द्योतितमुखं ब्रह्मसूत्रकटीतटम ॥१९०॥
रक्तवर्णं चतुर्बाहुं वरदाभयहस्तकम् ।
योगजा मानसी सिद्धिर्ब्रह्मभक्तिः परा स्मृता ॥१९१॥

स्कन्दपुराणस्य प्रभास खण्डे वङ्गवासी संस्करणे च
१०७।२–१६ पर्यन्तमपि भेदोऽधस्तद् द्रष्टव्यः ।

त्रिविधा भक्तिरुद्दिष्टा मनोवाक्कायसम्भवाः ।
लौकिकी वैदिकी चापि भवेदाध्यात्मिकी तथा ॥२॥
ध्यानधारणया या तु वेदानां स्मरणेन च ।
ब्रह्मप्रीतिकरी चैषा मानसी भक्तिरुच्यते ॥३॥
मन्त्रवेदनमस्कारैरग्निश्राद्धविधानकैः ।
जाप्यैश्चारण्यकैश्चैव वाचिकी भक्तिरुच्यते ॥४॥
व्रतोपवासनियमैश्चित्तेन्द्रियनिरोधिभिः ।
कृच्छ्रसान्तपनैश्चान्यैस्तथा चान्द्रायणादिभिः ॥५॥
ब्रह्मोक्तैश्चोपवासैश्च तथान्यैश्च शुभव्रतैः ।
कायिकी भक्तिराख्याता त्रिविधा तु द्विजन्मनाम् ।६॥
गो - धृत - क्षीर - दधिभिर्मध्विक्षु - सुकुशोदकैः ।
गन्धमाल्यैश्च विविधैर्वस्तुभिश्चोपपादिभिः ॥७॥
घृतगुग्गुलधूपैश्च कृष्णागुरुसुगन्धिभिः ।
भूषणैर्हेमरत्नाद्यैश्चित्राभिः स्रग्भिरेव च ॥८॥
न्यासैः परिसरैः स्तोत्रैः पताकाभिस्तथोत्सवैः ।
नृत्यवादित्रगीतैश्च सर्ववस्तूपहारकैः ॥९॥
भक्ष्यभोज्यान्नपानैश्च या पूजा क्रियते नरैः ।
पितामहं समुद्दिश्य सा पूजा लौकिकी मता ॥१०॥
वेदमन्त्रहविर्भागैः क्रिया या वैदिकी स्मृता ।
दर्शे च पौर्णमास्याञ्च कर्तव्यं चाग्निहोत्रजम् ॥११॥
प्राशनं दक्षिणादानं पुरोडाश इति क्रिया ।
इष्टिर्धृतिः सोमपानं यज्ञियं कर्म सर्वशः ॥१२॥
ऋग्यजुःसामजाप्यानि संहिताध्ययनानि च ।
क्रियन्ते ब्रह्माणमुद्दिश्य सा भक्तिर्वैदिकोच्यते ॥१३॥
प्राणायामपरो नित्यं ध्यानवान् विजितेन्द्रियः ।
भैक्ष्यभक्षी व्रती चापि सर्वप्रत्याहृतेन्द्रियः ॥१४॥

धारणं हृदये कृत्वा ध्यायमानः प्रजेश्वरम् ।
हृत्पद्मकर्णिकासीनं रक्तवर्णं सुलोचनम् ॥१५॥
पश्यन्नुद्योतिमुखं ब्रह्माणं सुकटीतटम् ।
रक्तवर्णं चतुर्बाहुं वरदाभयहस्तकम् ॥
एवं यश्चिन्तयेद्देवं ब्रह्मभक्तः स उच्यते ॥१६॥

एवमुभयत्र पद्मपुराणे स्कन्दपुराणे च भक्ते विवेचनं समानमेव कृतं दृश्यते । द्वयोः पुराणयोः लौकिक-वौदिकाध्यात्मभेदपुरः सरं सत्त्विक-राजस-तमस कायिक-वचिक-मानसिकभेदा अपि समानाएवावलोक्यन्ते । केवलं तयोः संक्षपतो विशदतश्च विचारो दृष्टिगोचरतामागच्छति । अतो मानवमणिभिर्भक्तिशिरोमणिभिरेतत्सर्वं समुह्यम् ।

पद्मपुरणस्य वङ्गवासीसंस्करणे ४।८५।४—१४पर्यन्तं तु आध्यात्मिकी-लौकिकी वेदिकी भेदात् प्रथमं तावत् त्रिधा भक्तिः प्रोक्ता, सा पुनः मानसी-वाचिकी-कायिकी भेदा त्रिधा भिध्यते । भूयोऽपि सा राजसी-तामसी-सात्त्विकीभेदात् त्रिधा विभक्ताऽस्ति—

त्रिविधा भक्तिरुद्दिष्टा मनोवाक्कायसम्भवा ।
लौकिकीवैदिकी चापि भवेदाध्यात्मिकी तथा ॥ ४ ॥
ध्यानधारणया बुद्धया वेदानां स्मरणेन च ।
विष्णुप्रीतिकरी चैषा मानसी भक्तिरुच्यते ॥ ५ ॥
वेदमन्त्रसमुच्चारैरविश्रान्तं दिवानिशम् ।
जपैश्चारण्यकैश्चैव वाचिकी भक्तिरिष्यते ॥ ६ ॥
व्रतोपवासनियमैः पञ्चेन्द्रियजयेन च ।
कायिकी भक्तिरुद्दिष्टा सर्वसिद्धिविधायिनी ॥ ७ ॥
पाद्यार्घ्याद्युपचारैश्च नृत्यवादित्रगीतकैः ।
वलिभिर्जागरार्चाभिर्लौकिकी भक्तिरीरिता ॥ ८ ॥
ऋग्यजुः सामजप्यैश्च संहिताध्ययनादिभिः ।
हविर्होमक्रियाभिश्च या भक्तिः सा तु वैदिकी ॥ ९ ॥
दर्शश्च पौर्णमासश्च विषुवादिषु यः पुनः ।
यागः संकीर्तितो विज्ञ वैदिकीभक्तिसाधकः ॥ १० ॥

चतुर्विंशतितत्त्वानि प्रधानादीनि संख्यया ।
अचेतनानि राजेन्द्र पुरुषः पञ्चविंशकः ॥ ११ ॥
चेतनः स समुद्दिष्टः कर्ता भोक्ता च कर्मणाम् ।
आत्मनित्यो ह्यसक्तश्च ह्यधिष्ठाता प्रयोजकः ॥ १२ ॥
व्यक्तिस्थचेतनो नित्यः कारणानां च कारणम् ।
तत्त्वसर्गो भावसर्गो भूतसर्गश्च तत्त्वतः ॥ १३ ॥
संख्यायाश्च प्रसंख्यानं प्रधानं च गुणात्मकम् ।
ज्ञात्वा साधर्म्यवैधर्म्ये प्रधानस्य गुणात्मनः ॥ १४ ॥
कारणत्वं ब्राह्मणस्य साधर्म्यमिदमुच्यते ।
नानात्वं चात्र वैधर्म्यं प्रधानस्य विदुर्बुधाः ॥ १५ ॥
तत्त्वान्तरं च तत्त्वानां कार्यकारणमेव च ।
प्रयोजनं प्रयोज्यत्वं ज्ञात्वा तत्त्वप्रसंख्यया ॥ १६ ॥
संख्यानां प्रोच्यते प्राज्ञैः सर्वतत्त्वार्थचिन्तकैः ।
इति मत्वास्य सद्भावं तत्त्वसंख्यां च तत्त्वतः ॥ १७ ॥
ब्रह्मतत्त्वाधिकं चापि ज्ञात्वा तत्त्वं विदुर्बुधाः ।
सांख्यैः कृता भक्तिरेषा प्रोच्यतेऽध्यात्मिकी नृप ॥ १८ ॥
योगजामपि वक्ष्यामि भक्तिमाध्यात्मिकीं शृणु ।
प्राणायामपरो नित्यं ध्यानवान् नियतेन्द्रियः ॥ १९ ॥
भैक्ष्यभक्ष्यव्रती चापि विषयेभ्यो निवृत्तिमान् ।
पश्यन्नुद्योतितमुखं ब्रह्मसूत्रं कटीतटे ॥ २० ॥
श्वेतवर्णं चतुर्बाहुं वरदाभयहस्तकम् ।
ध्यायमानः स्वहृदये योगयुक्तो महेश्वरम् ॥ २१ ॥
हृष्टं स्वतेजसा राजन् ! पीतवस्त्रं सुलोचनम् ।
योगजा मानसी सिद्धिर्विष्णुभक्तिः परा स्मृता ॥ २२ ॥
यथैवं भक्तिमान् देवे विष्णुभक्तः स उच्यते ।
एवं भक्तिः समुद्दिष्टा त्रिविधा नृपनन्दन ॥ २३ ॥

सात्त्विकी राजसी चैव तामसी भेदतस्त्विमाः ।
भक्तयो विविधा ज्ञेया विष्णोरमिततेजसः ॥ २४ ॥

श्रीमद्भागवते भक्तानां सगुण-निर्गुणभेदौ विधाय सगुणभक्तानां सात्त्विक-राजस-तामस भेदात् त्रिविधो भेदः कृतोऽस्ति । तत्र सगुणाः सात्त्विक-राजस-तामसा भक्ताः सकामा कथ्यन्ते, निर्गुणश्च भक्तो निष्कामो भवति । तस्मिन् भगवन्तं प्रति निष्काम-भावनया अनन्यं प्रेम प्रजायते । जिज्ञासुः, आर्तः, अर्थार्थी च भक्ताः क्रमशः सात्त्विक-राजस-तामसाः सन्ति । निर्गुणभक्तश्च गीताया ज्ञानी भक्त इव निर्मलो भवति ।

निर्गुणस्य भक्तस्य लक्षणं कुर्वता महामुनिना भगवता कपिलेन स्वमातरं देवहूतिं प्राति प्रोक्तं यद् यथा गङ्गाप्रवाहोऽखण्डरूपेण समुद्राभिमुखं प्रवहति तथैव भगवद्गुणानां श्रवणमात्रेण यस्य मनसो गतिः अविच्छिन्नरूपेण हृदयगुहायां विराजमाने भगवति पुरुषोत्तमे अनन्यप्रेमपूर्वकं निष्कामभावनया लगति, स एव निर्गुणो भक्तोऽस्ति । भक्ता-वस्यां भगवद्ध्यानमव्यवहितं जायते । एवंविधा निष्कामा भक्ता भगवत्सेवातिरिक्तं मोक्षमपि न वाञ्छन्ति—

मदगुणश्रुतिमात्रेण मयि सर्वगुहाशये ।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ॥११॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥१२॥
सालोक्य - सार्ष्टि - सामीप्य - सारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥१३॥
स एव भक्तियोगाख्यः आत्यन्तिक उदाहृतः ।
येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते ॥१४॥

सृष्ट्यादौ च वृक्ष-पशु-पक्षि-सरीसृप-दंश-मशक-मत्स्यादीनां निर्माणं विधायापि यदा ब्रह्मदेवस्य सन्तोषो न जातस्तदा तेन सम्यग्विचार्य मानवनिर्माणं विधाय महान् सन्तोषो लब्धः । यतो हि तेषु मानव योनिलाभस्य परमप्रयोजनपरमेश्वरप्राप्तिसाधिकां सुबुद्धिं विलोक्य जायमानो महान् हर्ष उचित एव । वस्तुतो मानवयोनिरेवैतादृशी सर्वोत्तमा वर्तते यत्रोत्पन्ना एव जीवा विविधैः साधनैः सद्बुद्धया च परोपकारं कुर्वाणा भगवन्तमा-राध्यात्मकल्याणं कर्तुं प्रभवन्ति । अतो भवत्साक्षात्कारं कर्तुं समर्थानां जीवानां कृते मानवयोनिलाभ एव परमोत्कृष्टः प्रोक्तोऽस्ति । तथा चोक्तं श्रीमद्भागवते—

सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्त्या
वृक्षान् सरीसृपपशून् खगदंशमत्स्यान् ।
तैस्तैरतुष्टहृदयः पुरुषं विधाय
ब्रह्मावलोकधिषणं मुदमाप देवः ॥ = ११।९।२८

लब्ध्वा सुदुर्लभमिदं बहुसम्भवान्ते
मानुष्यमर्थदमनित्यमपीह धीरः ।
तूर्णं यतेत न पतेदनुमृत्युयाव-
न्निःश्रेयसाय विषयः खलु सर्वतः स्यात् ॥ = ११।९।२९

अपि च—

लब्ध्वेह मानुषीं योनिं ज्ञानविज्ञानसम्भवाम् ।
आत्मानं यो न बुद्ध्येत न क्वचिच्छममाप्नुयात् ॥ = ६।१६।५८

किञ्च—

लब्ध्वा जन्मामरप्रार्थ्यं मानुषं तद् द्विजाग्र्यताम् ।
तदनादृत्य ये स्वार्थं घ्नन्ति यान्त्यशुभां गतिम् ॥ = ११।२३।२२

भक्तिरसविभागः

यथा भावमयं यद् दृश्यं तस्य चतुर्दशप्रकारतया सप्त ज्ञानभूमयः सप्त च अज्ञानभूमयो-भवन्ति । ज्ञानाज्ञानभूमीनां च सप्त सप्त विभागा मिलित्वा चतुर्दश विभागा भवन्ति । यथा वा विराट्पुरुषस्य भगवतो नाभेरुपरिष्टात् सप्त लोका अधस्ताच्च सप्त लोका मिलित्वा चतुर्दश लोका भवन्ति तथैव रसस्यानुभवात्मकं ज्ञानमपि चतुर्दशप्रकारकं भवति । तत्र सप्त रसा मुख्याः, सप्त च गौणाः । यथैकस्य ब्रह्माण्डस्य ऊर्ध्वाधोविभागेन सप्त सप्त मिलित्वा चतुर्दशभेदा भवन्ति तथैव भावसागरस्यापि चतुर्दश भेदा अवगन्तव्याः । एकस्मिन् ब्रह्माण्डे सत्त्वमया भूर्भुवःस्वर्महर्जनतपःसत्याख्याः ऊर्ध्वस्थाः सप्तलोकाः तमोमयाश्चातल - वितल-सुतल-महातल - तलातल - रसातल - पाताला-भिधा-अधोलोकाः सप्त । तद् द्वन्द्वविज्ञानमनुसृत्य भगवद्भावप्रकाशशीलाः रसा अपि गौणमुख्यभेदेन चतुर्दशविधा भवन्ति । तत्र हास्य-वीर-करुण-अद्भुत-भयानक-वीभत्स-रौद्राश्चेति सप्त गौणरसाः, दास्यासक्ति - सख्यासक्ति-वात्सल्यासक्ति-कान्ता-सक्ति-आत्मनिवेदनासक्ति—गुणकीर्तनासक्ति-तन्मयासक्तिश्च सप्त सन्ति मुख्याः रसाः । एते सर्वे मिलित्वा भवन्ति चतुर्दश भेदाः **"येते पाशाः सप्त सप्त भेदाः तिष्ठन्ति"** इतिमन्त्रानुसारं कार्यब्रह्मणो विराट्स्वरूपस्य भेदाः चतुर्दशविधाः चतुर्दशभुवन-संज्ञया वेदे वर्णिताः सन्ति । तदनुसारमेव पुराणेषु सत्त्व-तमसी, पुण्यपापे, प्रकाशा-न्धकारौ चानुसृत्य विराट्पुरुषस्य भगवतो नाभेरुपरि भूरादयः सप्त लोकाः अधश्च अतलप्रभृतयः सप्त लोका मिलित्वा चतुर्दश लोका विद्यमाना वर्ण्यन्ते । तथाहि श्रीमद्भागवते—

स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः ।
सहस्रोर्वङ्घ्रिबाह्वक्षः सहस्राननशीर्षवान् ॥ = २।५।३५

यस्येहावयवै र्लोकान् कल्पयन्ति मनीषिणः ।
कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः ॥ = २।५।३६

कार्यकरणसम्बन्धानुसारेण व्यष्टिसृष्टौ सर्वे पदार्थाः प्रायः सप्तप्रकाशा दृश्यन्ते यथा सप्त व्याहृतयः सप्त प्राणाः, सप्त समिधः सप्त दीप्तयः । सप्त सागराः सप्त मातृकाः, सप्त दिनानि, सप्त धातवः, सप्त ज्ञानभूमयः, ऊर्ध्वंलोका सप्त, सप्त चाधोलोकाः । तथाचोक्तं भरद्वाजसंहितायाम्—

अन्ये भेदाश्च भो देवाः ! श्रूयन्तां सप्तधा मम ।
स्थूलसूक्ष्मप्रपञ्चेषु व्याप्तोऽस्मि सप्त रूपतः ॥
अज्ञान - ज्ञानयोरस्मि भूमयः सप्त सप्त च ।
ऊर्ध्वलोकाश्च ये सप्त अधो लोकाश्च सप्त ते ॥
अहमेवास्मि ते सर्वे सप्त प्राणास्तथैव च ।
सप्त व्याहृतयः सप्त समिधः सप्त दप्तियः ॥
वाण्वै सप्त भूत्वाथ कालं हि विभजाम्यहम् ।
सप्त भूम्यनुसारेण ज्ञानस्य त्रिदिवौकसः ॥
सप्तसागररूपेण सदा पर्यावृतास्ति हि ।
निवासभूमिर्जीवानां सप्तैव सुरसत्तमाः ।
उपासकगणान् सप्त मातृका रूपमाश्रिताः ।
अहन्तूपासनामार्गे विधायाग्रेसान् हि तान् ॥
उपासनानदीस्नातान् स्वसमीपं नयामि च ।
भूमिर्दार्शनिकी सप्त निर्माय ताभिरेव च ।
आरोप्य ज्ञानसोपानं साधकास्तत्त्ववेदिनः ॥
न यस्मात् पुनरावृत्तिस्तत् कैवल्यपदं नये ॥

दृश्यमानं समस्तं जगदिदं शृङ्गारद्वारैवाविर्भूतम् । प्रलयदशायां हि केवलमेकमात्रमात्मैवासीत् । तदानीं तीव्रं तपस्तप्त्वा परमात्मा 'एकोऽहं बहु स्याम्' इतीच्छां प्रकटितवान् । ततः तस्यैव शरीरात् प्रकृतिरूपिणी जाया प्रादुरभवत्, तया सह मिथुनीभावफलरूपेयं शृङ्गारे बहुला सृष्टिरजायत । यथा चोक्तम् भगवता मनुना मनुस्मृतौ—

द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत् ।
अर्द्धेन नारी तस्यां स विराजमसृजत् प्रभुः ॥ = १।३२ ॥

अर्थात् ब्रह्मदेवो स्वकीयं शरीरं द्विखण्डं विधाय अर्द्धभागेन पुरुषो जातः, अर्द्धेन च स्त्रीरजायत, तस्यां मैथुनधर्मेण 'ततो विराडजायत, इति श्रुत्यनुसारं विराट् संज्ञकं पुरुषं निर्मितवान् । स एव तीव्रं तपो विधाय समस्तमिमं दृश्यमानं प्रपञ्चमसृजत् ।

अपि च—योगेनात्मा सृष्टिविधौ द्विधारूपो बभूव ह।
पुमांश्च दक्षिणार्द्धाङ्गं वामार्द्धं प्रकृतिः स्मृताः॥

तथा च भक्ति विषयका एते चतुर्दशरसाः सृष्टेः प्राथमिकशृङ्गाररसपरिणाम—स्वरूपाः वेदितव्याः। समस्तजगन्मूलकारणरूपः प्रकृतिपुरुषसंयोगात्मकः एकः-शृङ्गाररस एवानेकान् भेदान् प्राप्तो जीवमात्रहृदयेषु स्वाधिपत्यं स्थापितवानस्ति। चतुर्दशसु एतेषु रसेष्वेव हास्यादयः सप्त गौणरसा मलिनशृङ्गारात्मकाः, सप्त च दास्यासक्त्यादयो मुख्यरसाः शुद्धाः शृङ्गारात्मकाः सर्वेषां रसानामानन्दपरिणाम स्वरूपत्वात् हास्यादिरसद्वारापि समुन्नतिर्भवितुमर्हति, किन्तु रसा एते स्वाश्रयमालिन्यात् गौणा एवावगन्तव्याः।

सप्तसु मुख्यरसेषु एवं नास्ति यतो हि मुख्यासु दास्यादिसक्तिषु मलिनताया अत्यन्ताभावाद् दास्यादिद्वारा साक्षाद्रूपेण भक्तानां कल्याणं सम्पद्यते। भगवत्यनुरागोदयेन भक्तानां चेतांसि सर्वदाऽनन्दसागरे निमग्नानि तिष्ठन्ति।

प्रकृतिवैचित्र्याद् भक्तवत्सलं वाञ्छाकल्पतरुं भवन्तं प्रति केचिद् भक्ता दास्यभावेन, अपरे सख्यभावेन, केऽपि कान्तभावेन, बहवो वात्सल्येन, इतर आत्मनिवेदनेन, अन्ये गुणकीर्तनेन, परे च तन्मयतया भगवच्चरणारविन्दसन्निधाने अग्रेसरन्तः अन्ते परमानन्दपदमधिगच्छन्ति, भक्ताधीनो भगवानपि आत्मन्यासक्तानां भक्तानां परममनुगृहं विदधत् अन्ते परमानन्दस्वरूपं मुक्तिपदं प्रापयति। स हि स्वयं निजमुखेनाह श्रीमद्भागवते—

अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज!
साधुभिर्ग्रस्त हृदयो भक्तैर्भक्तजनप्रियः।
नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना।
श्रियं चात्यन्तकीं ब्रह्मन्! येषां गतिरहं परा॥
ये दारागारपुत्राप्तान् प्राणान् वित्तमिमं परम्।
हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे॥
मयि निर्बद्धहृदयाः साधवः समदर्शनाः।
वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा॥
मत्सेवया प्रतीतं च सालोक्यादि चतुष्टयम्।
नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत् कालविद्रुतम्॥
साधवो हृदयं मह्यं साधूनां हृदयं त्वहम्।
मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि॥ = ९।४।६३–६९

मुख्यरसानां दिङ्मात्रमुदाहरणम्

(१) भक्ताग्रगण्यस्य बुद्धिमतां वरिष्ठस्य पवनात्मजस्य भगवतो हनुमतो भगवति श्रीरामचन्द्रे या किला अपूर्वा दास्यासक्तिरासीत्, सा तु जगत्प्रसिद्धैवास्ते । दास्यासक्ति-समुदयेन भक्तः सेवकभावेन भगवति तत्सेवकेषु च आत्मानं समर्पयति । अतः स भगवतोऽत्यन्तं प्रियो भवति । स्वयमेवाह भगवान् श्रीमुखेन—

मद्भक्तानां च ये भक्तास्ते मे भक्ततमाः स्मृताः ॥
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥

स्वयमेव भगवता श्रीकृष्णेनार्जुनं प्रति महाभारतस्य शान्तिर्वण मोक्षधर्मे नारायणमहेश्वरयोरैक्यं प्रतिपादयता प्रोक्तं यत् महेश्वरस्य पूजया नारायणस्यापि पूजा-सम्पद्यते द्वयोरोकात्मकत्वात्—

नारायणात्मको ज्ञेयः पाण्डवेय ! युगे युगे ।
तस्मिन् ! हि पूज्यमाने वै देवदेवे महेश्वरे ॥
सम्पूजितो भवेत् पार्थः देवो नारायणः प्रभुः । ३४१ । २२१

(२) सख्यासक्तिः—नरावतारः तृतीयः पाण्डवः सव्यसाची अर्जुन आनन्द-कन्दस्य सच्चिदानन्दस्य नन्दनन्दनस्य भगवतः श्रीकृष्णचन्द्रस्य सख्यभावमधिगतः भेद-बुद्धिं सर्वथैव त्यक्तवान् आसीत् । महाभारतप्राङ्गणे विश्वरूपदर्शनेन यदा भगवतः श्रीकृष्णस्य यथार्थं स्वरूपमवगतवान् तदा स करौ बध्वा प्रोवाच—

सखेति मत्वा प्रसभं यदुक्तं हेकृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वापि ॥ - ११।४१

(३) वात्सल्यासक्तिदृष्टान्तभूता यशोदानन्दादयो गोपा आदर्शस्वरूपेण विज्ञातुं शक्यन्ते । एतैस्तु भगवतः श्रीकृष्णस्य विश्वरूपधारण-कालियनागदमनादिक-मलौकिकं कार्यकलापमवलोक्यापि पुत्रभावेन तत्र प्रीतिरनुष्ठिता । एतद्वात्सल्यायितेन एकेन भक्तेन प्रतिपादितम्—

एह्येहि वत्स ! नवनीरदकोमलाङ्ग !
याचामि मूर्धनि चिराय परिष्वजे त्वाम् ।
आरोप्य वा हृदि दिवानिशमुद्वहामि
वन्देऽथवा चरणपुष्करकं द्वयं च ॥

(४) कान्तासक्तिः मनोवाक्कायकर्मभिः भगवति श्रीकृष्णे समासक्तासु व्रज-गोपिकासु दृष्टिगोचरतामायाति । समस्ताभिराभिः लोकलज्जां कुलमर्यादां गार्हस्थ्यधर्मं चापि परित्यज्य भगवन्तं श्रीकृष्णं परं ब्रम्ह्म ज्ञात्वा वृन्दावननिवासिनो मुरलीधारिणः

परमप्रेमास्पदस्य आनन्दकन्दसच्चिदानन्दस्वरूपस्य भगवतः श्रीकृष्णस्य पवित्रे प्रेमपयोधौ स्वीया जीवननौका सनिर्भयं प्रवाहिता । यासामपूर्वप्रेमपाथोधिं पर्यालोच्यात्मानमधमर्ण्यंमन्यमानेन भगवता श्रीकृष्णेन स्पष्टमुद्घोषितम्—

न पारयेऽहं निरवद्यसंयुजां
स्वसाधुकृत्यं विबुधायुषापि वः ।
या माभजन् दुर्जरगेहश्रङ्खलाः
संवृश्च्य तद्वः प्रतियातु साऽधुना ॥ = १०।३२।२२ ॥

अपि च गोप-गोपीनां सान्त्वनाय प्रेमरसे भक्तिरससरसे वृन्दावने मथुरातः स्वसखायमुद्धवं प्रहिण्वता भगवता श्रीकृष्णेन स्वयं श्रीमुखेनोक्तम्—

गच्छोद्धव ! व्रजं सौम्य ! पित्रो नौं प्रीतिमावहः ।
गोपीनां मद्वियोगाधिं मत्सन्देशैर्विमोचय ॥ = १०।४६।३ ।
ताः मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ।
मामेव दयितं प्रेष्ठमात्मानं मनसा गताः ॥ = १०।४६।४ ॥
धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चन ।
प्रत्यागमनसन्देशैः बल्लव्यो मे मदात्मिकाः ॥ = १०।४६।६ ॥

(५) आत्मनिवेदनासक्तिसम्बन्धे बलिदेवर्षिनारदादयो दृष्टान्तभूता वेदितव्याः । तैस्तु भगवति नारायणे देहं मनः प्राणांश्च समर्पयद्भिः प्रकृष्टायाः आत्मनिवेदनासक्तेः परिचयो दत्तः । आत्मनिवेदनासक्तेरुदयेन भक्तचेतसोऽहंभावो हि सर्वथा विनश्यति । तदीय जीवनचेष्टादयो भगवत्प्रीत्यर्थमेव भवन्ति । तथाचोक्तं राज्ञा परीक्षिता—

स वा यया तस्य गुणान् गृणीते
करौ च तत्कर्मकरौ मनश्च
स्मरेद्वसन्तं स्थिरजङ्गमेषु
श्रणोति तत्पुण्यकथाः स कर्णः ॥ = १०।८०।३१ ॥
शिरस्तु तस्योभयलिङ्गमानमेत्
तदेव यत् पश्यति तद्धि चक्षुः ।
अङ्गानि विष्णोरथ तज्जनानां
पापोदकं यानि भजन्ति नित्यम् ॥ = १०।८०।४
वाणी गुणानुकथने श्रवणौ कथायां
हस्तौ च कर्मसु मनस्तव पादयोर्नः ।
स्मृत्यां शिरस्तव निवासजगत्प्रमाणे
दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम ॥ = १०।१०।३८

(६) गुणकीर्तनासक्तिदृष्टान्तो महर्षि वेदव्यासोऽवगन्तव्यो वाल्मीकिश्च वोद्धव्यः । ब्रह्मसूत्र-योगभाष्यं महाभारतं सप्तदश पुराणानि निर्मायापि यदा तेन शान्तिर्न लब्धा तदा भक्त्या भगवद्गुणकीर्तनेन परमा निवृत्तिरासादिता । तथा चोक्तं श्रीमद्भागवते-

निवृत्ततर्षैरुपमीयमानाद्
भवौषधाच्छ्रोत्रमनोऽभिरामात् ।
क उत्तमश्लोकगुणानुवदात्
पुमान् विरज्येत विना पशुघ्नात् ॥ = १०।१।३ ॥

(७) रागात्मिकाया भक्तेः रन्तिमावस्था तन्मयासक्तिरेवमु यस्यां भक्ता भगवद्रूपमात्मानमवधारयन् तदीयेऽपूर्वप्रीतिरसप्रवाहे दिवानिशं निमज्जति उन्मज्जति च । तन्मयासक्तेर्भावोदयेन भक्तः कदाचिद् भगवन्तं कदाप्यात्मानमेव प्रणमति—

नमस्तुभ्यं परेशाय नमो मह्यं शिवाय च ।
प्राक् चैतन्यरूपाय मह्यमेव नमो नमः ॥
मह्यं तुभ्यमनन्ताय मह्यं तुभ्यं शिवात्मने ।
नमोदेवाधिदेवाय पराय परमात्मने ॥

भगवति हरे हरौ वा विलक्षणा पारस्परिकासक्तिरेव तन्मयासक्तिरुक्ताऽस्ति । एकदा रहसि पद्मासनेन समासीनं ध्यानपरं भगवन्तं विष्णुं विलोक्य विस्मिता भगवती लक्ष्मीः ततः प्रबुद्धं सुप्रसन्नं च तं ज्ञात्वा विनयपूर्वकमप्राक्षीत्—भगवन् ! देवासुरैः मथ्यमानादर्णवाद् यदाहं निर्गता तदा सर्वैः स्तूयमानं भवन्तं वीक्ष्य सर्वेभ्योदेवेभ्यो-भवानेव श्रेष्ठतम इत्यज्ञासिषम् । सांप्रतं भगवान् कं ध्यायतीति मे महान् संशयो जात इत्येवं पृष्टो हरिः सस्नेहं स्वीयां प्रियातमां तां श्रियं प्रत्याह-देवीभागवते पुराणे—

श्रणु कान्ते ! प्रवक्ष्यामि यं ध्यायामि सुरोत्तमम् ।
आशुतोषं महेशानं गिरिजावल्लभं हृदि ॥
कदाचिद्देवदेवो मां ध्यायत्यमितविक्रमः ।
ध्यायाम्यहं च त देवं शङ्करं त्रिपुरान्तकम् ॥
शिवस्य हि प्रियः प्राणः शंकरस्तु तथा मम ।
उभयोरन्तरं नास्ति मिथः संसक्तचेतसोः ॥ = ६।१८।४४-४७ ॥

नरकं यान्ति ते नूनं ये द्विषन्ति महेश्वरम् ।
मम भक्ता विशालाक्षि ! सत्यमेतद् ब्रवीम्यहम् ॥ = ९।१८।४७ ॥

तन्मयासक्ते विलक्षणो भावविकाशः श्रीकृष्णसमर्पितप्राणासु व्रजस्य गोपिकासु विलोक्यते । यदा भगवान् श्रीकृष्णः रासलीलायां गोपीरभिमानवतीर्ज्ञात्वा

तन्मानापनोदनाय रासमध्ये एव ताः परित्यज्यान्तर्हितः । तदानीं ताः श्री कृष्णविरहे व्याकुलाः सत्यः तच्चिन्तया तन्मयतामवापुः, अनुचक्रुश्च भगवतः श्रीकृष्णस्य तांस्तान् लीलाविशेषान्—

इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणतत्पराः ।
लीला भगवतस्तास्ता अनुचक्रुस्तदात्मिकाः ॥ = १०।३०।१४

एवं हि हास्यादिगौणस्वरूपा दास्यादिमुख्याश्चासक्तीर्द्वारीकृत्य रागात्मिकाया भक्तेः साधको भगवद्राज्ये सदाग्रे सरीभवति ।

भगवद्भावसमुद्रे निमग्नः साधको नूनं रसरूपतां प्रतिपद्यते । सर्वे रसा आनन्दमयाः । अतः आनन्दस्वरूपस्य भगवतश्चरणसरसीरुहेषु चित्तैकाग्र्यं सम्पादयन् धातृ ध्यान-ध्येयरूपिण्याः त्रिपुट्या अवलम्बनेन भगवच्चरणारविन्दं ध्यायन् यथा परमानन्दमधिगच्छति तथा त्रिपुटीनाशतो भगवता सह तस्य भेदबुद्धिः प्रणश्यति ।

भगवद्भक्तौ एकवारमपि निमग्नो भक्तः स्वीयां स्वतन्त्रां जीवसत्तां परिहाय भगवतो रसस्वरूपतामवाप्नोति । हास्यादिगौणरसद्वारा दास्यादिमुख्यरसेन च साधकः समुन्नतिं लभते । गौणरसस्य साधनेन सालोक्यादिमुक्तिर्लभ्यते । निर्वाणमुक्तिस्तु केवलया परया भक्त्यैवाधिगम्यते । गौणरसेनापि तन्मयत्वं जायते तेन च परा भक्तिरुदेति । अतो गौणरसानां परम्परासम्बन्धेन मुख्यरसानां साक्षात्सम्बन्धेन परां भक्तिं प्रति कारणता विज्ञेया ।

सर्वेष्वेव रसेषु स्वभावत एवानन्दसत्तासद्भावात् मुख्येन गौणेन वा रसेन साधकः उन्नतिं लभते । यद्यपि रौद्र-वीर-बीभत्सादिषु गौणरसेषु आनन्दविरोधिदुःखजनकभावानां सम्बन्धोऽस्ति, परन्तु तद्गौणरसजनितक्रियापरिसमाप्तौ भगवत्सम्बन्धसत्वात् रूपान्तरेण तत्रापि भक्तिमात्रता दुर्निवारा । अतो गौणरसा अपि समुन्नतिप्रदाः ।

गौणेषु मुख्येषु च रसेषु एतावनेव विशेषोऽस्ति यत् गौणरसैः सह वहिर्विषयसंम्बन्धात् ते न सन्ति दोषशून्याः । अतः तद्द्वारा समुन्नतिलाभेऽपि परा भक्तिर्नोदेति ।

गौणरसेषु वैषयिकसम्बन्धेन साधकस्य चेत उदारतां न भजते । अतो गौणरसमग्नः साधकोऽभ्युदयाधिकारं लभमानोऽपि साक्षान्मुक्तिरूपाया पराया भक्तेरधिकारी भवितुं नार्हति, किन्तु दास्यादिमुख्यरसेन वहिर्विषयाणां लेशतोऽसंबन्धात् तद्द्वारा परा भक्तिरधिगम्यते । यथा कश्चन नरपतिर्यदा स्वीयराज्यसमुद्धाराय सकामः प्रयतते वीरतां च प्रदर्शयते तदानीं तत्र वीररससमुद्गमेऽपि स्वार्थसम्बन्धात् स्वच्छता न समायाति, परन्तु स एव वीरभावो यदि निष्कामभावेन देशोद्धाराय प्रयुज्यते तर्हि स मलिनताया अभावत् आध्यात्मिकसमुन्नतौ कारणायते ।

अतो गौणरसद्वारा कदाचित् पराया भक्तेः विषये उपकारे जातेऽपि न स सार्वकालिको भवति, परन्तु मुख्यरसानां निर्मलत्वाद् भगवद्भावयुक्तत्वाच्च तद्द्वारा भक्तैः

साक्षात् परा भक्तिरवाप्यते। अतो मुख्यरसानां पूर्णोदये सति साधकस्यान्तःकरणे समाधेरुदये न कापि बाधा संभवति॥

भक्तो यदा भगवत्तन्मयतामासाद्य भावसागरे निमज्जति उन्मज्जति च तदाद्वैत-भावप्रदायाः परायाः भक्तेरुदयो जायते। शुद्धरसधारणायां दृढत्वमापन्नायां साधकः क्रमशः षष्ठां समाधिभूमिमधिरोहति, अनन्तरं च तमेव भावसमुद्रमवगाहमानो भावुको भक्तोऽचिरमेव सविकल्पकसमाधेः वितर्कविचारानन्दास्मिताख्याश्चतस्रो दशा समति-क्रम्य निर्विकल्पकसमाधिमधिरोहति। तत्र ज्ञानस्य भक्तेश्चैक्यं जायते। परां भक्तिं प्राप्तः कृतकृत्यो साधकः समस्तमपि संसारं ब्रह्ममयं पश्यति। इयमेवाद्वितीया परमा-नन्ददायिका पराभक्तिर्विज्ञेया—

मुक्ताश्रयं यर्हि निर्विषयं विरक्तं
निर्वाणमृच्छति मनः सहसा यथार्चिः।
आत्मानमत्रपुरुषोऽव्यवधानमेक—
मन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः॥

(श्रीमद्भागवते ३।२८।३५)

सोऽप्येत्तया चरमया मनसो निवृत्या
तस्मिन् महिम्न्यवसितः सुखदुःखबाह्ये।
हेतुत्वमप्यसति कर्तरि दुःखयोर्यत्
स्वात्मन् विधत्त उपलब्धपरात्मकाष्ठः॥

(श्रीमद्भागवते ३।२८।३६)

अपि च— सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
पश्यति योगयुक्तात्मा सर्वत्र समदर्शनः॥

देवीभागवते पराभक्तिमुपगवतो भक्तस्यावस्थास्वरूपमेवं वर्णितम्—

परानुरक्त्या मामेव चिन्तयेद्यो ह्यतन्द्रितः।
स्वाभेदेनैव मां नित्यं जानाति न विभेदतः॥ = ७।३७।११
इति भक्तिस्तु या प्रोक्ता परा भक्तिस्तु सा स्मृता।
यस्यां देवातिरिक्तं तु न किञ्चिदवभासते॥ = ७।१७।२६
इत्थं जाता पराभक्ति र्यस्य भूधर तत्त्वतः।
तदेव तस्य चिन्मात्रं मद्रूपे विलये भवेत्॥ = ७।१७।२७
भक्तेस्तु या परा सै वज्ञानं प्रकीर्तितम्।
वैराग्यस्य च सीमा सा ज्ञाने तदुभयं यतः॥ = ७।२७।२८

भक्तिमीमांसायां चतुर्थस्य "रसस्तु तत्सामग्रीत उत्पत्तेः" इति सूत्रस्य टिपण्यां पराया भक्तेः स्वरूपमेवमुपवर्णितमास्ते—

परत्रानासङ्गं जनयति. रतिर्या नियमतः
परस्मिन्नेवास्मिन् समरसतया पश्यत इमम् ।
परप्रेमाढ्येयं भवति परमानन्दमधुरा
परा भक्तिः प्रोक्ता रस इति रसास्वादनचणैः ।।

भक्तिरसप्रवाहस्य पर्यवसानम्

सर्वेषां रसानां पर्यवसानमेकत्रैव परमपदास्पदे पुरुषोत्तमतत्त्वे एव संजायते यथा किल देशकालपात्रानुकूलत्वे एकोऽपि अग्निस्फुलिङ्गः समस्तमपि विश्वं भस्मसात्कर्तुं प्रभवति तथैवासाधारणोऽपि रसोऽबाधविकासः समुन्नतो भूत्वा भक्तचेतसि भगवन्तं प्रति रागमुत्पाद्य भक्तं भक्तेः समुन्नततमां भूमिमासादयन् अन्ते नूनमेव परमानन्दमधिगमयति । यतोहि सर्वेषां रसानां परिसमाप्तिस्तत्रैव स्वकारणे रससागरे भगवति परमात्मन्येवेत्ति वदन्ति रससिद्धान्तविदो विपश्चितः ।

भगवद्भक्तिभावे निमग्नस्य भाग्यशालिनो भक्तस्य हृदये शुद्धो ब्रह्मानन्दः समुदेति । भक्तस्य पवित्रं हृदयं भक्तिपरिपूर्णं समाधिस्थं भवदेव ब्रह्मानन्दमुपभुङ्क्ते । विषयानन्दभोक्ता जीवः ज्ञानविरहितो भगवन्तं विस्मृत्य विषयानन्दमेव भजन् गमनागमनचक्रे परिभ्राम्यति, परन्तु ब्रह्मानन्दपरिभोक्ता भाग्यवान् भक्तः भगवद्भावभावितः गमनागमनचक्रं भेदयन् भगवच्चरणारविन्दे निलीयते । विषयानन्दभोगी जीवो यावत्कालपर्यन्तमन्तःकरणेन विशयसुखमास्वादयति तावदसौ गमनागमनचक्रे परिभ्राम्यति, परन्तु यदि जीवोऽसौ साधनराज्यपथपथिको विषयसुखासक्तोऽपि स्वीयं चेतो भगवच्चरणारविन्दे समर्पयेत् तदानी तस्य विषयरसास्वाद एव भगवत्सान्निध्यहेतुर्बोभूयते ।

मिष्ठान्नमोगी विषयी जीवो नूनमेवात्मविमुखः तदेव मिष्ठान्नं यदि भक्तः भगवत्प्रसादरूपेण भक्त्या भुङ्क्ते तदानीं तस्य भाग्यवतो भक्तस्य चित्ततरङ्गपरिसमाप्तिर्भगवद्रससागरे बोभवीति । अतः भक्तिरससागरावगाही भाग्यशाली भक्तः सप्तप्रकारासु आसक्तिषु काम्प्येकाम्प्येकामासक्तिं द्वारीकृत्य भगवच्चरणकमलमकरन्दरसास्वादनमधुकरमात्मानं कुर्याच्चेत्तर्हि तदीयसमस्तचेष्टापरिसमाप्तिः अन्ते भगवच्चरणमुपेत्य स्यादेव ।

यथा तरलतरङ्गिणी भवभयमोचिनी भव्या भगवती भागीरथी विभिन्नान् जनपदान् पुनाना समुद्रमासादयति तथैव भगवद्भावमूलकः समस्तोऽपि रसप्रवाहो भक्तहृदयस्य विभिन्नदेशेषु प्रवहन् निजामृतभावसमूहद्वारा भक्तहृदयं समुन्नयन् अन्ते

ब्रह्मानन्दसागरे समुन्मेलयति । तस्मात् सच्चिदानन्दे परमात्मन्येव सर्वरसपरिसमाप्ति-रिति निश्चप्रचम् ।

कर्मोपासनातपोदानादिभिः साधकोऽभ्युदयमवश्यं लभते, परन्तु भगवद्भक्त्या परमानन्दमयं कैवल्यपदमधिगच्छति । भक्तो भगवद्भक्त्या त्रिगुणातीतं पदं प्राप्य सर्वविधबन्धाद् विमुच्यते । अतो भगवद्भक्तिमन्तरा न काचिदप्यन्या भुक्तिमुक्तिदायिनी सरणिः भवितुमर्हति । त्रिगुणमयेनाश्रयेण त्रिगुणातीतं पदं लब्धुं न शक्यते । केवलं नित्यत्रिगुणातीतपदावलम्बनेनैव निःश्रेयसाख्या मुक्तिरधिगम्यते । सच्चिदानन्दरससागरा-दृते परमपदातिरिक्तं सर्वमपि त्रिगुणमयमेवेति सुतरां त्रिगुणमयस्य पदस्यावलम्बनेन विधीयमाना भक्तिः त्रिगुणातीतं पदं प्रापयितुं नार्हतीत्यत्र नास्त्यणीयानपि संशीतिलेशः । तथाचोक्तं श्रीमद्भागवते—

विसृज्य सर्वानन्यांश्च मामेव विश्वतोमुखम् ।
भजन्त्यनन्यया भक्त्या तान् मृत्योरतिपारये ॥ = ३।२५।४०

यस्मिन् मनोलब्धपदं यदेतच्छनैः शनैर्मुञ्चति कर्मरेणून् ।
सत्त्वेन वृद्धेन रजस्तमश्च विधूय निर्वाणमुपैत्यविन्धनम् ॥ = ११।९।१२

भक्तेर्वैशिष्ट्यम्

आनन्दरसस्वरूपे भगवति एकान्तानुरक्ता भक्ता भगवच्चरणारविन्दपरागरस-लुब्धा समस्तानपि विषयवासनाभोगान् परिहृत्य कृपासिन्धुभगवत्कृपापरवशतां प्रपद्यते । तांश्च परमकारुणिको भगवान् स्वीयं सच्चिदानन्दं परमं स्वरूपं प्रत्याययति, येन जन्ममरणरूपसंसारक्लेशरहितास्ते मुक्तिपदमासादयन्ति । तथाचोक्तं भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायाम्—

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ = १८।५५

मध्येसमुद्रं तरन्त्याः तरङ्गमालाकुलायाः तरण्याः चालका यथा ध्रुवं निरीक्षमाणा कदापि भ्रान्तिदिशो न भवन्ति, अपि तु गन्तव्यस्थानमासादयन्ति तथैव संसारसागरे कोटिजन्मभ्यो भ्रमणशीलाः स्वजीवनतरणीचालकाः भक्ताः स्वहृदयाकाशप्रकाशमान ध्रुवताराकरूपभगवद्भक्तिरसमास्वादयन्तः संसारसमुद्रे दिग्भ्रान्ताः कुपथगामिनो न भवन्ति, न वा कदाप्यवनतिं प्राप्नुवन्ति, प्रत्युतोत्तरोत्तरमुन्नमन्तोऽन्ते सच्चिदानन्दमय-भगवत्परमधामप्राप्ता निर्वृतिमासादयन्ति । जीवा भगवत्सम्बन्धादुन्नमति इन्द्रिय-सम्बन्धेन च पतति । तस्मात्सर्वदा भगवानेव ध्येयो ज्ञेयश्च । सहि भक्तानां हृदये स्थितः सूर्योऽन्धकारमिव सर्वविधं व्यसनं वारयति निवारयति च भयशोकमोहान्—

संकीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसाम् ।
प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवातिवातः ॥

(श्रीमद्भागवते १२।१२।४७)

तस्मिन् महन्मुखरिता मधुभिश्चरित्रपीयूषशेषसरितः परितः स्रवन्ति ।
ता मे पिबन्त्यवितृषो नृप ! गाढकर्णैस्तान्न स्पृशत्यशनतृड्भयशोकमोहाः ॥

(श्रीमद्भागवते ४।२९।४०)

सर्वाण्यपि विषयसुखानि नश्वराणि क्षणभङ्गुराणि च । क्षणभङ्गुरत्वाद्विषयेषु चित्तशान्तेरभावात् सुखाभावः । विषयभोगैरतृप्तं मनः चञ्चलं सत् अनवरतमशान्तिं दुःखपरम्पराञ्च अनुभवति, न किमपि फलमश्नुते, किन्तु—

मनो दृश्यमिदं द्वैतं यत् किञ्चित् सचराचरम् ।
मनसो ह्यमनी भावे द्वैतं नैवोपलभ्यते ।
चित्तप्रसादेन यतिः जहातीह शुभाशुभम् ।
प्रसन्नात्मात्मनि स्थित्वा सुखमत्यन्तमश्नुते ॥

भगवच्चरणारविन्दाश्रयं चेत भगवतो दयामधिगत्य प्रनष्टवासनं सत् परमानन्द-रसमासादयति ।

आहारं परित्यक्तवतो मानवस्य यद्यपि विषयव्यापारो निवर्तते तथापि तदीयचित्तवासना न प्रणश्यति, बीजरूपेण तिष्ठत्येव । पुनराहारे कृते सा अङ्कुरिता जायते, किन्तु भक्तचित्ते भगवच्चरणारविन्दे विलीने सर्वा अपि कामना समूलनाशं नश्यन्ति, ततश्च वासनाविनाशपूर्वकं तत्वज्ञानोदयेन परमानन्दमयनिर्विकल्पक-समाधिरुदेति, पराभक्तिश्चाधिगम्यते । यदा सर्वविधा वासनाः साधकस्य हृदयतः समूलनाशं नश्यन्ति तदा अमरो भूत्वा मानवः शरीरे एव परब्रह्म परमात्मानं सम्यगनु भवति । तथा चोक्तं कठोपनिषदि—

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥ = २।६।१४

परमात्मनः साक्षात्कारे जाते साधकस्य हृदयतोऽहंता-ममता दूरीभवति, अज्ञानग्रन्थयो विच्छिन्ना भवन्ति सर्वविधाश्च संशया विलीयन्ते । तथाहि श्रीमद्भागवते—

भिद्यते हृदयग्रन्थि श्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्ट एवात्मनीश्वरे ॥ = १।२।२१
अतो वै कवयो नित्यं भक्तिं परमया मुदा ।
वासुदेवे भगवति कुर्वन्त्यात्मप्रसादनीम् ॥ = १।२।२२

भगवद्भक्तिः साधकाय सर्वविधं फलं प्रददाति । यतोऽसौ फलरूपा, अतो निखिलफलप्रदा । सर्वविधपुरुषार्थलक्ष्यभूतो मोक्ष एव, अतस्तत्प्राप्तिरेवान्तिमः पुरुषार्थः । भक्तिर्यदि परमपुरुषार्थ रूपं निःश्रेय फलं प्रयच्छति तर्हि सा फलरूपा । तथा च फलरूपायाः तस्याः सर्व प्रदातृत्वं निर्विवादं सिध्यति । यद्वा धर्मार्थकाममोक्षाः पुरुषार्थाः चतुर्धा विभक्ता तेषु कामार्थौ धर्माधीनौ मोक्षश्च धर्मस्य फलरूपः । अतो मोक्षप्रदायिनी भक्तिः सर्वफलप्रदा । सकामस्य भक्तस्य सर्वविधं फलं करुणा-वरुणालस्य भक्तवत्सलस्य सर्वशक्तिमतो भगवतो भक्तिरेव निष्पादयति । भगवद्भक्त्या भुक्ति-मुक्ति सिद्धिपरमानन्दादि सर्वं सम्पद्यते । तथा चोक्तं भक्तिचन्द्रिकायाम्

सिद्धयः परमाश्चर्या मुक्तिर्मुक्तिश्च शाश्वती ।
नित्यं च परमानन्दं भवेद् गोविन्दभक्तितः ॥

श्रीमद्भागवतेऽपि महमुनिः भगवान् कपिलो निजजननीं देवहूतिं प्रति प्राह—

वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयात्याशु वैराग्यं ज्ञानं यद् ब्रह्मदर्शनम् ॥ = ३।३२।२३

पराभक्तिस्वरूपज्ञानयोरैक्यम्

परमात्मनः स्वरूपज्ञानं परामभक्तिश्चैकमेव तत्त्वम् । तटस्थ-स्वरूपलक्षणभेदेन ज्ञानं द्विविधम् । परमात्मनः तटस्थज्ञानदशायां ज्ञेयस्य परमात्मनः ज्ञातुः साधकस्य ज्ञानरूपस्य व्यापारस्य च सत्वेन ज्ञातृ-ज्ञान-ज्ञेयरूपिणी त्रिपुटी तिष्ठति, किन्तु ब्रह्मणः स्वरूपज्ञानदशायां ज्ञातृ-ज्ञान-ज्ञेय स्वरूपिण्याः त्रिपुट्या विलयेनैकमात्रमद्वितीयं सच्चिदा-नन्दस्वरूपं परं ब्रह्म एवावशिष्यते । भगवतः सच्चिदानन्दस्यानन्दभावनिमग्नः साधकः भक्तेः प्रकृष्टदशायां सर्वत्रैवरनन्दरूपस्य परमात्मनः साक्षात्कारं कुर्वन् तमेवाद्वैतभाव-मधिगच्छति । यथा ब्रह्मसद्भावस्योदयेन स्वरूपज्ञाने जाते कार्यकारणब्रह्मणोरैक्यतोऽ-द्वैतभावो उदेति तथैव प्रकृष्टायाः पराभिधानायाः भक्तेरुदयेन भाग्यशालिना भक्तेन केवलं परमात्मैवानुभूयते, न तद्भिन्नः कश्चिदपरः पदार्थः तस्य दृष्टिगोचरी भवति । तदानीं भक्तःकार्यब्रह्मस्वरूपं जगत्प्रपञ्चं कारणब्रह्मस्वरूपे परमात्मनि एव विलीनमनु-भवति । तदा भक्तमानसं रससागरस्वरूपकारणब्रह्मपरमात्मनि जलाशये जलविन्दुरिव मिलित्वैकरसतां प्रतिपद्यते । अतः पराभक्तेः स्वरूपज्ञानस्य चैकरूपत्वे न काप्यनुपपत्तिः । अतएवोक्तं देवीभागवते पुराणे—

भक्तेस्तु या पराकाष्ठा सैव ज्ञानं प्रकीर्तितम् ।
यस्यां तदतिरिक्तं तु न किञ्चिदपि भाव्यते ॥ = ७।३७।२८

भगवतो मधुरकीर्तनानुरक्तः साधको भगवत्येकात्मानं निवेदयन् अहंभावशून्यो देहाध्यासरहितः आत्मारामतां प्रतिपद्यते । तदानीं साधकस्य चेतसि निखिलेऽपि संसारे

ब्रह्मव्यतिरिक्तं न किञ्चिदवभासते, इयमेव पराभक्तिदशा । एतया किल स्वरूपज्ञान-निर्विकल्पकसमाधि परवैराग्यावस्थानां नाणीयानपि विभेदः । एवं किल पराया भक्तेर्दशायां शान्तः साधकः सर्वतो व्याप्ते आनन्दस्वरूपे भगवत्येव स्वचेतो विलीय स्वस्वरूपमधिगच्छति अस्यामेव दशायां तत्वम सीत्यादि महावाक्यानां चरितार्थता ।

वैध्याः भक्तेः प्रथमसोपानमारभ्य रागात्मिकाया भक्तेः तन्मयासक्तिपर्यन्तं सर्वास्ववस्थासु ध्यातृध्येययोः पृथक् संबन्धः तिष्ठति, परन्तु परायाः भक्तेर्दशायां स्वरूपज्ञानोदयेन साधकेन सर्वत्राद्वितीयं सच्चिदानन्दं ब्रह्मैव परिदृश्यते । तदानीं ध्यातृध्येययोः ऐक्येन साधकः स्वस्वरूपे एव तिष्ठति । यावत् द्वैतज्ञानं तिष्ठति तावत् दृष्ट्टदृश्ययोः भेदो जायते । यदा च स्वस्वरूपज्ञानमुदेति तदानीं पूर्णारूपेण द्वैतभावे विनष्टे साधकोऽद्वितीये ब्रह्मभावे एव तिष्ठति । इयमेव पराभक्तिर्भक्तैः काम्यते निरन्तरम् ।

ज्ञानाद्यपेक्षया भक्तेर्वैशिष्ट्यम्

यथा ज्ञानास्योपलब्धये तत्त्वजिज्ञासादीनि सन्ति साधनानि शास्त्रेषु निर्दिष्टानि न तथा भक्तेरधिगमाय केचन उपाया उपदिष्टा अपितु सा केवलं भगवत्कृपयैव लभ्यते । यथा गुरोश्चरणकमलयोः प्रणिपातादिना शनैः शनैः तत्त्वज्ञानमुदेति न तथा पुरुषार्थैः साध्या भवति भक्तिः, किन्तु तया सह अन्तःकरणस्य विशिष्टावस्थासम्बन्ध एवापेक्षितोऽस्ति । वैधी भक्तितो रागात्मिकाया ततश्च परायाः भक्तेः सन्धी केवलं भगवत्कृपाया एवास्ति अलैक्तिः सम्बन्धः । यथा वैधीतो रागात्मिकतादशाया अधिगमः तथैव रागात्मिकावस्थातः पराभक्तिप्राप्तिरपि अस्ति भगवत्कृपामूलिकैव ।

तथाच वैध्या भक्तेः साधनकाले गुर्वनुज्ञानुष्ठानस्यावश्यकत्वेऽपि वैधीतो रागात्मिका ततश्च पराभक्तेरधिगम भगवत्कृपैवास्ति मुख्यो हेतुः । अत एव पुरुषार्थेन नोपलभ्यते पर आत्मा, किन्तु स एव साधकस्तं प्राप्नोति यं स स्वस्वरूपप्रदर्शनद्वारा अनुगृह्णाति । तथाचोक्तं कठोपनिषदि ।

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधाश्रुतेन ।
यमेवैष वृणुते तेन लभ्यः तस्यैवात्मा वृणुते तनुं स्वाम् ॥ = १।२।२२

विभिन्नं भक्तिस्वरूपम्

महर्षिणा शाण्डिल्येन आत्मीयशाण्डिल्यभक्तिसूत्रे ईश्वरं प्रति परमानुराग एव भक्तिर्निगदिता, यतो हि परमेश्वराभिमुखेन प्रेम्णैव जीवोऽमृतरूपं मोक्षं लभते । तथा हि—'सा परानुरक्तिरीश्वरे' (१।१।२), 'तत्संस्थस्यामृतत्वोपदेशात्' (१।१।३)

अङ्गिरसो मुनेर्मतेन भक्तिर्भगवन्तं प्रत्यनुरागविशेषः, अलौकिकेश्वरानुरागरूपा वा । तन्मते सर्वासु चित्तवृत्तिषु प्राधान्येन वृत्तिद्वयं कारणस्वरूपतां भजते—रागो

द्वेषश्च । तत्र रागो रजःप्रधानः, द्वेषश्च तमःप्रधानः । सुखानुशायी रागः, दुःखानुशायी द्वेष इति योगसूत्रानुसारेण सुखानुस्मरणपूर्वकं प्रवृत्तिरेव रागः, दुःखानुस्मरणपुरः सरं विरुद्धभावनोत्पत्तिरेव द्वेषः । तथा च तमःप्राधान्याद् द्वेषवृत्तिर्द्वेषस्य रागवृत्तिश्च सत्त्वोन्मुखरजःप्राधान्येन सुखस्य हेतुर्भवति । भक्तिः किल द्वेषप्रतिकूला रागानुकूला चालौकिकी वृत्तिः । अलौकिकी भगवद्भक्तिः सात्त्विकी यतस्तया साकं भगवदनुरागस्यास्ति सम्बन्धः । फलतोऽधोगतिदायिन्या द्वेषवृत्तेर्विपरीता समुन्नतिसम्पादिकाऽनुरागवृत्तिरूपिणी भक्तिरुक्ता भवति । एवञ्च द्वेषातीता रागानुरूपा परमेश्वराभिमुखगमनशीला सत्त्वगुणमयी भगवति विशिष्टालौकिकानुरागवृत्तिरेव भक्तिः । अलौकिकेश्वरानुरागरूपा वा भक्तिः । भक्ति रसायनस्य प्रथमे उल्लासे धर्मपूर्वकं भगवद्गुणानामाराधनेन द्रवीभूतस्य चेतसस्तैलधारावदविच्छिन्नधारावाहिका भगवदाकारवृत्तिरेव भक्तेः सामान्यलक्षणमभिहितं श्रीमधुसूदनसरस्वतीपादेन ।[१]

भक्तिविशेषप्रतिपादके द्वितीये उल्लासे तु द्रवीभूते चेतसि मनस गोविन्दाकारता वृत्तिरेव भक्तिरित्युक्तम्[२] । हरिभक्तिरसामृतसिन्धौ रूपगोस्वामिनापि[३]—नारदपाञ्चरात्रे तु भक्तिलक्षणमेवं कृतमस्ति[४] ।

पूज्यपादैः श्रीशङ्कराचार्यैस्तु स्वकीये विवेकचूडामणावात्मस्वरूपानुसन्धानमेव भक्तिः प्रोक्ताऽस्ति[५] । एवमेभिस्तत्तदाचार्यैः स्वस्वग्रन्थेष्वेवंविधं भक्तिलक्षणं कृतमस्ति । परमेषां समेषां समीक्षया इदमेव तात्पर्यमवसीयते यदखिलात्मनि भगवति परमात्मन्यनन्यसाधारणं प्रेमैवास्ति भक्तिः ।

भज सेवायामिति धातोर्भावे क्तिन् प्रत्ययेन निष्पन्नस्य भक्तिशब्दस्याप्यर्थः प्रेम्णा भगवतः सेवैव प्रतीयते । यथा वृक्षस्य पूर्णता फलेन भवति, तथैव भक्तेरपि पूर्णता

---

१. द्रुतस्य भगवद्धर्माद्धारावाहिकतां गता ।
सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते ॥ = भ. र. १।३॥

२. द्रुते चित्ते प्रविष्टा या गोविन्दाकारतता स्थिरा ।
सा भक्तिरित्यभिहिता (विशेषस्त्वधुनोच्यते) ॥ = भ. रा. २।१ ॥

३. अन्याभिलाषिताशून्या ज्ञानकर्माद्यनावृतम् ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ॥ = पूर्वभागे १।११ ॥

४. सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम् ।
हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते ॥
अनन्यममता विष्णौ ममता प्रेमसङ्गता ।
भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः ॥

५. स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते ॥

परमप्रेमास्पदे पुरुषोत्तमे परमेण प्रेम्णैव निष्पद्यते । तस्माद् भगवति जगदीश्वरेऽनन्यानुराग एव भक्तिरिति निःसरति भक्तिलक्षणनिष्कर्षः ।

भक्तिरसस्य विमर्शः

पुण्यस्थली भारतभूमिर्हि सरसस्य भक्तिरसस्य स्निग्धया धारया सिक्ता आप्यायिता च वर्तते । भारते भक्तिरसस्य प्रवाहोऽनादिकालत एव प्रचलन्नास्ते । स्निग्धानुरागसम्बन्धा भावप्रवणा भक्तिरसप्लाविता वहवो विद्वांसः सन्तो महात्मानश्चानायासेन परमात्मानमवाप्य कृतकृत्यतामगुः, यान्ति, यास्यन्ति च ।

यद्यपि रसविषयकचिन्तनपरम्पराया उदयस्तु बहुपूर्वत एव जात आसीत्, परन्तुऽउपलब्धसामग्रीप्रामाण्यात् तस्य प्रवर्तनं भरतमुनित एव मन्यते रसज्ञैः । भारते भरतेन मुनिना रसनिष्पत्तिं सूत्ररूपेण निर्दिशता तत्र पानकरसन्यायेन दृष्टान्तमुपस्थायात्मसन्तोषो लब्धः । आनन्दसाधनमेव रसतत्त्वस्य चरमं लक्ष्यम् । 'रसो वै सः, रसं ह्येवायं लब्ध्वा आनन्दीभवति, आनन्दं ब्रह्मणो विद्वान्न विभेति कुतश्चन, आनन्दाद् ह्येव भूतानि जायन्ते' इत्यादीनि श्रुतिवचनानि आनन्दस्य परमात्मस्वरूपतां प्रतिपादयन्ति जीवनस्य च परमं पुरुषार्थमानन्दमेवामनन्ति । दुःखस्यात्यन्तिकनिवृत्तेरपि समावेश आनन्द एव जायते । आनन्दस्याधिष्ठानमस्त्यात्मा । स चास्ति द्विविधः—एको जीवात्मा, द्वितीयश्च परमात्मा । तत्र वस्तुतः परमात्मैवास्ते आनन्दस्याधिष्ठानम्, तथापि जीवात्मन्यपि सच्चिदानन्दस्वरूपस्य परब्रह्मणोंऽशस्य विद्यमानत्वादग्निस्फुलिंग इव समुद्रजलविन्दुवद्वा जीवे आनन्दानुभूतिर्जायते, आनन्दप्रतिभासो वा भवति ।

विषयजन्य आनन्दोऽस्थायी भवति, स्थायी त्वात्मगत एवानन्दो जायते । भरतमुनेर्लक्ष्यं जीवगतस्यानन्दांशोद्बोधनमात्रमस्ति । जीवो ह्यनादिकालतो नानायोनिषु बंभ्रम्यमाणोऽनेकाभिर्वासनाभिः परिव्याप्तो भवति । मानवमानसे विविधा वासनाः सूक्ष्मतयाऽवतिष्ठन्ते, काव्यार्थचिन्तनयोग्यताऽपि तत्र स्वभावत एव समुद्भवति । अतो विभावानुभावसञ्चारिभावमाध्यमेन रसप्रक्रियाया विचारो रसाचार्यस्य भरतस्यास्ति लक्ष्यम् । वस्तुतोऽयं रसोपक्रमः परमानन्दास्वादस्यास्ति पूर्वपीठिकैव विविधवासनासंसक्तचेतसां सचेतसां कृतेऽधिकः सुगमश्च ।

परमतत्त्वपुरुषोत्तमगतायाः पूर्णाया रसानुभूतेः सर्वैर्दुष्करत्वाद् भरतादिभिराचार्यैर्न निःश्रेयसाप्तौ समर्थानां श्रवणादिसाधनानां विचारः प्रस्तुतः, न वा निखिलानर्थनिदानभूतस्याज्ञानस्योन्मूलने प्रयासो विहितः । भरतमुनिना हि महता परिश्रमेण दिव्यज्ञानमन्दरेणागमसिन्धोर्मन्थनं विधाय पीयूषवपुषो यस्य नाट्यशास्त्रस्य प्रणयनमकारि, तस्य लक्ष्यं जीवगतानन्दांशस्यास्वादनमात्रमेवास्ते, न तु पूर्णब्रह्मानन्दानुभूतिरपि तस्यास्ति लक्ष्यभूता ।

भक्तिरसाचार्यैस्तु न जीवगतानन्दांशमात्रमेव लक्ष्यीकृतम्, प्रत्युत आनन्दराशि-भगवद्गतानन्दस्यास्वादनमेवास्ति तेषां वास्तविकं लक्ष्यम् । पुष्कलानन्दरसास्वादस्तु तदैवोद्भवति यदा परमानन्दस्वरूपो भगवान् स्वयमेव मनोगतो भवेत् । तथा चोक्तं श्रीस्वामिवर्यैर्मधुसूदनसरस्वतीपादैः—

स्थायिभावगिराऽतोऽसौ वस्त्वाकारोऽभिधीयते ।
व्यक्तं च रसतामेति परमानन्दतया पुनः ॥ = ११९
प्राक्तन्याधुनिकी चास्ति यस्य सद्भक्तिभावना ।
एगभक्तिरसास्वाद स्तस्यैव हृदि जायते ॥
भगवान् परमानन्दस्वरूपः स्वयमेव हि ।
मनोगतस्तदाकारो रसतामेति पुष्कलम् ॥भ = ० र० १११०
व्यतीत्य भावनावर्त्म यश्चमत्कृतिभारभूः
हृदि सत्त्वोज्ज्वले गाढं स्वद्यते स रसो मतः

अपि च यदा भक्त्या भक्तस्य द्रवितं चित्तं विभुं पूर्णबोधं सुखात्मकं च परमात्मानं नितरां समाश्लिष्यति, तदा किमप्यन्यत् कर्तव्यं नावशेषतया अवतिष्ठते । अर्थात् सर्वदेशव्यापकस्य नित्यसुखस्वरूपस्य सर्वतः परिपूर्णस्य परमेश्वरस्य द्रवीभूतेन चेतसा ग्रहणं कृतकृत्यतया न किञ्चिदवशिष्यते । अत एवोक्तं ब्रह्मणा श्रीमद्भागवते स्वकीयस्तुतौ भगवन्तं श्रीकृष्णं प्रति—

पुरेह भूमन् ! बहवोऽपि योगिनस्त्वदर्पितेहा निजकर्मलब्धया ।
विबुध्य भक्त्यैव कथोपमीतया प्रपेदिरेऽञ्जोऽच्युत ते गतिं पराम् ॥ = १०।१४।५

भगवन्त विभु नित्य पूर्ण बोधसुखात्मकम् ।
यद् गृह्णाति द्रुतं चित्तं किमियदवशिष्यते ॥

यथा विम्बस्थानीयं मुखमेव दर्पणाद्युपाधिसम्बन्धात् प्रतिबिम्बरूपं धत्ते, तथैवेश्वरो देहोपाधिसंयोगाद् जीवरूपं गृह्णाति । अत एव जीव ईश्वर एव पूर्णरसरूपः तयोर्भेदो नास्ति । दृश्यदर्शकयोरभेदानुभव एव रसस्य परमं प्रयोजनम् । कान्तादि-लौकिकविषयेष्वपि रसप्रतीतिकारणं सुखस्वरूपं चैतन्यघनमेवास्ति, किन्तु मायाया आवरणशक्त्या आवृतत्वान्न तत् प्रतीयते विशुद्धं भगवत्तत्वम् । अत एवोक्तं भर्तृहरिणा वैराग्यशतके—

यदासीदज्ञानं स्मरतिमिरसञ्चारजनितं
तदा दृष्टं नारीमयमिदमशेषं जगदिति ।
इदानीमस्माकं पटुतमविवेकाञ्जनजुषां,
समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ = ६९ ॥

अतो द्रवीभूतचित्तवृत्तावाविर्भूतश्चिदानन्द एव रसरूपत्वं प्रतिपद्यते । यत्र च भरतेन मुनिना नाट्यशास्त्रे नव रसाः स्वीकृतास्तत्र भक्तिसम्प्रदाये पञ्च मुख्याः सप्त च गौणा इति गौणमुख्यभेदाद् द्वादश भक्तिरसाः स्वीक्रियन्ते । भक्तेः सप्त गौण-रसाः, साहित्ये तथैव स्वतन्त्रतया स्वीकृताः । शिष्टौ द्वौ शान्तश्रृङ्गाररसौ भक्तिशास्त्रे शान्तमधुरभक्तिभेदेऽन्तर्भूतौ भवतः । तत्र मुख्यभक्तौ शान्तस्य नामग्राहं ग्रहणं कृतम्, किन्तु श्रृङ्गारस्य न नामग्राहं ग्रहणमस्ति । वस्तुतो मधुरभक्तिरेवास्ति साहित्य शास्त्रस्य श्रृङ्गाररसः ।

भक्तिरसामृतसिन्धौ दक्षिणविभागे पञ्चमलहर्यां स्थायिभावस्य विस्तृतविवेचन-प्रसङ्गे स्थायिभावपरिभाषां कुर्वता रूपगोस्वामिना प्रोक्तं यद् यो हि भावो विरुद्धान् अविरुद्धान् वा भवान् स्ववशी कृत्वाउत्त मराजवत् शोभेत स स्थायी भावो निगद्यते ।[1]

विभावैरनुभावैश्च स्वात्त्विकैर्व्यभिचारिभिः ।
स्वाद्यत्वं हृदि भक्तानामानीता श्रवणादिभिः ।
एषा कृष्णरतिः स्थायीभावो भक्तिरसो भवेत् ॥

इत्यनुसारमेवोज्ज्वलनीलमणौ रूपगोस्वामिवर्येणापप्रोक्तमस्ति । तद्यथा—

वक्ष्यमाणैर्विभावाद्यैः स्वाद्यतां मधुरा कृतिः ।
नीता भक्तिरसः प्रोक्तो मधुराख्यो मनीषिभिः ॥[3]

तथाच विभावादिभिः तथ्यैः कृष्णरतिनामकः स्थायिभावः श्रवणादिद्वारा भक्तहृदयेषु समानीतो भूत्वा आस्वाद्ययोग्यो भक्तिरसो भवति । भक्तिशास्त्रे श्रीकृष्ण-विषयकरतिरेव स्थायीभावः स्वीकृतोऽस्ति ।

भक्तानां हृदि रञ्जन्ती संस्कारयुगलोज्ज्वला ।
रतिरानन्दरूपैव नीयमाना तु रस्यताम् ।
स्थायिभावोऽत्रश्रृङ्गारे कथ्यते मधुरा रतिः ॥

सा द्विविधा—मुख्यरतिर्गौणरतिश्च । गोस्वामिना स्थायीभावस्य स्वरूपं तु तदेव स्वीकृतं यत् साहित्यशास्त्रे स्वीकृतमस्ति, किन्तु तद्वर्गीकरणव्यवहारो भिन्नप्रकारेणो-पस्थापितः । श्रीकृष्णविषयकरतेर्गौणमुख्यस्थायिभावस्य वर्गीकरणं तेन स्वकीयया शैल्या समुपस्थापितम् ।

लक्ष्यभेदाद् रसस्य निष्पत्तावास्वादे च भवति भेदः स्वाभाविकः । 'विभावानु-भावसञ्चारिसंयोगाद् रसनिष्पत्तिः' इति भरतसूत्रमवलम्ब्य रसनिष्पत्तिविषये यावत्यो

१. अविरुद्धान् विरुद्धाश्च भावान् यो वशतां नयन् ।
सुराजेव विराजेत स्थायीभाव स उच्यते ॥

व्याख्या उपलभ्यन्ते ताः सर्वा अपि भक्तिविषयकरसनिष्पत्तिव्याख्यातो विभिन्ना एव दृष्टिगोचरतामायान्ति ।

भट्टलोल्लटस्योत्पत्तिवादो यत्र विभावादिकारणैः सह स्थायिभावस्य (दमयन्त्यादिदर्शनजनलादिसवेतरत्याद्युद्बोधस्य तत्कार्यकटाक्षासहचरितोत्कण्ठादीनां च) अनुकार्यनलादिनेव सम्बन्धात् तत्रैव रस उत्पद्यते, नटे तु तत्तदनुकृत्या सादृश्यमूलकारोपो विधीयते । शंकुकस्यानुमितिवादो यत्रानुकार्ये नलादौ गृहीतैर्विभावादिभिर्हेतुभिरनुकार्यभिन्ने नटे रसस्यानुमानं क्रियते । आभ्यामाचार्याभ्यां प्रदर्शितरसनिष्पत्तिप्रकाराद् भिन्नो भक्तिरसनिष्पत्तिप्रकारः । भक्तिरसदृष्ट्या न रसोत्पत्तिरनुकार्ये भवति, नापि नटेऽनुमीयते, प्रत्युत तत्र भक्तस्य भाव एवास्वादगोचरो भूत्वा रसरूपतां प्रतिपद्यते ।

नटचेऽनुकार्यगतभावस्य नटे आरोपसम्भवेऽपि भक्तिक्षेत्रीयरसानुभूतौ कर्तृत्वं श्रवणकीर्तनादावेवाधारितमस्ति । अत एव भट्टनाय्यकस्यापि भावकत्व-भोजकत्वरूपयोर्द्वयोर्व्यापारयोर्नवीनकल्पनाऽपि न कृतकार्या भवति, यत्रैकया विभावादीनां साधरणीकरणं क्रियते, द्वितीयया च सत्त्वोद्रेकाज्जायमानामानन्दात्मिकां संविद्विश्रान्ति संसाध्य रसस्यानुभवः क्रियते । न वा व्यञ्जनावादिनोऽभिनवगुप्तस्य प्रमातृगतसहजातमनोभावस्यास्वादनादेव निर्वाहो भवितुमर्हति, यतो ह्यन्यपात्रगतभावस्य प्रधानपात्रगतभावे विलस्य सिद्धान्तो न भक्तिरससिद्धान्ते मान्यतामर्हति । चतुर्ष्वेतेषु मतेष्वात्मस्वरूपस्य रसस्य नित्यता न सिद्ध्यति । अतो भावत्रयीसमूहालम्बनज्ञानानन्तरं जायमाना व्यवधानरहिता प्रतीतिरेव भक्तिरसः । अतएव भक्तिरसायनेऽयं सर्वमान्यः सिद्धान्तः समुद्घोषितः श्रीयतिवर्यमधुसूदनसरस्वतीपादैः—

सानन्तरक्षणेऽवश्यं व्यनक्ति सुखमुत्तमम् ।
तद्रसः, केचिदाचार्यास्तामेव तु रसं विदुः ॥ - ३।१३॥
अपि च—नित्यं सुखमभिव्यक्तं रसो वै स इति श्रुतेः ।
प्रतीतिः स्वप्रकाशस्य निर्विकल्पसुखात्मिका ॥ = ३।२२॥
किञ्च—परमानन्द आत्मैव रस इत्याहुरागमाः ।
शब्दतस्तदभिव्यक्तिप्रकारोऽयं प्रदर्शितः ॥ = ३।२४॥

भरतसूत्रे पञ्चमी हेत्वर्था, हेतुत्वं च कारकत्व-ज्ञापकत्वान्यतररूपम् । ज्ञापकत्वं च तद्विषयकज्ञानजनकज्ञानविषयत्वम्, ज्ञानं चात्र त्रिविधम्-प्रत्यम्, अनुमितिः शाब्दबोधश्च । तत्र प्रत्यक्षं द्विविधम्—यथार्थमयथार्थञ्च । अयथार्थं पुनर्द्विधा-दोषजन्यं भ्रमत्वेन प्रसिद्धम्, इच्छाजन्यमारोपत्वेन ख्यातम् । यथा च भट्टलोल्लटादीनां मते रसास्पदनलयुधिष्ठिरादिनायकेषूत्कण्ठादिभिर्हेतुभी रस उत्पद्यते, ज्ञापकहेतुना नटादि-

पात्रेषु रस आरोप्यते। व्यञ्जनावृत्त्या वा नलदमयन्त्यादीनां गुणक्रियादीनि नट-नटीष्वारोप्य अयथार्थानुभवस्वरूपो मानसो रसः साध्यते। एवं च स्वस्वशेमुषीविकासानुसारेण भरतसूत्रघटकसंयोगपञ्चमोनिष्पत्त्यर्थं विविधतया अभियुक्ता भट्टलोल्लट-भट्टनायकाभिनवगुप्ताचार्या रसतत्त्वं सोपष्टम्भं प्राचीकसन्।

भक्तिरसे भावस्याश्रयो भक्त एव भवति, न नाटयगतपात्रं यथा लौकिके रसे जायते : लौकिके रसे शृङ्गाररसास्याश्रयो भवति नलदुष्यन्तादिः आलम्बनविभावस्य च दमयन्तीशकुन्तलादिः, किन्तु भक्तिरसक्षेत्रे राधाकृष्णयोर्द्वयोरपि विवेचनमालम्बन-प्रकरणे एव कृतमस्ति। अत एव भक्तिरसानुरागिभिराचार्यैं रसानुभूतेरभिनवा प्रक्रिया साभिनिवेशं प्रकल्पिता।

मधुराया भक्तेः परम्पराविवेचनम्

विविधकण्टकाकीर्णं सङ्कीर्णं वर्त्म विहाय परिष्कृतेन घण्टापथेन सञ्चरिष्णूनां रसविदां समेषां विपश्चितां मतेन "रसो वै सः, रसं लब्ध्वा ह्यानन्दी भवति' इति श्रुत्यनुसारं स्वरूपतटस्थलक्षणलक्षितो ब्रह्म-परमात्मेत्यादिपर्यायो भगवानेवास्ति रसः, तमेव साक्षात्कृत्य स्वल्पानन्दो जीवः; प्रशस्तानन्दो भवतीति परमपुरुषार्थप्रापकतया भगवत्प्राप्तये भक्तिमार्गोऽस्त्यतिसुगमो मार्गः। यथा भक्ता सुखेन भक्तैरवाप्यते भगवान्, न तथा ज्ञानिभिः[1] सुखेनावाप्तुं शक्यते।

नित्यकर्मानुष्ठानाद् विशुद्धेऽन्तःकरणे श्रवणकीर्तनादिना भवति भगवति प्रमोद्भवः इत्यभिलक्ष्य विपश्चिदग्रेसरा यतिवर्याः श्रीमधुसूदनसरस्वतीमहोदया भक्तिरसायने सपरिकरं सोपपत्तिकं च भक्तिरसं व्यवातिष्ठपन्। भक्तिमद्भिः विद्वद्भिश्च भक्तिः ज्ञान-कर्म-योगेभ्यः श्रेष्ठतमा सुगमा च स्वीकृताऽस्ति।

यथा समुद्रजलं वाष्पमेघवर्षादिक्रमेण परिणतं सत् पुनर्नदनदीद्वारा समुद्रमेवोपगच्छति, तथैव रसस्वरूपात् प्रेमस्रोतसो भगवतः प्रेमधारा निःसृत्य भक्तानां मनांसि सिञ्चन्ती भूयः प्रेमस्रोतःस्वरूपं परमात्मानमेवोपतिष्ठते।

भारतीयप्रेमपद्धतौ प्रेम अनेकेषु रूपेष्वभिव्यक्तं भवति गुरुशिष्योः श्रद्धास्पदं परस्परं प्रेम, पतिपत्न्योरन्योन्यमनुरागाभिधं प्रेम, पितापुत्रयोश्चेतरेतराश्रयं स्नेहाख्यं प्रेम, प्रेमप्रेरितः पित्रादिर्यथा स्वसन्ततिं पालयति, पोषयति, अभिरक्षति च सर्वाभ्यो बाधाभ्यः, तथैवेश्वरोऽपि भक्तप्रेमाभिभूतो भक्तान् पालयति, पोषयति, सुखयति, रक्षति, तेषां हितं विधत्ते, निरन्तरं च तदर्थं चिन्तयति।

---

१. नायं सुखापो भगवान् देहिनां गोपिकासुतः।
ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह॥ = श्री० भा० १०।९।२१

यथा पर्वतीयोच्चावचप्रदेशेषु मेघात् पतितं पनीयं शिलाखण्डैः संहन्यमानमितस्तत उपढौकमानं यावत् समतलभूमौ नोपतिष्ठते तावद् निर्मलं स्थिरं वा न भवति. तथैव सृष्टिसमये जीवोऽपि प्रभुपादपद्मतः पृथग्भूय विभिन्नासु योनिषु बंभ्रम्यमाणोऽनेकान् क्लेशांश्च सहमानो विविधां यातनामनुभवन् यावत् प्रभुपादपद्मं नोपतिष्ठते, तावत् तस्य पाप-तापयोः शान्तिर्न जायते । अतो जीव आनन्दधामानं परमात्मानमुपस्थायैव परमानन्दमनुभवितुमर्हति, नान्यथा; तदर्थं जगदाधारे भगवति परमप्रेमरूपा, परमात्मनि पराकाष्ठाया अनुरक्तिरेव वा भक्तिरस्ति सरलं साधनम् । तत्राप्यनादि-कालतो विविधविषयासक्तस्य जीवस्यानायासेन भगवत्पदप्राप्तये मधुरभक्तिः परमतमं साधनं समवस्थीयते ।

यद्यपि मध्ययुगो ह्रासस्य युगः कथ्यते, अथापि भक्तिसाधनसाहित्यदृष्ट्याऽय-मुत्कर्षस्य युगः स्वीक्रियते तज्ज्ञैः । अस्मिन् युगे प्रायो भारतस्य सर्वेषु भागेषु तत्त्वज्ञानिना दार्शनिकाः, मननशीलाः गभीरविचारकाः, उच्चकोटिकाः साधकाः, वीतरागा महात्मानो भगवद्भक्ताः सन्तच प्रादुरभवन् । न केवलं शास्त्रवेत्तारो विद्वांस एव, अपि त्वनधीतशास्त्रा अपरिचिताक्षरा अप्यनुभविनः साधवः सन्तो महान्तश्च भगवद्भक्तिविषये शास्त्रसम्मतान् स्वानुभूतिनिर्भरान् स्वतन्त्रान् विचारान् वोपस्थापितवन्तः । फलतस्तदानीं भगवदाराधनोपयोगिनो योगतन्त्रसाधनोपासनार्च-नादयो विविधा मार्गा दृष्टिगोचरतामागताः ।

बृहद्धारीतस्मृतौ सूक्ष्मतया त्रिविधायाः श्रौतस्मार्तागमोपासनापद्धतेः समुपलब्धावपि संहिताग्रन्थेष्वाराधनाप्रक्रियायाः सविस्तरो विचारो विहित । अग्निसंहितानुसारं समाराधानाया द्वे प्रक्रिये स्तः-एकाऽमूर्तोपासना, द्वितीया च समूर्तोपासना । तत्राग्ना-वाहुतिप्रक्षेपमाध्यमेन क्रियमाणोपासनाऽमूर्तोपासना, प्रतिमादिपूजनञ्च समूर्तोपासना कथ्यते ।

मध्यकालीनवैष्णवसम्प्रदाये मधुरभक्तेः प्रथममुदयो जातः । दाम्पत्यप्रेमवर्णनं माधुर्यभावस्य मूलं स्रोतः । ऋग्वेदीयमधुविधाया अथर्ववेदीयमधुलतायाश्च प्रतिपाद्या मधुरोपासनेति केषाञ्चिदस्ति मतम् ।

वैष्णवभक्तौ माधुर्योपासनाभावस्य मूलान्वेषणे क्रियमाणे तेष्वेव स्रोतस्सु अवगाहनं समीचीनं प्रतीयते, येषु मधुराया भक्तेस्तत्त्वं स्पष्टतो लक्ष्यते । पाञ्चरात्र-संहितासु ज्ञानपाद-योगपाद-क्रियापाद-चर्यापादाख्याश्चत्वारः पादा विद्यन्ते । तत्राद्ये ज्ञानपादे ब्रह्म-जीव-जगत्-सम्बन्धिनां सिद्धान्तानां निरूपणं' विद्यते । द्वितीये योगपादे यौगिकप्रक्रियाया विवेचनं वर्तते । तृतीये क्रियापादे मूर्तिमन्दिरनिर्माणस्थापनपूजनादि-विधीनां समावेशः । चतुर्थे च चर्यापादे सगुणोपासनायाः प्रामुख्यं दृश्यते । जयाख्य-

संहितायां समूर्तार्चनस्य विस्तारो विहितः। अहिर्बुध्न्यसंहितायां वर्णिता षड्विधा शरणागतिर्मधुरभक्तेः पूर्वस्थितौ प्रपत्तेः पुष्टेर्वा परिचयं प्रददाति—

आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनम् ।
रक्षतीति विश्वासो गोप्तृत्ववरणं तथा ॥
आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः । अ० बु० स० २।५१

ज्ञानामृतसंहितायां प्रभोः सेवायाः षड् विधयो वर्णिताःसन्ति। ते यथा—स्मरण, कीर्तनम्, प्रणतिः, पादवन्दनम्, अर्चनं समर्पणं च। तत्र भगवतः श्रीकृष्णस्य तत्प्रियाणां गोपीनाञ्च प्रचुरं प्रेम वर्णितमस्ति।

मध्ययुगस्योत्तरभागे पाञ्चरात्रसंहिता अनुसरन्त्यो नृसिंहतापिना-रामतापिनी-गोपाल-तापिनीत्यादिनाम्ना अनेका उपनिषदो दृष्टिगोचरतामागताः।

भगवत्पूज्यपाद श्रीस्वामिशङ्कराचार्य-अप्पयदीक्षिताभ्यां पाञ्चरात्रसंहितानां वर्ण्य-विषयं विविच्य तासामवैदिकत्वमुद्धोष्य तत्प्रतिपादितपद्धतेरुपेक्षात्वं प्रतिपादितम्। परिणामतः श्रीशंराचार्यस्य विरोधे विशिष्टाद्वैतमतप्रवर्तकेन श्रीरामानुजाचार्येण पाच-रात्रसिद्धन्तस्य वेदवत् प्रामाण्यमङ्गीकृत्य साटोपं तत्समर्थनं कृतम्।

पाञ्चरात्रमते क्रियाचर्यातिरिक्ता प्रेममाधुर्ययोरप्यप्रत्यक्षरूपेण स्वीकृतिरस्ति। मध्ययुगे शैवशाक्तमतयोरपि प्रभावश्चरममुत्कर्षमुपगत आसीत्। शासकवर्गेऽपि वैष्ण-वमतापेक्षया शैवमतानुयायिनोऽधिका आसान्। शैवागमशाक्ततन्त्रशासनपद्धतेरांशिकः प्रभावोऽपि मधुरभक्तेः राधातत्त्वे बहुभिर्विद्वद्भिः प्रदर्शितः।

शैवषु भक्तेषु शिवभक्तेर्यादृशी कल्पनास्ति,शाक्तेषु च त्रिपुरसुन्दर्या यद्रूपमुपवर्णितम्, तादृगेव बर्णनं राधाभावेन गोपीभावेन च बहुत्रोपलभ्यते। युगलतत्त्वस्य मूलबीजमपि शैवसाधनासरणिषु लक्ष्यते। तन्त्रे भगवान् श्रीकृष्णः कामबीजात्मकः, राधादेवी च रतिबीजात्मिका प्रोक्ताऽस्ति। बौद्धतान्त्रिकसमाराधनाया अपि मधुरभक्तिविकासेऽप्रत्यक्षो योग आसीत्। दक्षिण-भारतीयालवारभक्तानां मनोमुग्धकारिषु गीतेषु मधुरभक्तेः सुन्दरं रूपं दरीदृश्यते। सूफीमतसाधकेष्वपि मधुरभक्तेश्चमत्कारो विपुलो विलोक्यते। साहित्यस्य शृङ्गाररस एव भक्तिसम्प्रदाये मधुरभक्तिरसः।

राष्ट्रभाषाया हिन्द्या मध्यकालीननिर्गुणधारायां सन्तकवीनामभिव्यक्तिष्वपि माधुर्यभावस्य प्राचुर्यं विलोक्यते। दाम्पत्यसम्बन्धरूपकेषु बाहुल्यं तु दादू-कबीर-नानकादीनां रचनासु समुपलभ्यते। निर्गुणोपासकानां सन्तकवीनां माधुर्यभावस्य मर्यादारूपे दृढो विश्वास आसीत्। सन्तकबीरस्त्वात्मानं श्रीरामस्य वधूं मत्वा अमन्दमामन्दमनुभवति स्म। एवं सत्यपि उच्छृङ्खलं प्रेम अनैतिकाचरणवर्णनञ्चैतेषां

सन्तकवीनां रचनासु न दृश्यते। कौलकापालिकाशुपतादिमतेषु साधनावर्णनप्रसङ्ग नारीपुरुषमाध्यमेन मधुरभावस्याभिव्यक्तिर्जाता परिवर्तिनि सहजियासम्प्रदाये तु मधुरभाव: परकीयाभावमाध्यमेन चरमं विकाससीमानमुपगतं दृश्यते। इत्थं पाञ्चरात्रसंहितत आरभ्य सहजियासम्प्रदायसाधनपद्धतिपर्यन्तं मधुरभक्तेरुपकरणचयनमुपलभ्यते।

मधुरभक्तेः शास्त्रीयरूपस्य विकासस्तु चैतन्यमतानुयायिनां वृन्दावननिवासिनां षड्गोस्वामिनां ग्रन्थैरेव जातः। तेषां ग्रन्थप्रणयनमूलप्रेरकः स्वयं चैतन्यमहाप्रभुरेवासीत्। तेन तु स्वयमहर्निशं श्रीकृष्णलीलायां निमग्नतैव स्वीकृतासीत्, किन्तु तद्भक्तानां कृते शास्त्रीयसुदृढाधारेण मधुरभक्तेः शास्त्रीयं पक्षं प्रतिपाद्य भक्तेः समुज्ज्वलं रूपं समुपस्थापयितुं गोस्वामिवर्या प्रेरिताः सततं प्रोत्साहिताश्च महाप्रभुणा।

तत्प्रेरणामवाप्य तैश्चैतन्यमतानुयायिभिः पण्डितैर्न केवलं मधुरभक्तेः रूपरेखैव प्रस्तुता, प्रत्युत तस्या बाह्याभ्यन्तरं रूपमपि सर्वाङ्गपूर्णं परिकल्पितम्। एकतस्तैस्तस्यै शास्त्रीयं रूपं प्रदत्तम्, अन्यत्र च तत्सिद्धये शास्त्रतो दर्शनतश्चः प्रचुराणि प्रमाणानि उपस्थाय सुदृढांश्च तर्कान् संगृह्य स्वस्वग्रन्थेषु साहित्यिकाधारेण भक्तिरसरूपेण प्रतिष्ठापिता मधुरभक्तिः, यत्र श्रीमद्भागवतब्रह्मवैवर्तादिपुराण-महाभारत-नारदभक्तिसूत्र-शाण्डिल्यभक्तिसूत्रादीनामपि पर्याप्तं योगदानं दरीदृश्यते।

भक्तेराचार्यैर्गोपीनां भगवति श्रीकृष्णेऽपूर्वा भक्तिः, आदर्शभक्तिरभिमता। तथा हि नारदभक्तिसूत्रे –'यथा व्रजगोपिकानाम्' (२१), शाण्डिल्यभक्तिसूत्रे च –'अत एव तद्भावाद् वल्लवीनाम्' (१।२।५)।

वस्तुतो गोपीनां भगवति वासुदेवे आदर्शमयस्य प्रेम्णस्तुलना विश्वप्रेमपरम्परायां न क्वचिद् भवितुमर्हति। साधनामार्गे यावती प्रेममात्रा अधिका भवति, तावत्येव श्रेष्ठतमा भवति भक्तिः।

गोपिकानां प्रेम्णः केन्द्रबिन्दु, षोडशकलश्चन्द्र इव पूर्णकलो भगवान् श्रीकृष्णचन्द्र एवासीत्, यस्मिन् ताभिः सकलाः शारीरिक्यश्चेष्टा मानसानि सुखानि दुःखानि च समर्पितान्यासन्। क्षणमात्रमपि श्रीकृष्णविरहे तासां जीवनं जलविहीनो मीन इव व्याकुलमासीत् केवलं तत्प्राप्तिलालसायामेव' ताभिः प्राणधारणं कृतम्। तदुक्तं श्रीमद्भागवते स्वयमेव भगवता श्रीकृष्णेनोद्धवं प्रति व्रजे नन्द यशोदयोः गोपिनां सविधे च स्वसन्देशं प्रहिण्वता—

गच्छोद्धव ! व्रजं सौम्य। पित्रोर्नो प्रीतिमावह।
गोपीनां मद्वियोगाधिं मत्सन्देशैर्विमोचय॥

ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः।
मामेव दयितं प्रेष्ठमात्मानं मनसा गताः।
ये त्यक्तलोकधर्माश्च मदर्थे तान् बिभर्म्यहम्॥
मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः।
स्मरन्त्योऽङ्ग ! विमुह्यन्ति विरहौत्कण्ठ्यविह्वलाः॥
धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चन।
प्रत्यागमनसन्देशैर्बल्लव्यो मे मदात्मिकाः॥ = १०४६ ३-६

इदमेव विशुद्धस्य प्रेम्णः सत्यं स्वरूपम्, यतो हि तत्र न लौकिकरागजन्यबन्धनस्य विषयवासनाया वा सत्ता तिष्ठति। अत एव भक्तिसम्प्रदाये विशुद्धस्य प्रेम्णोऽपूर्वं स्थानमङ्गीकृतमस्ति। विशुद्धं प्रेमैवास्ति भक्तिभूमिकाया आधारस्तम्भः। समस्तानि साधनानीदमेव लक्ष्यीकृत्य भक्तेरवस्थापर्यन्तमुपस्थापयितुं मार्गं प्रशस्तं कुर्वन्ति। भगवत्यनन्यं प्रेमैव भक्तिमार्गस्यास्ति प्राण;, यदं विना भक्ति र्भवति निष्प्राणा आडम्बरमात्रं वा। महत्त्वमेतदेव स्वीकुर्वता देवर्षिणा नारदेनात्मीये भक्तिलक्षणे प्रेम्णः निवेशः कृतः- 'सा त्वस्मिन् परमप्रेमरूपा॥' (ना० भ० सू० २)।

अत एवानन्दसिन्धौ परमप्रेमास्पदे भगवति श्रीकृष्णे गोपीनामपूर्वं भक्त्यात्मकं स्वाभाविकं प्रेम पर्यालोच्य ज्ञानिनाप्युद्धवेन तासां चरणरेणुस्पर्शस्पृहया वृन्दावनस्थेषु तृणतरुगुल्मलतादिषु किमपि जन्म वाञ्छता प्रेमद्गदया वाचा आत्मनः सौभाग्यवैभवं सूचितं श्रीमद्भागवते[1]।

ब्रह्मवैवर्तस्य श्रीकृष्णजन्मखण्डे प्रोक्तमस्ति यद् गोपीनां भगवति श्रीकृष्णेऽपूर्वं प्रेम पर्यलोच्य मथुराप्रत्यागमनविचारं विहाय वृन्दावने एव गीथानां किङ्करीभूत्वावस्थातुमभिलाषां प्रकटिवान् उद्धवः—

तासां तद्वचनं श्रुत्वा चोद्धवो भक्तिविह्वलः।
पुलकाञ्चितसर्वाङ्गः रुरोद च पपात च॥
धन्यं भारतवर्षं च पुण्यदं शुभदं वरम्।
गोपीपादाब्जरजसा पूतं परमनिर्मलम्।
ततोऽपि राधिका धन्या मान्या योषित्सु भारते।

---

१. आसामहो चरणरेणुजुषामहं स्यां
वृन्दावने किमति गुल्मलतौषधीनाम्।
या दुस्त्यजं स्वजनमार्यपथं च हित्वा
भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम्॥ = १०।४७।६१।

गोलोक वासिनीराधा कृष्णप्राणाधिका परा।
तत्र श्रीदामशापेन वृषभानुसुताऽधुना ।
धन्योऽहं कृतकृत्योऽहमागतो गोकुले यतः।
गोपिकाभ्यो गुरुभ्यश्च हरिभक्ति लभेऽचलाम्।
मथुरां च न यास्यामि तीर्थकीर्तेश्चकीर्तनम्।
श्रोस्णामि किङ्करोभूत्वा गीमानां जन्मजन्मनि ॥
न गोपीभ्मः परोभक्तः हरेश्च परमात्मनः।
यादृशीं लभिने गोप्यो भक्ति नान्येच तादृशीम् ॥—९४।७३—८५

तत्रैव तदुत्तरे श्रीराधिकया प्रावोचि—

मथुरां गच्छ वत्स ! त्वं मां च विस्मर सम्पदा।
अतोऽप्यधर्मो नास्त्येव भवतो भवसागरे॥
मदीयं वचनं सर्वं गत्वा कथय साम्प्रतम्।
श्रीकृष्णं परमानन्दं शीघ्रमानय मत्प्रभुम् ॥ = ९१।३।४

योगिराजस्यारविन्दस्य मतेनापि भगवत्प्राप्तिमार्गे प्रचुरं प्रेमैवैकं पाथेयमस्ति, येन निश्चप्रचं प्रभुं प्राप्तं शक्यते। 'अनिर्वचनीयं प्रेमस्वरूपम्' (५१) इति सूत्रयता भगवता नारदेन प्रेमस्वरूपस्यानिर्वचनीयत्वमुपस्थाय प्रोक्तं, यदास्यामवस्थायां भक्तो भगवत्-स्वरूपामृतमास्वादयन्नपि न वाणीद्वारा स्वानुभवं प्रकटयितुं प्रभवति। "तत् प्राप्य तदेवावलोकयति, तदेव शृणोति, तदेव चिन्तयनि च (ना० भ० ५५)।

भक्तो यदाऽऽत्मानमसहायं मत्वा प्रेममयस्य परमात्मनश्चरणकमलयोरात्मानं समर्प्य तदिच्छानुसारी जायते, तदा स एव तस्य योगक्षेमं निर्वहति। इयमेवास्ति गीतोक्ता मुख्या शरणागतिः, इयमेव च संसारसागरसन्तरणाय सुगमं साधनं, सर्वाश्रयाश्रये परमात्मनि सच्चिदानन्दस्वरूपे तल्लीनतासम्पादनाय च श्रेयस्करः पन्थाः।

गोस्वमिवर्याणां कार्यम्

वस्तुतो रूपगोस्वामि-सनातनगोस्पमिनोः प्रगल्भया प्रतिभया चैतन्यमतस्य धार्मिकं दार्शनिकं साहित्यिकं च स्वरूपं प्रकाशे समागतम्। भक्तिरसनिरूपणे गोस्वामिवर्याणां योगदानं सर्वाभ्यहितं महत्त्वपूर्णं चास्ति। भक्तिरसामृतसिन्धौ रूपगोस्वमिना तर्क-सम्मतया शास्त्रीयपद्धत्या सप्रमाणं भक्तेः रसरूपता प्रसाधिता। उज्ज्वलनीलमणौ च मधुरभक्तेः शास्त्रीयं निरूपणं कुर्वता राधाकृष्णयोः परस्परं प्रेमपर्यालोचनप्रसङ्गे तेन विभावानुभावसंचारिभावानां साङ्गोपाङ्गविवेचनपूर्वकं भक्तिरसो रसपदे प्रतिष्ठापितः। दानकेलिकौमुद्यां च श्रीकृष्णविषयिणी भक्तिः प्रतिपादिता। भक्तिरत्नाकरस्तु अन्वर्थ-नामैवास्ते, यत्र च साङ्गोपाङ्गाः सर्वे भक्तिविषयाःसविस्तरं समुपस्थापिताः सन्ति।

जीवगोस्वामिनस्तु भक्तिरसामृतसिन्धावन्वर्थनाम्नीं 'दुर्गसङ्गमनी' नाम्नीं टीकां कृत्वा वस्तुतो दुर्गमानि मूलस्थलानि समजीगमन् ।

एवं वेदोद्गता उपनिषद्भ्यश्च स्पष्टमग्रेसरन्ती, भगवद्गुणलीलाधामचरितानि चर्चयन्ती तदर्चनादिविधानं बोधयन्ती निराकारं च ब्रह्म भक्तानां कृते साकाररूपेण सप्रौढं स्थापयन्ती पौराणिकी भगवद्भक्तिविचारधारा मध्यकालीनानां महात्मनां सतां विद्वद्धौरेयाणां च बुद्धिषु विशदतया अभिनवरूपेण परिणता सती शैव-शाक्त-वैष्णवादि-धारासु प्रसृता । अनन्तरं भक्तकवीनां हृदयपटलेषु काव्यप्रवृत्त्या सह भक्तिप्रवृत्तिर्जागृता, या शनैः शनैः संस्कृतप्रणयिभिः, हिन्दीप्रेमिभिः, आर्यभाषाविज्ञैश्च विद्वद्भिरग्रेसारिता प्रसार्यते प्रसारयिष्यते च निरन्तरम् ।

मानवयोनौ समुन्नतजीवनमभिलक्ष्य भक्तिभावनाया विषये बहुभिर्विपश्चिद्भि-र्विवेकपूर्णो विपुलो विचारः प्रस्तुतः, येन भव्या भक्तिस्रोतस्विनी भारतीयलोकमानस-मनन्तकालत एव भगवदुन्मुखं विदधाना संकृत-प्राकृत-पालि-अपभ्रंश-हिन्द्यादिभाषाद्वारा प्रस्फुटिता जाता । काव्यानन्द-ब्रह्मानन्दयोः सहोदरत्वरूपस्य चारितार्थ्यं भक्तिसाहित्येऽ-प्यवलोक्यते । साधकैरनुभूते यस्मिन्नुच्चशिखरे ब्रह्मानन्दस्योपलब्धिः कृता, तत्रैवानि-र्वचनीयानन्दस्याभिव्यक्तिर्भक्तकवीनां रचनास्वप्युपलभ्यते ।

यद्यपि भक्तिसम्बन्धिनी रचना प्राचीनसाहित्येऽपि प्रचुरमात्रायां प्राप्यते, किन्तु मध्यकालीनभक्तकवीनां कृतिषु यया निपुणतया, तल्लीनतया, एकात्मतया च भक्ति-भावनाया यादृशं विविधं मनोरमं रूपमभिव्यक्तीभवति, न तादृशमन्यत्रोपलभ्यते ।

युगेऽस्मिन् प्रधानतया हिन्दीसाहित्यक्षेत्रे निर्गुण-सगुण-भक्तिविकासाय निर्गुण-कबीर-सूफीजायसी-कृष्णभक्तसूरदास-रामभक्तगोस्वामितुलसीदासप्रभृतीनां सन्तकवीनां महत्त्वपूर्णं योगदानं जातम् । अत एव हिन्दीसाहित्यस्यायं कालो भक्तिकाल इति नाम्ना व्यवह्रियते । भक्तिकालोऽयमादौ द्वयोर्धारयोर्विभक्तः, यत्रैका निर्गुणधारा, द्वितीया च सगुणधारा कथ्यते। इमे द्वे अपि धारे पुनर्द्वयोर्द्वयोः शाखयोर्विभक्ते । तथा च निर्गुणधाराया ज्ञानाश्रयी प्रेमाश्रयी चेति द्वे शाखे जाते । सगुणधाराया रामभक्तिः कृष्णभक्तिश्चेति मान्यतमे द्वे शाखे अभूताम् । तत्र ज्ञानाश्रयीशाखायाः प्रमुखः प्रतिनिधिकविः कबीरोऽस्ति, प्रेमाश्रयीशाखायाश्च मुख्यो मलिकमुहम्मदजायसी । यत्र कृष्णभक्तिकाव्यस्य प्रातिनिध्यं कविवरः सूरदासः करोति, तत्र रामभक्तिकाव्यस्य गोस्वामितुलसीदासः । एवं पारसीक-बौद्ध-जैन-इसाई-इस्लामधर्मेष्वपि भक्तिप्रणालीनां प्रचुरा चर्चाऽस्ति ।

वस्तुतः स्वेष्टदेवताराधनं विना न कैश्चिदपि सम्प्रदायैः, न वा कैश्चित् पुरुषैरुत्क-र्षमवाप्तुं शक्यते । अत एव विश्वस्मिन् सर्वेषु सम्प्रदायेषु स्व-स्वविश्वासानुरं विभिन्ना भक्तिसम्बन्धिनो विशेषा दरीदृश्यन्ते ।

भगवन्नामगुणादिश्रवणं भक्तेरस्त्यारम्भिकं सोपानम्, यद्धि यदा कीर्तनस्मरणात्मनिवेदनादिद्वारा साधकं भगवत्पादपद्मप्रसादे प्रापयति, तदा स कृतकृत्यो भूत्वा लोकातीतं पूर्णं सुखमनुभवति ।

मधुरभक्तेरस्ति महत्त्वपूर्णमेकमिदं वैशिष्ट्यं यद् मधुरभक्तिमार्गो हि न लौकिकं जीवनमुक्षते, अपि तु लोकवासानां स्वीकृत्य तस्य मार्जनं संशोधनमुन्नयनं वा प्रक्रियाऽनया क्रियते । अस्याः प्रधानं लक्ष्यं सांसारिकव्यवहारस्वीकृतिपूर्वकं मानवमनस्युद्बुद्धानन्दोद्बोधनमेवास्ति । यथा उच्चतमसाधकवर्गे इन्द्रियदमनेनान्ते भगवत्प्रेमैव प्राप्यते, तथैव माधुर्यभावस्य साधकोऽपि तदेवाभिलक्ष्य तत्र प्रवर्तते । क्रियमाणेऽप्यनेके प्रयासे मानवोऽनादिकालतोऽनुस्यूतां मनसि स्थितां कामवासनां न सहसा सर्वथा समुच्छेत्तुं पारयति । अतस्तां साधनं विधाय तस्या उन्नयने संशोधने मार्जने च प्रवर्तते । अत एव शाक्तैः, बौद्धैः, ईसाई-सूफीमतानुयायिभिर्विभिन्नैः साधकैरपि काममतिरस्कृत्य भक्त्या तं दिव्यप्रेम्ण उदात्तभूमौ शनैः शनैः प्रतिष्ठाप्य तस्य संशोधनाय उन्नयनाय च महान् प्रयासो विधीयते । भगवति विलीनः कामो न किमप्यनर्थं कर्तुं प्रभवति ।

मधुरभक्तौ यस्योदात्ततमस्य प्रेम्णः कल्पनाऽस्ति, न तद् यौनेन सम्बन्धेन समुद्भूतं कामेच्छापरकं प्रेम अभिमतमस्ति । यतो हि कामजन्ये प्रेम्णि स्वसुखस्य प्राधान्यं तिष्ठति, न तत्र प्रियतमस्य सुखेन सुखित्वमपेक्षितं भवति, किन्तु भगवति प्रेम स्वसुखविवर्जितम्, तत् सुखप्रधानमेव भवति । तत्र न जायते स्वसुखसुखित्वस्य लेशोऽपि, अपित्वात्मविस्मृतिपूर्वकं परमात्मनः सुखसुखित्वस्यैवोत्कृष्टा कामनैव जागर्ति । लोके दाम्पत्यभावसंश्लिष्टः, शृङ्गारात्मको भावो निम्नकोटिको मन्यते, तदुन्नतो वात्सल्यभावः, ततः सख्यस्याऽस्ति स्थानम्, तदुपरि दास्यभावः, तदनन्तरं निर्वेदपोषकः शान्तभावो मान्यो भवति, किन्तु माधुर्यभावे क्रमस्याऽस्य पूर्णतया विपर्ययो दृष्टिगोचरी भवति । अयं शान्त-दास्य-सख्य-वात्सल्य-दाम्पत्यभावक्रम उत्तरोत्तरोत्कर्षदृष्ट्या ग्राह्यो भवति । दाम्पत्यभावः कान्तभावः, शृङ्गारभावश्चैकस्यैकस्यैव भावस्य सन्ति द्योतकाः, मधुरभावो वा अस्यैवास्ति परिचायकः ।

मधुरभक्तेरियमेकाऽस्त्यपरा विशेषता—अस्यां विधिनिषेधयोर्बाह्यप्रपञ्चाज्जायते विमुक्तिः । विधिनिषेधयोः प्रपञ्चो हि भवति सदैव वाह्याडम्बरे पर्यवसितः । अतो यदि तं परिहाय भक्तिपथं प्रशस्तं क्रियेत, तर्हि स निश्चप्रचं सर्वजनसुलभ आकर्षकश्च भवितुमर्हेत् ।

गृहस्थाश्रमे स्थितानां पुंसां भक्तिपथे समारोढुमनया मधुरभक्त्या सम्भवति सुखदं साहाय्यम् । समाराध्ययो राधाकृष्णयोर्दाम्पत्यभावं स्वीयलौकिकजीवनस्य दाम्पत्य-

भागेन सह मेलयित्वा शनैः शनैः कामवासमुन्नयनपूर्वकं भक्तिमार्गेऽग्रेसर्तुं शक्यते । मार्गस्यास्य रहस्यं सम्यगवबुध्य यदि सामान्यलौकिककामवासनारूपेण ग्रहणं क्रियेत, तर्हि मन्ये समस्तं माधुर्यतत्वं कामकेलिकर्दमकलुषितं सद् यौनभावनातृप्ति-पर्यन्तमेव सीमितं स्यात् । दशायामस्यां न शृङ्गारस्योन्नयनं मार्जनं संशोधनं वा सम्भवति, नापि साधकस्याभ्युदयो भवितुमर्हति । अत उच्चकोटिकाः साधकाःसर्वथा स्वसुखमुपेक्ष्य भगवत्सुखाय तत्रात्मानं समर्प्य मधुरभक्तेरादर्शमुपस्थापयन्ति । तन्मयत्ताद्वारा पृथक् सत्ताया अभावाद् भक्तहृदयेषु पूर्णं सुखं जायते । वैषयिकसुखे न पूर्णता प्रत्युत पूर्णं सुखमस्ति आनन्दखनिः सच्चिदानन्दस्वरूपः साक्षाद् भगवानेव । यतो विषयानन्दो न ब्रह्मानन्दः, स हि ब्रह्मानन्दाभासस्वरूपः । साधको यथा यथा विषयानन्दं परित्यजन् ब्रह्मानन्दाभिमुखमग्रेसरति, तदा तदा यथार्थसुखस्याधिकारितां लभते, अन्ते च स्वीयां पृथक् सत्तामपहाय पूर्णानन्दमधिगच्छति । एवञ्च भगवद्भावपरिपूर्णे साधकस्यान्तःकरणे विषयसुखनिवृत्तौ सत्यं विषयानन्दस्य समूलनाशे ब्रह्मानन्दस्य समुदये न काचिदस्ति विप्रतिपत्तिः । भक्तः सदैव भगवद्भावे निमज्जति च । अतस्तस्य भोजनं पानमुपवेशनमुत्थानं परिभ्रमणादिकं च सर्वमपि कर्म भगवद्भावयुक्तं सम्पद्यते । अतो भक्तस्य विषयानुभवे भावबुद्धया विषयानन्दो ब्रह्मानन्दप्रदो भवति । भगवद्भावस्य भावनया विषयानन्दस्य विस्मृतौ स्वारूपानन्दस्योदये न काऽपि संशीतिः ।

गोपिकानां सर्वा अपि क्रिया भगवतः श्रीकृष्णस्य सुखार्थमेवास्ति । अतस्तासां भगवति श्रीकृष्णे उत्कृष्टमं प्रेम आदर्शभूतमं गण्यते भक्तसमाजे । तत्र स्वसुखसुखित्वस्य प्राधान्यं नासीत्, अपि तु परसुखसुखित्वमुद्दिश्य भगवत्सुखार्थमेव तासां सर्वाश्चेष्टा अजायन्त । अतस्तासां प्रेम्णः प्रत्युपकारं कर्तुमशक्नुवता भगवता श्रीकृष्णेन ब्रजगोपिका उद्दश्य स्वमुखेन नैजमसामर्थ्यं प्रकटितम् ।[1]

भक्तौ विकासेन सह परमात्मानं प्रत्यनुरागस्याभिव्यक्तेःक्रमिकविकासस्यानुशीलनेन स्पष्टं प्रतीयते यत् पाञ्चरात्रसम्प्रदाये साधकैरीश्वरभक्तेर्यद्रूपमङ्गीकृत तत्र प्रेमानुरागयोर्विशिष्टं स्थानमासीत् । महाभारतकाले भक्तानां मनःसु अनुरागस्य प्रेम्णो वा भावः पूर्णतया समाविष्ट, पुराणकाले च नवधाभक्तिमूले भावस्यास्य प्राधान्यं प्रचुरता वा दरीदृश्यते, चैतन्यमते त्वस्य भावस्यांशः सर्वाधिकया मात्रया विकसितो जातः, यत्र पञ्चमपुरुषार्थरूपस्य स्वतन्त्रस्य भक्तिरसस्य साङ्गोपाङ्गं निरूपणं विधाय मधुरभक्तेः विकासश्चरमं सीमानमुपगतः ।

---

१. न पारयेऽहं निरवद्य संयुजां स्वसाधु कृत्यं विबधायुषापि वः ।
या मा भजन् दुर्जरगेहशृङ्खलाः संवृश्च्य तद् वः प्रतियातु साधुना ॥
—श्रीमद्भागवते १०।३२।२२

भक्तेरुद्गमस्थानस्य समीक्षणम्

भारते भक्तेरुद्गमः कदा कथं च, जात इति प्रश्नस्योत्तरे प्राच्यविद्याविशारदानां पाश्चात्यविपश्चितां कथनमस्ति यद् भारते भक्तिकल्पना ईसाईधर्मस्यास्ति दायः। पाश्चात्ये जगति कर्मप्रधानयहूदीधर्मापेक्षया ईसाईधर्मे प्रेम्णः प्रचुरता विद्यते, यतो हि ईसाईधर्मस्य मूलसिद्धान्तोऽस्ति भगवति प्रेमप्राचुर्यं, भगवतो भक्तिर्वा। अतः पाश्चात्यानां विदुषां मतेन ईसाईधर्मे एव सर्वप्रथमं भक्तेः समुदयो जात। तत एव लब्धप्रतिष्ठा भक्तिर्भारतवर्षेऽपि प्रविष्टा सती सर्वत्र सादरं प्रचारिता प्रसारिता चाभवत्। एवं भारतवर्षं भक्तेः कल्पनायामीसाईधर्मस्यास्ति अधमर्णः। तस्मात् भारतभूमौ भक्तिप्रचारे प्रसारे च ईसाईधर्मस्यास्ति प्रचुरः प्रभावः।

किन्तु समीक्षाजगति पाश्चात्यविपश्चितामिदं मतं नितान्तं निर्मूलं निराधारं कपोलकल्पितं सर्वथा अप्रामाणिकञ्च मन्यते। वैदिकवाङ्मयस्यानुशीलनेनैव निष्कर्षो निःसरति यद् यथा वेदो ज्ञानकर्मणोरुद्गमस्थलं तथैव भक्तेरपि मूलं स्रोतो वेद एव विद्यते। यतो हि बहुषु वेदमन्त्रेषु भक्तिभावस्य स्फुट आभासो मिलति।

यद्यपि वेदेषु स्पष्टतया भक्तिशब्दो नोपलभ्यते, तथापि वेदमन्त्रेषु देवानां स्तुतिषु च तैः साकं मातृ-पितृ-भ्रातृ-सुहृदादीनां स्निग्धबन्धूनां विविधप्रकारको हृदयङ्गमः सम्बन्धः स्तुतिकर्तॄणामन्तःकरणेषु देवान् प्रति स्पष्टतः प्रेम्णोऽनुरागस्य वा सद्भावं व्यञ्जयति, येन, तदुन्मुखीभवति मानवानां प्रवृत्तिः।

वेदे वैदिकदेवेषु प्रधानो देवराज इन्द्रः शौर्यस्य प्रतीकः प्रोक्तः। दस्यूनां दमने मानवाः तस्य सततं साहाय्यं कामयन्ते। तदनुकम्पया चार्याः शत्रून् शातयितुं सर्वथा समर्था जायन्ते स हि न केवलमुपासकानां सखा, माता, पिता वा स्वीकृतोऽस्ति, अपि तु पितॄणामपि श्रेष्ठतमोऽपि वर्णितोऽस्ति।[1]

एवमिन्द्रो मित्रतायाः सहृदयताया मातृत्वस्य पितृत्वस्य चावासभूमिरभिमतोऽस्ति। किञ्च तेन सहैवंविधं भावपूर्णं स्निग्धानुरागसम्बन्धं विलोक्य वेदेष्वनुरागातिशयसूचकभक्तेःसद्भावं कल्पयितुं शक्यते? तस्मात् स्तवनकाले विभिन्नदेवानां भावप्रवणासु स्तुतिषु श्रूयमाणा तादृशी सरसतापूर्णभावुकता नीरसहृदयेषु न सम्भवतीति स्तोतॄणां हृदयेषु भक्तिसद्भावः कल्प्यते। देवानां स्तवनकाले स्तोतॄणां हृदयेष्वनुरागविशेषस्य सत्ताया पूज्येष्वनुरक्तिसूचकभक्तेरपि स्फुट आभासः प्रतीयते।

---

१. त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ, आधा ते सुम्नमीमहे।

(ऋग्वेदे ८।९८।११)

अपि च—सखा पिता पितृतमः कर्तेमु लोकमुशते वयोधाः।

(ऋग्वेदे ४।१७।१७)

ब्राह्मणग्रन्थेषु कर्मकाण्डस्य प्राधान्येऽप्युपासकानां हृदयेषु भक्तिभावस्यानुरागात्मिका प्रवृत्तिरुत्तरोतरं वर्द्धमानैव दृष्टिगोचरी भवति । आरण्यकेषु गर्हियोंगापेक्षया आन्तरयागायैवाधिकं महत्त्वं दत्तमस्ति । उपनिषत्सु च चित्तवृत्तिनिरोधात्मकेन योगेन पुष्टं साधकानां हृदयं भक्तावधिकमाकृष्टमुन्मुखं च दृश्यते ! श्वेताश्वतरोपनिषदि स्पष्टतया भक्तिशब्दस्य प्रयोगो दृष्टिपथमायाति ।[१] अग्रे उपनिषत्सु प्रतिपाद्याया एव भक्तेर्विशदतया विकासो महाभारते, श्रीमद्भगवद्गीतायाम् श्रीमद्भागवतादिमहापुराणेषु, भक्तिसूत्रेषु, वैष्णवादीनां साम्प्रदायिकग्रन्थेषु च जात । प्राय इमे ग्रन्थाः पाश्चात्यजगता सार्द्धं भारतवर्षस्य सम्पर्कात् पूर्वमेव निर्मिताः, प्रामाणिकरूपेण स्वीकृताः सर्वमान्याश्च जाताः आसन् ।

महर्षिणा शाण्डिल्येन स्वकीये भक्तिसूत्रे स्पष्टतया प्रतिपादितमस्ति यद् भक्तिः श्रुतितो ज्ञातु शक्या—"भक्तिः प्रमेया श्रुतिभ्यः" (१।२।९) सूत्रस्यास्य व्याख्यानं कुर्वता स्वामिनारायणतीर्थेनापि भक्तिचन्द्रिकाभिधायां टीकायां भक्तेस्तद्भेदानां च प्रदर्शनाय व्याख्यासहिता अनेके वेदमन्त्राः समुद्धृताः सन्ति, येषु श्रवण-कीर्तन-भगवदर्पणात्मक प्रपत्त्यादीनां भक्तिभेदानां स्पष्टं प्रतिपादन भवति ।

इत्थं वैदिकवाङ्मयस्य समीक्षया निष्कर्षो निःसरति यद् भक्तिसिद्धान्तो वैदिकोऽस्ति य उपनिषद्द्वारा परिपुष्टः पुराणेषु च पूर्णतया विकसितः सन् विविधैश्च भक्तिग्रन्थैः समस्तासु भारतभूमिषु प्रचारितः प्रसारितश्च जातः । यथा वेदो ज्ञानकर्मणोरुद्भगभूमिरस्ति, तथैव स भक्तैरप्युदगमस्थली वर्तत इत्यत्र नास्ति काचित् संशीतिः । भारतीयानां विदुषां मतेन समेषां सिद्धान्तानां मूलं वेद एव वर्तते । अतो भक्तिसद्भावोऽपि वेदत एव जातः । तस्माद्भक्तेरर्वाचीनत्वमवैदिकत्वं वेति मन्यमानानां पाश्चात्यविपश्चितां मतं सर्वथा निर्मूलत्वादप्रमाणिकम् ।

यच्च डॉ० ग्रियर्सनमहोदयेन प्रबन्धमेकं लिखित्वा रायल-एशियाटिक-सोसायटीसभायां पठित्वेदं साधयितुं प्रयतितमासीद् यद् भारतवर्षे भगवद्भक्तिरीसासंप्रदायानुयायिभिः प्रचालिता । ईसामसीहस्य धर्मप्रचारकः सेन्टटामसनामक एकः शिष्यो भारते आगत्य दक्षिणदेशे मद्रासे स्थितः, तत्र तेन स्वीयः संप्रदायः प्रसारितः । तत्कालादेव भारतवर्षे भक्तिमार्गः प्रचलितः, पश्चाद्दक्षिणत एव समस्ते भारते भक्तिमार्गस्य प्रसारो जातः । इतः पूर्वं हिन्दुषु भक्तिमार्गो न प्रचलित आसीदिति ।

तन्न युक्तिसहम्, यतो हि ईसामसीहात् प्रागपि भारतवर्षे भक्तिमार्गः प्रचलित आसीदिति ग्रीकदेशीयस्येतिहासकारस्य मेगस्तनीजस्य लेखैरेव प्रमाणितं भवति ।

---

१. यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥६।२३॥

ग्रीकदेशाधिपतेः सेल्यूकसस्य राजदूतो मेगस्तनीजो मगधेश्वरस्य सम्राजश्चन्द्रगुप्तमौर्यस्य राजधान्यां पाटलिपुत्रे बहुतिथं कालमुषित्वा पुस्तकमेकं लिखितवानस्ति। तत्र तेनोल्लिखितमस्ति यत् शौरसेनीषु मथुराप्रदेशे वासुदेवस्योपासना प्रचलिता आसीत्। पुस्तकमदस्तेन ईसामसीहाद् त्रिशतीपूर्वमेव लिखितम्। मेगस्तनीजानुसारमीशापूर्वं चतुर्थशताब्द्यामपि भारते भक्तिमार्गः प्रचलित आसीत्। घोसुण्डीशिलालेखे (ई० पू० २००) भगवत्सङ्कर्षण-वासुदेवयोः पूजार्थं शिलाप्रकारनिर्माणस्योल्लेखो विद्यते, नानाघाटस्याभिलेखे (ई० पू० १५) सङ्कर्षण-वासुदेवयोः पूजाया वर्णनमुपलभ्यते।

महाभारते वासुदेवः (प्रकृतिः), संकर्षणः (जीवः), प्रद्युम्नः (मनः), अनिरुद्धः (अहङ्कारः) इति चत्वारो व्यूहाः प्रोक्ताः। एते ईश्वरस्यैव रूपान्तराणि सन्ति। अहङ्कारत एव शनैः शनैर्भक्तिद्वारा भक्तो वासुदेवं प्राप्नुवन्ति। किञ्च भग्नावशिष्टां प्राचीनामुत्तुङ्गभूमिं च खनित्वा खनित्वा प्रस्तरान् खर्परादीनि च निःसारयितुं सततं सन्नद्धेन पाश्चात्यविद्वद्बहुलेन पक्षपातरहितेन भारतीयेनोत्खनन-विभागेन तत्तत्स्थानेषु या मूर्त्तयो मुद्राः शिलालेखाश्चोपलभ्यन्ते, तेभ्योऽपि ईसाम-सीहाद् पूर्वं भारते वासुदेवोपासनाविषये स्पष्टं प्रमाणं मिलति। उत्खननविभागेनैको भेलसा (विदिशा) समीपे वेसनगरे वसुदेवनिमित्तमेवंविधो गरुडध्वजस्तम्भोऽ-वाप्तोऽस्ति, यं निर्माय तक्षशिलानिवासी बासुदेवोपासको हिलियोडोरनामको ग्रीकराजदूतः ईसामसीहात् सार्द्धशतवर्षपूर्वमेव स्थापितवानासीत्। भक्तिमन्तरा उपासनायाः सम्भवो नास्ति, यतो भक्तिरस्त्युपासनायाः प्राणः, नापि भक्तिं विना यज्ञादिकर्म अनुष्ठातुं शक्यते। अतो भक्तिमार्गं ईसामसीहाद् बहुपूर्वत एव भारते प्रचलितो वर्तते। गीतायां भक्तियोगस्य विशिष्टं विवेचनमस्ति। भगवता श्रीकृष्णेन भक्तायार्जुनाय स्थाने स्थाने भगवत्प्रपत्तेरुपदेशो दत्तोऽस्ति। कालिकातास्थ इम्पीरियल-लाइब्रेरी-भूतपूर्व-ग्रन्थाध्यक्षो बहुभाषाऽभिज्ञो हरिनाथदे महोदयश्चीनभाषायामेकं गीतानुवादं दृष्टवानस्ति य ईसामसीहाद् द्विशतीपूर्वमेव लिखितोऽस्ति। अपि च डॉ० ग्रियर्सनादपि पूर्वं सर्वप्रथमं शर्मण्यदेशीयो डॉ० लोरिनजरनामा विद्वानपि स्वकीये श्रीमद्भगवद्गीतानुवादेऽस्यां समस्यायां दृष्टिपातं कुर्वाणो लिखितवानासीद् यद् न्यूटेस्टामेन्टस्य बहव उपदेशा गीता-यामुपलभ्यन्ते। अतो न्यूटेस्टामेन्टोऽस्ति प्राचीनः ततः परं गीताया निर्माणं जातम्। एतदभिप्रायक एवैकः प्रबन्ध इण्डियन-आन्टिक्वेरिनामिकायां मासिकपत्रिकायामपि प्रकाशित आसीत्, किन्तु डॉ० म्यूरो नैतत् स्वीकृतवान्। शर्मण्यदेशीया डॉ० लासन-विटलिकप्रभृतयो महाविद्वांसो डॉ० म्यूरस्य निर्भयं समर्थनं कृतवन्तः। एतेनापीसा-मसीहात् पूर्वमेव गीताया निर्माणं जातमिति निर्विवादं सिध्यति। तस्माद् डॉ० ग्रिय-र्सनप्रभृतीनामुक्तयः सर्वथा निर्मूला भ्रान्तिपूर्णा उपेक्ष्याश्च सन्तीत्यत्र नास्ति कश्चित् सन्देहलेशः। अतो भक्तेरुद्गमस्थानं भारतवर्षमिति निर्विवादम्।

भक्तेरुपासनामूलकत्व विवेचनम्

उपासना किल भवति भक्तिमूला। यथा स्थूलशरीरेण सह प्राणानां सम्बन्धः तथैव भक्त्या सहोपासनाया अप्यस्ति स्वभाविकः सम्बन्धः। यथा स्थूलशरीराद् निःसृतेषु प्राणेषु तद्धि शवरूपो भवति तथैव भक्तिमन्तरोपासनाऽपि व्यर्थैव। यद्युपासनाया भक्तेः सम्बन्धो न स्यात्तर्हि नासावुपासनाशब्दवाच्या भवितुमर्हति। अतो यथा प्राणान् विना शरीरं नैव स्थातुं शक्नोति, तथैव भक्तिं विनोपासनाऽपि न सम्भवतीति फलतो भक्तिरुपासनायाः प्राणस्वरूपा सिध्यति। अत एवोक्तम्-'**तस्याश्चैव द्विजा ज्ञेया भक्तिः प्राणस्वरूपिणी।**'

सकाम-निष्कामभेदेनोपासना द्विविधा। तत्र निष्कामोपासनैव मुख्या, तस्या एव भक्तिशास्त्रेषु प्रशंसा कृताऽस्ति। यत्र कुत्राप्युपासनामूलकस्य कर्मकाण्डस्यावरत्वप्रदर्शनमुपलभ्यते, तत्र सकामत्वमेव कारणमस्ति। यतो हि वैष्णवैः केवलं निष्कामोपासनाया एव महत्त्वं स्वीक्रियते, तस्या एव च सर्वत्र प्राशस्त्यमुच्यते। भक्ता हि व्यक्ताव्यक्तोपासनारूपेण भगवन्तमुपासत। तत्र व्यक्तोपासनैव सरला, अव्यक्तोपासना तु महती कठिनाऽस्ति। सगुण-साकारादिरूपेण भगवत उपासना व्यक्तोपासना कथ्यते। तत्रोपास्योपासकभावो यावत्तिष्ठति तावद् द्वैतभावोऽवश्यमेव तिष्ठति। पराभक्तेरवस्थायां यदा उपासको भक्त उपास्यदेवतया सह तन्मयो भवति, तदा द्वैतभावो विनश्यति। सैवास्ति परमानन्दस्यावस्था। अनेके एवंविधा भक्ताः सन्ति, य उपासकभावं कदाऽपि त्यक्तुं न वाञ्छन्ति, तैस्तत्रैव महानन्दोऽवाप्यते। एवमपि सन्ति भक्ता ये मुक्त्यवस्थायामपि भक्तेरानन्दा एव श्रेयोमार्गं मन्यन्ते। शैव-शाक्त-वैष्णव-सौर-गणपत्यभेदेनोपासना पञ्चायतना प्रोच्यते। तत्र पञ्चसु देवेषु स्वेच्छया स्वरुच्यनुसारं प्राधान्येन यं कञ्चिद् देवमिष्टदेवं मत्वा विशिष्टरीत्या तदाराधना कर्तव्या, परमन्येषां देवानां निन्दा न कदापि विधेयेत्येवायमस्त्युदारो मार्गः।

उपासना हि हिन्दुधर्मस्यास्त्येकं स्वतन्त्रं मननीयमावश्यकं चाङ्गम्। उपपूर्वकाद् आसु उपवेशने इत्यस्माद्धातोर्भावे ल्युट्प्रत्ययेन निष्पद्यते उपासनाशब्दः, यस्य निर्गलितोऽर्थः सम्पद्यते—स्वकीयस्योपास्यदेवस्य समीपेऽन्तःकरणस्योपस्थापनम्। उपासको ह्युपासनया नैजमन्तःकरणं स्वोपास्यदेवस्य चरणकमलयोरुपस्थाय कृतकृत्यः सन्ननल्पमानन्दमनुभवति। पुराणेषु भक्तिरुपासनायाः प्राणः प्रोक्तः, योगश्चोपासनाया अङ्गं निर्दिष्टमस्ति। अतः प्राणाङ्गस्थानीयाभ्यां भक्ति-योगाभ्यामुपासनाया अस्त्यान्तरिको नैकटतमः सम्बन्धः। अत उपास्यसान्निध्यहेतुका उपायसमूहा अपि भवन्त्युपासनाशब्दवाच्या इति निश्चप्रचम्।

भक्तिसम्बन्धिनो विचारस्य भेदादुपासना पञ्चप्रकारा अभिमताऽस्ति (१) असुरोपासना, (२) देवर्षिपितृ्युपासना, (३) अवतारोपासना, (४) सगुणब्रह्मोपासना (५) निर्गुण-

ब्रह्मोपासना च । अपि च बहिर्मुखचित्तवृत्तीनां निरोधं विधाय आत्मसाक्षात्कराय भगवतः सान्निध्यलाभाय च यावत्यः साधनापद्धतयः सम्भवन्ति, ताः सर्वा अपि योगशास्त्रसरणिमनुसृत्य चतुर्षु भागेषु विभक्ताः सन्ति । तथा च योगसाधनप्रणाल्यनुसारमुपासनाभेदश्चतुर्विधो भवति—(१. मन्त्रयोगः, (२) हठयोगः, (३) लययोगः (४) राजयोगश्च ।[1] आसामेव नवविधानाम् (५ + ४ = ९) उपासनानां सात्त्विक-राजस-तामसभेदाद्भवति उपासना सप्तविंशतिप्रकारा ।[2]

प्रतिमनुष्यं प्रकृतिः प्रवृत्तिश्च भिन्ना भिन्ना भवति । अतो यस्य पुंसो यादृशी प्रवृत्तिः प्रकृतिश्च भवति, स तदनुकूले एवाहारे विहारे व्यवहारे भक्तावुपासनायाञ्च प्रवर्तते अत एव च शास्त्रे षूत्तममध्यमाधमानामधिकारिणां भेदादुपासनाभेदोऽपि निर्दिष्टः । तत्र सात्त्विका उपासका उच्चकोटिकोपासनायामेवाग्रे सरन्ति, राजसा अधिकारिणो मध्यममार्गमाश्रयन्ते, तामसप्रकृतयस्त्वासुरोपासनामेवात्मनः श्रेयस्करीं मन्यन्ते। भगवता श्रीकृष्णेनाऽपि श्रीमद्भागवदद्गीतायां त्रिविधोपासनाभेदं प्रदर्शयता प्रोक्तं यत् सात्त्विकप्रकृतय उपासका देवानुपासते, राजसप्रकृतयः पुमांसो यक्षराक्षसान् पूजयन्ति, तामसस्वभावाश्च मानवा भूतप्रेतादिकमेव समाराधयन्ति ।[3]

केषाञ्चिमते—सालम्बन-निरालम्बनभेदादप्युपासना भवति द्विविधा। तत्रालम्बनेन सम्पाद्यमानोपासना सालम्बनोपासना कथ्यते, आलम्बनराहित्येन क्रियमाणोपासना च निरालम्बनोपासना गीयते । आलम्बनं हि भवति भावमूलम् । तत्र ध्येयस्य प्राधान्यं जायते । मनसो ध्येयाभिमुखीकरणमन्तरा ध्यानसिद्धिरम्भवा । एवञ्च वेदशास्त्रसम्मता योगविज्ञानमूलिकोपासनाप्रणाली सालम्बना, तदन्या प्रमाणविरहिता केवलमनसा

---

१. मन्त्रो हठो लयो राजयोगोऽयं भूमिकाक्रमात् ।
एक एव महादेवि ! चतुर्धा संप्रकीर्त्यते ॥ = ह० दी० २५

२. पितृदेवर्षिवृन्दानामवतारगणस्य च ।
पञ्चानां सगुणब्रह्मरूपाणां निर्गुणस्य च ॥
ब्रह्मश्चासुरौघानामुपास्ते भक्तियोगतः ।
मन्त्रो हठो लयो राज एते योगेन च ध्रुवम् ॥
अस्या भेदाश्च चत्वारो भेदा एवं नवासते ।
एते भेदा नवैवाहुर्देवास्त्रैगुण्ययोगतः ।
उपास्ते प्रतिशास्त्रं स्युः संख्यया सप्तविंशतिः ॥ शा०गी०२७-३०

३. यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।
भूतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥ = गीता १७।४

कल्पिता ध्यातृ-ध्येय-ध्यानविर्जिता मतान्तरप्रचारिता अवैदिक्युपासना-प्रणाली निरालम्बनान्तर्गता ज्ञेया ।

वैदिकविज्ञानयुक्ता निराकारब्रह्मोपासना किल आध्यात्माधिदैवाधिभूतभावसंयुता विद्यते। एवं ब्रह्मस्वरूपध्यानमपि सच्चिदान्दमयमेव। सगुणपञ्चोपासना लीलाविग्रहोपासनाप्रभृतयश्च मूर्तिध्यानसंयुक्ताः सन्ति । अतो वैदिक्युपासनापद्धतयः सालम्बनेत्यत्र न-कस्याप्यस्ति काचिद्विमतिः, किन्त्ववैदिकमार्गप्रचारितोपासनाप्रणाल्यो निजभावविज्ञान-मनुसृत्य स्वस्वसरण्यनुसारेण सिद्धिप्रदा भवन्तीति हेतोस्ता निरालम्बना इत्यत्र न मनागप्यस्ति सन्देहलेशः ।

निर्गुणस्य ब्रह्मण उपासना ॐकारध्यानद्वारा निष्पद्यते । **'तस्य वाचकः प्रणवः'** (१।२७) इति योगसूत्रेणेश्वरस्य प्रणववाचकता निरूपिता । तस्मात् प्रणवशब्द ईश्वर-वाचकः । ॐकारश्च प्रणावस्यैवास्ति नामान्तरम्, तदनुसारमीश्वरस्य ॐकारो मुख्यं नामास्ति, तेन तदुपासनया स परमं प्रसीदति । ब्रह्मणः साक्षात् सम्बन्धनिबन्धनत्वात् प्रणवस्यालम्वनं सर्वाभ्यर्हितमुत्तम् । अतः प्रणवाश्रयेण साध्यमानोपासना मुख्या अवगन्तव्या । एका स्वतन्त्रा उद्गीथोपासनापद्धतिरपि वेदे वर्णिताऽस्ति । एवं वेदेषु बहुविधानां धारणानामवलम्बनेन बहुविधं ब्रह्मोपासनाविधानं दरीदृश्यते । तदनुसारमेव तत्तदुपासनचर्या महर्षयः प्रधानविधीनामलम्वनेनोपासनाविज्ञानरहस्यस्योद्घाटनं स्वेषु स्वेषु ग्रन्थेषु कृतवन्तः ।

यथा भगवान् भास्करः स्वतेजसा भूमिगतं वाष्पराशिं स्वाभिमुखमाकर्षति तथैवो-पास्यदेवोऽप्युपासकान् स्वाभिमुखमाकृष्य तेषामीप्सितं फलं पूरयति । अत एवोपासकाः स्वस्वलक्ष्यसिद्धये स्वस्वस्वभावानुसारं साधनमवलम्ब्य तत्तद् देवतानामुपासनायामग्रेसराः भवन्ति । भगवानस्ति प्रेममयः, अतस्तदुपलब्धये उपासनापथमपि प्रेमप्रचुराया भक्तेराश्र-यमवलम्वते तस्मादुपासना भक्तिरसस्य मधुरधारायामेव विकाशमाप्नोतीति, निश्चप्रचम् ।

त्रिविधो भक्ताः

सामान्यतया भक्ता भवन्ति त्रिविधाः—साधारणः, विधेरनुगामोः निषेधपरकश्च । तेषु साधरणो भक्तः केवलं प्रथानिर्वाहार्थं दैनिकाचाररूपेण भक्तिं करोति । विधेरनु-गामी भक्तो नियते समये निश्चिते स्थाने शास्त्रीयविधिविधानानुकूलभावेना भीष्टदेवस्यार्चनध्यानादिकं विधत्ते । निषेधपरकश्च भक्तो भक्तिप्रतिकूलाचारपरित्याग-पूर्वकं दुःसङ्गाद्युपेक्षको भवति ।

भक्तानां हृदयपटलेषु भगवन्तं प्रति त्रिप्रकारको भावः परिस्फुरति वाचनिकः, आलोकदानः, हार्दश्च । तत्र भक्तानामभ्यर्थनापूर्वकं भगवदुन्मुखो यो भक्तिप्रवाहो वर्द्धते सोऽस्ति वाचनिको भावः । एष हि भावो देवर्षिनारद - भीष्मपितामह - भरद्वाजादिषु

परिस्फुरति । यान् भक्तान् हि स्वयं प्रभुरात्मीयान् सेवकान् विधत्ते, तेषामस्ति अवलोकदानभावः । अस्योदाहरणभूताः सन्ति-ध्रुव-प्रह्लाद-हनुमदङ्गदोद्धवादयः । हार्दभावश्च शुक-शिव-सनकादीनामन्तः करणेषु स्वाभाविकतयास्त्वत एव परिस्फुरति ।

यथा गङ्गाप्रवाहोऽखण्डरूपेण समुद्राभिमुखं प्रवति तथैव भगवद्गुणाश्रवणमात्रेण येषां मनसो गतिरविच्छिन्नतया हृदयगुहायां विराजमानं भगवन्तं पुरुषोत्तमं प्रति प्रवर्तते । ते अमन्दमानन्दमनुभवभन्तो निष्कामा भक्ता भगवत्सेवातिरिक्तं मोक्षमपि न वाञ्छन्ति, सततं भगत्सेवासुखमनुभवन्त एव परमान्दं लभन्ते ।

भक्तया भगवन्नामोच्चारेण भक्तानां मानसपटले तस्य सात्त्विकं स्वरूपं सहसा प्रतिबिम्बितं भवति, यदनुभूय भक्ता आनन्दनिभग्नाः सन्तो भक्तिरससमुद्रे निमज्जनोमज्जनं कुर्वाणा लोकोत्तरं सुखमाश्रयन्ते ।

विष्णुपुराणेङ्कितमस्ति यद् यथा वायुना प्रक्षिप्तः उद्गतज्वालोऽग्निः शुष्कं तृणकक्षं सहसा भस्मसात् कुरुते तथैवात्मस्मरणद्वारा सद्यः साधकानां हृदये विराजमानो भगवान् विष्णुरपि भक्तानां समस्तान् दोषान् निर्दहति—

यथाग्निरुद्धतशिखः कक्षं दहति सानिलः ।
तथा चित्तिस्थितो विष्णुः योगिनां सर्वकिल्विगम् ॥ = वि. पु. ६।७५

भक्तेः साध्यसाधनोभयत्वविवेचनम् ।

भक्तिः किल साध्यरूपा, साधनरूपा चास्ते । यथा प्रसादमधिरोढुमिच्छुना मानवेन अन्तिमस्य सोपानस्य प्राप्तये प्राथमिकानि सोपानानि पारयितव्यानि भवन्ति तथैव प्रभुपादपद्मं प्राप्तमिच्छुना साधकेन साद्दयरूपां भक्ति प्राप्तुं भक्तेः अङ्गानि अनुष्ठयेयान्येव भवन्ति ।

नारदभक्तिसूत्रानुसारं सनकादयोः मुक्तेः फलं भक्तिमेव मन्यन्ते । यतो हि तन्मते भक्तिः स्ववमेवास्ति फलम् । तथाचोक्तम्—"स्वयं फलरूपेति ब्रह्मकुमारः" (३०)

भगवत्सेवार्थं मोक्षमपि उपेक्षामाणा निर्गुणा भक्ता भगवद्भक्तिमेव स्वकीयं परमं पुरुषार्थं मन्यन्ते । भक्तेरियं साध्यावस्थाऽस्ति । भक्तावस्यां भक्ता गुणत्रयमतिक्रम्य भगवद्भावमुपढौकते । एवंभूता भक्ता देवर्षिणा नारदेन एकान्तिनः सर्वश्रेष्ठाश्च प्रोक्ताः । "भक्ता एकान्तिनो मनुष्याः" (६७) गीतायां यत्र भगवता श्रीकृष्णेन नैस्त्रैगुण्याय भक्तप्रवरः पार्थः प्रोक्तः, तत्र तस्यायमभिप्रायो यत् अस्या एव साध्यरूपाया भक्तेः प्राप्तिरवश्यं विधेया ।

अत एव भक्तिः साधनसाध्योभयरूपा सिध्यति । साध्यावस्थायां ज्ञानकर्मयोगादीनि भक्तेः साधनानि, साधनरूपेण च भक्तेः साध्यः परमानन्दस्वरूपः परमात्मैव । भक्ताचार्यैः भक्ति साध्यां मत्वैव प्रेमसाततयस्य प्राधान्यं प्रदत्ताम् ।

देवर्षिणा नारदेन तु ईश्वरे पराकाष्ठाया अनुरक्तिरेव भक्तिः प्रोक्ता ।

भगवानस्ति प्रेमस्वरूपः । यथा समुद्रजलं वाष्प मेघादिरूपेण परिणतं सत् पुनः वर्षा-नद-नदी-द्वारा समुद्रमेवोपगच्छति तथैव प्रेमप्रभवस्य भगवतः प्रेमधारा निःसृत्य भक्तहृदयं सिञ्चन्ती पुनः प्रेमश्रोतःस्वरूपे परमात्माभिमुखं व्रजन्ती तथैव विलीयते ।

भारतीयप्रेमपद्धती प्रेम अनेकेषु रूपेषु अभिव्यक्तं भवति—मित्रयोः परस्परं प्रेम, पतिपत्न्योरन्योऽयं प्रेम, पितापुत्रयोरितराश्रयं प्रेम । यथा प्रेमप्रेरितः पित्रादिः स्वसन्ततिं पालयति पोषयति तथैवेश्वरोऽपि भक्तप्रेमाभिभूतो भक्तान् पालयति तेषां हितं विद्यते, निरन्तरं च तदर्थं चिन्तयति ।

यथा मेघात् पर्वतीयोच्चावचप्रदेशेषु विसृष्टं वर्षाजलं शिलाखण्डैः संघट्टमानमितस्ततो निपतत् प्रपतच्च यावत् समतलभूमौ नोपतिष्ठते तावत् निर्मलं स्थिरं च न भवति तथैव जीवो पि प्रभुतः पृथग् भूत्वा विभिन्नासु योनिषु बभ्रम्यमाणोऽनेकान् क्लेशान् सहमानो विविधोश्च यातनामनुभवन् यावत् प्रभुपादपद्मं नोपतिष्ठते तावतस्य पापतापयोः शान्तिर्न जायते । अतो जीव आनन्दधामानं परमात्मानमुपस्थायैव आनन्दमनुभवितुमर्हति नान्यथा । अतो भगवत्प्राप्तये भक्तिरसोऽति सरलो मार्गः ।

यद्यपि वैष्णवसंप्रदायानुसारं श्रीमद्भागवतं श्रीमद्भगवद्गीतेति ग्रन्थद्वयं प्रधानमस्ति, यत्र भक्तिज्ञानकर्मणां समन्वितरूपेण दर्शनं वोभविति तथापि ज्ञानकर्मभ्यां भिन्ना भक्तेरेका स्वतन्त्रा सत्ता स्थिरा कृताऽस्तिः, यत्र नारदभक्तिसूत्रशाण्डिल्यभक्तिसूत्रसिद्धा भक्तिः अप्यन्तर्भवति । अन्तः करणे प्रयुज्यते तथैव—

स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् ।
भक्त्या सञ्जातया विभ्रत्युत्पुलकां तनुम् ॥ = ११।३।

इतिश्रीमद्भागवतीयप्रबुद्धस्य वाक्ये प्रथमभक्तिशब्दः करणव्युत्पत्त्या भागवतधर्मेषु प्रयुक्तो द्वितीयस्तु भावव्युत्पत्त्या फले निगदितोऽस्ति । तस्मात् साधनफलभेदेन भक्तेर्द्वैविध्योपपत्तौ न क्वापि बाधा समुपतिष्ठते ।

भक्तिचन्द्रिकायां नारायणतीर्थेन भक्तिर्न सेवामात्रं समानेऽपि राजसेवाकर्मणि अयं भक्तः अयं चाभक्त इति भेदव्यपदेशदर्शनात् । तस्माद्भक्तिर्भावविशेष इति प्रोक्तम् । एतत् सर्वमभिप्रत्यैव महर्षिणा शाण्डिल्येन "सा परानुरक्तिरीश्वरे" (२) इति भक्तिलक्षणं कृतम् ।

देवर्षिणा नारदेन महर्षिणा शाण्डिल्येन च स्वस्मिन् स्वस्मिन् सूत्रे गोपीनां भक्तिः आदर्शभक्तिः स्वीकृताऽस्ति—यथा व्रजगोपीकानाम् (नारदभक्तिसूत्रे २१) अत एव तद-

भावाद् वल्लवीनां (शाण्डिल्यभक्तिसूत्रे ।२।५।) वस्तुतो गोपीनामादर्शप्रेम्णः तुलना विश्वप्रेमपरम्परायां भवितुं नार्हति । साधनायां प्रेममात्रा यावती अधिकतरा भवति तावत्येव श्रेष्ठतमा भक्तिर्भवति । गोपीकानां प्रेम्णः केन्द्रबिन्दुः षोडशकलः पुरुषः साक्षाद् भगवान् श्रीकृष्ण एवासीद्, यस्मिन् ताभिः सकलाः शीररिक्यः चेष्ठा मानसा व्यापाराः सर्वविधानि सुखानि दुःखानि च समर्पितान्यासन् । क्षणमात्रमपि श्रीकृष्ण-विरहे तासां जीवनं जलविहीनमीन इव व्याकुलमासीत् केवलं पुनर्मिलनलालसायामेव ताभिः प्राणधारणं कृतम् । इदमेवास्ति विशुद्धस्य प्रेम्णः सत्यं स्वरूपं, यतो हि तत्र न लौकिकरागजन्यबन्धनस्य वासनाया वा सत्ता तिष्ठति । अत एव भक्तिसम्प्रदाये विशुद्धस्य प्रेम्णोऽपूर्वं स्थानमङ्गीकृतमस्ति । विशुद्धं प्रेमैव भक्तिभूमिकाया आधारः स्तम्भः प्रोच्यते । समस्तानि साधनानि इदमेव लक्ष्यीकृत्यैव भक्तेरैकान्तिक्यवस्थापर्यन्तमुपस्थापयितुं मार्गं प्रशस्तं कुर्वन्ति । भगवति अनन्यं प्रेमैव भक्तिमार्गस्य प्राणस्वरूपमस्ति यस्याभावे भक्तिनिष्प्राणा आडम्बरभागेव भवति । महत्त्वमेतत्स्वीकुर्वता देवर्षिणा नारदेन भक्तिलक्षणेऽस्य निवेशो ऽभिमतः-'सा त्वस्मिन् परमप्रेमरूपा' इति ।

योगिराजस्याविन्दस्य मतेनापीश्वरप्राप्तिमार्गे प्रेमैव पाथेयमस्ति येनावश्यमेव प्रभुः प्राप्तुं शक्यते । "अनिर्वचनीयं प्रेमस्वरूपम्" (५१) इतिसूत्रानुसारं देवर्षिणा नारदेन प्रेमस्वरूपस्यानिर्वचनीयत्वमुपस्थापयता प्रोक्तं यत् अस्यामवस्थायां भक्तो यद् भगवतः स्वरूपामृतमास्वादयति, न तद् वाणीद्वारा विशदीकर्तुं प्रभवति "तत्प्राप्य तदेवावलोकयति, तदेव चिन्तयति च" (५५) भक्तो यदाऽऽत्मानमसहायं मत्वा प्रेममयस्य परमात्मनश्चरणकमलयोरात्मानं समर्प्य तदीच्छानुसारी जायते तदा स एव तस्य योगक्षेमं निर्वहति । इयमेव गीतोक्ता मुख्या शरणागतिः । इयमेव च भवसागरसन्तरणाय सुगम साधनमस्ति, सर्वाश्रये सच्चिदानन्दस्वरूपे परमात्मनि तल्लीनतासम्पादनाय च श्रेयस्करः पन्थाः । तस्माद्भवसागरसंतरणाय भगवानेव ध्येयो ज्ञेयश्च—

संसारसिन्धुमतिदुस्तरमुत्तितीर्षो
र्नान्यः प्लवो भगवतः पुरुषोत्तमस्य ।
लीलाकथा रसनिषेवण मन्तरेण
पुंसो भवेद् विविधदुःखदवार्दितस्य ॥

॥ इति पूर्वार्द्धम् ॥

अथोत्तरार्द्धम्

रूपगोस्वामिनो भक्तिरसामृतसिन्धुः भक्तिरसस्य प्रतिपादकः शास्त्रीयो मान्यग्रन्थोऽस्ति। तत्र तेनस्वामिवर्येण साहित्यशास्त्रे स्वीकृता एव रसा भक्तिरसे पर्यवसिताः। भक्तिं मुख्यं रसं स्वीकृत्य अन्येषां साहित्यिकरसानां तदङ्गत्वेन निरूपणं कृतमस्ति। भक्तेः साहित्यशास्त्रीयरसकोटिकस्थानस्याप्राप्त्या रूपगोस्वामिना ग्रन्थेऽस्मिन् काव्यरसस्य सकलानि उपकरणानि भक्तौ एवं संघटितानि येन भक्तेः रसरूपप्रदाने शास्त्रीयदृष्ट्या न कापि बाधोपतिष्ठेत। विभावानुभावसञ्चारिभावेषु यथावद् ध्यानं ददता तेन स्थायिभावस्य भगवद्विषयकरतेः स्थापनं कृत्वा स्वतन्त्रो भक्तिरसः साहित्यिकधरातले प्रस्तुतः।

तथा च भक्तिरसाभिव्यक्तये साहित्यशास्त्रस्य रसप्रक्रियामवलम्ब्य नाट्याचार्यस्य भरतमुनेः विभावानुभावसंञ्चारिभावाद्रसनिष्पत्तिरिति सूत्रं यथावच् चरितार्थयता तेन भगवद्भक्तिरसनिरूपके दक्षिणविभागे भक्तिरसस्य साङ्गोपाङ्गं निरूपणं कृतंमस्ति।

भक्तेः रसत्व-पुरुषार्थत्वयोः पर्यालोचनम्

भक्तिरसक्षेत्रे सर्वाधिका अभिनवता स्थायिभावस्य कल्पनायामस्ति। भक्तिरसाचार्याः भक्तिविषये नेदं निश्चेतुं पारयन्ति यत् जात एव जन्तुः ईयतीभिः संविद्भिः परीतो भवति, नापि चैतद् कथयितुं शक्नुवन्ति यत् नह्येतच्चेतनाशून्यो प्राणी भवति। इमे आचार्याः केवलामेकां भक्तिमेव स्थायिभावं स्वीकुर्वन्ति। भावश्चायमुपार्जितः संवर्धितश्च भवति। प्राक्तनसंस्कारप्रभावेण जन्मार्जितोऽपि भवितुमर्हति, किन्तु अधिकांशतोऽस्योपार्जनमेव क्रियते। प्राक्तनैः आचार्यैः, न भक्ते रसात्मकत्वं, नापि स्थायिभावत्वमङ्गीकृतम। अत एवैषां मते भक्तिकाव्यस्य न भावकोटी, न वा रसकोटी समावेशो भवितुमर्हति। रसशास्त्रे वासनामया सहृदयहृदयाः रसिका एव रसास्वादनस्याधिकारिणोऽभिमताः सन्ति, भक्तिशास्त्रे तु भक्तिवासनावासितान्तः करणा एव भक्तिरसास्वादनस्याधिकारिणो गण्यन्ते।

स्थायिभावस्य रसरूपताविषये भक्ताचार्याणां नाट्याचार्येण साकं विशेषो मतभेदो नास्ति। प्रसङ्गेऽस्मिन् भक्ताचार्यैरनेकशो भरतमुनेरेवातिदेशः कृतः। रूपगोस्वामिना तु परिभाषाऽपि साहित्यदर्पणपरिभाषासम्बद्धैव दत्ताऽस्ति। भक्तिरसायने मधुसूदनसरस्वतीभिः रसनिष्पत्तेर्विश्लेषणं कुर्वद्भिः प्रोक्तं यत् स्थायिभावः सामाजिकेष्वेवाव-

तिष्ठते। यदा तस्य संयोगो विभावादिभिर्मात्रै र्भवति तदा सामाजिकाभिनेययोः तद्भेदः तिरोहितो भवति। ततोऽभेदप्रतीत्या भगवद्गतायाः परमानन्दरूपतायाः सामाजिकेष्वेवस्थितत्वात्तेऽपि आनन्दमग्ना भवन्ति। अयमेवास्ति रसः, इयमेव रसज्ञानां सिद्धान्तः—

स्थायिभावगिराऽतोऽसौ वस्त्वाकारोऽभिधीयते।
व्यक्तश्च रसतामेति परमानन्दतया पुनः॥ भ० र० ११९

विभावानुभावव्यभिचारिसंयोगेनाभिव्यक्तः स्थायिभाव एव सभ्याभिनेययोर्भेदतिरोधानेन सभ्यगत एव सन् परमानन्दसाक्षात्काररूपेण रसतामाप्नोतीति रसविदां मर्यादा

परिभाषयानया निम्नाङ्किता निष्कर्षा निःसरन्ति—(१) स्थायिभावः सामाजिकगत एव भवति। सामाजिकचित्तवृत्तिरेव रसरूपतामाद्यते। (२) रसः सर्वदा सुखात्मक एव भवति। (३) स्थायी भाव एव रसतामापद्यते। (४) व्यञ्जनावादानुसारमेव रसोऽभिव्यजयते। (५) तादात्म्यसिद्धान्तस्वीकाराद् सभ्याभिनेययोर्भेदस्तिरोहितो भवति।

भक्तिसिद्धान्ते सर्वे भावा भगवद्रतेरेव पोषका भवन्ति। अत्र भगवानेवालम्बनमप्यास्ते स्थायिभावरूपेण तत्प्रत्यायनमपि जायते। अतस्तत्र तादात्म्यस्थापनं स्वाभाविकमेव भवति। भक्ताचार्याः सर्वान् भावान् रतिमूलकान् मन्यन्ते। आधारममुमाश्रित्यैव तैः मुख्यामुख्यरसानां कल्पना कृताऽस्ति।

भक्ताचार्याणं मते स्वयं सुखमयः स्थायी भाव एव रसरूपतां प्रतिपद्यते, किन्तु अभिनवगुप्ताचार्येण स्थायिभावविलक्षण एव रस इति ब्रुवता रसस्य स्थायिभावविलक्षणत्वमङ्गीकृतम्। अपिच रतेः रसरूपताधारणाय तत्परिपोषकाणां विभावादीनां नितान्तमपेक्षा भवति, किन्तु प्रेमाभक्तिः तदभावेऽपि स्वसत्तया रसतां प्रतिपद्यते।

भक्तिरसामृतसिन्धौ स्थायिभावः सञ्चारिभावश्चेत्युभावपि रससंज्ञयाऽभिहितौ। भावानिष्पत्तिविषयेऽधिकारिनिरूपणप्रसङ्गे द्विविधो भक्तः प्रोक्तः—कर्कशचितः कोमलचित्तश्च। तत्रापि कर्कशचित्तः त्रिधोपमितः—वज्रचितः, स्वर्णचित्तः, जतुचित्तश्च। तेषु वज्रचित्तो भावाग्निना न कदापि द्रवते, स्वर्णचित्तोऽधिकेन तापेन द्रवते, जतुचित्तश्च तापलेशमात्रेण द्रवते। अस्यैव भावस्य जतुदृष्टान्तेनाववोधाय मधुसूदनसरस्वतीभिरपि भक्तिरसायने प्रोक्तम्—

चित्तद्रव्यं हि जतुवत् स्वभावात् कठिनात्मकम्।
तापकैर्विषयै र्योगे द्रवत्वं प्रतिपद्यते॥ १।४॥

भक्तिशास्त्रसिद्धान्तनुसारं भक्तिरसमात्रं प्रति भगवद्विषया रतिरेव स्थायीभावः— प्रोच्यते तथाचोक्तम्–स्थायीभावोऽत्र संप्रोक्तः श्रीकृष्णविषया रतिः ।

स्थायीभाव एव विभावैः अनुभावैः सञ्चरिभिश्च सुखरूपतया प्रतीयमानः रस उच्यते । तथाचोक्तम् भक्तिरसायने स्वामिपादैः मधुसूदनसरस्वतिभिः—

विभावै रनुभावैश्च व्यभिचारिभिरप्युत ।
स्थायी भावः सुखत्वेन व्यज्यमानो रसो भवेत् ॥ ३।२ ॥

एष एव भावो भक्तिरसामृतसिन्धो दक्षिणविभाणे प्रथमलहर्यामपि रूपगोस्वामिना प्रोक्तोऽस्ति—

सामग्रीपरिपीषेण परमा रसरूपता ।
विभावैरनुभावैश्च सात्त्विकै र्व्यभिचारिभिः ॥
स्वाद्यत्वं हृदि भक्तानामानीता श्रवणादिभिः ।
एषा कृष्ण रतिः स्थायीभावो भक्तिरसो भवेत् ॥ =२।१।५.६

अथ विभावाः

यथा साहित्यशास्त्रे रतेः कारणं कार्यं सहकारि च क्रमशः विभावः, अनुभवः, व्यभिचारिभाव इति कथ्यते तथैव भक्तिरसेऽपि ते तथैव स्वीकृताः सन्ति । इत्थं रतेः आस्वादनस्य यत् कारणं तद् विभावः प्रोच्यते ।

तत्र विभावयति वासनात्मना स्थितां रतिमास्वादाङ्कुरयोग्यतां नयतीति व्युत्पत्त्या विभाव आलम्बनत्वेनोद्दीपनत्वेन च द्विविधः । यद्वा विभावयन्ति = उद्बोधयन्ति प्रसुप्तं स्थायिनमिति विभावा आलम्वनानि उद्दीपनानि च वस्तुनि । अथवा विभाव्यते अनेन रत्यादिरिति विभावः, स च द्विप्रकारको भवति, आलम्वनविभाव उद्दीपनविभावश्च ।

तत्र यमुद्दिश्य यत्र वा रतिः प्रवर्तते स आलम्बनविभावः । तत्र हरेर्हरिभक्तानां वा भवति गणना । तथाचोक्तं भक्तिचन्द्रिकायां स्वामिवर्येण श्रीनारायेणतीर्थेन—

श्रीर्हरि हरिभक्ताश्च बुधैरालम्बना मताः ।
रत्यादेर्विषयत्वेन तथा ऽऽधारतयाऽपि च ॥ १।१।३

उज्ज्वलनीलमणी रूपगोस्वामिनापि—

अस्मिन्नाम्वनाः प्रोक्ताः कृष्णस्तस्य च वल्लभाः ।
हरेः साधरणगुणै रूपेतास्तस्य वल्लभाः ।

मधुराया रते लक्षणं तु यथा—

मिथो हरेः मृगाक्ष्याश्च संभोगस्यादिकारणम् ।
मधुरापरपर्याया प्रियताख्योदिता रतिः ।'

तत्र श्रीमद्भागवते विदुरं प्रति उद्धवोक्तौ श्रीहरिराम्बनविभावो यथा—

स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः ।
बलिं हरिद्भिश्चिरलोकपालैः किरीटकोट्येडितपादपीठः ॥ ३।२।१

यथा वा—धीरोदारदयाकरो निजरताकर्षी शरण्यो नवः
सर्वज्ञः प्रतिभान्वितो रसमयः शान्तो विनीतः प्रियः ।
ब्रह्मण्यो गतिदायकोऽगतिमतामात्मद्विषामीशिते-
त्याद्यानन्तगुणाः स्थिरा भगवतीत्यालम्बनः श्रीहरि. ॥ भ.च० १।१।६

किञ्च — अयं कम्बुग्रीवः कमलकमनीयाक्षिपटिमा
तमालश्यामाङ्गद्युतिरतिरां छत्रितशिराः ।
दरश्रीवत्साङ्कस्फुरदीरदराद्यङ्कितकरः
करोत्युच्चैर्मोदं मम मधुरमूर्तिर्मधुरिपुः ॥ भ. च. १।१।६

अपिच— कान्त्या कामविमोहकृत् कृतनयः काम्यप्रदः कीर्तिभृत्
केकावाक्करिकुञ्जकार्पितकरः कान्तः कृती कंसहृत् ॥
कैवल्यार्थकरः सतां कृतिमतां कल्याणमूर्तिः कभूः
कृष्णोऽयं करुणाकरोऽतिमधुरः कर्षन् मनः क्रीडति ॥भ.च.१।१।६

हरिभक्ता आलम्बना यथा—

भक्ता ईश्वरभावभावितहृदस्तेऽपि द्विधा साधकाः
सिद्धाश्चेति यथायथं हरिगुणान् स्वस्मिन्निधातुं क्षमाः ।
ते हि स्वान्तनितान्तभारितमुखाः स्वीयेष्वपि स्वैर्गुणै-
रासक्तिं परमेशितुर्जनयितुं शक्ताः सदालम्बनाः ॥

ते हि— प्रह्लादः मुखचिह्नं हरिमनुध्यायन् ध्रुवो मातृवाग्-
विद्धः सिद्धपदोऽम्बरीषनृपतिर्दुर्वाससोऽपीष्टकृत् ।
राजा श्रीहरिसंश्रयो हि भरतः श्रोता परीक्षिद्धरेः
कीर्तीनां जनकः स्वरूपरतयोः व्यासः शुकाद्या अपि ॥

यस्मिन् कृते रस उद्दीप्तो (पुष्टः) भवति स उद्दीपनविभावः । यथा—

भावोद्दीपनकारका निगदिता उद्दीपनास्ते हरे-
श्चेष्टाश्चारुगुणाः प्रसाधनमथो वंशीध्वनिः सुस्मितम् ।
वाणी चामृतदर्पहृत्तलसिकापत्राणि तद्वासराः
वृन्दारण्यमुखाः सुभूमय इमाः श्रीकृष्णपादाङ्किताः ।

अपि च—वृन्दारण्यभुवः कलिन्दतनया वंशीध्वनि र्ध्यायिना—
मव्याश्चर्यकरी धृता तुलसिका जन्मादिवारोत्सवाः ।
रासाद्यान्यनुचेष्टितानि करुणानन्दादयः सद्गुणाः
भावं मङ्क्षु विभावयन्ति भजतां प्रोक्ता विभावाह्वयाः ॥

तथाहि श्रीमद्भागवते वैकुण्ठे भगवद्दर्शनावसरे कुमाराणामवस्थावर्णने—
तस्यारविन्दनयनस्य पदारविन्द-
किञ्जल्कमिश्रतुलसी मकरन्दवायुः ।
अन्तर्गतः स्वविवरेण चकार तेषां
संक्षोभमक्षरधियामपि चित्ततन्वोः ॥३।१५।४३

यथा वा— ध्यानं बलात् परमहंसकुलस्य भिन्दन्
निन्दन् सुधा—मधुररिमाणमधीरधर्मा ।
कन्दर्पशासनधुरां मुहुरेव शंसन्
वंशीध्वनि र्जयनि कंसनिषूदनस्य ॥

अथानुभावाः

अनुपश्चात् स्थाय्युद्बोधनानन्तरं भावयन्ति स्थायिनमास्वादयन्तीति अनुभावाः, अथवा यैं रसः अनुभाव्यते = प्रकाश्यते तेऽनुभावाः यद्वा अनुभवनं रत्यादेः समनन्तरमेव-रसादिरूपतया भावनम्, आहोस्वित् अनु = पश्चाद् भवनं यस्य सोऽनुभावः । अतएव हरिभक्तिरसामृतसिन्धौ ते यथा—

अनुभावास्तु चित्तस्थभावाना भववोधकाः ।
ते वहि विक्रियाप्रायाः प्रोक्ता उद्भास्वरादयः ॥
तां चानुभावयन्त्यन्तस्तन्वन्त्यास्वादनिर्भराम् ।
इत्युक्ता अनुभावास्ते कटाक्षाद्याः ससात्त्विकाः ॥
भावानाभववोधिका विकृतयस्ताश्चानुभावाह्वयाः
गीतिक्रोशननृत्यभूविलुठितश्वासास्तनोर्मोटनम् ।
लालास्त्रावजनानवेक्षणमयो हिक्काट्टहासो भ्रमि-
हुंकारः परिजृम्भणदय इमे स्वान्तस्थितिव्यञ्जकाः ॥

यथा हि— राधा माधवभावनाविलुठितश्वासाधिका मूर्छिता
गीत - क्रोशन - नृत्य - हुङ्कृति - जनानीक्षाट्टहासभ्रमीः ।
लालास्त्रावमथो विमोटिततनु र्जुम्भां च हिक्कामसौ
धत्ते ध्यानपराथ मज्जति सुखे कस्मिंश्चिदेषा चिरम् ॥

अपिच— राधा स्वेदसमन्विताश्रुनयना रोमाञ्चकम्पान्विता
स्तब्धा ध्यायति योगिनीव कमपि श्रोतुं तथा वीक्षितुम् ।
अन्यं नोत्सहते गता क्वचिदहो श्यामेन दष्टाधरा
तद्दंशेन तनोः स्वकीयमनसः स्वास्थ्यं मुहुर्वाञ्छति ॥=भ. च. १।१।६।

अनुभावोऽपि स्वाभाविकत्वौपाधिकत्वाभ्यां द्विधा । तत्र पूर्वंमद्धाक्रान्ताः सात्त्विका उच्यन्ते । परमद्धाक्रान्ता अनुभावाः कथ्यन्ते । तथाहि—

ते स्तम्भस्वेदरोमाञ्चाः स्वरभङ्गोऽथवेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥
स्मितं गीतं कटाक्षं च भुजक्षेपश्च हुङ्कृतिः ।
तनुमोट्टनजृम्भादि श्चानुभावः प्रकीर्त्यते ॥

तत्र तात्त्विकीया यथा—

कुन्दैर्मुकुन्दाय मुदा सृजन्ती स्रजं वरां कुन्दविडम्बिवन्ती ।
वभूव गान्धर्वरसेन वेणी गान्धर्विका स्पन्दनशून्यगात्री ॥

अथ व्यभिचारिणः—विशेषेणआभिमुख्येन चरन्तीति व्यभिचारिणः । तदुक्तम्—

विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्ना कल्लोला इव वारिधौ ॥
ये तूपकर्तुमायान्ति स्थायिनं रसमुत्तमम् ।
उपकृत्य तु गच्छन्ति ते मता व्यभिचारिणः ॥

अयं भावः—यथा सागरलहर्यः सागर एवोद्भवन्ति विलीयन्ते च तथैव स्थायिभावे व्यभिचारिभावानां संकोचविकासौ भवतः । तथा च रत्यादीनां स्थायिभावानामभिव्यक्तिकारका विभावाः सुखमयकारका अनुभावाः परमसुखास्वादकारकाश्च व्यभिचारिणो भावा भवन्ति । व्यभिचारिभावस्यैव द्वितीयं नाम सञ्चारिभावोऽप्यस्ति । ते च त्रयस्त्रिंशत्संख्याकाः सन्ति । तथाहि—

रत्यादेर्हि विशेषतोऽभिमुखतां ये चारयन्ति स्मृताः
भावास्ते व्यभिचारिणो रतिभृतां निर्वेदगर्वौ मदः ।
दैन्यग्लानिविषादमोहमृतयः शङ्काः वितर्कः स्मृति-
र्व्रीडा जाड्यमसूयितौग्रमतयो हर्षो धृतिश्चोत्कता ॥
निद्राऽपस्मृतिचापले श्रम उतालास्यावहित्थायुता
चिन्तावेगरुजा भययुता उन्मादबोधाः कथाः ।
संख्याभिस्त्रिभिरन्विताभिरुदिता त्रिंशद्भिरित्थं रते-
र्व्यक्तिः सम्यगिमे यतो विदधते स्वान्तास्थितायाः अपि ॥

यथा— स्वातं चिन्तनवेगरोगकुपितं भीतिं दधाना तथा
सोन्मादा ननु वोधभाक् सुनयना भावैरपेता चिरम् ।
पूर्वोक्तैः मुँरलीरवामृतभरः पीताम्वरः सुन्दरः
कान्तिद्योतितमन्दिरः किमनया स्वान्ते धृतः श्यामलः

भगवत्सदाशिवद्वारा देवतानां स्वागतवर्णनप्रसङ्गे कालिदासेन कुमारसम्भवेऽपि महाकाव्येऽनेकेषां सञ्चारिभावानां समावेशः कृतोऽस्ति । यथा—

कम्पेन मूर्ध्नः शतपत्रयोनिं वाचा हरिं वृत्रहणं स्मितेन ।
आलोकमात्रेण सुरानशेषान् सम्भावयामास यथाप्रधानम् ॥

सञ्चारिभावेषु आवेशो यथा—

प्रेक्ष्य वृन्दावनात् पुत्रमायान्तं प्रस्नुतस्तनी ।
सङ्कुला पुलकैरासीदाकुला गोकुलेश्वरी ॥

औत्सुक्यं यथा—

प्राप्तं निशम्य नरलोचनपानपात्र ।
मौत्सुक्यविश्लथितकेशदुकूलवन्धाः ॥
सद्यो विसृज्य गृहकर्म पतींश्च तल्पे ।
द्रष्टुं ययु र्युवतयः स्म नरेन्द्रमार्गे ॥

अवहित्थं यथा—

सात्राजिती सदनसीमनि पारिजाते ।
नीते प्रणीतमनसा मधुसूदनेन ॥
द्राघीयसीमपि विदर्भभुवस्तदेर्ष्यां ।
सौशील्यतः किल न कोऽपि विदाम्वभूव ॥

मतिर्यथा—

व्यामोहाय चराचरस्य जगतस्ते ते पुराणागमा
स्तां तामेव हि देवतां परमिकां जल्पन्तु कल्पावधि ।
सिद्धान्ते पुनरेक एव भगवान् विष्णुः समस्तागम-
व्यापारेषु विवेचनव्यतिकरं नीतेषु निश्चीयते ॥

एवं भक्तिरससम्प्रदायिनां मतेन भक्तिरसे आलम्वनविभावो रतेराधारः स्वयं भगवान् श्रीकृष्णः, तद्भक्ताश्च, उद्दीपनविभावो भगवद्गुणालङ्करणतुलसीचन्दनादिः, अनुभावः स्वेदाश्रुरोमाञ्चकम्पजृम्भागीतनेत्रवक्त्रविक्रियादिः, व्यभिचारिणो भावाश्च द्वात्रिंशत् निर्वेदादयो ज्ञेयाः ।

तत्र विषयतासम्बन्धेन स्थायिविशिष्टमालम्बनम्, स्वोद्बोजनकतासम्बन्धेन स्थायिविशिष्टमुद्दीपनम्, स्थायिपोषकत्वे सति आलम्बनचेष्टारूपोऽनुभावः, आलम्बनावच्छेदेनाविर्भूष्णुः स्थायिपोषकरूपो व्यभिचारिभावः इति विवेचनीमम् । एभिः त्रिभिः भावैः समुदितैः रस आविर्भवति । तथाहि भक्तिरसयने मधुसूदनसरस्वतीपादाः—

अलौकिस्य रत्यादेः सामाजिकनिवासिनः ।
उद्बोधे कारणं ज्ञेयं त्रयमेतत् समुच्चितम् ॥

स्वेदो यथा दानकेलिकौमुद्यां राधिकामालेक्य मधुमङ्गलं प्रति भगवान् श्रीकृष्णः—

अभ्युक्ष्य निष्कं पतयालुना मुहुः
स्वेदेन निष्कम्पतया व्यवस्थिता ।
पञ्चालिका कुञ्चितलोचना कथं
पाञ्चालिकाधर्ममवाय राधिका ॥

यथा वा— गोपीकपोलसंश्लेषमवाप्य च हरेर्भुम्नौ ।
पुलकोद्गमशस्याय स्वेदाम्बुघनतां दधौ ॥

भावाद्यथा— वनस्तनितचक्रेण चकितेयं घनस्तनी ।
बभूव हरिमालिङ्ग्य निश्चलाङ्गी व्रजाङ्गना ॥

रोमाञ्चो यथा—

चुम्बन्तमालोक्य चमूरुचक्षुषां चमूरमूषां युगपन्मुरद्विषम् ।
व्योमाङ्गणे तत्र सुराङ्गनावली रोमाञ्चिता विस्तृतदृष्टिराबभौ ॥

रोषाद्यथा बिल्वमङ्गले—

राधापराधेन विनैव कस्मादस्मासु वाचः परुषा रुषा ते ।
अहो कथं ते कुचयोः प्रथन्ते हारानुकारा स्तरलाश्रुधाराः ॥

ज्ञातस्वपरसम्बन्धाद् अन्ये साधारणात्मना ।
अलौकिकं बोधयन्ति भावं भावास्त्रयोऽप्यमी ॥
भावत्रितयसंसृष्ट - स्थायिभावावगाहिनी ।
समूहालम्बनैका जायते सात्त्विकी मतिः ॥ =३।१०।१२

तथाच भगवद्गुणश्रवणदिना जनितद्रुतिरूपायां मनोवृत्तौ विभावादिसंयोगेन व्यक्तीभवद् भगवदाकरतारूपरत्याख्यः स्थायी भावः परमानन्दसाक्षात्कारात्मको रसरूपतया प्रादुर्भवति । तमेनं पुरुषार्थचतुष्टयभिन्नं भक्तिरसं स्वतन्त्रं परमं निरतिशयं पञ्चमं पुरुषार्थमामनन्ति भक्तिरसाचार्याः श्रीमधुसूदनसरस्वतीप्रभृतयो विद्वांसः ।

एवञ्च विविधकण्टकाकीर्णं संकीर्णं वर्त्म विहाय परिष्कृतेन घण्टापथेन संचरिष्णूणां रसविदां विपश्चितां मतेन "रसो वै सः, रसं लब्ध्वा ह्यानन्दी भवति" इति श्रुत्यनुसारं स्वरूपतटस्थलक्षणलक्षितो ब्रह्मपरमात्मादिपर्यायो भगवानेव रसः, तमेनमेव लब्ध्वा स्वल्पानन्दो जीवः प्रशस्तानन्दो भवतीति परमपुमर्थप्रापकतया भक्तिशास्त्रस्य दर्शनतापि संगच्छते ।

भक्तेः पञ्चमपुरुषार्थत्वसमर्थनम्

अनाद्यनेहःस्रोतसोह्यमानानां प्राणिनां प्रवृत्तेः प्रकृतेश्चानन्तत्वेऽपि मुख्यतया चत्वारो धर्मार्थकाममोक्षा एव परमपुरुषार्थाः शास्त्रेषु अभिमताः सन्ति । तत्रादृष्टोपायत्वेन धर्मस्य दृष्टोपायत्वेनार्थस्य, जन्यसुखफलत्वेन कामस्य, नित्यमुख्यफलत्वेन च मोक्षस्य चरितार्थ्येऽपि—

त्वत्कथामृतपाथोधिं विहरन्तो महामुदः ।
कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपमम् ॥
त्वत्साक्षात्कारणाह्लाद-विशुद्धाब्धिस्थितस्य मे ।
सुखानि गोष्पदायन्ते ब्रह्माण्डान्यपि जगद्गुरो !
न साधयति मां योगो न सांख्यं धर्म उद्धव ?
न स्वाध्यायस्तपो योगो यथा भक्तिर्ममोर्जिता ॥
तस्माद् भारत ! सर्वात्मा भगवान् हरिरीश्वरः ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयम् ॥

इत्यादीनां मुक्तेरप्यनभिलषणीयतामवगमयतां वचनानां भगवत्प्रेम-स्वरूप-फल-परत्वस्य न्याय्यत्वेन उक्तेषु चतुर्षु पुमर्थेषु अग्रहणाद् भक्तिः पञ्चमः पुरुषार्थः सिद्ध्यति । अत एव भक्तैर्भक्ति र्नितरां काम्यते ।

नच भगवत्प्रेम्णि मुक्तेर्नान्तरीयकतया तच्चतुष्टयत्वेनैवोपपत्तौ पुमर्थेषु पञ्चमपुरुषार्थ-सिद्धान्तोनतिप्रयोजक इति वाच्यम्, भगवत्प्रेमाणमुद्दिश्य साधने प्रवृत्तस्य पुरुषस्य तत्प्रेमत्वस्यैवोद्देश्यतावच्छेदकत्वं युक्तं, नत्वानुषङ्गिकमुक्तित्वस्यापि प्रधानेन व्यपदेशा भवन्तीति न्यायात् । तस्माद् भक्तेः पञ्चमपुरुषार्थतोक्तिः सुसमञ्जसैव । इत्थं सिद्धे भगवद्भक्तेः पञ्चमपुरुषार्थत्वे तदधिगमोपायकुक्षिप्रविष्टाः सर्वेऽपि कायिका वाचिका-मानसिका व्यापाराः भक्तिसाधनव्यवहार्या इत्यत्रास्ति न कापि संशीतिः ।

नित्यकर्मानुष्ठानाद् विशुद्धेऽन्तःकरणे वैराग्योपोद्बलिते चेतसि अद्रुतचितानां तत्त्वज्ञानोदयाद् मोक्षाधिगमः यद्वा श्रवणकीर्तनादिना द्रुते चेतसि श्रद्धादिक्रमेण भवति भगवति प्रेमोदयः, इत्यधिकारिभेदाद् व्यवस्था निर्धारिता भक्तिशास्त्रे तज्ज्ञै-र्विपश्चिद्भिः ।

एवं चाद्रुतचित्तानामद्वैतसिद्धौ मार्गं प्रदर्श्य द्रुतचित्तानामेतत्प्रदिदर्शयिषुः विपश्चिदग्रेसरो मधुसूदनसरस्वतीयतिः भक्तिरसायने सपरिकरं सोपपत्तिकं च भक्तिरसं व्यवातिष्ठिपत् ।

रससम्बन्धिनः प्रश्नाः

इह तावत् रससंबद्धाः संक्षेपतश्चत्वारः प्रश्नाः समुपतिष्ठन्ते—(१) रसः किं प्रमाणकः (२) किं प्रयोजनकः (३) किं स्वरूपः (४) कथञ्चोपलब्धव्यः ? अत एव भक्तिरसायने श्रीमता मधुसूदनसरस्वतीयतिवर्येणाशङ्कितम्—

ननु कोऽयं रसो नाम किं निष्ठो वा भवेदसौ ।
अस्य प्रत्यायकः को वा प्रतीतिरपि कीदृशी ॥ ३।१॥

(१) तत्र "मानाधीना मेयसिद्धिः मानसिद्धिश्च लक्षणात्, इत्युभियुक्तोक्तदिशा प्रकृताचार्याणामेव प्रमाणानामु पगन्तव्यतायां रसाचार्यैरपि त्रयः प्रत्यक्षानुमानागमा एव प्रमाणत्वेन उपेयन्ते । पारमार्थिकस्वरूपप्रदर्शनपरायणानां महर्षिशण्डिल्यनारदादीनां सूत्राक्षरतो वा लब्धमुक्तप्रमाणत्रं विध्यमेवेहाप्यनुमोद्यते । अत एतत् त्रिकेनैव रसः प्रमातव्यः । तस्माद्भक्तिशास्त्रेऽपि सन्ति त्रीण्येवैतानि मान्यानि प्रमाणानि ।

तत्र प्रत्यक्षं तावत् नाट्यदर्शिनां सहृदयहृदयानामनुभविकमेवेति नेह किमपि विवक्षणीयम् । अनुमानमपि पक्षीकृतात्मनि 'आत्मनस्तु कामाय सर्वं प्रियम्' इत्यादिभिः श्रुतिभिः प्रमापितेन निरतिशयप्रेमास्पदत्वेन हेतुना आनन्दात्मकत्वसाधकतया स्वाभ्युपगतमेव । निरतिशयानन्दस्य रसात्मकतया आत्मनश्च रसाभिन्नतया तदात्मकताया औत्सर्गिकत्वात् । आगमस्तु 'रसो वै सः' इत्यादिरपि उपक्रमोपसंहारादिभिः निर्णीततत्पर ताको नैव तिरोहित इति प्रमाणसिद्धे रसतत्त्वे न काचिद् विमतिः । (२) प्रयोजनं द्विविधं गौणं मुख्यं च । तत्र फालान्तरेच्छाधीनेच्छाविषयत्वं गौणत्वं तदनधीनेच्छास्पदत्वं च मुख्यत्वम् । तच्च सुखे एव विश्राम्यति सर्वानुभवसिद्धत्वात् । लोके सुखत्वेन व्यवह्रियमाणं न वास्तविकं सुखं विनाशित्वेन दुःखाधायकत्वात् । अतः 'आनन्दो ब्राह्मणो विद्वान्' 'तस्यैवानन्दस्य मात्रामन्ये उपजीवन्ति' इत्यादिभिः श्रुतिभिरवगमितं सुखमेव मुख्यं लक्ष्यभूतम् । ततश्च निरतिशयानन्दसाक्षात्कार एव प्रयोजनत्वेनावधार्यते । (३) रसस्वरूपजिज्ञासायां तावदात्मैव रस इति रसदर्शिनां सिद्धान्तः । 'रसो वै सः, रसं लब्ध्वा ह्यानन्दी भवति, आनन्दं ब्रह्मणो विद्वान्, एष एवानन्दयति, आनन्दाद्धयेवेमानि, इत्यादिश्रुतिवचनानि स्वरूपतटस्थलक्षणाभ्यां रसरूपमात्मानमेव लक्षयन्ति । आत्मा चात्र यद्यपि ब्रह्म-परमात्मेत्यादिपर्यायो भगवानेव तथापि प्रतिविम्बितया परिच्छिन्नतया च 'अग्नेः स्फुलिङ्गो ममैवांशः, अंशो नानाव्यपदेशात्, इत्यादिभिः श्रुतिभिश्च व्यवस्थापितो

जीवोऽपि तत्त्वदृशां सच्चिदानन्दात्मा स्वीकृतः । एवं च जीवोऽपि रसपदवाच्यतामर्हतीत्यत्र न कश्चित् सन्देहलेशः ।

रससमुद्रस्य विन्दू रसान्यो भवितुनार्हतीत्यभिप्रेत्य रसशास्त्राचार्यैः प्राकृताप्राकृतभेदाद्रसस्य द्वैविध्यं प्रोक्तम् । तत्र प्राकृतो रसो नाट्यशास्त्रीयो लौकिकः । अप्राकृतस्तु भक्तिरसोऽलौकिक इति । भरतमुनिना हि विविधवासनावासितहृदयानां सुकुमारमतीनां विनेयानामुन्मुखीकरणाय दिग्दर्शनविधया प्राकृतरसनिरूपणव्याजेनैवेतत्सर्वं प्रदर्शितम् । वास्तविकतयोद्देश्यभूतोऽप्राकृतरसस्तु श्रीभगवदालम्वनात्मक एव तस्यैव सर्वशेषित्वेन चरमप्राप्यतया परमपुरुषार्थत्वेन चोपनिषत्स्मृतिपुराणादिषु व्यवस्थापितत्वेन निसर्गतया सकलशास्त्राणां साक्षात्परम्परया वा तत्रैव पर्यवसानात् । एवमलौकिके तस्मिन् अलौकिकतासम्पादनाय नाट्यादिषु तादृशानन्दानुभवानुगुणसाधारणीकरणोररीकरणमुपपद्यते । परत्रोपयोगित्वेनाप्रयोजकत्वात् प्रकारभेदोनोन्नयनाय भक्तिरसाचार्यैरेव भक्तिरसनाम्ना व्यपदिश्यते । सिद्धन्तेनैतेन ज्ञानकाण्डेन रसकाण्डस्य गतार्थतया काण्डान्यराम्भचर्चा मुधैवेति वदन्तो निरस्ताः । प्रयोजनपार्थक्यं हि प्रस्थानपार्थक्यं प्रयोजयति, तच्चैहिकमामुष्मिकमुत्कृष्टमपकृष्टं वेत्यन्यदेतत् । इत्थं चैष रसः प्राकृतालम्वनतया प्राकृत इति व्यवह्रियते' अप्राकृतालम्वनकोऽप्राकृतः कथ्यते इति शास्त्रविदां मर्यादा व्यवहारसंरक्षणार्थयादणीयैव । द्वैविध्यञ्चैतदाचार्यभरतमुनिनापि बहुशो ध्वनितम् । तमेवाग्नेयादिपुराणेषु स्पष्टमुक्तम् । (४) रसोपलब्धिप्रकारस्तु—विभावानुभावसञ्चारिभिर्भावैः स्थायी भाव एव रसतां भजते इत्युक्तप्रायमेव । तस्माद्भक्तिरसस्य रसत्वे पुरुषार्थत्वे च न भवितुमर्हति काऽपि विप्रतिपत्तिः ।

भक्तिरसायनानुसारं

विभावानुभावव्यभिचारिभावानां संयोगेन रत्याख्यः स्थायीभावः रसरूपेण परिणमते । विभाव्यन्ते = आस्वादाङ्कुर प्रादुर्भावयोग्याः क्रियन्ते इति विभावाः । एतद् व्युत्पत्यनुसारं । ये विभावात्यादिभावान् आस्वादयोग्यान् कुर्वते, ते सन्ति द्विविधा आलम्बनबिभावा उद्दीपनविभावाश्च । आलम्बनविभावा ते उच्यन्ते येषामाश्रयं गृहीत्वा रसस्य निष्पत्तिर्भवति । उद्दीपनविभावाश्च ते भवन्ति, ये रसमुद्दीपन्ति । भक्तिरसे भगवानस्ति आलम्बनविभावः तमेवाश्रयं मत्वा रसस्य भवति निष्पत्तिः । तुलसी चन्दनादयोऽस्य सन्ति उद्दीपनबिभावाः, यतोहि एभिः पदार्थैः भगवदर्चनायां भक्तिभावा उद्दीप्ता भवन्ति । आलम्बनोद्दीपनाविभावानन्तरं भक्तानां या चेष्टाः-नेत्र विकारादयः भवन्ति, ते सन्ति भक्तेरनुभावाः । ये स्थिरतया विद्यमानरत्यादिस्थायिभावे आविर्भवन्ति तिरोभवन्ति च, ते सन्ति व्यभिचारिभावाः । यथा-निर्वेदश्रमालिस्यादयः । तथाहि भक्तिरसायनस्य प्रथमे उल्लासे श्रीमन्तो मधुसूदन-

सरस्वतीपादाः साधनभक्तिनिष्ठया निखिलमपि विषयनिष्ठं प्रेमाणं भगवत्येव प्रतिष्ठापयन्ति सकलविदायविमुखमनसो महाभागस्य मनोवृत्ती सर्वसाधनगल भूतायां गृहीतथगवदाकारायां विभावानुभावव्यभिचारिभावसंयोगेन रसरूपतयाऽभिव्यक्तो भगवदाकारतारूपो रत्याख्यः स्थायीभावः परमानन्दसाक्षात्मकः प्रादुर्भति । स एव भक्तियोग इति तं परमं = निरतिशयं पुरुषार्थं वदन्ति रसज्ञाः ।

प्रोक्तेन भक्तियोगेन भजतो मामसकृन्मुने !
कामा हृदय्या नश्यन्ति सर्वे मयि हृदि स्थिते ॥
श्री० भा० ११।२०।२९

तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः ।
न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिति ॥
यत् कर्मभि र्यत् तपसा ज्ञानवैराग्यतश्च यत् ।
योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥
सर्वं मद्भक्तियेगेन मद्भक्तो लभतेऽञ्जसा ।
स्वर्गापवर्गं यद्धाम कथञ्चिद् यदि वाञ्छति ॥

तथाहि दुःखासंभिन्नं सुखं हि परमः पुरुषार्थ इति सर्भतन्त्रसिद्धान्तः । एतेन भक्तिर्न पुरुषार्थो धमर्थिकाममाक्षेष्वनन्तर्भावादित्यादिकं सर्वमपास्तम् । धर्मार्थकामानां स्वतः पुरुषार्थत्वाभावात् तजन्य सुखस्यैव पुरुषार्थत्वे गौवरादनुनानाच्च । धर्मजन्यत्वादि विशेषणं परित्यज्य सुखमात्रं पुरुषार्थं इति स्थिते समाधिसुखस्येव भक्तिसुखस्यापि स्वतन्त्रपुरुषार्थत्वात् । तस्मात् पुरुषार्थचतुष्टयान्तर्गतत्वेन वा स्वातन्त्रेण वा भक्तियोगः पुरुषार्थः परमानन्दरूपत्वादिति निर्विवादम् ।

ननुभक्तियोगस्य साधनत्वमेव न साध्यत्वम् । तथाहि
वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानं च तदहैतुकम् ॥ = १ २।७

भक्त्या मामभिजानाति यावन् यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ - गीता १८।१५

अत्रोच्यते फलसाधनभेदेन भक्ते द्वैविध्यत्वे दोषाभावात् । तथाहि भजनमन्तःकरणस्य भगवदाकारतारूपम्, भजनं भक्तिरितिवाभावव्युत्पत्या भक्तिपदेन फलमभिधीयते तस्य निरतिशयपुमर्थत्वात् । तथा भज्यते = सेव्यते भगवदाकारमन्तःकरणं क्रियतेऽननेति करणव्युत्पत्त्या भक्तिशब्देन श्रवणकीर्तनादि साधनमभिधीयते, तस्य च स्वयं पुरुषार्थत्वाभावात् । ततश्च स्पष्टीकृतं प्रवुद्धेन मुनिना श्रीमद्भागवतस्यैकादशाध्याये—

स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् ।

भक्त्या संजातया भक्त्या विभ्रत्युत्पुलकां तनुम् ॥ = ११।३।३१

अत्र प्रथमभक्तिपदं करणव्युत्पत्त्या भागवतधर्मेषु प्रयुक्तं तथा द्वितीयं भावव्युत्पत्त्या फले प्रतिपादितम्—

इति भागवतान् धर्मान् शिक्षन् भक्त्या तदुत्थया ।

नारायणपरो मायामञ्जस्तरति दुस्तराम् ॥ = ११।३।३३

तस्मात् साधनरूपा च भक्तिः युक्तितः संसिध्यति । अतः साधनफलभेदेन भक्तिद्वैविध्योपपत्तौ न काचिदस्ति संगीतिः । अतएव जीवनमुक्तानामपि महात्मनां भक्तिरावश्यिका प्रतिपादिता सूतेन श्रीमद्भागवते—

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।

कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतभूतगुणो हरिः ॥ = १।७।१०

अतो भक्तियोगस्यात्याश्यकत्वात् तत्प्रतिपादकग्रन्थानामपि सार्थक्यं प्रतिपादितम्-

संसाररोगेण वलीयसा चिरं

निपीडितैस्तत्प्रशमेऽतिशिक्षितम् ।

इदं भवद्भिर्बहुधा व्ययातिगं

निपीयतां भक्तिरसायनं बुधाः ॥

यदा गङ्गायाः प्रवाहः अखण्डरूपेण समुद्राभिमुखं प्रवहति तथैव भगवद्गुणश्रवणमात्रेण मानसी वृत्तिः अविच्छिन्नरूपेण सर्वान्तर्यामिनि भगवति यत् प्रवर्तते तदेव निर्गुणस्य भक्तियोगस्य लक्षणमुक्तमस्ति श्रीमद्भागवतस्य तृतीये स्कन्धे कपिलदेवहूतिसंवादे—

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ।

मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ॥

लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ।

अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥

यथा विम्बं = मुखमेव उपाधौ = दर्पणादौ प्रतीतं सत् प्रतिबिम्बमुच्यते तथैव परमानन्दस्वरूपो भगवान् बिम्बस्वरूपः उपाधौ = मनसि प्रतिबिम्बितः स्थायिभावमवाप्य रसत्वमापद्यते । अतः भक्तिरसस्य परमानन्दता निर्विवादाऽस्ति । तथा चोक्तं मधुसूदनसरस्वतीपादैः—

भगवान् परमानन्दस्वरूपः स्वयमेव हि ।
मनोगतस्तदाकारो रसतामेति पुष्कलम् ॥

ननु आलम्बनविभावस्य भगवतो स्थायिभावत्वस्वीकारे उभयोः = आलम्बन स्थायिभावयोरैक्यापत्तिरितिचेन्न–अत्रोच्यते यथा वेदान्तिनो हि जीवेश्वरयोः बिम्ब-प्रतिबिम्बभावं मन्यन्ते तथैव बिम्बप्रतिबिम्बयोरन्तरव्यवहारस्वीकारेणादोषः । तथा चालम्बनविभावो बिम्वं स्थायी भावश्च तस्य प्रतिबिम्बमित्युमयोरैक्याभावः ।

परमानन्दस्वरूपस्य भगवदाकारस्य स्थायिभावस्य भक्तिरससिद्धत्वेऽपि कान्तादि-विषयकश्रृङ्गारादिषु रसेषु स्थायीभाव भगवदाकरो नोपपद्यते तर्हि तत्र कथं परमा-नन्दतेति चेन्न—

आनन्दाद्धयेव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्द-प्रयन्त्यभिसंविशन्तीत्यादिश्रुत्या हि परमानन्दरूपं परं ब्रह्म जगदुपादानमिति प्रतिपादितम् । जन्माद्यस्य यतः' इति न्यायेन तथैव निर्णीतम् । उपादानाभिन्नञ्च सर्वं कार्यं मृदभिन्नघटवत् सर्वत्र दृष्टम् । 'सर्वङ्खल्विदं ब्रह्म' (छा० उ० ३।१५) इदं सर्वं यदयमात्मा (ब्र० सू० १।१।२) सदेव सोम्येदमग्र आसीत् (छा० उ० ६।२) इत्यादिच्छान्दोग्यादिश्रुतिभिश्च तथैव प्रतिपादितम् । तदनन्यत्वमारम्भणशब्दा-दिभ्य इति न्यायेन च निर्णीतम् । तस्माद् भगवद्भक्तैः भक्तिरस एव लौकिकरसानुपेक्ष्य परमार्थोपयोगित्वात् परमेण प्रेम्णा पेयः संसेवनीयश्च ।

सांख्यदर्शनानुसारं त्रिगुणात्मिकायाः प्रकृतेः जगतः कारणत्वं श्रूयते । सर्वे भावास्सुखदुःखमोहात्मकैकसामान्यप्रकृत्तिकाः, सुखदुःखमोहात्मकत्वेन प्रतीयमान-त्वात् । ये यदात्मकत्वेन प्रतीयन्ते, ते तदात्मकसामान्यप्रकृतिकाः । यथा मृदात्म-कतया प्रतीयमाना मृत्सामान्यप्रकृतिका घटशरावादयः । अनुगतकारणातिरिक्त-सामान्यानभ्युपममान्न घटत्वादिना व्यभिचारः । सुखदुःखमोहात्मकत्वेन चैते प्रतीयन्ते । तस्मात्तत्सामान्यप्रकृत्तिका इत्यनुमानेन सुखदुःख मोहात्मकप्रकृतिसिद्धिः । तत्र यत् सुखं तत् सत्त्वम्, यद्दुःखं तद्रजः, यो हि मोहो विषादः स एव तम इति तस्यास्त्रिगुणात्मकत्वसिद्धिः ।

भर्त्तारं प्रति हि कामिन्यास्सत्त्वांश एवोद्रिच्यते । सपत्नीं प्रति तु रजोंऽश उदेति । तां कामयमानमन्यञ्च तामविन्दन्तं प्रति तमोंऽश एव । अतः क्रमेण तेषु सुखदुःख विषादाः प्रादुर्भवन्त्यतो व्यवस्थोपपत्तिः । वासना भेदेनैकस्मिन्नपि भावभेदो भट्टाचार्यैरप्युक्तः—

परिव्राट्कामुकशुनामेकस्यां प्रमदातनौ ।
कुणपः कामिनी भक्ष्यमिति तिस्रो विकल्पनाः ॥

अर्थात् सन्यासी तां प्रमदां शवं मत्वा उपेक्षते, कमी तामुपभोगसाधनं मत्वा स्पृहयते, कुक्कुरश्च तां भोजनसामग्रीं मत्वोपभोक्तुमिच्छति । अतः सर्वे भावाः त्रिगुणात्मका एव । तथा चोक्तं भक्तिरसायने श्रीमन्मधुसूदनसरस्वतीपादैः—

तमोरजसत्त्वगुणा मोहदुःखसुखात्मकाः ।
तन्मयी प्रकृतिर्हेतुः सर्वङ्कार्यञ्च तन्मयम् ॥ १५ ॥
त्रिगुणात्मकमेकैकं वस्तु त्र्याकारमीक्ष्यते ।
निजमानससङ्कल्पभेदेन पुरुषैस्त्रिभिः ॥ १६ ॥
कामिन्यास्सुखता भर्त्रा, सपत्न्या दुःखरूपता ।
तदलाभात्तथाऽन्येन मोहत्वमनुभूयते ॥ १७ ॥
एवं सति सुखाकारः प्रविष्टो मानसे यदा ।
तदा स स्थयिभावत्वं प्रतिपद्य रसो भवेत् ॥ १८ ॥

द्रवीभावस्य सत्त्वधर्मत्वात्तं विना स्थायिभावासंभवात् सत्त्वगुणस्य सुखमयत्वात् सर्वेषां भावानां सुखमयेऽपि रजस्तमोंऽशमिश्रणात् तारतम्यमवगन्तव्यम् । अतो न सर्वेषु भावेषु तुल्यसुखानुभवः ।

भगवद्विषये चित्तकठिनस्य निन्दा श्रूयते श्रीमद्भागवते—यथा तत् हृदयमश्मना-तुल्यं वर्तते यद् भववन्नामकीर्तनं न कुर्यात्, नेत्रयोरश्रुर्न प्रवहेत्, रोमसु च हर्षो न स्यात्—तदुक्तंश्रीमद्भागवते—

तदश्मसारं हृदयं वतेदं यद् गृह्यमाणैर्हरिनामधेयैः ।
न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥ =२।३।१४

अपि च भक्त्या बिना आशयः कथं शुद्धेत, भक्तिश्च द्रवता चेतसा विना कथं स्यात्, रोमहर्षं बिना चित्तं कथं द्रवितं स्यात्, आनन्दाश्रुकलया विना हृदयं न शुद्धेत् । तथाहि—

कथं विना रोमहर्षं द्रवता चेतसा बिना ।
विनाऽऽनन्दाश्रुकलया शुध्येद्भक्तया विनाऽऽशयः ॥ = ११।१४।२३

यतो द्रवत्वाभावे चित्तं न वास्यते; अतः बुधाः = पण्डिताः = कामक्रोधाद्यनास्पदीभूतपाषाणादिज्ञानमुपेक्षाज्ञानं संस्काराजनकमाहुः । अत एवोक्तवान् न्यायकार्तिककारः 'यन्नसुखसाधनं तदेवोपक्षणीयमिति'। सुखसाधने रागसंस्कारोहतुः दुःखसाधने द्वेषस्तथा । तदुभयाभावे तु चित्ते द्रवत्वाभावान्न जायते संस्कार इत्यर्थः । एतावानेव सर्वेषां शास्त्रकारणां रहस्यभूतोऽर्थः यद्विषयाकरता निराकरणपूर्वकं चित्तस्य भगवदाकारतासम्पादनं सर्वेषा शास्त्राकराणामत्रैव व्यापारभेदेन पर्यवसानम् ।

ननु यथा जलस्य शीतलत्वं वह्नेरुष्णत्वं वायोश्च संचरित्वं स्वाभाविको धर्मः तथैवानादिकालाद् द्रवीभूतचित्ते प्रविष्टैः प्रियाप्रियैः विषयै र्व्याप्तस्य चित्तस्य स्वाभाविको धर्मः कथं निर्वर्त्स्यति, यतः सति धर्मिणि स्वाभाविकोपमर्दासंभवः इति चेदत्रोच्यते

काठिन्यं विषये कुर्याद् द्रवत्वं भगवत्पदे ।
उपायैः शास्त्रनिर्दिष्टैरनुक्षणमतो बुधः ॥ ३२ ॥

अर्थात् विषयाकरता हि न चित्तस्य स्वाभाविको धर्मः, तस्या आगन्तुकहेतुजन्यत्वात् । तथाहि जाग्रवस्थायामिन्द्रियसन्निकर्षात् स्थूलविषयाणां ग्रहणं जायते । अतः स्थूलविषयाकारता भवति । स्वप्ने स्थूलविषयैरिन्द्रियसनिकर्षो न भवति, केवलं मनोगता एव भावनाऽवशिष्टा वर्तते । अतः सूक्ष्मविषयाकारता भवति, किन्तु सुपुप्तौ तयोरभावाश्चित्तं निर्विषयं भवति । न तत्र कथमपि विषयाकरता भवति । एतच्च भगवता सूत्रकारेण बादरायणेन प्रदर्शितमस्ति—

तदाऽपीतेः संसारव्यपदेशात् (४।२।८)

चित्ते स्वाकारसमर्थका ये विषयास्ते भगवद्व्यतिरिक्ता न भवन्ति भगवत्यध्यस्तत्वात् । भगवत एव सद्रूपतया 'घटः सन्, पटः सन्' इत्यादि सदाकारेणैव सर्वविषयाणां स्फुरणात् । 'सर्वं खल्विदं ब्रह्म तज्जलान् (छा० उ० १४।१) इति श्रुत्या भगवेदकोद्भवत्वेन भगवदेकस्थितत्वेन भगवदेकलयत्वेन च मृद्घटवभेदवोधनात्, स्वप्नादिप्रपञ्चवद् बाधत्वाच्च । अतएव भगवदाकारस्फूर्त्या ते सर्वे निवर्त्तमानाः तद्रूपा एव भवन्ति । अधिष्ठानज्ञाननिवर्त्यतत्वादध्यस्तानाम् । एवञ्च सति विषयनिष्ठः सर्वोऽपि प्रेमा भगवत्येवार्पितो भवति तद्व्यतिरिक्तस्यास्फुरणाद् । एतादृशी चावस्था भक्तराजेन प्रह्लादेन प्रार्थिता विष्णुपुराणे—

या प्रीतिरविवेकानां विपयेष्वनपायिनी ।
त्वामनुस्मरतस्सा मे हृदयान्मापसर्पतु ॥ = १।२०।१९ ॥

तस्मादेतादृशयुक्त्यनुसन्धानेन सर्वाधिष्ठानं सन्मात्रं परिपूर्णं सच्चिदानन्दघनं भगवन्तमद्वयमात्मानं निश्चिन्वतः स्वाप्निकविषयेष्विव जाग्रद्विषयेष्वपि तुच्छत्वानुसन्धानेन महद्वैराग्यमुपजायते वशीकाराख्यम् । तथाहि सूत्रितवान् भगवान् पतञ्जलिः-

दृष्टानुश्रविकविषयवितृष्णस्य स्ववशीकारसंज्ञा वैराग्यम् ।

इत्थं भागवतान् धर्मान् शिक्षन् भगवदाराधनायां तत्परो भक्तः आराधनाजन्यया भक्त्याऽनायासेन दुस्तरां मायां संतरति । तदुक्तं श्रीमद्भागवते प्रबुद्धेन —

इति भागवतान् धर्मान् शिक्षन् भक्त्या तदुत्थया
नारायणपरो मायामञ्जस्तरति दुस्तराम् ॥ = ११।३।३३॥

यथामृतसमुद्रे निमज्जमानस्य पुंसः खातजलैः किमपि प्रयोजनं न भवति तथैव निःश्रेयसात्मनि भगवति श्रीकृष्णे यस्य दृढा भक्तिः, तस्य क्षुद्रैः विषयैः किमस्ति प्रयोजनम् ?, तदर्थं किमपि प्रयोजनम् नास्तीत्यर्थः—

यस्य भक्तिर्भगवति हरौ निःश्रेयसेश्वरे ।
विक्रीडितोऽमृताम्भोधौ किं क्षुद्रैः खातकोदकैः ॥ = ६।१२।२२

यतो ज्ञानं विना वैराग्यं न संभवति, वैराग्यमन्तरा च भगवत्प्रेम परां काष्ठां नधिगच्छति । अत उत्कृष्टज्ञानाय ज्ञानवैराग्ययोर्दृढीकरणे प्रयासो विधेयः—

असेवयाऽयं प्रकृतेर्गुणानां ज्ञानेन वैराग्यविजृम्भितेन ।
योगेन मय्यर्पितया च भक्त्या मां प्रत्यगात्मनमिहावरुन्धे ॥ = ३।२५।२७

अतो योगिराजा आत्मकल्याणाय ज्ञानवैराग्ययुक्तेन भक्तियोगेन भगवच्चरणकमलाराधनमत्यावश्यकं मन्यन्ते, यत्र न किमपि भयं विद्यते—

ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः ।
क्षेमाय पादमूलं मे प्रविशन्त्यकुतो भयम् ॥ = ३।२५।४३

भगवच्चरणकमलेषु भक्तेरभ्यासं कुर्वतः तस्य भक्तस्य भगवति प्रेम भवति, संसारतो भगवत्स्वरूपस्य यथार्थं च ज्ञानमुपजायते, ततः स परमां शान्तिमुपगच्छति—

इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या
भक्ति विरक्तिर्भगवत्प्रबोधः ।
भवन्ति वै भागवतस्य राजन् !
ततः परां शान्तिमुपैति साक्षात् ॥ = ११।२।४३

एवंभागवतधर्मानुष्ठाद् भक्तप्रवरस्य प्रथमं भगवत्प्रबोधः, ततः वैराग्यम्, तदनन्तरं प्रेम लक्षणा भक्तिर्भवति । एतदेव स्पष्टयता भगवता उद्धवं प्रति प्रोक्तं यद् ज्ञानविज्ञानसम्पन्नो नर एव मम श्रेष्ठं पदं जानाति । अतो मम ज्ञानी भक्तोऽत्यन्तं प्रियः ज्ञानद्वारैव स मां धारयति—

ज्ञानविज्ञानसम्पन्ना पदं श्रेष्ठं विदुर्मम ।
ज्ञानी प्रियतमोऽतो मे ज्ञानेनासौ विभर्ति माम् ॥ = ११।१९।२

श्रीमद्भगवद्गीतायामपि चतुर्विधेषु भक्तेषु ज्ञानिनो भक्तस्याभ्यर्हितत्वं स्पष्टं प्रोक्तं भगवता श्रीकृष्णेन—

तेषां ज्ञानी नित्ययुक्तः एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥ = ७।१७

तस्माद् भगवद्व्यतिरिक्तं सर्वं नश्वरं स्वप्नमायिकं तुच्छं दुःखरूपं चेत्यतो भगवनेव सत्यस्वरूपप्रकाशमानपरमानन्दरूपो नित्यो विभुश्चेत्यवश्यमुपादेयो ध्येयो ज्ञेयश्च । एवं भागवतधर्माननुतिष्ठन् भगवदाराधनायां तत्परो भक्तः नूनं भगवत्पदं लब्धा परमानन्दमश्नुते ।

श्रीमद्भागवतस्य प्रथमे स्कन्धे देवर्षिणा नारदेन भगवत्प्राप्तौ ये उपाया वर्णिताः संक्षेपतः, त एव भगवन्मधुसूदनसरस्वतीपादैः भूमिकाभेदक्रमेण कथिताः भक्तिरसायनस्य प्रथमे उल्लासे । यथा प्रथमं (१) महतः सेवा (२) ततस्तस्य दयापात्रता (३) तदनन्तरं तेषां धर्मेषु श्रद्धा (४) तदनु भगवद्गुणश्रवणम् (५) तत्पश्चाद् भगवद्भक्तौ रत्यङ्कुरोत्पत्तिः (६) ततः स्वरूपाधिगतिः (७) ततः परमानन्दरूपे भगवति प्रेम बृद्धिः (८) ततः भगवद्दर्शनम् (९) पुनर्भागवतधर्मेणु निष्ठा (१०) स्वस्मिन् तद्गुणशालिता (११) तदनन्तरं च प्रेम्णः पराकाष्ठा जायते—

उपायाः प्रथमस्कन्धे नारदेनोपवर्णिताः ।
सङ्क्षेपात्तानहं वक्ष्ये भूमिभेदविभागतः ॥ ३३
प्रथमं महतां सेवा, तद्दयापात्रता ततः ।
श्रद्धाऽथ तेषां धर्मेषु, ततो हरिगुणश्रुतिः ॥ ३४
ततो रत्यङ्कुरोत्पत्तिः, स्वरूपाधिगतिस्ततः ।
प्रेमवृद्धिः परानन्दे तस्याथ स्फुरणं ततः ॥ ३५

(१) महतः सेवा यथा—

महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां सङ्गिसङ्गम् ।
महान्तस्ते समचित्ताः प्रशान्ता विमन्यवस्सुहृदस्साधवो ये ॥ = ५।५।२

(२) तद्दयापात्रता यथा—

अप्रमत्तो गभीरात्मा धृतिमाज्जितषड्गुणः ।
अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः ॥ = ११।११।२९

(३) तेषां धर्मेषु श्रद्धा—

यदनुध्याऽसिना युक्ताः कर्म ग्रन्थिनिबन्धनम् ।
छिन्दन्ति कोविदास्तस्य को न कुर्यात् कथारतिम् ॥१।२।१५

(४) हरिगुणश्रुतिर्यथा

इत्थं परस्य निजधर्मरिरक्षयात्त-
लीलातनोस्तदनुरूपविडम्बनानि ।
कर्माणि कर्मकषणानि यदूत्तमस्य
श्रूयादमुष्य पदयोरनुवृत्तिमिच्छन् ॥ = १०।९।४

(५) भगवद्भक्तौ रत्यङ्कुरोतिर्यथा—

सतांप्रसङ्गान्मम वीर्यसंविदो
भवन्ति हृत्कर्णरसायनाः कथाः ।
तज्जोषणादाश्वपवर्गवर्त्मनि
श्रद्धा रतिर्भक्तिरनुक्रमिष्यति ॥ = ३।२५।२५

(६) स्वरूपाधिगतिर्यथा

ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनम्
यदाहुर्वर्णये तत्ते हृदयग्रन्थिभेदनम् ।
अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः
प्रत्यग्धामा स्वयञ्ज्योतिर्विश्वं येन समन्वितम् ॥

(७) भगवत्प्रेमवृद्धिर्यथा —

निशम्य कर्माणि गुणानतुल्यान्
वीर्याणि लीलातनुभिः कृतानि ।
यदाऽतिहर्षोत्पुलकाश्रुगद्गदं
प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥ = ३।२६।२
न्यस्तक्रीडनको वालो जडवत्तन्मनस्तया ।
कृष्णग्रहग्रहीतात्मा न वेद जगदीश्वम् ॥ = ७।७।३४

(८) भगवद्दर्शनं यथा—

तैर्दर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तैः ।
हृतात्मनोहृतप्राणांश्च भक्तिरनिच्छतो मे गतिमण्वीं प्रयुङ्क्ते ॥ = ३।२५।३६

(९) भगवद्धर्मनिष्ठा यथा—

वयन्त्विह महायोगिन् । भ्रमन्तः कर्मवर्त्मसु ।
त्वद्वार्तया तरिष्यामस्तावकैर्दुस्तरं तमः ॥ = ११।६।४८

(१०) तद्गुणशालिता यथा—

अथो विभूतिं मम मायया चितामैश्वर्यमष्टाङ्गमनुप्रवृत्तम् ।
श्रियं भागवतीं वा स्पृहयन्ति भद्रां परस्य मे तेऽश्नुवते तु लोके ॥=३।२५।३७

(११) प्रेम्णः पराकाष्ठा यथा—

गोपीनां परमानन्द आसीद् गोविन्ददर्शने ।
क्षणं युगशतमिव यासां येन विनाऽभवत् ॥ = १०।१९।१३

वस्तुत: तैलधारावच्छिन्नरूपे द्रविते चित्ते स्थिररूपेण प्रविष्टा भगवद्दकारतैवास्ति भक्तिः । चित्तद्रुतेः विभिन्नत्वाद् भक्तेरपि भवन्ति विभिन्ना अवान्तरभेदाः । द्रुतचित्ते हि विभिन्नानि कारणानि सन्ति यथा—

काम: शरीरसंबन्धविशेषस्पृहयालुता ।
संनिधानासंनिधानभेदेन स भवेद् द्विधा ॥

रूपगोस्वामिना स्वकीये हरिभक्तिरसामृतसिन्धौ कामादयः साधनभक्ते निमित्ताः अभिमताः तथा साध्यभक्तेः मोक्षादयो फलभेदाः कथिताः, किन्तु मधुसूदनसरस्वतीपदा भक्तिरसायनस्य प्रथमे उल्लासे साध्यभक्तेः साधनभक्तेश्च स्वरूपं भिन्नं भिन्नं स्वीकृतम् । कामजन्यभक्तेः स्वरूपं तद्भेदा यथा—

काम-क्रोध-भय-स्नेह-हर्ष-शोक-दयादयः ।
तापकाश्चित्तजतुनः तच्छान्तौ कठिनं तु तत् ॥ = ॥ ३ ॥

अर्थात् सुरतेच्छाजनकतैवास्ति कामः । कामयन्ते = सुरतमधिगच्छन्ति यद्वा कामयन्ते सुरतमेष्यन्ते जना अनेन स कामः । सामान्यया इच्छया चित्तद्रुतिर्न भवति, किन्तु उत्कटेच्छया भवति चितं द्रवितम् । अतः कामशब्देन उत्कटसुरतेच्छैव गृह्यते । श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन कथितमस्ति यत् 'धर्माविरुद्धो भूतेषु-कामोऽस्मि भरतर्षभ !' इत्यस्याप्ययमेवार्थोऽस्ति यद् यः केवलमिन्द्रियतृप्तिसाधनं नहि, किन्तु नित्यनियमितप्रकाशस्योद्दीपकधर्मसहचरोऽस्ति । अर्थाद् यः शास्त्रोक्तविधाना-नुसारं पितृऋणान्मुक्तये मनुष्यं सदाचारिणं जितेन्द्रियं तथा मुमुक्षुं सम्पादयति स कामो-ऽहमेवास्मि । स्त्रीपुरुषयोः मिलनजन्यभवाङ्कुरं शृङ्गारोत्पादकं कथयित्वा भरतमुनिना स्वकीये नाट्यशास्त्रे कामः तृतीयः पुरुषार्थोऽङ्गीकृतोऽस्ति । सोऽयं कामो द्विविधः सन्निधानासन्निधान-सामीप्यदूर-सन्निकर्ष-विप्रकर्षभेदात् । इदमस्त्यस्य रहस्यम् — प्रेमिणः सन्निधौ शरीरस्य सम्बन्धावेशो जायते यथाऽसान्निध्यान्मानसिकः सम्बन्धो भवति । तथा च सन्निधानासन्निधानभेदेन द्विविधात् कामात् चित्तस्य द्रुतौ सत्यां तस्मिन् चित्ते या श्रीकृष्णविषयकनिष्ठा रतिरुत्पद्यते सा क्रमशः संयोगविपलम्भभेदाद्-द्विविधा भवति । तथाहि भक्तिरसायने मधुसूदनसरस्वतीपादाः—

तज्जन्यायां द्रुतौ चित्ते या स्याच्छ्रीकृष्णनिष्ठता ।
संभोगविप्रयोगाख्या रतिः सा सा क्रमाद् भवेत् ॥ ॥ ४ ॥

यद्यपि वाह्यैर्लक्षणैः विषयजन्यसंभोगे तथा भगवत्सम्भोगे विशेषः अन्तरो न प्रतीयते तथापि भगवत्सम्भोगः सात्त्विकः समाधिरूपः तथा विषयसंभोगो राजसो नाशवांश्च भवति । अत एवोक्तं तेन यतिपादेन तत्रैव—

प्रसरति विषयेषु येषु रागः
परिणमते विषयेषु तेषु शोकः ।
त्वयि रुचिरुचिता नितान्तकान्ते
रुचिपरिपाकशुचामगोचरोऽसि ॥

संभोगश्रृङ्गारस्योदाहरणं यथा—

बाहुप्रसारपरिरम्भकरालकोरु—
नीविस्तनालभननर्मनखाग्रपातैः ।
क्ष्वेल्यावलोकहसितैर्व्रजसुन्दरीणा—
मुत्तम्भयन् रतिपतिं रमयाञ्चकार ॥ श्री० भ० १०।१९।४६

अपि च— चुम्बे पटावृतमुखी नवसंगमेऽभू—
दालिङ्गने कुटिलताङ्गलता तदासीत् ।
अव्यक्तरागजनिकेलिकलासु राधा
मोदं तथापि विदधे मधुसूदनस्य ॥

विप्रलम्भस्योदाहरणं यथा—

गत्यानुरागस्मितविभ्रमेक्षितै—
र्मनोरमालापविहारविभ्रमैः ।
आक्षिप्तचित्ताः प्रमदा रमापतेः
तास्ता विचेष्टा जगृहुस्तदात्मिकाः ॥ = १०।३०।२

केयं श्यामा स्फुरति सरले गोपकन्या किमर्थं
प्राप्ता सख्यं तव भृगुपते ! निर्मितासौ वयस्या ।
आलिङ्ग्यामुं मुहुरिति तथा कुर्वती मां विदित्वा
नारीवेशं ह्रियमुपययौ भानवी यत्र राधा ॥

द्वेषजन्यरतेरुदाहरणं यथा—

इत्थं निशम्य दमघोषसुतः स्वपीठा-
दुत्थाय कृष्णगुणवर्णनजातमन्युः ।
उत्क्षिप्य बाहुरिदमाह सदस्यमर्षी
संश्रावयन् भगवते परुषाण्यभीतः ॥ = १०।७४।३०

भगवद्विषयक भयजन्यरतेरुदाहरणं यथा—

गोप्याददे त्वयि कृतागसि दाम तावद् या ते दशाश्रुकलिलाञ्जनसम्भ्रमाक्षम् ।
वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति भीरपि यद्बिभेति ॥
(श्री० भा० १।८।३१)

दास्यसख्यमिश्रितभक्ते रुदा हरणं यथा—

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वापि ॥
यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनषु ।
एकोऽथवाप्यच्युत ! तत्समक्षं तत् क्षामये त्वामहमप्रमेयम् ॥
(श्रीमद्भागवद्गीता । ११।४१.४२)

धर्मरक्षार्थं प्रयत्नपूर्विका या प्रवृतिर्भवति तथा चित्तस्य यो विस्तारो जायते स द्रुती धर्मोत्साहः कथ्यते । समये समये धर्मग्लान्गधर्मभ्युत्थाननिवृतिपूर्वकं धर्मसंस्थापनाय सतां संरक्षणाय च भारतभूभागे भगवतो लीलावतारो भवति । तथा चोक्तं स्वयमेव भगवता श्रीकृष्णेन गीतायाम्—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत !
अभ्युत्थानमधर्मस्य तदात्मानं सृज्याम्यहम् ।
परित्राणाय साधूनां विनाशाय च दुष्कृताम्
धर्मसंस्थापनार्थाय संभवासि युगे युगे ॥

किन्तु श्रीमद्भागवते भगवतोऽवतारस्य मुख्यं कारणं सदुपदेश द्वारा लोकशिक्षणमेवोक्तमस्ति । अत्याचारिणां विनाशस्तु तदवसरे नान्तरिकतया भवत्येव—

मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः ।
कुतोऽन्यथा स्याद्रमतः स्व आत्मनि सीताकृतानि व्यसनानीश्वरस्य ॥५।१९।५

दानोत्साहस्योदाहरणंयथा—

सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम ॥

काम-क्रोध-भय-स्नेह-शोक-हर्ष-दया-शमातिरिक्तः कश्चन भावो नास्ति, यत्र चित्तदुतिर्भवेत् । स्थायी भावः स एवोच्यते यश्चित्तं विद्रावयितुं शक्नोति । अतोऽमी अष्टावेव स्थायिभावा विभावादीनामाश्रयेण रसतां प्रतिपद्यन्ते—

यावत्यो द्रुतयश्चित्ते भावास्तावन्त एव हि ।
स्थायिनो रसतां यान्ति विभावादिसमाश्रयात् ॥ २६ ॥

धर्मोत्साहः दयोत्साहः त्रिविधा जुगुप्सा तथा शमइती षट् सन्ति अन्यविषयाः न भगवद्विषयाः । भगवद्विषयताभिन्नत्वात् धर्मवीरः, दयावीरः, वीभत्सः शान्तरसश्च भक्तिरसतां न प्रतिपद्यन्ते—

धर्मोत्साहो दयोत्साहो जुगुप्सा: त्रिविधा शमः
षडप्येते न विषया भगवद्विषया न हि ॥ २७ ॥
धर्मवीरो दयावीरो वीभत्सः शान्त इत्यमी ।
अतो न भक्तिरसतां यान्ति भिन्नास्पदत्वतः ॥ २८ ॥

ननु शास्त्रकारैर्धर्मो भगवत्प्राप्तिसाधनमभिमतमस्ति-यथा **धर्मेण पापमपनुदति तस्माद्धर्मं परमं वदन्ति** । अतएव शमोऽपि मनुष्यान् विषयविमुखान् करोति । एवं विषयवितृष्णविषयत्वाद् भक्तिरसः संभवतीति कथमिमौ भक्तिरसभिन्नौ संभवत इति चेत्—अत्रोच्यते इमौ द्वावपि परमपरया भक्तिरसं प्रति साधकौ, न सक्षादप्यदोषः । यस्यालम्बनं भगवानेव स हि भवति भक्तिविषयो यथा—

राज्यं च वसु देहश्च भार्याभ्रातृसुताश्च ये ।
यच्च लोके ममायत्तं तद्धर्माय सदोद्यतम् ॥

अत्र धर्मराजस्य युधिष्ठिरस्योक्तौ धर्मोत्साहस्तु स्पष्टतया प्रतीयते, किन्तु अत्र भगवद्विषयता नास्ति । अत इदं पद्यं न भक्तिरसप्रतिपादकं मन्तुं शक्यम् । एवमेव शान्तरसो विरागमूलको वर्तते, भक्तिरसस्तु अनुरागमूलकोऽस्तीत्युभयोः स्पष्टं पार्थक्यम् ।

एवमीर्ष्याजन्य-भयजन्यौ द्वेषौ च भगवद्विषयकावपि न भक्तिरसतां प्रतिपद्येते, यतस्तत्र न भवति साक्षात् चित्तद्रुतिः । पूर्णचित्तद्रुतिस्तदैव भवति यदा भगवद्विषयिका रतिः प्रीत्यात्मिकाऽपि स्यात् । ईर्ष्याभये द्वे अपि प्रीतिविरोधिनी स्तः—

इर्ष्याजन्यभयद्वेषौ भगवद्विषयावपि ।
न भक्तिरसतां यातः साक्षाद् द्रुतिविरोधतः ॥ २९ ॥

भक्तिरसः शृङ्गारादिभिर्नवभिः रसैः मिश्रितः, अथवा स्वतन्त्ररूपेण परमपुरुषार्थः स्वीकृतोऽस्ति—**'नवरससचिरं वा केवलं वा पुमर्थं परमिह मुकुन्दे भक्तियोगं वदन्ति ।'** अत्रत्यं नवरसकथनमुपलक्षणमात्रं, लोकप्रसिद्धेभ्यो नवरसेभ्यो यावतां रसानां सम्भवोऽस्ति, तेषामपि समेषां तत्र मिश्रणं भवितुमर्हति—

व्यामिश्रभावरूपत्वं यान्त्येते क्षीरनीरवत् ।
विभावादिसमायोगे तथा भक्तिरसा अपि ॥ ३२ ॥

शृङ्गार-करुण-हास्य-प्रीति-भयानक-अद्भुत-युद्धवीराणां भक्तिरसे संभवति मिश्रणम् । यथा भयमिश्रितद्वेषवान् रसो रौद्रभयानकः कथ्यते तथैव भयमिश्रितरतिस्थायिभाववान् प्रीतिभयानक उच्यते । यथा श्रीमद्भागवद्गीतायां विराट्रूपदर्शनानन्तरमर्जुनेनोक्त भगवन्तं श्रीकृष्णं प्रति—

स्थाने हृषीकेश ! तव प्रकीर्त्या जगत् प्रहृष्यत्यनुराज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः ॥ ११ ॥ ३६

शुद्धा रतिः, वत्सलरतिः, प्रयोरतिरिति तिस्रो रतयोऽन्यैः स्थायिभावैरमिश्रितत्वात् अमिश्रितरतयः कथ्यन्ते—

शुद्धा च वत्सलरतिः प्रेयोरतिरिति त्रयी ।
भावान्तरामिश्रितत्वादमिश्रा रतिरुच्यते ॥ ३४ ॥

यथा हासादीनां भवानां परस्परं मिश्रणं भवति तथा आसां रीतीनां केष्वपि अन्येषु भावेषु मिश्रणं न जायते। अत एता अमिश्रा रतय उच्यन्ते। शुद्धा रतिः केवलं भगवद्विषयिकैव भवति, किन्तु वत्सलरतिः तथा प्रेयोरतिस्तु यथा भगवद्विषयिके भवतः तथैवान्यविषयके अपि। अथापि अन्यस्थायिभावैः तत्रामिश्रणं तु तिष्ठत्येव।

विशुद्ध-वत्सल-प्रेयोरसनामानः त्रयो रसा भवन्ति। रसान्तैररामिश्रितत्वादिमे सर्वाङ्गपूर्णा भवन्ति। पूर्वश्लोके या शुद्धा रतिः वत्सलरतिः प्रेयोरतिश्चेति स्थायिभावाः प्रोक्ताः सन्ति तासामेव इमे त्रयो रसा उक्ताः सन्ति—

विशुद्धो वत्सलः प्रेयानिति भक्तिरसास्त्रयः ।
रसान्तरामिश्रितास्ते भवन्ति परिपुष्कलाः ॥ ३५ ॥

विशुद्धभक्तिरसस्योदाहरणं यथा—

मृद्वीका रसिता सिता समशिता स्फीतं निपीतं पयः
स्वर्यातेन सुधाप्यधायि कतिधा रम्भाधरः खण्डितः ।
सत्यं ब्रूहि मदीय जीव ! भवता भूयो भवे भ्राम्यता
कृष्णेत्यक्षरयोरयं मधुरिमोद्गारः क्वचिल्लक्षितः ॥

वत्सलभक्तिरसो यथा—

दोर्भ्यां दोर्भ्यां व्रजन्तं व्रजसवनजनाह्वानतः प्रोल्लसन्तं
मन्दं-मन्दं हसन्तं मधुमधुरगिरा मेति-मेति ब्रुवन्तं ।
गोपालीपाणितालीतरलितवलयध्वान्तमुग्धान्तरालं
वन्देऽहं श्याममिन्दीवरविमलदृशं नन्दगोपालबालम् ॥

प्रेयोरसो यथा—

रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणम् ।
बृहदुरः श्रियो वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः ॥

(श्री० भा० १०।३१।१७)

मिश्रितत्वेऽपि शृङ्गाररसः सर्वेभ्यो रसभ्यो बलवत्तरो भवति, यतस्तत्रैव रतेः तीव्रता, तीव्रतरता च दृश्येते। अर्थात् त्रिविधानिमान् भक्तिरसान् विहायावशिष्टाः सर्वे रसा मिश्रिता भवन्ति। एवं शृङ्गारोऽपि कामादि मिश्रितो भवति। अथापि अन्यरसा-

पेक्षया स निरतिशयचमत्कारजनको भवति, यतः शृङ्गारे एव रतेः तीव्रता संभोगे तथा विप्रलम्भे तीव्रतरता च संजायते तथाहि—

श्रृङ्गारामिश्रितत्वेऽपि सर्वेभ्यो बलवत्तरः ।
ते तीव्रतीव्रतरत्वं तु रतेस्तत्रैव वीक्ष्यते ॥ ३५ ॥

रसाश्चतुर्विधा भवन्ति केवलसंकीर्ण - संकीर्णमिश्रित - केवलमिश्र-शुद्धभेदात् । तथाहि—

केचित् केवलसंकीर्णाः केचित् संकीर्णमिश्रिताः ।
केचित् केवलमिश्राश्च शुद्धाश्च स्युश्चतुर्विधाः ॥ ३७ ॥

तत्र शुद्ध-रौद्र-रौद्रभयानक-धर्मवीर-दयावीर-वीभत्स-शान्तरसा केवलसंकीर्णाः प्रोच्यन्ते । मिश्ररसा एवान्यविषयकाः सन्तः संकीर्णा मिश्रिता उच्यन्ते । मिश्ररसा तथा—

शृङ्गारः करुणो हास्यस्तथा प्रीतिभयानकः ।
अद्भुतो युद्धवीरश्च दानवीरश्च मिश्रिताः ॥

एते एव भगवद्भिन्नालम्बनविभावाश्रयाः सन्तः संकीर्णमिश्रिताः कथ्यन्ते तथा भगवद्विषयकालम्बनविभावाश्रिताः सन्तः मिश्रिताः प्रोच्यन्ते । तथाहि भक्तिरसायनस्य-द्वितीयोल्लासे श्रीमधुसूदनसरस्वतीपादाः—

तत्र केवलसंकीर्णा रौद्रो रौद्रभयानकः ।
धर्मवीरो दानवीरो वीभत्सः शान्त इत्यपि ॥
मिश्रा एवान्यविषया प्रोक्ताः संकीर्णमिश्रिताः ।
भगद्विषयास्ते तु ख्याताः केवलमिश्रिताः ॥ = ३८-३९

योगशास्त्रानुसारं चतुर्विधा भवति भक्तिः—राजसी, तामसी, शुद्धसात्त्विकी, मिश्रिता च । तत्र प्रथमा राजसी भक्तिः ईर्ष्याजन्यद्वेषादुत्पद्यते, द्वितीया तामसी भयजन्यद्वेषाद्भवति, तृतीया शुद्धसात्त्विकी हर्षजन्या भवति, चतुर्थी च मिश्रिता कामशोकादिजन्या भवति—

राजसी तामसी शुद्धसात्त्विकी मिश्रिता च सा ।
ईर्ष्यजिद्वेषजाऽऽद्या स्याद् भयजद्वेषजा परा ॥
हर्षजा शुद्धसत्त्वोत्था कामशोकादिजेतरा ।
सत्त्वजत्वे तु सर्वासां गुणान्तरकृता भिदा ॥ = ४१-४२

योगशास्त्रानुसारं भगवता श्रीकृष्णेन गीतायां चतुर्विधा भक्ता उक्ताः । सन्ति तत्रार्थार्थी राजस भक्तोऽस्ति, यतो हि तस्य परमेश्वरे विभूतीनां भवति आकङ्क्षा ताम-

विन्दमानः परमेश्वरमीर्ष्यति । अत ईर्ष्याजन्यो द्वेषः तस्य भवति राजसी भक्तिः । रावणः-शिशुपालः-हिरण्यकशिपुप्रभृतयोऽस्या एव भक्ते सन्ति अधिकारिणः । परमेश्वरो हि निग्रहद्वारा एतान् अनुगृहीतवान् । आर्तः भक्तो हि तामसभक्तेरधिकारी । तथाचोक्तं भगवता श्रीकृष्णेन गीतायां—

अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥

जिज्ञासुः मिश्रितभक्तोऽस्ति 'योगश्चित्तवृत्तिनिरोधः' इतियोगसूत्रानुसारं स कामक्रोधादिवृत्तीनां भक्तिद्वारा निरोधं विधाय ता ज्ञाने परिणमय्य अशान्तं चित्तं परमेश्वरे नियोजयति । ईदृशेभ्यो भक्तेभ्य उपदिशति भगवान् सर्वस्वसमर्पणाय—

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय ! त कुरुष्व मदर्पणम् ॥

ज्ञानी च शुद्धः सात्त्विको भक्तोऽस्ति । यतो हि स 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज' इति भगवद्वचनानुसारं स सर्वं मायामयं प्रपञ्चं परिहाय शोकहितो भवति । भगवांश्च 'अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुच, इति प्रतिज्ञानुसारं तं सर्वपापविनिर्मुक्तं कृत्वाऽऽनन्दमग्नं करोति ।

सर्वा भक्तयः सत्त्वगुणस्य सन्ति परिणामाः । त्रिगुणात्मकशरीरस्य धर्मो नाशयितुं न शक्यते । अतो यदा रजोगुण-तमोगुणावुत्कटौ सन्तौ सत्त्वगुणमभिभवतः तदा राजसी-तामसी भक्त्यौ प्रभवतः । यदा च समावस्थायां सर्वे गुणः तिष्ठन्ति तदा शुद्धसत्त्वस्योत्कटतायां शुद्ध सात्त्विकी भक्ति र्भवति । उक्तासु चतुर्विधासु भक्तिषु प्राथमिके द्वे राजसी तामसी च भक्त्यौ सुखविरोधित्वान्न रतितां प्राप्नुतः । अन्तिमे द्वे मिश्रिता शुद्धसात्त्विकी च सुखमयीत्वाद् रती भवितुमर्हतः । अर्थात् राजसी तामसी भक्त्यौ ईर्ष्याजन्य-भयजन्यद्वेषादुत्पद्यते । ईर्ष्याभयाभ्यां दुःखमेवोत्पद्यत, न सुखम् । अतः सुखविरोधित्वादिमौ न रती भवतः । शिष्टयो र्द्वयोः मिश्रितासात्त्विक्यौ रती भवतः यतो ह्यनयोः चित्तद्रुतिपूर्णतया भक्त्या रते मुंख्यं कारणमस्ति—

राजसी तामसी शुद्धा सात्त्विकी मिश्रिता च सा ।
ईर्ष्याजद्वेषजाऽऽद्या स्याद् भयजद्वेषजा परा ॥ ४१
हर्षजा शुद्धसत्त्वोत्था कामशोकादिजेतरा ।
सत्त्वजत्वे तु सर्वासां गुणान्तरकृता भिदा ॥ ४२
तत्र ते रतितां नैव यातः सुखविरोधतः ।
रतिशब्दं तु भजतः सुखमय्यौ परे द्रुती ॥ ४३

रजोगुण-तमोगुण प्रतिवन्धकरहिता या भगवद्विषयिणी चित्तस्यैकाग्रवृत्तिरुदेति सैव सुखाभिव्यञ्जकत्वाद् रतिरुच्यते । अर्थात् यदा सुखमयाभिव्यक्तिप्रतिवन्धकराजस-तामसभावौ विनश्यतः तदा भगवद्विषयिणी एकाग्रमनोवृत्ति भंवति, या शुद्धसत्त्व, मिश्रितभक्तौ भवति रतिलक्षणं यथा—

रजस्तमोविहीना तु भगवद्विषया मतिः ।
सुखाभिव्यञ्जकत्वेन रतिरित्यभिधीयते ॥ ५८

विरहे यादृशं दुःखं भवति तादशं रतावपि दृश्यते । तत्र मृदु-मध्य-अधिकमात्रायां विशेषो दृश्यते । अतो रतेः त्रिविधो भेदो भवति-मृद्मात्रा, मध्यमात्रा, अधिकमात्रा च । वैकुण्ठे, द्वारकायां, वृन्दावने च सा रतिः क्रमशः मृदुतीव्रा, मध्यतीव्रा, तीव्र-तीव्रा अनुभूयते—

विरहे यादृशं दुःखं तादृशी दृश्यते रतिः
मृदुमध्याधिमात्रत्वाद् विशेषोऽपि च वक्ष्यते ॥ ६०
वैकुण्ठे द्वारकायां च श्रीमद्वृन्दवने तथा
मृदुतीव्रा मध्यतीव्रा तीव्रतीव्रा च सा क्रमात् ॥ ६१

अयंभावः वैकुण्ठमस्ति श्रीविष्णोः परमं धाम । सोऽस्ति लक्ष्मीपतिः । तत्र काम-नायाः संसर्गः स्वाभाविकः । अतः तत् मृदुतीव्राया रतेः स्थानम् । द्वारकायां भगवता राजसलीलाः कृताः । तत्राहङ्कारस्यास्ति संसर्गः । अतस्तत्र मध्यतीव्रा रतिः, किन्तु'वृन्द-वनं भगवतो नित्यं लीलाधामास्ति । तत्रत्यप्रत्येकलीलायां शुद्धं सत्त्वं विराजते । अत-स्तस्य सर्वोत्कृष्टत्वद्योतनाय श्रीमदिति विशेषणं संलग्नमस्ति पद्मपुराण-स्कन्दपुराणादिषु श्रीमद्वृन्दावनस्य प्रचुरो महिमा गीतोऽस्ति तत्रत्या लीला च नित्यलीला प्रोक्ता वर्तते । तत्र भगवतो दासाः सखायः प्रेयस्यः मातापितरौ चेति सर्वे नित्याः प्रोक्ताः सन्ति-

दास्य सखायः पितरौ प्रेयस्यश्चहरेरिह ।
सर्वे नित्या मुनिश्रेष्ठ ! वसन्ति गुणशालिनः ॥

वृन्दावनलीलायां माधुर्यरसस्य निर्झरिणी नित्यं प्रवहति । अत एव यत्र तत्र कविभिः तत्रत्यो लीलानायको भगवान् श्रीकृष्णः परं ब्रह्मरूपेण वर्णितोऽस्ति—

शृणु सखि ! कौतुकमेकं नन्दनिकेतनाङ्गणे मया दृष्टः
धूलधूसराङ्गो नृत्यति यत्र वेदान्तसिद्धान्तः ॥

अपिच—वर्हापीडाभिरामं मृगमदतिलकं कुण्डलाक्रान्तगण्डं
कञ्जाक्षं कम्बुकण्ठं स्मितसुभगमुखं स्वाधरे न्यस्तबेणुम् ।
श्यामं शान्तं त्रिभङ्गं रविकरवसनं भूषितं बैजयन्त्या
वन्दे वृन्दावनस्थं युवतिशतवृतं ब्रह्म गोपालवेषम् ॥

किञ्च—कोमलं कूजयन् वेणुं श्यामलोऽयं कुमारकः ।
वेदवेद्यं परं ब्रह्म भासतां पुरतो मम ॥

विभावादिसंयोगे शुद्धः भक्तिरसो भवति । अयमनुपाधिः भक्तिरस्ति । सोपाधिका भक्तिस्तु काम-सम्बन्ध-भयरूपोपाधिभिः मिश्रितत्वात् त्रिप्रकारिका भवति । शृङ्गारमिश्रिता भक्तिः कामजा भक्तिरस्ति, सम्बन्धजा भक्ति भवति द्विविधा पाल्यपालकसम्बन्धेन वत्सलभक्तिः सख्यसेवकभावेन प्रेयोभक्तिश्च । भयजन्या भक्तिः प्रतिभयानके रसे भवति । इमाश्चतस्रः सहैव व्यक्तीभूता प्रणाणकरसन्यायेन एकमपूर्वं परमं विलक्षणं रसमनुभावयन्ति । अत आसु चतसृषु रतिषु कस्या अपि एकस्या अभ्यासः परमाय श्रेयसे सम्पद्यते नूनम्—

कामसबन्धभयतः सोपाधिस्त्रिविधा भवेत् ।
विभावादिसमायोगे शुद्धभक्तिरसो भवेत् ॥ ६६ ॥
शृङ्गारमिश्रिता भक्तिः कामजा भक्तिरिष्यते ।
संबन्धजा रतिर्याति पूर्वोक्तां रसतां द्वयोः ॥ ६७ ॥
एको वत्सलभक्त्याख्यः प्रेयोभक्तिस्तयाऽपरा ।
भयजा रतिरध्यास्ते रसं प्रीतिभयानकम् ॥ ६८ ॥
एकदैव यदि व्यक्तमिदं रतिचतुष्टयम् ।
तदा तु पानकरसन्यायेन परमो रसः ॥ ६९ ॥
एकद्वयादिरसव्यक्ति भेदाद्रसभिदा भवेत् ।
तस्मात् क्वचित्तदभ्यासं कुर्याद्रतिचतुष्टये ॥ ७० ॥

दिव्यासु व्रजदेवीषु स्पष्टतया चतस्रोऽपि रतयो दृश्यन्ते । तासु चित्तालम्बनेन स्वकीयमपि चितं तादृशमेव जायते । तथाहि—

व्रजदेवीषु च स्पष्टं दृष्टं रतिचतुष्टयम् ।
तच्चित्तालम्बनत्वेन स्वचित्तं तादृशं भवेत् ॥

'व्रजति = व्याप्नोतीति व्रजः' इति व्युत्पत्यनुसारं परब्रह्मणो नित्यलीलाभूमितया तद्रूपतया यद् व्याप्तमस्ति तदेवास्ति व्रजः । तत्रैव चाखण्डसच्चिदानन्दपरब्रह्मणा साकं या दिव्यन्ति = मोदन्ते, क्रीडन्ति वा ताः सन्ति व्रजदेव्यः । यथा व्रजो व्यापकः तथैव तासां देवीनां संख्या अनन्ता । अतः तासु आसां चतसृणां रतीनां दृष्टान्तः सुलभः । अतः शास्त्रकारैः उत्तमभक्तकोटौ व्रजगोपिका अभिमताः सन्ति । भक्तप्रवर उद्धवो हि गोपीनां पादधूलिवन्दनं कुर्वन् आत्मानं धन्यतमं मन्यमानो नमस्करोति ताः श्रीमद्भागवते—

वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः ।
यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ॥ = १०।४७।६३

अपि च

एवं भक्तिः सकलभुवने नेक्षिता न श्रुता वा
किं शास्त्रौघैः किमिह तपसा गोपिकाभ्यो नमो नमः ॥

अन्येषां रसानां विभावादिभिः संकीर्णा भगवद्विषयिणी रतिरपि विचित्ररूपवत् चित्ररसतां प्रतिपद्यते । अर्थात् यथा शुक्ल-पीत-रक्त-नीलादीनि रूपाणि मिलित्वा एकं विचित्रं रूपं दधते तथैव भक्तिरसस्योद्दीपनविभावादयः अन्यैः शृङ्गारादिभिः रसैः मिश्रिताः सन्तो विचित्ररसरूपतया प्रतीयन्ते । तथाहि स्वामिवर्याः—

रसान्तरविभावादिसंकीर्णा भगवद्रतिः ।
चित्ररूपवदन्यादृग्रसतां प्रतिपद्यते ॥ ७२ ॥

व्रजदेवीषु यद्यपि शुद्धा रितिरस्ति, किन्तु तासु अन्यरसानां विभावादयो दृश्यन्ते । अतः सा मिश्रिता रतिर्भवति, परं सनकादिषु जीवन्मुक्तेषु अन्यरसानां विभावादेः नितान्तमभावो विद्यते । अतस्तेषां रतिः सर्वातिशायिनीत्वाद् विलक्षणास्ति । अतस्तां दशमी रतिं कथयितुं शक्यते । यस्याः प्रकियायां केवलं स्वरूपमात्रस्यानन्दो लभ्यते—

रसान्तरविभावादिराहित्ये तु स्वरूपभाक् ।
दशमीमेति रसतां सनकादेरिवाधिकाम् ॥ ७३ ॥

ननु रसशास्त्रस्याचार्यो भरतमुनिः देवादिविषयकरतिः तथा निर्वेदादीन् सञ्चारिणो भावं मन्यते, न रसम् । अतः कथं भक्तिरसो मन्तुं शक्यते, यतः सोऽपि कृष्णविषयकरतिरेवास्तीति चेन्न अन्यदेवताविषयकरतिः भाव इति कथयितुं शक्यते, यतो मलिनसत्त्वप्रधानो जीवोऽविद्याकार्यत्वान्न सम्पूर्णानन्दप्रकाशको भवितुमर्हति, किन्तु भगवान् श्रीकृष्णस्तु परमानन्दस्वरूपः परमात्मैवास्ते । अतो न तद्विषये स सिद्धान्तः संगतो भवितुमर्हती ति दोषाभावः । अतएव श्रीमद्भागवते

एतेः चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥ = ।१।३।२८
वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ = १।२।११

श्रीमद्भिः मधुसूदनसरस्वतीपादैः भक्तिरसायनस्य प्रथमे उल्लासे भक्तेः सामान्यनिरूपणं तथा द्वितीये उल्लासे भक्तेः विशेषनिरूपणं विधाय तृतीये उल्लासे-रसपदार्थं निरूपयितुं शिष्यजिज्ञासारूपेणोक्रमते—

ननु कोऽयं रसो नाम किन्निष्ठो वा भवेदसौ ।
अस्य प्रत्यायकः को वा प्रतीतिरपि कीदृशी ॥ १ ॥

एषामेव चतुर्णां प्रश्नानामुत्तरे तेनामुष्मिन् तृतीये उल्लासे रसस्य विवेचनं कृतमस्ति ।

विभावै रनुभावैश्च व्यभिचारिभिरप्युत ।
स्थायीभावः सुखत्वेन व्यज्यमानो रसः स्मृतः ॥ = ३ । २ ॥

अर्थाद् विभावैरनुभावै र्व्यभिचारिभावैश्च परिपुष्टः सन् सुखरूपेण व्यक्तः स्थायी भावो रसो निगद्यते । संक्षेपतो रतिहासादीनां स्थायिभावानां को विभावो भवतीति प्रश्ने स रसो भवति द्विविध, आलम्बनविभाव उद्दीपनविभावश्च । सामान्यरसे तु कान्तादयः आलम्बना भिन्ना भिन्ना भवन्ति, किन्तु भक्तिरसे कस्मिन्नपि स्थायिभावे आलम्बनो भवति भगवानेव । तथाच रत्यादिस्थायिभावाभिव्यक्तकारका भवन्ति विभावाः । तेषां सुखमयकारकाः सन्ति अनुभावाः, तथा सुखास्वादेऽत्यन्तमुपकारीणि साधनानि सन्ति व्यभिचारिणः । एवं रसे स्थायिभाव एव विभावादिभिः परिपुष्टः सन् रसरूपेणाभिव्यक्तो भवति ।

त्रिभिः विभावानुभावव्यभिचारिभावैः सहितस्य स्थायिभावस्य ग्राहिका सत्त्वगुणमयी वृत्तिरुत्पद्यते या समूहालम्बनरूपास्ति । यथा प्रपाणके प्रक्षिप्तवस्तुनां भिन्न-भिन्नस्वादेऽपि एको विलक्षणः स्वादः प्रतीयते तथैव विभावादीनां पृथक् पृथक् ज्ञानसत्वेऽपि सम्मिलितरूपेण एका विलक्षणप्रतीति र्भवति यत्राधिकमात्रायां सत्त्वमेवोद्रिक्तं भवति । एवं त्रयाणां विभावादीनां समूहालम्बनात्मिका वृत्तिः तत्कालं यदेकमुत्तमं सुखमुत्पादयति तदेवास्ति रसः । केचिदाचायास्तु तामेव समूहालम्बनात्मिकां मनोवृत्तिमेव रसं कथयन्ति——

भावत्रितयसंसृष्टस्थायिभावावगाहिनी ।
समूहालम्बनात्मैका जायते सात्त्विकी मतिः ॥ १२ ॥
साऽनन्तरक्षणेऽवश्यं व्यनक्ति सुखमुत्तमम् ।
तद् रसः केचिदाचार्यास्तामेव तु रसं विदुः ॥ १३ ॥

तस्माद् विभावानुभावव्यभिचारिभवानां समूहालम्बनात्मकज्ञानानन्तरमेवाव्यवहितप्रतीतिविषयको य आनन्दः स एवास्ति रस इति भक्तिरसायनस्याभीष्टं मतम् ।

विभिन्नमतेन भक्तिरससमर्थनम्

इत्थं भक्तिरसायने, हरिभक्तिरसामृतसिन्धौ, उज्ज्वलनीलमणौ दानकेलिकौमुद्यादिषु अतिविशदतया सूक्ष्मरूपेण वा भक्तिरसस्य विवेचनं कृतमस्ति । यथा स्पष्टतया एभिभारतीयै विद्वद्भिः भक्तिरसविवेचनं कृतम्, न तथा पाश्चात्यविपश्चिद्भिः कृतं यतस्ते रसव्यापारस्य वस्तुतो विशेषानुसन्धानं न कृतम् ।

यद्यपि तेषां विभिन्नानां पाश्चात्यविपाश्चितां काव्य-नाटकादिषु रसस्याङ्गानामुत्कर्षो दृष्टिगोचरी भवति अथापि भारतवासिभिः विशिष्टैर्विद्वद्भिः यथा रचना

परिपाटी प्रदर्शिता, न तथाऽन्यत्र दृश्यते। रसाचार्येण भरतमुनिना तथ्यस्यास्य प्रचुरं विवेचनं कृतं विद्यते, किन्तु तद्विवेचनं प्राकृतं रसमेवादायैव जातमस्ति। गौडीय-सम्प्रदायाचार्यै विशेषतश्चैतन्यमतानुयायिभिरेनामेव लौकिकरसपरिपाटीं सम्मुखे स्थापयित्वा अप्राकृतभावसामग्रीभिः तां परिमार्जितां परिवर्द्धितां च कृत्वा उत्कर्षताया३चरमं सीमानमुप्रस्थापिता भक्तिरसपरिपाठी। तेषां इदं मतमस्ति यद् रसो हि अप्राकृतः पदार्थोऽस्ति, यतो भगवानेवास्ति रसः। प्राकृतवस्तुनि रसवृत्तिः छायामात्रमस्ति, किन्तु भगवति श्रीकृष्णे एव पूर्णरूपेणास्ति रसवृत्तेः सत्ता।

वल्लभाचार्येणाणुभाष्येऽपि प्रोक्तमस्ति—'वस्तुतस्तुः ग्रामसिंहस्य सिंहस्वरूपत्वेऽपि न ताद्रूप्यं वक्तुं शक्यम्। तथा लौकिके पुंसि नार्यां वा तदाभासो रसशास्त्रे निरूप्यते तद्दृष्टान्तेन भगवद्भाववद्भक्तरीतिभावनार्थं, नतु ऋषीणां लौकिके रसे तात्पर्यं भवितुमर्हति। अतः लौकिके रसे तथ्यस्य विवेचनमात्रमस्ति, तस्य वास्तविकं लक्ष्यं भगवद्भावे वर्तते।

मधुसूदनसरस्वतीपादा अपि—"विषयावच्छिन्नचैतन्यमेव द्रवावस्थमनोवृत्त्या रूढतयाऽऽविर्भावित्वं प्राप्य रसतां प्राप्नोति, न लौकिकरसस्यापि परमानन्दरूपतानुपपत्तिः। अत एवानवच्छिन्न चिदानन्दघनस्य भगवतः स्फुरणाद् भक्तिरसेऽत्यन्ताधिक्यमानन्दस्य, लौकिकरसे तु विषयावच्छिन्नस्यैव चिदानन्दांशस्य स्फुरणात् तत्रानन्दस्य न्यूनतैव। तस्माद् भक्तिरस एवोत्तमत्वात् लौकिकरसानुपेक्ष्य सेवनीयो माननी यश्च।

प्रीतिसन्दर्भे जीवगोस्वामिनोऽपि लिखति लौकिकस्य रत्यादेः सुखरूपत्वं यथाकथञ्चिदेव, वस्तुविचारे दुःखपर्यवसायित्वात्। तदुक्तं भगवता स्वयमेव—"सुखं दुःखात्ययः, दुःखं कामसुखापेक्षा" इति। रुक्मिणीवाक्येऽपि—

त्वक्श्मश्रुरोमनखकेशपिनद्धमन्तर्मांसास्थिरक्तकृमिविट्कफपित्तवातम्।
जीवच्छवं भजति कान्तमतिर्विमूढा या ते पदाब्जमकरन्दमजिघ्रती स्त्रीः॥

तस्माल्लौकिकस्यैव विभावादेः रसजनकत्वमिति न श्रद्धेयम्। तज्जनकत्वे च सर्वत्र वीभत्सजनकत्वमेव सिध्यति। श्रीमद्भागवतस्य रसात्मकत्वं शब्देनैव निर्दिशति भगवान् व्यासदेवः—

निगमकल्पतरो र्गलितं फलं शुकमुखादमृतद्रवसंयुतम्।
पिवत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः॥ = १।१।३

अतो लौकिकविभावादीनां रसजनकत्वमश्रद्धेयं वचः। भागवतरसे भक्तिरसे विषयितआरम्भ मुक्तपर्यन्तं समस्तेषु जीवेषु रसनिष्पत्तेरसंभावना न भवितुमर्हति। अतो भगवत्प्रीतिव्यञ्जकस्य श्रीमद्भागवतपुराणस्य रसरूपत्वं स्वीकृतं भगवता महर्षिणा वेदव्यासेन।

लौकिका रसिका यस्याः सामग्र्या रहितत्वात् भक्तिरसे यद् रसत्वं नाङ्गी कुर्वन्ति तदस्ति प्राकृतरसविषयकम् । अद्भुतरूपेणालौकिको रसो भगवत्प्रीतावेव संभवति । विना वासनां रसनिष्पत्तिर्भवितुं नार्हति —

न जायते रसास्वादो विना रत्यादिवासनाम्
पुण्यवन्तःप्रमिण्वन्ति योगिवद्रससन्ततिम् ।

साहित्यदर्पणे विश्वनाथेन प्रतिपादितलौकिकरसस्य स्वरूपं तदास्वादनप्रकारः एवमस्ति—सत्त्वोद्रेकात् कश्चन समाजिकः तन्मयताप्रयुक्तमूर्तिमद्वस्तुवद् रसास्वादनं कुरुते । सरसोऽखण्डः प्रकाशानन्दः चिन्मयो वेद्यान्तस्पर्शशून्यो ब्रह्मानन्द सहोदररूपोऽस्ति । लोकोत्तरचमत्कारिता तस्यास्ति प्राणम्, परन्तु अलौकिक भगवत्प्रीतिमये रसेऽप्राकृतविशुद्धं सत्वमेवास्ति हेतुः । तद् विशुंद्ध सत्त्वं हि—'सत्त्वं विशुद्धं वसुदेवसंज्ञितम् । इत्यादिवचनै र्वासुदेव एवाभिहितः ।

या निवृत्तिस्तनुभृतां तव पादपद्म-
ध्यानाद्भवज्जनकथाश्रवणेन वा स्यात्
सा ब्रह्मणि स्वमहिमन्यपि नाथ माभूत्
किन्त्वन्तकासिलुलितान् पततां विमानात् ॥ = ४।९।१० ॥

अपिच—

नात्यन्तिकं विगणयन्त्यिपि ते प्रसादं
किन्त्वन्मदर्पितभयं भ्रुव उन्नयैस्ते ।
येऽङ्ग ! त्वदङ्घ्रिशरणा भवतः कथायाः
कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ॥ = ३।१५।४८ ॥

इत्यादि श्लोकैः ब्रह्मानन्दतोऽप्राकृतस्यरसस्याधिक्यं प्रदर्शितमस्ति । अत प्राचीनानां लौकिकालौकिकरसवेत्तृणां मतेनायं प्रीतिमयरसः (भक्तिरसः) सुतरां सिध्यति ।

प्रथमं भगवन्नामकौमुद्यां सामान्यरूपेण भक्तिरसस्य साधने प्रयासः कृतः । ततः श्रीधरस्वामिचरणाः किञ्चिद्वैशिष्ट्यं प्रदर्श्य—

मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्
गोपानां स्वजनोऽसतां क्षितिभुजां शस्ता स्वपित्रोःशिशुः ।
मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां
वृष्णीनां परदेवतेति विदितो रङ्गं गतः साग्रजः ॥ = १०।४३।१७ ॥

इति श्लोकानुसारं श्रीमता शुकदेवेन मुनिना भक्तिरसः स्पष्टतया स्वीकृतः । तदनन्तरं वृन्दावननिवासिभिः गोस्वामिः पल्लवनं विधाय भक्तेः रसत्वं पञ्चमपुरुषार्थत्वं च साटोपं संसाधितम् ।

यदा भगवान् आदिनारायणः शिष्टानुग्रह-दुष्टनिग्रहपूर्वकं धर्मसस्थापनार्थं पृथिव्यामस्यामवतरति तदा तस्य नित्यप्रियाणामंशसमूहा अपि अवतरन्ति । ते देवताभिः सहावतीर्य गोपकन्यका भूत्वा गोपीनां प्राणसख्यः सत्यः श्रीकृष्णलीलायां साहाय्यं कुर्वन्त्यः सततं तत्सेवां प्रकुर्वते—

अत्र देवावतरणे जनित्वा गोपकन्यकाः ।
तामंशिनीनामेवासां प्रियसख्योऽभवन् व्रजे ॥

व्रजे श्रीराधाचन्द्रवल्यौ मुख्यरूपेण नित्यप्रिये सख्यौ उक्ते स्तः । ते श्रीकृष्णवदेव नित्यसौन्दर्यवैदग्ध्यादिगुणानामश्रयीभूते विराजेते । तथाहि श्रीरूपगोस्वामिना उज्वलनीलमणेः—श्रीकृष्णवल्लभाप्रकरणे स्पष्टं प्रतिपादितम्—

राधाचन्द्रावलीमुख्ये प्रोक्ते नित्यप्रिये व्रजे ।
कृष्णवन्नित्यसौन्दर्यवदैग्ध्यादिगुणान्विते ॥ ५२ ॥

एकदा गोपिकासंसदि ललिताद्वारा चन्द्रावल्याः सौन्दर्ये कटाक्षे कृते तत्सखीपद्माऽसहिष्णुः सती तामब्रवीत्—ललिते ! पृथिव्यामस्यां चन्द्रावल्याश्चन्द्रवदनस्य कान्तिपुञ्जं को वक्तुं पटुः स्यात्, येन कान्तिपुञ्जेन पिच्छमुकुटो वनविहरणशिलोऽपि मुरारिः गृहवाटिकाकाननकुटीरे विचरणकारी कृतः—

चन्द्रावलीवदनचन्द्रमरीचिपुञ्जं
कः स्तोतुमप्यतिपटुः क्षमते क्षमायाम् ।
येनाद्य पिच्छमुकुटोऽपि निकेतवाटी
पर्यन्तकाननकुटीरचरः कृतोऽयम् ॥ २३ ॥

भगवतः श्रीकृष्णस्य तिस्रः सन्ति शक्तयः—(१) ह्लादिनीशक्तिः (२) वहिरङ्गा शक्तिः तथा (३) तटस्था शक्तिः । ताः क्रमशः स्वरूपशक्तिः, मायाशक्तिः, जीवशक्तिश्च कथ्यन्ते । तत्र ह्लादिनीशक्तिः भगवत्स्वरूपा अन्तरङ्गा शक्तिरस्ति । वहिरङ्गाशक्तिः वाह्या शक्तिः मायाऽस्ति, यया ब्रह्माण्डनिर्माणे क्रियते साहाय्यम्, यतो मायामाध्यमेनानन्तकोटिब्रह्माण्डस्य सृष्टि र्जायते । अनन्तकोटिब्रह्माण्डमस्ति जडरूपं, यतो हि जडरूपया मायया तत्सृष्टि र्जायते । भगवद्धाम चिन्मयं भवति, यस्य निर्माणं चिन्मयशक्त्यैव जायते । भगवतः श्रीकृष्णस्य नित्यं धाम गोलोकोऽस्ति । यत्र सोऽनादिकालतः स्वकीयाभिः आह्लादिनीशक्तिरूपाभिः व्रजगोपिकाभिः सहाजस्रं विहरति । कदापि ब्रह्मण एकस्मिन् दिने कस्मिंश्चित् समये विशेषलीलास्वादनाय व्रजभूमौ अवतरति । एतत् सर्वं ब्रह्मसंहितामङ्गलात्मकश्लोकत एव प्रमाणीभवति । तथाहि—

आनन्दचिन्मयरसप्रतिवोधिताभि-
स्ताभिर्य एव निजरूपतया कलाभिः ।

गोलोक एव निवसत्यखिलात्मभूतो
गोविन्दमादिपुरुषं तमहं भजामि ॥

व्रजस्य सर्वा गोप्यो भगवतः श्रीकृष्णस्यः प्रेयस्यः सन्ति । एता शतशो यूथेषु विभक्ताः सन्ति । प्रतियूथं लक्षलक्षगोप्यस्तिष्ठन्ति । उज्ज्वलनीलमणौ तासां यूथेश्वरीणां नामानि गृहीत्वा तासु राधैव सौभाग्यधौरेया उक्ताऽस्ति, यतः सर्वा अपि सख्यो राधामेव तत्र निरन्तरं सेवन्ते—

इत्यादीनां तु शतशो यूथानि व्रजसुभ्रुवाम् ।
लक्ष्यसंख्यास्तु कथिता यूथे यूथे वराङ्गनाः ॥ ५८ ॥
सर्वा यूथाधिपा एता राधाद्याः कुङ्कुमान्तिमाः ।
किन्तु सौभाग्यधौरेया अष्टौ राधादयो मताः ॥ ५९ ॥
यूथाधिपत्वेऽप्यौचित्यं दधाना ललितादयः ।
स्वेष्टराधादिभावस्य लोभात् सख्यरुचिं दधुः ॥ ६० ॥

अष्टानां यूथेश्वरीणां मध्ये राधाचन्द्रावल्यौ उभे सर्वतः श्रेष्ठे अभिमते स्तः, ययोः द्वयो यूंथयो कोटि-कोटिसंख्यका व्रजगोप्यो विराजन्ते । इत्थं तस्मिन् यमुनापुलिने शतकोटिगोपीभिः साकं भगवतः श्रीकृष्णस्य रासः परिव्याप्त आसीत्—

तास्वपि सर्वथा श्रेष्ठे राधाचन्द्रावलीत्युभे ।
यूथयोस्तु तयोः सन्ति कोटिसंख्यो मृगीदृशः ॥ १ ॥
अभूदाकुलितो रासः प्रमदाशतकोटिभिः ।
पुलिने यामुने तस्मिन्नित्येषाचागमी प्रथा ॥ २ ॥

श्रीराधा-चन्द्रावल्योः द्वयोर्मध्ये राधिकैव सर्वप्रकारेण श्रेष्ठतराऽस्ति, या महानुभावस्वरूपा तथा नानागुणैः समस्तव्रजगोपिकासुः श्रेष्ठा प्रेष्ठा च प्रोक्ता । यथा नद-नदी-सरोवरादिषु जलाशयत्वे सत्यपि तत्र जलधित्वं नास्ति, तत्तु केवलं समुद्र एव वर्तते तथैव श्रीराधायामेव महानुभावत्वमस्ति, नान्यत्र । तथाचोक्तम्—

तयोरप्युभयोर्मध्ये राधिका सर्वसाधिका ।
महाभावस्वरूपेयं गुणैरतिवरीयसी ॥ ३ ॥

गोपालतापिन्युपनिषद उत्तरभागे या गन्धर्वा प्रोक्ता सा श्रीराधकैवास्ते । ऋग्वेद-परिशिष्टे राधिकया सह माधवो माधवेन च सह राधिका विराजते इत्युक्तमस्ति । अतः पद्मपुराणे श्रीराधाया महात्म्यं वर्णयता देवर्षिणा नारदेन प्रोक्तमस्ति यद् यथा राधिका भगवतो ऽतिशयप्रियास्ति तथैव राधाकुण्डमपि तस्यात्यन्तं प्रियतममस्ति—

यथा राधा प्रिया विष्णोस्तस्याः कुण्डं प्रियं तथा ।
सर्वगोपीषु सैवेका विष्णोरत्यन्तवल्लभाः ॥

गौतमीतन्त्रे प्रोक्तमस्ति यत् ह्लादिनीशक्तेः यो सारस्वरूपो मदनाख्यो भावोऽस्ति सा महानुभावा परां काष्ठामधिगता भगवता सह तादात्म्यं प्राप्ता सती राधा कथ्यते यतः सर्वदा सुष्ठुकान्तस्वरूपा वृषभानुपुत्री कृतषोडशशृङ्गारा द्वादशाभरणाश्रिता विद्यतेतराम्—

ह्लादिनी या महाशक्तिः सर्वशक्तिवरीयसी ।
तत्सारभावरूपेयमिति तन्त्रे प्रतिष्ठिता ॥ ६ ॥
सुष्ठुकान्तस्वरूपेयं सर्वदा वार्षभानवी ।
कृतषोडशसंस्कारा द्वादशाभरणाश्रिता ॥ ७ ॥

यथा भगवति श्रीकृष्णे नन्दनन्दनत्वं निरन्तरं विद्यमानमस्ति तथैव श्रीराधिकायामपि वृषभानवीत्वं विद्यते । षोडशसंस्कारा द्वादशाभरणानि च इत्थं सन्ति ।

अथैकदा सायंकाले श्रीकृष्णस्य व्रजागमनसमये उद्यानस्थितां कृतषोडशशृङ्गारां राधिकां वीक्ष्य सुवलः भगवन्तं श्रीकृष्णं कथयति—सखे ! राधाया अङ्गशोभामवलोकय—

स्नाता नासाग्रजाग्रन्मणिरसितपटा सूत्रिणी वद्धवेणिः
सोत्तंसा चर्चिताङ्गी कुसुमितचिकुरा स्रग्विणी पद्महस्ता ।
ताम्बूलास्योरुविन्दुस्तवकितचिवुका कज्जलाक्षी सुचित्रा
राधा रक्तोज्वलाङ्घ्रिः स्फुरति तिलकिनी षोडशाकल्पिनीयम् ॥

एवमेकदा द्वादशाभरणाश्रितां राधां विलोक्य पौर्णमासी सखी स्वमनस्येव विचन्तयति —

दिव्यचूडामणीन्द्रः पुरटविरचिताकुण्डलद्वन्द्वकाञ्ची
निष्का चक्रीशलाका युगवलयघटा कण्ठमूर्षोर्मिकाच ।
हारास्तारानुकारा भुजकटकतुलाकोटयोरत्नक्लृप्ता-
स्तुङ्गा पादाङ्गुलीयच्छविरिति रविभि भूँषणै र्भाति राधा ॥

विभावानुभावसात्त्विकसंञ्चारिभि र्भावैः पुष्टा मधुरा रतिः आस्वाद्ययोग्या सती काव्यरसिकैः विद्वद्भिः मधुरो भक्तिरस उच्यते । भगवतः श्रीकृष्णस्य व्रजवालानां च परस्परसंभोगस्य मूलकारणमस्ति मधुरारतिरेव । मधुरापरपर्याया रते लंक्षणं यथा—

मिथो हरे र्मृगाक्ष्याश्च सम्भोगस्यादिकारणम् ।
मधुरापरपर्याया प्रियताख्योदिता रतिः ॥

श्रीकृष्णः तत्प्रियव्रजवालाश्च सन्ति आलम्वनानि । मुरलीशब्दादि उद्दीपनमस्ति । कटानिरीक्षणस्मितादयः अनुभावः, आलस्यादयः सन्ति व्यभिचारिभावश्च । अष्ट सात्विकाः भावाः भवन्ति ।

मधुरे रसे भगवान् श्रीकृष्णः तत्प्रियाः ब्रजसुन्दर्यश्च सन्ति आलम्बनम् ! भगवति श्रीकृष्णे द्वौ भावौ विद्येते-एकः पतिभावः, द्वितीयश्चोपपतिभावः । वैवाहिक मान्यतानुसारं यो वैदिकविधिना कन्यायाः पाणिग्रहणं कुरुते स भवति पतिः । यथा—

रुक्मिणं युधि विजित्य रुक्मिणीं द्वारकामुपगम्य विक्रमी ।
उत्सवोच्छलितपौरमण्डलः पुण्डरीकनयनः करेऽग्रहीत् ॥

यश्च आसक्तिवशाद् धर्मस्योल्लघनं विधाय परकीयपत्नीं प्रति अनुरक्तो भवति स उपपतिः कथ्यते, । किन्तु भगवति श्रीकृष्णेऽस्य लक्षणस्यास्ति अभावः । लीलाशक्त्या योगमायया रसविशेषपरिपोषाय ब्रजाङ्गनासु परकीयात्वं संचाल्य औपपत्यभावो वोधितः । वस्तुतो ब्रजगोपिका भगवतः श्रीकृष्णस्य सन्ति नित्यपत्न्य एव । यथा लोके औपपत्यभावोऽधर्मतया विगीतः, परं भगवति श्रीकृष्णे न विगीतो भवति । लोके परोढाभावस्य विगीतत्वेऽपि स केवलं भगवति श्रीकृष्णमात्रे कामनया ब्रजगोपिकासु परमसंगतो भवति ।

तम्भो यथा

अभ्युक्ष्य निष्कं पतयालुना मुहुः स्वेदेन निष्कम्पतया व्यवस्थिता ।
पञ्चालिका कुञ्चितलोचना कथं पञ्चालिकाधर्ममवाप राधिका ॥

रामोञ्चो यथा

चुम्बन्तमालोक्य चमूरुचक्षुषां चमूरुमूषां युगपन् मुरारिम् ।
व्योमाङ्गणे तत्र सुराङ्गनावली रोमाञ्चिता विस्तृतदृष्टिराबभौ ॥

किञ्चिद्दूरप्रवासो यथा

दृष्टिं विधाय सुरभीनिकुरम्बवीथ्यां कृष्णेति वर्णयुगलाभ्यसने रसज्ञाम् ।
शुश्रूषणे मुरलिनिश्वसितस्य कर्णौ चित्तं सुखे तव नयहरद्य राधा ॥

एकदा विल्वमङ्गलो भगवन्तं श्रीकृष्णं कथयति-छलपूर्वकं राधासमीपमुपस्थायाहं प्रोक्तवान् देवि ! अद्य मयैकमपूर्वं दृश्यं दृष्टं-वसन्ते पुष्पशीलापि माधवी अद्यत्वे शरदर्तौ पुष्पिता जाता । तच्छ्रुत्वैव सा वृषभानुसुता निकुञ्जभवनं प्रस्थिता । अतो भवताऽप्यति शीघ्रमेव तत्र प्रस्थेयम्—

न पुनरिदमपूर्वं देवि ! कुत्रापि दृष्टम्
शरदि यदियमारान्माधवी पुष्पिताऽभूत् ।
इति किल वृषभानो र्लम्भिताऽसौ कुमारी
ब्रजजनयुवराज ! व्याजतः कुञ्जवीथीम् ॥ ४ ॥

उज्वलनीलमणौ रूपगोस्वामिना औपपत्यभावे शृङ्गाररसस्योत्कर्षोऽङ्गी क्रियते ।

यथा—

अत्रैव परमोत्कर्षः शृङ्गारस्य प्रतिष्ठितः।

उपपतिभावे रसविद्भिर्विद्वद्भिः यल्लघुत्वं प्रतिपादितं तत् प्राकृते नायके एव बोद्धव्यं, न तु रसनिर्यासास्वादनहेतवेऽवतारग्रहीतरि भगवति श्रीकृष्णेऽपि। श्रीहरिः नित्यं निजधाम्नि गोलोके राधादिकया निजह्लादिनीशक्त्या मधुरं रसमास्वादयति। परन्तु तत्र गोलोके रसनिर्यासस्यास्ति अभावः। अतो गोलोकाद् व्रजेऽवतीर्य रास-लीलादिकं कार्यं कुरुते। साहित्यदर्पणकारेण विश्वनाथेन परोढामनुरागिणीं वेश्यां च त्यक्त्वा अवशिष्टा नायिका दक्षिणादयो नायकाश्च आलम्बनानि भवितुमर्हन्तीत्युक्त्वा परोढा-वेश्ये नायिके रसवर्जिते स्तः। अतः परोढा रमणी निषिद्धाऽस्ति, परन्तु स निषेधः कुलाङ्गनासमूहं वर्जयित्वैव प्रवर्तते। तत्र परोढात्वं रसपरिपोषकमस्ति। रसास्वादनार्थं रसिकमण्डलेश्वरः भगवान् श्रीकृष्णो व्रजे प्रकटीभूयावतारी मूर्तिमान् शृङ्गाररसमयोऽस्ति यथा गोपिका मूर्तिमत्स्वरूपाः तथा तस्याह्लादिनीशक्तयः सन्ति। ताः सर्वा गोपिका व्रजेऽवतार्य भगवता श्रीकृष्णेन ताभिः सह रसविधिना शृङ्गाररसस्यास्वादनं कृतम्। तत्र कामप्रवर्तकस्य शृङ्गारस्य निषेधो वर्तते। परदारनिष्ठशृङ्गाररसस्य प्रवृत्तिः शास्त्रे निषेद्धाऽस्ति, तदास्वादनपि दुरदृष्टोत्पदक-नरकपातस्यास्ति कारणम्। भगवता श्रीकृष्णेन तु स्वकीया आह्लादिनीशक्तिरूपिणीः परमाकान्ताः व्रजवधूः प्रपञ्चेऽवतार्य रसपोषकपरकीयाभावस्यास्वादनार्थं तासु परदारात्वभावं संभाव्य ताभिः साकं तन्मय्यो नाना लीलाः कृताः। यः ता वर्णयति, शृणोति, आस्वादयति च, स तस्मिन् परां भक्तिं प्राप्नोति तस्य कामक्रोधादयो हृद्रोगा दूरी भवन्ति। एवं रासपञ्चाध्याय्याः फलश्रुतावुक्तमस्ति। व्रजदेवीनां नन्दनन्दने भगवति श्रीकृष्णे याऽनिर्वचनीया भावनिष्ठाऽवर्तत तां प्रधानकृष्णभक्ता अपि ज्ञातुं न शक्नुवन्ति।

अङ्गिनि शृङ्गाररसे द्विविधो भावो वर्तते दाम्पत्यमयः, औपपत्यमयश्च। तत्र वसुदेवनन्दनाभिमानिनि भगवति श्रीकृष्णे दाम्पत्यमयो भावः, नन्दनन्दनाभिमा-निनि श्रीकृष्णे चौपपत्यमयो भावः पुष्टिमश्नुते। तथाचोक्तं सूर्योपरागप्रसंगे स्यमन्त-पञ्चके क्षेत्रे समवेतानां द्रौपद्याः श्रीकृष्णपत्नीनां च परस्परं वार्तालापे द्रौपद्या पृष्ठाः श्रीकृष्णपत्न्यः प्रेम्णा प्रोचुः—

न वयं सध्वि ! सम्राज्यं स्वाराज्यं भौज्यमप्युत।
वैराज्यं पारमेष्ठ्यं च आनन्त्यं वा हरेः पदम्॥
कामयामह एतस्य श्रीमत्पादरजः श्रियः।
कुचकुङ्कुमगन्धाढ्यं मूर्ध्ना वोढुं गदाभृतः॥

व्रजस्त्रियो यद् वाञ्छन्ति पुलिन्द्यस्तृणवीरुधः ।
गावश्चारयतो गोपाः पादस्पर्शं महात्मनः ॥
(श्री० भा० १०।८३।४१-४३)

अथ च दाम्पत्यमयभाववतीनां पुरसुन्दरीणां, कृष्णपत्नीनां विषयभूते नन्दनन्दने यथा स्पृहा श्रूयते, न तथा स्पृहा औपपत्यमयभाववतीनांव्रजयुवतीनां दम्पत्यमयभावतीपुरसुन्दरीविषयभूते भगवति वासुदेवे न श्रूयते, नापि दृश्यते। गोपीनां व्रजेन्द्रनन्दने या निष्ठाऽस्ति तस्या परिपाटीमुत्तमोत्तमा भक्ता अपि न ज्ञातुं शक्नुवन्ति। व्रजबालाभिः स्वप्नेऽपि वसुदेवनन्दनत्वनिष्ठा न स्वीकृता तथा भगवान् श्रीकृष्णोऽपि व्रजनिवाससमये आत्मानं स्वप्नेऽपि वासुवेदरूपेण न जानातिस्म। तथाहि रूपगोस्वामिना उज्ज्वलनीलमणौ नायिकाभेदनिरूपणप्रकरणे—

व्रजेन्द्रनन्दनत्वेन सुष्ठुनिष्ठामुपेयुषः ।
यासां भावस्य सा मुद्रा सद्भक्तैरपि दुर्गमा ॥ ४ ॥

यथा ललितमाधवे—

गोपीनां पशुपेन्द्रनन्दनजुषो भावस्य कस्तां कृती
विज्ञातुं क्षमते दुरूहपदवीं सञ्चारिणः प्रक्रियाम् ।
आविस्कुर्वति वैष्णवीमपि तनुं तस्मिन् भुजैर्जिष्णुभिः
यासां हन्त चतुर्भिरद्भुतरुचिं रागोदयः कुञ्चति ॥५॥

माथुराविहारे श्रीराधिका अत्यधिकं विवशा सती यमुना खेलातीर्थे निमग्ना भूत्वा सूर्यमण्डले समुपस्थिता। तस्मिन् समये सूर्यपुत्री यमुनाऽऽत्मनो मातरं सज्ञां सम्बोध्योक्तवती—मातः। नन्दनन्दनस्य भगवतः श्रीकृष्णस्य भावं को विज्ञातुं शक्नोति। तस्य भावस्य मार्गोऽत्यन्तं कठिनोऽस्ति तत्प्रक्रियापि अतिदुरूहा विद्यते। एकदा व्रजराजनन्दनः सपरिहासमात्मनि नारायणरूपमाविर्भावयामास, परन्तु तद्रूपं विलोक्य गोपीनां रागोदयः संकुचितो जातः। न तद्रूपे तासामणीयानपि कृष्णसम्बन्धी रागोऽभवत्। गोपीनां श्रीकृष्णस्य द्विभुजरूपमेव प्रियमासीन्नं चतुर्भुजं रूपम्।

अपि च गोपरमणीनां मध्ये राधाया नन्दनन्दनविषयकोऽनुरागोऽतिशयवानासीत्। एकदा परिहासं कुर्वता भगवता श्रीकृष्णेन चतुर्भुजं रूपं धृतं, परन्तु राधाया दर्शनेन चतुर्भुजत्वं परिहाय तत्क्षणे द्विभुजो जातः—

भुजाचतुष्टयं क्वापि नर्मणा दर्शयन्नपि ।
वृन्दावनेश्वरीप्रेम्णा द्विभुजः क्रियते हरिः ॥ ६ ॥

गोवर्द्धनपर्वतस्यापत्यकायां प्रसिद्धरासस्थल्यां भगवान् श्रीकृष्णो रासलीलाया तत्पर आसीत् । स गोपीनां भावोत्कण्ठां वर्द्धयितुं तत्रारण्ये यदा प्रच्छन्नोऽभवत् । तदा गोपवालाः तमन्विष्यन्त्यः तत्रोपस्थाय श्रीकृष्णं परिवव्रु, तदा किं कर्तव्यशून्यो स स्वबुद्धिप्रतिभया चतुर्भुजो नारायणोऽभवत् । गोपिकाः तच्चतुर्भुजरूपमाकलय्य 'नायं व्रजराजनन्दनः, अपितु एष साक्षान्नारायणदेवोऽस्तीति विचार्थं तं नमस्कृत्य च श्रीकृष्णप्राप्तिकामनां कृत्वा यदा प्रचालितुमारेभिरे तदैव राधिका तत्रोपस्थिता । तामालोक्य श्रीकृष्णो न तच्चतुर्भुजं रूपं स्थापयितुं प्राभवत्, तस्य द्वौ भुजौ तत्काले एव तत्र विलीनौ जातौ । अस्येदं तात्पर्यम्—यद् यथा ब्रह्मेन्द्रादौ ऐश्वर्यमस्ति न, तत्तदग्रे स्थातुं शक्नोति तथैव भगवान् श्रीकृष्णोऽस्ति प्रेमाधीनः प्रेमाग्रे तत्तस्यैश्वर्यं न तिष्ठति, परन्तु तस्य तिरोधानं जायते, यतो हि तदपि प्रेमवन्नित्यं नास्ति । तत् क्वचित् परममहद्रूपेण, क्वचन च सूक्ष्मरूपेण परिणमते । वृन्दावनेश्वर्यां राधायां परममहद्रूपेण वर्तते । अतः तत्समक्षे भगवतः श्रीकृष्णस्यैश्वर्यं न प्रकटितं भवति ।

व्रजमण्डले सर्वासु च गोपिकासु मध्ये मुख्या दश गोप्यो भविष्योत्तरे श्रूयन्ते यथा (१) गोपाली (२) पालिका (३) धन्या (४) विशाखा (५) धनिष्ठका (६) राधा (७) अनुराधा (८) शोभा (९) उमा (१०) तारका च—

गोपाली पालिका धन्या विशाखान्या धनिष्ठका ।
राधानुराधा शोभोमा तारका दशमी तथा ॥

तास्वापि दशसु गोपिकासु मध्ये राधाया एव प्राधान्यं पद्मपुराणस्य कार्तिकमाहात्म्ये तत्कुण्डवर्णन प्रसङ्गे चाभिहितमस्ति । यथा भगवतो विष्णो राधा अत्यन्तप्रियाऽस्ति तथैवेतत् कुण्डमपि तस्यात्यन्तं प्रियं वर्तते

तथाहि सर्वासु गोपीसु सा एव राधैव विष्णोरत्यन्तप्रिया वरीवर्ति । अतएव मत्स्यपुराण-स्कन्दपुराणयोः शक्तित्वसाधारण्येनाभिन्नतया गणनायामपि तस्या एव वृन्दावने प्राधान्यं प्रोक्तमस्ति—

रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने ।

तथा च वृहद्गौतमीयदृष्ट्या राधात्वेन प्रसिद्धा सर्वतो विलक्षणा श्री विराजते तामुद्दिश्यैव श्रीमद्भागवतस्य दशमे स्कन्धे गोपीनामिदं वाक्यम्—

अनया राधितो नूनं भगवान् हरिरीश्वरः ।
यन्नो विहाय गोविन्दः प्रीतो यामनयद्रहः ॥

मत्स्यपुराणे रुक्मिण्या सह पठिता श्रीराधा तु सर्वतः पूर्णा लक्ष्मीः कृष्णमयी परदेवता वा प्रोक्तास्ति—

देवी कृष्णमयी प्रोक्ता राधिका परदेवता।
सर्वलक्ष्मीमयी सर्वकान्तिः सम्मोहिनी यथा॥

अत एवोक्तं भगवता श्रीकृष्णेन—

सत्वं तत्त्वं परं त्वं च तत्त्वं त्रयमहं किल।
त्रितत्त्वरूपिणी सापि राधिका मम वल्लभा॥
प्रकृतेः पर एवाहं सापि मच्छक्तिरूपिणी

ऋक्परिशिष्टश्रुतावपि—

राधया माधवो देवो माधवेनैव राधिका।
विभ्राज्जते जनेष्वाद्या शक्तिः विश्वरूपिणी॥

ब्रह्मवैवर्त्तपुराणस्य श्रीकृष्णजन्मखण्डे सर्वासु गोपीषु श्रीराधिकैव श्रीकृष्णस्य प्राणेभ्योऽप्यधिका धन्या मान्या च प्रोक्तेति—'कृष्णप्राणाधिका गोपी धन्या मान्य च योषिताम्।'

पुराणानुसारं राधायाः उत्पत्तिः दैवी अभिमताऽस्ति। गोलोकस्थितवृन्दावनस्य रासमाण्डले रमणीये सिंहासने विराजमानस्य भगवतः श्रीकृष्णस्य यदा रमणाकाङ्क्षा जागर्ति तदा तस्य रिरिंसावृत्तिरेव राधाया मूर्त्तं रूपं धत्ते। तस्य दक्षिणमङ्गं श्रीकृष्णरूपेण वामाङ्गं च राधारूपेण परिणमते। तदुक्तं ब्रह्मवैवर्तस्य श्रीकृष्णजन्मखण्डे

रमणं कर्तुमिच्छा च तद् बभूव सुरेश्वरी।
इच्छया च भवेत् सर्वं तस्य स्वेच्छामयस्य च॥
एतस्मिन्नन्तरे दुर्गे द्विधारूपो बभूव सः।
दक्षिणाङ्गं च श्रीकृष्णो वामाङ्गं चैव राधिका॥ =४८।२७-२८

एवं राधा भगवतः श्रीकृष्णस्य ह्लादिनी शक्तिरूपा अभिमता। पद्मपुराणास्य पातालखण्डे च राधा भगवतः श्रीकृष्णस्य आद्याप्रकृतित्वात् प्रधाना प्राणवल्लभा प्रोक्तास्ति तथा दुर्गाद्या तदंशसम्भवा उक्ता सन्ति—

तत्प्रिया प्रकृतिस्त्वाद्या राधिका कृष्णवल्लभा।
तत्कला कोटिकोट्यंशा दुर्गाद्यास्त्रिगुणात्मिकाः॥

अपि च श्रीकृष्णपार्षदवर्णनप्रसंगे भगवतीं पार्वतीं प्रति भगवता सदाशिवेन राधिकां मूलप्रकृतिमुक्त्वा तदंशानां ललितादीनां प्रधानानामष्टगोपीनामष्टकोणेषु उल्लेखः कृतोऽस्ति—

प्रत्यङ्गं रभसावेशाः प्रधानाः कृष्णवल्लभाः।
ललिताद्याः प्रकृत्यंशा मूलप्रकृतिराधिका॥

संमुखे ललिता देवी श्यामला वायुकोणके ।
उत्तरे श्रीमती धन्या ऐशान्यां श्रीहरिप्रिया ॥
विशाखा च तथा पूर्वे शैव्या चाग्नौ ततः परम् ।
पद्मा च दक्षिणे पश्चान्नैर्ऋते क्रमशः स्थिताः ॥
अष्टौ प्रकृतयः पुण्याः प्रधानाः कृष्णवल्लभाः । ७०।४-७।

तदनतरं च चन्द्रावलीप्रभृतीरष्टौ गोपिका अपि गणयित्वा षोढश गोपिका प्रधाना प्रकृतयः कृष्णवल्लभा इचोक्ताः सन्ति—

चन्द्रावली चित्ररेखा चन्द्रा मदनसुन्दरी ।
प्रिया च श्रीमधुमती चन्द्ररेखा हरिप्रिया ॥
षोडशाद्याः प्रकृतयः प्रधानाः कृष्णवल्लभाः ॥ = ७०।८-९।

समानरूपगुणसौन्दर्यशालिन्यः सुमनोहराः सुन्दरवेशाः किशोरीवयसः अन्या अनेकाः गोपकन्यकाअपि प्रेमप्रगाढ़ाः तत्र गूढ़रहस्यानि गायन्ति—

वृन्दावनेश्वरी राधा तथा चन्द्रावली प्रिया ।
अभिन्नगुणलावण्यसौन्दर्याश्चारुलोचनाः ॥
मनोहराः मुग्धवेशाः किशोरीवयसोज्ज्वलाः ।
अग्रेसरास्तथा चान्या गोपकन्याः सहस्रशः ॥ =७०।१०, ११

रूपगोस्वामिद्वाराविरचितं विदग्धमाधवनाटकं राधाकृष्णाभ्यां कृतानां ललितलीलानामस्ति आकरः । नाटकेऽत्र बृन्दावनस्य केलिकथाया रमणीयरूपेण स्तुतीकरणे कवेः प्रयासः प्रशंसनीयः । नाटककारस्य राधाकृष्णयोः पारस्परिकः संयोगोऽभीष्टः प्रतीयते । तत्र कृष्णलीलातोऽसम्बद्धानां घटनानामुल्लेखमकृत्वा तयो पारस्परिकमिलने सहायिकानां घटनानामेव संकलनं कृतमस्ति । तत्र तयोः संयोगविषयिका घटना एतादृशी रोचिकाऽस्ति यत् कस्यापि दृश्यस्य बिम्बात्मकं रूपं सहसा समुपतिष्ठते । विदग्धमाधवस्य नाटकस्य मूलकथा गर्गसंहिता = ब्रह्मवैवर्त्त; पद्मपुराण-गीता-गीतगोविन्द-कृष्णकर्णामृतादिषु ग्रन्थेषु आधारिताऽस्ति । रूपगोस्वामिना हि उज्ज्वलनीलमणौ परीकयावादस्य निराकरणं कृत्वा स्वकीयावादस्य स्थापना कृताऽस्ति, तथा भगवतः श्रीकृष्णस्य स्वकीयासु नायिकाषु अष्टानां राधा-शैव्या-चन्द्रावलीजाम्बतीप्रमुखानां प्रामुख्यं स्वीकृतमस्ति ।

यथा श्रीमद्भागवते ब्रजस्य गोपिकाभिः सह भगवतः श्रीकृष्णस्य रासलीलाया विधानमस्ति तथैव विष्णुपुराणेऽपि भगवान् श्रीकृष्णो गोपीजनवल्लभमात्रमेव प्रोक्तोऽपि, परन्तु तत्र कस्यापि गोपिकाया उल्लेखो नास्ति, किन्तु ब्रह्मवैवर्त-पद्मपुराणयोः राधाया जन्मनः तथा श्रीकृष्णेन सह तस्या लीलाया विशिष्टं वर्णनं विद्यते ।

इत्थं यदि श्रीकृष्णजीवनचरित्रस्य सम्यक् मूल्याङ्कनं क्रियेत तर्हि स महाभारते योद्धृरूपेण राजनितीज्ञरूपेण उपतिष्ठते तथा पुराणेषु रसिकरूपेण दृष्टिगोचरी भवति । श्रीकृष्णस्य तिसृणां व्रजलीला-मथुरालीला-द्वारकालीलानां यद् वर्णनमुपलभ्यते, तत्तस्य त्रिणि रूपाणि प्रस्तौति । राधाकृष्णयोर्नित्यं क्रीड़ास्थलं वृन्दावनमपि तच्च अमन्दानन्दसृष्टौ सहायकमस्ति—

नित्यौ गोलोक ब्रह्मण्डौ प्रोक्तौ शाश्वदकृत्रिमौ ।
प्रत्येकं लोमकूपेषु ब्रह्माण्डं परिकीर्तितम् ।
प्रत्येकं प्रतिब्रह्माण्डं ब्रह्मविष्णुशिवादयः ॥

अर्वाचीनेषु पुराणेषु भगवतः श्रीकृष्णस्य ब्रह्मरूपं प्रच्छाद्य ईदृशी लौकिकी शृङ्गारज्वाला प्रज्वालिताऽस्ति, यया श्रीकृष्णस्य ब्रह्मरूपं वासनामय्यां ज्वालायां भस्मसाद् भवति, स रसिकशिरोमणिमात्रं तिष्ठति । एवं तत्तत्पुराणेषु भगवतः श्रीकृष्णस्य रसिकरूपवर्णनं दरीदृश्यते ।

अस्य श्रीकृष्णरूपस्य पर्याप्तः परिचयः ब्रह्मवैवर्तस्य श्रीकृष्णजन्मखण्डे प्राप्यते, यत्र ब्रह्मरूप-रसिक रूपयोः विरोधाभासो दृश्यते ।

महाभारते भगवतः श्रीकृष्णस्य यद् विराट्स्वरूपं प्रतिपादितमस्ति तथा श्रीमद्भागवते विष्णुपुराणे च यः भगवान् श्रीकृष्णः परब्रह्मरूपेण वर्णितोऽस्ति तद्रूपस्य तिरोभावो नितरामर्वाचीनेषु पुराणेषु, जातमस्ति, तद्रूपं शृङ्गारात्मकमश्लीलं च दरीदृश्यते ।

ब्रह्मवैवर्तपुराणस्य श्रीकृष्णजन्मखण्डे गृहिणां धर्मवर्णनप्रसङ्गे भगवता श्रीकृष्णेन स्वयं राधाया उत्पत्तिविषये प्रोक्तमस्ति यदेकदा गोलेके रासं कुर्वतो मम शरीरस्य वामभागात् षोडशवार्षिकी काऽपि वाला आविर्भूय कटाक्षपूर्वकं मां निरीक्ष्य रमणोत्सुका रासे संभूय मां ददर्श तेन सा विद्वद्भिः राधेति नाम्ना समाख्याता । सैव च प्रकृतिरीश्वरी शक्तिः सर्वमङ्गला च प्रोच्यते—

एकदा मयि गोलोके रासे नित्यं प्रकुर्वति ।
आविर्भूता च वामाङ्गाद् वाला षोडशवार्षिकी ।
मां ददर्श कटाक्षेण रमणी रमणोत्सुका ।
रासे संभूय रामा सा दधार पुरतो मम ॥
तेत राधा समाख्याता पुराविद्भिः प्रपूजिता ।
प्रकृष्टा प्रकृतिश्चास्यास्तेन प्रकृतिरीश्वरी ।
सर्वमङ्गलदक्षा सा तेन स्यात् सर्वमङ्गला ॥ ८४.७३-७६ ॥

सा वै मत्प्राणवल्लभा गोलोकवासिनी राधा श्रीदाम्नः शापकारणादिदानीं पुण्यभूमेः भारतवर्षस्य व्रजमण्डले वृषभानुगृहे समुत्पन्ना। राधा चरणकमलधूलिपरिपूते वृन्दावने निवसतां गोपाङ्गनां च जीवनं सफलं, ये राधापादपद्मं प्रत्यहं सस्पृहं पश्यन्ति। इह महान्तो योगीन्द्र-मुनीन्द्र-सिद्धेन्द्र-वैष्णवाः सन्तो नित्यं मानिनीं राधिकामुपासते—

गोलोकवासिनी राधा कृष्णप्राणाधिका परा।
तत्र श्रीदामशापेन वृषभानुसुताऽधुना॥ =९४–८०
अहो भारतवर्षेषु पुण्यं वृन्दावनं वनम्।
राधापादाब्जसंस्पर्शरजःपूतं सुरेप्सितम्॥ ९७–३५॥
गोपानां गोपिकानाञ्च सफलं जन्म जीवनम्।
नित्यं पश्यन्ति ते पादपद्मं ब्रह्मादिदुर्लभम्॥
मानिनीं राधिकां सन्तः सदा सेवन्ति नित्यशः।
योगीन्द्राश्च मुनीन्द्राश्च सिद्धेन्द्रा वैष्णवास्तथा॥ =९७।४२-४३

यदा नन्दोऽक्रूरेण साकं मथुरामुपगम्य कंसं निहत्य मथुरायामेव स्थातुं कृतनिश्चयं भगवन्तं श्रीकृष्णं प्रार्थयद् यद् आयुष्मन्! रम्यं वृन्दावनं, सुरम्यं गोकुलं, सुन्दरं यमुनातटं, त्वत्प्रियं राशमण्डलं, गोपीः गोपबालकांश्च स्मर, सुतस्नेहां स्वमातरं यशोदां प्राणाधिकां राधां च कथं न स्मरसि? एकवारं किञ्चिद्दि नस्य कृते। गोकुलं गच्छ, इति कथयित्वा तं क्रोडे कृत्वा नेत्राश्रुणा अभिषिषेच—तदा भक्तवत्सलो भगवान् श्रीकृष्णस्तं सादरमुवाच—

स्मर वृन्दावनं तात! रम्यं पुण्यं महोत्सवम्।
गोकुलं गोकुलं रम्यं सुन्दरं यमुनातटम्॥
रमणीयं सुरम्यञ्च त्वत्प्रियं रासमण्डलम्।
गोपालिका गोपबालान् यशोदां रोहणीं प्रसूम्॥
प्राणाधिकां राधिकां न कथं स्मरसि पुत्रक!
वारमेकं स्वल्पदिनं गोकुलं गच्छ वत्सक॥
इत्येवमुक्त्वा नन्दश्च क्रोड़े कृष्णं चकार सः।
नेत्राश्रुणा च पूर्णेन तं सिषेच शुचान्वितः॥
चुचुम्ब तद्गण्डयुगं कृत्वा वक्षसि मोहतः।
सानन्दः परमानन्दो भगवांस्तमुवाच सः॥ =९०।७७-८०

तात! सर्वं कालकृतं मत्वा मोहं च परिहाय स्वकीयं गृहं गच्छ। मम प्रियभक्त उद्धवो गत्वा सर्वान् सम्बोध्ययिष्यति। तथा चोक्तं ब्रह्मवैवर्तस्य श्रीकृष्णजन्मखण्डे पालकत्वात् पितः।

सर्वं कर्मानुरोधेन काल एव करोति च ।
सर्वं कालकृतं तात ! विस्मयं न व्रजं व्रज ॥
कुतस्त्वं गोकुले वैश्यो नन्दो वैश्याधिपो नृपः ।
वसुदेवसुतोऽहं च मथुरायामहो कुतः ॥
पित्रा मे कंसभीतेन त्वद्गृहे च समर्पितः ।
पितुः परं पिता त्वं च माता मातुः परा पि वा ॥
माया दत्तेन ज्ञानेन सांप्रतं त्वं व्रजेश्वर !
त्यज मोहं महाभाग ! गच्छ तात ! सुखं गृहम् ॥ = ८९।७३-७६ ॥
गमनागमनार्थञ्चाप्युद्धवः कथयिष्यति ।
प्रस्थापयामि तं शीघ्रं विज्ञास्यसि ततः पितः ॥
यशोदां रोहिणीञ्चैव गोपिका गोपकालान् ।
प्राणाधिकां राधिका तां गत्वा सम्बोधयिष्यति ॥ = ९१।२, ३ ।

तदनुसारमेव भगवान् श्रीकृष्ण: प्रियभक्तमुद्धवं वृन्दावनं प्रेषयन्नुवाच—

गच्छोद्धव सुखं भद्र ! भविष्यति तव प्रियम् ।
सहर्षं गोकुलं गत्वा यशोदां रोहिणीं प्रसूम् ॥
गोपालबालसमूहञ्च राधिकां गोपिकागणम्
प्रबोधयाध्यात्मिकेन मद्दर्शन च शुच्छिदा ॥

तदनन्तरम् उद्धवो हि भगवत श्रीकृष्णस्य सन्देशमादाय मथुरां गत्वा गोपिनां भगवति श्रीकृष्णेऽपूर्वं प्रेम पर्यालोच्य वृन्दावनतो मथुरां प्रति प्रत्यावर्तनस्य बिचारमेव त्यक्त्वा गोकुले निवासस्य विचारं व्यक्तीकृतवान्—

तथाहि—

धन्यं भारतवर्षं च पुण्यदं शुभदं वरम् ।
गोपीपादाब्जरजसा पूतं परमनिर्जलम् ॥ ९४।७७
ततोऽपि गोपिका धन्या मान्या योषित्सु भारते ।
नित्यं पश्यन्ति राधायाः पादपद्मं सुपुण्यदम् ॥ ९४।७८
ये ये भक्ताश्च कृष्णस्य देवा ब्रह्मादयस्तथा ।
राधायाश्चापि गोपीनां कलां नार्हन्ति षोडशीम् ॥ ९४।८१
धन्योऽहं कृतकृत्योऽहमागतो गोकुलं यतः ।
गोपिकाभ्यो गुरुभ्यश्च हरिर्भक्ति लभेऽचलाम् ॥ ९४।८४
मथुरां च न यास्यामि तीर्थकीर्तेश्च कीर्तनम् ।
श्रोष्यामि किङ्करो भूत्वा गोपीनां जन्म जन्मनि ॥ ९४।८५

न गोपीभ्यः परो भक्तो हरेश्च परमात्मनः ।
यादृशीं लेभिरे गोप्यो भक्तिं नान्ये च तादृशीम् ॥ = ९४।८६

भगवतः श्रीकृष्णस्य वियोगेन अत्यन्तं कातरायाः राधिकाया यदा मूर्च्छा समायाता तदा तत्सखी कालिका तां समुद्बोधयितुमुद्धवं प्रोवाच । तथाहि—

साम्प्रतं मूर्च्छितां राधां युक्तो बोधयितुं बुधः ।
अत्र युक्तिः प्रधाना च तां प्रबोधय चोद्धव ॥ = ९४।११५

तदनुसारमेवोद्धव उवाच—

चेतनं कुरु कल्याणि ! जगन्मातर्निबोध माम् ।
उद्धवं कृष्णभक्तस्य किङ्करस्यापि किङ्करम् ॥ = ९४।११६
प्रसादं कुरु मातर्मां यास्यामि मथुरां पुनः ।
न स्वतन्त्रः पराधीनो योषा दारुमयी यथा ॥
यथा वृषो वशीभूतो वृषवाहस्य सन्ततम् ॥ = ९४।११७

तदन्तरं तेन भक्तराजेन उद्धवेन प्रबोधिता राधा मूर्च्छां त्यक्त्वा हृदयेन विद्रुयता प्रेम्णा प्रोवाच—

मथुरां गच्छ वत्स ! त्वं माञ्च विस्मर सम्पदा ।
अतोऽप्यधर्मो नास्त्येव भवतो भवसागरे ॥ = ९५।३
मदीयं वचनं सर्वं गत्वा कथय साम्प्रतम् ।
श्रीकृष्णं परमानन्दं शीघ्रमानय मत्प्रभुम् ॥ = ९५।४
स्मरामि मनसा शश्वन्नान्यो मनसि वर्त्तते ।
रात्रौ निद्रां परित्यज्य स्मरणं शोकवर्धनम् ॥ = ९५८
मामुद्धर ध्रुवं वत्स ! निमग्नां शोकसागरे ।
जीवाभयप्रदानेन तीर्थे स्नानफलं नृणाम् ॥ = ९५।९
प्रबोधितुं न शक्नोमि दुर्निवारञ्च मानसम् ।
चिन्तये चरणाम्भोजं कृष्णस्य परमात्मनः ॥ = ९५।१०
ध्यायन्ते यत्पदाम्भोजं ब्रह्मेशशेषसंज्ञकाः ।
कया वा सम्पदा तातः विस्मरामि च तं प्रभुम् ॥ = ९५।२४

आनन्दकन्दः सच्चिदानन्दो नन्दनन्दनो भगवान् श्रीकृष्णचन्द्रो गोकुले वृन्दावने च गोपवेशेन द्विभुजो विराजते तथा गोभिः, ग्रोपालैः, गोपिकाभिश्च साकं वैकुण्ठे चतुर्भुजरूपेण विराजते । इत्थं भगवतः श्रीकृष्णस्य द्विविधं रूपं सनातनं प्रतिपादितमस्ति । तथाहि ब्रह्मवैवर्तपुराणस्य श्रीकृष्णजन्मखण्डे—

गोलोके गोकुले रम्ये क्षेत्रे वृन्दावने वने ।
द्विभुजो गोपवेशश्च स्वयं राधापतिः शिशुः ॥ = ९४।८६ ॥
गोपालैः गोपिकाभिश्च सहितः कामधेनुभिः ।
चतुर्भुजोऽहं वैकुण्ठे द्विधारूपः सनातनः ॥ = ९४।८७ ॥

अपिच तत्रैव सप्तविंशाधिकशततमेऽध्यायेऽप्येतदेव स्पष्टीकृतम्—

गोकुले गोपवेशश्च पुण्ये वृन्दावने वने ।
चतुर्भुजश्च वैकुण्ठे महालक्ष्मीपतिः स्वयम् ॥ १२७।७७ ॥
नारायणश्च भगवान् यन्नाम मुक्तिकारणम् ।

राधामाधवयोर्भेदबुद्धेः नराधमस्य वंशहानि नरकगमनं च प्रोक्तमस्ति । दुग्धे धावल्यमिव कदापि भगवति श्रीकृष्णे राधाया वियोगो न संभवति यथा श्रीमती

श्री राजेश्वरी सा रसिका तथैव श्रीकृष्णो रसिकेश्वरः । विदग्धाया विदग्धेन संगमो गुणवान् भवति ।

राधा माधयोर्भेदं ये कुर्वन्ति नाराधमाः ।
वंशहानिर्भवेत्तेषां पच्यन्ते नरके चिरम् ॥ = १२२।४५
यावज्जीवनपर्यन्तं न विच्छेदो भविष्यतिं ।
राधामाधवयोर्देवि ! दुग्धधावल्ययोर्यथा ॥ = १२२।४८
रासेश्वरी त्वं रसिका श्रीकृष्णो रसिकेश्वरः ।
विदग्धाया विदग्धेन संगनो गुणवान् भवेत् ॥ = १२२।५०

यो हि पुरुषश्रेष्ठः आदौ राधाया नाम समुच्चार्य पश्चाद् भगवतः श्रीकृष्णस्य मनोरमं नाम समुच्चारयति, स एव पण्डितो योगी च लीलया गोलोकं व्रजति । व्यतिक्रमेण स पापी ब्रह्महत्याभाक् च भवति । तथाहि तत्रैव भगवान् श्रीगणेश आह—

आदौ राधां समुच्चार्य पश्चात् कृष्णं परात्परम् ।
स एव पण्डितो योगी गोलोकं याति लीलया ॥ = १२२।९।१० ॥
व्यतिक्रमे महापापी ब्रह्महत्यां लभेद् ध्रुवम् ।

यस्यातुलं सुदुर्लभं पादारविन्दं ब्रह्मेशशेषमहेशादयो देवाः, सनकादयो मुनीन्द्राः, जीवनमुक्ता महात्मानः, सिद्धेन्द्रा कपिलादयोः भक्ताश्च नित्यं ध्यायन्ति तस्यैव परात्परतरस्य ब्रह्मणः भगवतः श्रीकृष्णस्ये प्राणाधिका प्रियतरा श्रीराधिका देवी विद्यते—

यत्पादपद्ममतुलं ध्यायन्ते ते सुदुर्लभम् ।
सुरा ब्रह्मेशशेषाद्या मुनीन्द्राः सनकादयः ॥ = १२२।४ ॥
जीवनमुक्ता भक्ताश्च सिद्धेन्द्राः कपिलादयः ।
तस्य प्राणाधिदेवी सा प्रिया प्राणधिका प्रिया ॥ = १२२।५ ॥

सख्यां कृष्णप्रेमोत्कीर्तिर्यथा—

केलीकलासु कुशला नगरे मुरारे-
रामीरपङ्कजदृशः कति वा न सन्ति ।
राधे ! त्वया महदकारि तपो यदेष
दामोदरस्त्वयि परं परमानुरागः ॥

वृन्दावनेश्वर्यां श्रीराधायां रम्यशब्दवाक्यत्वं यथा—भगवान् श्रीकृष्णः स्वयमेव राधां सम्बोध्य कथयति प्रिये !

सुवदने वदने तव राधके ! स्फुरति केयमिहाक्षरमाधुरी ।
विकलतां लभते किल कोकिलः सखि ! यबाद्य सुधापि मुधार्थताम् ॥ २७ ॥

श्रीराधाया नर्मपाण्डित्यं यथा राधा भगवन्तं श्रीकृष्णं कथयति—

देव ! प्रसीद वृषवर्धन ! पुण्यकीर्ते ?
साध्वीगणस्तनशिवार्चननित्यपूत !
निर्मञ्छनं तव भजे रविपूजनाय
स्नाताऽस्मि हन्त ! मम न स्पृश न स्पृशाङ्गम् ॥ २९ ॥

गोकुलप्रेमवसतिं राधां विलोक्य व्रजेश्वरी यशोदा स्वकीयां कामपि सखीं ब्रवीति—

प्रेमसन्ततिभिरेव निर्ममे वेधसानुवृषभानुनन्दिनी ।
यादृशं पदमिता मनांसि नः स्नेहयत्यखिलगोष्ठवासिनाम् ॥ २९ ॥

अथैकदा लज्जया नतमुखीं मौनभूतां वस्त्रावरितां ता राधामालोक्य यशोदा कथयति—

न सुतासि कीर्तिदाथाः किन्तु ममैवेति तथ्यमख्यामि ।
प्राणिभि र्वीक्ष्य मुखं ते कृष्णस्यैवेति किं त्वपरे ॥

सखीप्रणयाधीना राधिका वृन्दासखीमुद्बोधयति—

उपदिश सखिवृन्दे ! वल्लवेन्द्रस्य सुनुं
किमयमिह सखीनां मामधीनां दुनोति ।
अपसरतु सशङ्कं मन्दिरान्मानिनीनां
कलयति ललितायाः किन्न शौटीर्यधाटीम् ॥ ४५ ॥

गिरिराजस्य गोवर्द्धनस्य धारणसमये राधा विशाखां कथयति—

उद्यम्य कन्दुकितमन्दरसोदराद्रिं
सव्यं करं कटिमनु स्थगयन्नसव्यम् ।
स्मेराननश्चलदृगञ्चलचञ्चरीक—
श्चित्ताम्बुजं मम हरिश्चटुलीचकार ॥

राधया श्रीकृष्णलीलानुकरणस्योदाहरणं यथा—

मृगमदकृतचर्या पीतकौशेयवासा
रुचिरशिखिशिखण्डा बद्धधम्मिल्लपाशा ।
अनृजुनिहितमंशे वंशमुत्क्वाणयन्ती
कृतमधुरिपुवेशा मालिनी पातु राधा ।

विलासोदाहरणं यथा—

अध्यासीनममुं कदम्बनिकटे क्रीडाकुटीरस्थली—
माभीरेन्द्रकुमारमत्र रभसादालोकयन्त्याः पुरः ।
दिग्धा दुग्धसमुद्रमुग्धलहरी लावण्यनिस्यन्दिभिः
कालिन्दी तव हृत्तरङ्गिततभरैस्तन्वङ्गि ! गङ्गायते ॥ ३२ ॥

गात्रमोटनं यथा—

व्रजाङ्गने वल्लवपुङ्गवस्य पुरः कुरङ्गीनयना सलीलम् ।
अप्यङ्गमङ्गं किल कुर्वतीयमनङ्गभङ्गं तरसा व्यतानीत् ॥ ७३ ॥

उज्ज्वलनीलमणौ रूपगोस्वामिनाऽपि—

वक्ष्यमाणै र्विभावाद्यैः स्वाद्यतां मधुरा रतिः ।
नीता भक्तिरसः प्रोक्तो मधुराख्यो मनीषिभिः ॥ ३ ॥

इत्यनुसारं विभावानुभावसात्त्विकसञ्चरिभि र्भावैः पुष्टा सती आस्वाद्ययोग्या मधुरा रतिः काव्यरसिकैः मधुरो भक्तिरस उच्यते । अर्थात्—

विभावैः, अनुभावैः, व्यभिचरिभिश्च भक्तानां हृदये स्वाद्यतामानीता = सम्यक् प्रापिता चमत्कारविशेषेण पुष्टा एषा कृष्णरतिरेव स्थायी भावः, सैव भक्तिरसो भवेत् । तथा चोक्तं हरिभक्तिरसामृतसिन्धोः दक्षिणविभागस्य प्रथमलहर्यां—

विभावैरनुभावैश्च सात्त्विकै र्व्यभिचारिभिः ।
स्वाद्यत्वं हृदि भक्तानामानीता श्रवणादिभिः ॥
एषा कृष्णरतिः स्थायी भावो भक्तिरसो भवेत् ।

अत्र विभावादिसामान्यलक्षणं यथा—

ये कृष्णभक्तमुरलीनादाद्या हेतवो रतेः ।
कार्यभूता स्मिताद्याश्च तथाष्टौ स्तब्धतादयः ॥ १३ ॥
निर्वेदाद्याः सहायाश्च ते ज्ञेया रसभावने ।
विभावा अनुभावाश्च सात्त्विका व्यभिचारिणः ॥ १४ ॥

तदेवमग्निपुराणेऽपि प्रोक्तमस्ति यद् येन रत्यादिर्विभाव्यते स विभावः स द्विविधो ज्ञेयः आलम्बनविभावः, उद्दीपनविभावश्च ।

विभाव्यते हि रत्यादि यत्र येन विभाव्यते ।
विभावो नाम सद्वेधाऽऽलम्बनोद्दीपनात्मकः ॥

अत एवोक्तं हरिभक्तिरसामृतसिन्धोः दक्षिणविभागे प्रथमलहर्याम्—

तत्र ज्ञेया विभावास्तु रत्यास्वादनहेतवः ।
ते द्विधाऽऽलम्बना एके तथैवोद्दीपनाः परे ॥

तत्रालम्बनविभावो यथा

कृष्णश्च कृष्णभक्ताश्च बुधैरालम्बना मताः ।
रत्यादे विषयत्वेन तथाधारतयापि च ।

उज्ज्वलनीलमणौ च अस्मिन्नाम्बनाः प्रोक्ता कृष्णस्तस्य च वल्लभाः

तत्र भगवान् श्रीकृष्णो यथा—

नायकानां शिरोरत्नं कृष्णस्तु भगवान् स्वयम् ।
यत्र नित्यतया सर्वे विराजन्ते महागुणाः ॥ २७ ॥
सोऽन्यस्वरूपाभ्यामन्यस्मिन्नालम्बनो मतः ।

अन्यरूपेण यथा—

मां स्नेहयति किमुच्चैः महिलेऽयं द्वारकावरोधेऽत्र ।
आं विदितं कुतुकार्थी वनितावेषो हरिश्चरति ॥

प्रगटरूपेण यथा—

अयं कम्बूग्रीवः कमलकमनीयाक्षिपटिमा
तमालश्यामाङ्गो स्फुरदरिदराद्यङ्कितकरः ।
दरश्रीवत्साङ्कः द्युतिरतितरां क्षत्रितशिराः ।
करोत्युच्चैर्मोदं मम मधुरमूर्ति मंधुरिपुः

अथोद्दीपनविभावः—

उद्दीपनास्तु ते प्रोक्ता भावमुद्दीपयन्ति ये ।
ते तु श्रीकृष्णचन्द्रस्य गुणाश्चेष्टा प्रसाधनम् ॥
स्मिताङ्ग सौरभ्यवंश शृङ्गनूपुरकम्बलः ।
पदाङ्कः क्षेत्रतुलसी भक्ततद्वासरादयः ॥
वैजन्ती - शिखण्डादि - नट - प्रवरबेषता ।
वंशीमधुरिमावस्त्र शोभाचात्र परिच्छदः ॥ १२४ ॥
वैदाधीसारविस्तारकुञ्जकेलिमहोत्सवः ।
आरम्भो रासलीलादेरिह चेष्टादिसौष्ठवम् ॥ १२८ ॥

रूपं यथा—

कृष्णस्य मण्डनततिर्मणिकुण्डलाद्या
नीताङ्गसङ्गतिमलं कृतये वराङ्गि !
शक्ता वभूव न मनागपि तद्विधाने
सा प्रत्युत स्वयमल्पमलंकृतासीत् ॥

अथ भगवतः श्रीकृष्णस्य गर्गादयो धर्मे सहायाः, युधि युयुधानादयः सहायाः, उद्धवादयश्च मन्त्रे सहाया भवन्ति । तथा हि हरिभक्तिरसामृतसिन्धोः दक्षिणविभागे प्रथमलहर्याम्—

अस्य गर्गादयो धर्मे युयुधानादयो युधि ।
उद्धवाद्यास्तथामन्त्रे सहायाः परिकीर्तिताः ॥ १०१ ॥

तत्र साधका विल्वमङ्गलादयः—

कृष्णसाक्षात्कृतौ योग्याः साधका इति कीर्तिताः ।
विल्वमंगलतुल्या ये साधकास्ते प्रकीर्तिताः ॥ १०५ ॥

अथ सिद्धा

अविज्ञाताखिलक्लेशाः सदा कृष्णाश्रितक्रियाः ।
सिद्धाः स्युः सततप्रेम सौख्या स्वाद परायणाः ॥

तत्रापि सिद्धा भवन्ति द्विधा सम्प्राप्तसिद्धयो नित्यसिद्धाश्च । यथा —

संप्राप्तसिद्धयः सिद्धा नित्यसिद्धाश्च ते द्विधा
तत्र संप्राप्तसिद्धयोऽपि द्विधा साधनसिद्धाः कृपासिद्धाश्च-
साधनैः कृपया चास्य द्विधा संप्राप्तासिद्धयः ।

तत्रापि साधनसिद्धा यथा—

यच्च व्रजन्त्यनिमिषा वृषभानुकृत्या
दूरेयमाह्युपरि नः स्पृहणीयशीलाः ।
भर्तुर्मिथः सुयशसः कथनानुराग-
वैक्लव्य वाष्पकलया पुलकीकृताङ्गाः ॥
मार्कण्डेयादयः प्रोक्ताः साधनैः प्राप्तसिद्धयः ।
कृपासिद्धा यज्ञपत्नी - वैरोचनि - शुकादयः ॥ १०८ ॥

यथा श्रीमद्भागवतस्य दशमे स्कन्धे—

नासां द्विजातिसंस्कारो न निवासो गुरावपि ।
न तपो नात्ममीमांसा न शौचं न क्रियाः शुभाः ॥
अथापि ह्युत्तमश्लोके कृष्णे योगेश्वरेश्वरे ।
भक्ति र्दृढा नचास्माकं संस्कारादिमतामपि ॥ = २३।४२।४३ ॥

नित्यसिद्धा यथा—

आत्मकोटिगुणं कृष्णे प्रेमाणं परमं गताः ।
नित्यानन्दगुणाः सर्वे नित्यसिद्धा मुकुन्दवत् ॥ १०९ ॥

यथा पद्मपुराणस्य भगवच्छ्रीकृष्णसत्यभामासंवादे—

अथ ब्रह्मादिदेवानां तथा प्रार्थनया भुवः ।
आगतोऽहं गणाः सर्वे जातास्तेऽपि मया सह ॥
एते हि यादवाः सर्वे मद्‌गणा एव भामिनि !
सर्वदा मत्प्रिया देवि ! मत्तुल्यगुणशालिनः ॥

श्रीमद्भागवतस्य दशमे स्कन्धे च—

अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम् ।
यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम् ॥ = १४।३२ ॥

अथानुभावा नृत्यविलुठितादयः—

अनुभावास्तु चित्तस्थभावानामवबोधकाः ।
ते वहिर्विक्रिया प्रायाः प्रोक्ता उद्भासुराख्यया ॥
ते च नृत्यं विलुलितं गीतं क्रोशनं तनुमोटनमित्यादयः

तत्र विलुठितं यथा—

नवानुरागेण तवावशाङ्गी बनस्रगामोदमवाप्य मत्ता ।
व्रजाङ्गने सा कठिने लुठन्ती गात्रं सुगात्रा व्रणयां चकार ॥

गीतं यथा—

रागाडम्बरकम्पितचेताः कुर्वती तव नवं गुणगानम् ।
गोकुलेन्द्र ! कुरुते जलतां सा राधिकाद्य दृषदां सुहृदां च

तत्रास्रावो यथा—

शङ्के प्रेमभुजङ्गेन दष्टः कष्टं गतो मुनिः ।
निश्चलस्य येदतस्य लाला स्रवति वक्त्रतः ॥

सत्त्वादुत्पन्नाः = भावाः सत्त्विकाः प्रोच्यन्ते । ते च त्रिधा भवन्ति—स्निग्धा, दिग्धा रुक्षाश्च—

तथाहि—

सत्त्वादस्मात् समुत्पन्ना ये भावास्ते सुसात्त्विकाः ।
स्निग्धा दिग्धास्तथा रुक्षा इत्यमी त्रिविधाः मता ॥

स्निग्धा यथा--

कुन्दे मुंकुन्दाय मुदा सृजन्ती स्रजं वरां कुन्दविडम्बिदन्ती ।
वभूव गन्धर्वरसेन वेणोर्गन्धर्विका स्पन्दनशून्यगात्री ॥

दिग्धा यथा—

पूतनामिह निशम्य निशायां सा निशान्तलुठदुद्भवगात्री ।
कम्पिताङ्गलतिका ब्रजराज्ञी पुत्रमाकुलमति विचिनोति ॥

रुक्षा यथा—

भोगैकसाधनजुषा रतिगन्धशून्यं
स्वं चेष्टया हृदयमत्र विवृण्वतोऽपि ।
उल्लासिनः सदपि माधवकेलिगीतै-
स्तस्याङ्गमुत्पुलकितं मधुरैस्तदासीत् ॥

सात्त्विकभेदाः—

ते स्तम्भ-स्वेद-रोमाञ्चाः स्वरभेदोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सत्त्विकाः स्मृताः ॥

तत्र हर्षाद् स्तम्भोः यथा श्रीमद्भागवते

यस्यानुरागप्लुतहासरास-लीलावलोकप्रतिलब्धमानाः ।
व्रजस्त्रियो दृग्भिरनुप्रवृत्तधियोऽवतस्थुः किल कृत्यशेषाः ॥ = ३।२।१४ ॥

आश्चर्याद् यथा स्तम्भः—

शिशोः श्यामस्य पश्यन्ती शैलमभ्रंलिहं करे ।
तत्र चित्रार्पितैवासीद् गोष्ठी गोष्ठनिवासिनाम् ॥

विस्मयाद्रोमाञ्चो यथा श्रीमद्भागवते (१०।१३।६४)

शनैरथोत्थाय विमृज्य लोचने मुकुन्दमुद्वीक्ष्य विनम्रकन्धरः ।
कृताञ्जलिः प्रश्रयवान् समाहितः स वेपथु गंद्गदयैलतेलया ॥

वित्रासेन यथा—

शङ्खचूडमणिरुद्धविश्रमं प्रेक्ष्य विस्मृतभुजं जिघृक्षया ।
हा, व्रजेन्दतनयेतिवादिनी कम्पसम्पदमधत्त राधिका ॥

अमर्षेण यथा—

कृष्णाधिक्षेपमात्रेण व्याकुलो नकुलाग्रजः ।
चकम्प द्रागमर्षेण भूकम्पे गिरिराडिव ॥

रोषेण यथा—

भीमस्य चेदीशवधं विधित्सोः रेजेऽश्रुविश्रावि रुषोपरक्तम् ।
उद्यन्मुखं वाधिकणावकीर्णं सान्ध्यं त्विषा ग्रस्तमिवेन्दुविम्बम् ॥

सुखेन यथा—

मिलितं हरिमालोक्य लतापुञ्जादतर्कितम् ।
व्रक्षिशून्यममा रेजे निश्चलाङ्गी व्रजाङ्गना ॥

अतएवोक्तं हरिभक्तिरसामृतसिन्धोः दक्षिणविभागे तृतीयलहर्यां—

प्रायो धूमायिता एव रुक्षास्तिष्ठन्ति सात्त्विकाः ।
सर्वानिनन्दचमत्कारहेतुभावो वरो रतिः ॥
एते हि तद्विना भावान्न चमत्कारिताश्रयाः ।

आकर्ण्यन्नघहारामघवैरिकीर्ति पक्ष्माग्रमिश्र विरलाश्रुरभूत्पुरोधाः ।
यष्टा दरोच्छासितलोमकपोलमीषत् प्रस्विन्ननासिकमुवाहमुखारविन्दम् ॥

अथ व्यभिचरिभावः—

विशेषेणाभिमुख्येन चरन्ति स्थायिनं प्रति ।
वागङ्गसत्त्वसूच्या ये ज्ञेयास्ते व्यभिचरिणः ।
संचारयन्ति भावस्य गतिं संचाररिणोऽपि ते ।

विप्रयोगेण यथा—

असंगमान्माधवमाधुरीमपुष्पिवे नीरसतां प्रयाते ।
बृन्दावने शीर्जति हा कुतोऽसौ प्राणित्यपुण्यः सुबलो द्विरेफः ॥

सद्विवेकेन यथा—

ममैवपपकालोऽजित ! निष्फलो गतः राज्यश्रियोनद्धमदस्य भूपतेः ।
मर्त्यातिमबुद्धेः सुतदारकोषभूष्वासज्जमानस्य दुरन्तचिन्तया ॥

प्रारब्धकार्यासिद्धेर्यथा—

स्वप्ने मयाऽद्य कुसुमानि किलाहृतानि
यत्नेन तै विरचिता बनमालिका च ।
यावन्मुकुन्दहृदि हन्त निधीयते सा
हा तावदेव तरसा विरराम निद्रा ॥

अपराधाद् यथा—

पश्येश ! मेऽनार्यमनन्त आद्य परात्मनि त्वय्यपि मायि मानिनि ।
मायां वितत्येक्षितुमात्मवैभवं ह्यहं कियानैच्छमिवार्चिरग्नौ ॥

अपिच—

स्यमन्तकमहं हृत्वा गतो घोरास्यमन्तकम् ।
करवै तरणिं कां वा क्षिप्तो वैतरणीमनु ।

किञ्च—

अतः क्षमस्वाच्युत ! मे रजोभुवो ह्यजानतस्त्वत्पृथगीशमानिनः ।
अजावलेपान्धतमोऽन्धचक्षुषः एषोऽनुकम्प्यो मयि नाथवानिति ॥

रत्या यथा रससुधाकरे

अतिप्रयत्नेन रवान्ततान्तां कृष्णेन तल्पादवरोपिता सा ।
आलम्ब्य तस्यैव करं करेण ज्योत्स्नाकृतानन्दमलिन्दमाप ॥

स्वौभाग्यगर्वेण यथा विल्वमङ्गले—

हस्तमुत्क्षिप्य यातोऽसि वलात्कृष्ण ! किमद्भुतम् ।
हृदयाद् यदि निर्यासि पौरुषं गणयामि ते ॥

रूपयौवनाभ्यां यथा—

यस्याः स्वभावमधुरां परिषेव्यमूर्तिं धन्या वभूव नितरामपि यौवनश्रीः ।
सेयं त्वयि व्रजवधूशतभुक्तमुक्ते दृक्पातमाचरतु कृष्ण ! कथं सखी मे ॥

इष्ट लाभेन यथा—

वृन्दावनेन्द्र ! भवतः परमं प्रसादमासाद्य नन्दितमति र्मुहुरुद्धतोऽस्मि ।
आशंसते मुनिमनोरथवृत्तिमृग्यां वैकुण्ठनाथकरुणा मयि नाद्य चेतः ॥

प्रियदर्शनजो यथा—

प्रेक्ष्यवृन्दावनात् पुत्रमायान्तं प्रस्नुतस्तनी ।
संकुला पुलकैरासीदाकुला गोकुलेश्वरी ॥

प्रौढानन्दाद् यथा विल्वमङ्गले—

राधा पुनातु जगदच्युतदत्तहस्ता
मन्थानकं निदधती दधिरिक्तपात्रे ।
यस्याः स्तनस्तवकचञ्चललोचनालि-
र्देवोऽपि रुद्धहृदयो धवलं दुदोह ॥

नवीनसंगमेन यथा पद्मावल्यां—

गोविन्दे स्वयमकरोः सरोजनेत्रे प्रेमान्धा वारवपुरर्पणं सखि ! त्वम् ।
कार्पण्यं न कुरु दरावलोकदाने विक्रीते करिणि किमङ्कुशे विवादः ॥

अवज्ञया यथा हरिवंशे सत्यादेवी वाक्यम्—

वसन्तकुसुमै श्चित्रं सदा रैवतकं गिरिम् ।
प्रिया भूत्वाऽप्रिया भूता कथं द्रक्ष्यामि तं पुनः ॥

दाक्षिण्येन यथा—

सात्राजितीसदनसीमनि पारिजाते नीते प्रणीतमहसा मधुसूदनेन ।
द्राघीयसीमपि विदर्भभुवस्तदेर्ष्या सौशील्यतः किल न कोऽपि विदां वभूव ॥

निद्रापूर्त्यां यथा—

दूती चागात्तदागारं जजागार च राधिका ।
तूर्णं पुण्यवतीनां हि तनोति फलमुद्यमः ॥

रतिगान्धि यथा—

पीतांशुकं परिचिनोमि धृतं त्वयाङ्गे
संगोपनाय नहि नप्त्रि ! विधेहि यत्नम् ।
इत्यार्यया निगदिता नमितोत्तमाङ्गा
राधावगुण्ठितमुखी तरसा तदासीत् ॥

हर्षोत्पत्तिर्यथा—

त्वयि रहसि मिलन्त्यां संभ्रमन्यासभुग्नाऽ-
प्युषसि सखि ! तवाली मेखला पश्य भाति ॥
इति विवृतरहस्ये माधवे कुञ्चितभ्रू-
र्दृशमनृजु किरन्ती राधिका वः पुनातु ॥

अथ स्थायी भावः—

भक्तिरसे हि श्रीकृष्ण विषया रतिः स्थायी भावः, सा च रति मुख्यागौणीभेदेन द्विविधा । तत्र मुख्यापि द्विधा । एकः स्थायी स्वार्थो अपरा च परार्था भवति । तथाहि हरिभक्तिरसामृतसिन्धोः दक्षिणभागे पञ्चमलहर्याम्—

अविरुद्धान् विरुद्धांश्च भावान् यो वशतां नयन् ।
सुराजेव विराजेत स्थायी भाव स उच्यते ॥ १ ॥
स्थायी भावोऽत्र संप्रोक्तः श्रीकृष्णविषया रतिः ।
मुख्या गौणी च सा द्वेधा रसज्ञैः परिकीर्तिता ॥ २ ॥

तत्र मुख्या—

शुद्धसत्वविशेषात्मा रति र्मुख्येति कीर्तिता ।
मुख्याऽपि द्विविधा स्वार्था परार्था चेति कीर्त्यते ॥

यथा वा—

त्रिवर्षा वालिका सेयं वर्षीयसि ! समीक्ष्यताम् ।
या पुरः कृष्णमालोक्य हुङ्कुर्वन्त्यभिधावति ॥

यथा च—

देवर्षिवीणया गीते हरिलीलामहोत्सवे ।
सनकस्य तनौ कम्पः ब्रह्मानुभविनोऽप्यभूत् ॥

मीमांसका हि भक्ते रसस्यास्वादविमुखा भवन्ति, यतो हि तेषु तदङ्करस्य रसस्यास्त्यभावः । अतो भक्ति रसिकैः भक्तिभाग्भिः साधकैः चोराद् महानिधिरिव

तेभ्यो स्वादाङ्कुरविरहेण निरसेभ्यो मीमांसकेभ्यः भक्तिरसः संरक्षणीयः नोचेद् जरन्मीमांसकास्तमपहृत्य दूषयेयुः । अस्य भक्तिरसस्यास्वादस्तु भाव्यभावकभक्तैरेवास्वाद्यः स्यात्, नतु पूर्वोक्तै जरन्मीमांसकैः । अत एवोक्तं हरिभक्तिरसामृतसिन्धो दक्षिणविभागस्य पञ्चमलहर्याम्––

फल्गुवैराग्यनिर्दग्धा शुष्कज्ञानाश्च हैतुकाः ।
मीमांसका विशेषेण भक्त्यास्वादवहिर्मुखाः
इत्येष भक्तिरसिकैश्चोरादिव महानिधिः ११२

जरन्मीमांसकाद्रक्ष्यः कृष्णभक्तिरसः सदा ।
सर्वथैव दुरोहोऽयमभक्तै र्भगवद्रसः । ११३

तत्पदाम्बुजसर्वस्वै र्भक्तैरेवात्र रस्यते ।
व्यतीत्य भावान् वर्त्म यश्चमत्कृतिभारभूः ॥ ११४

हृदि सत्त्वोज्ज्वले वाढं स्वदते स रसो मतः ।
भावनायाः पदं यस्तु बुधेनानन्यवुद्धिना
भाव्यते गाढसंस्कारं चित्ते भावः स कथ्यते ।

ननु वियोगे यथा रसता स्थापिता तथा संभोगे प्रतीयते, किन्तु करुण-भयानक-वीभत्सेषु न तथा प्रतीयते । तत्र करुणे वियोग इवभक्तानां तत्प्रादया, भयानके भयेनाच्छादनात्, वीभत्से च अहृद्यस्फूर्त्या दुःखमेव स्फुरति । अतएव तदितरेषां भापकभक्तानां वैरस्यावत्तिः स्यादिति तत्राह-हरिभक्तिरसामृतसिन्धोः दक्षिणविभागे पञ्चमलहर्याम्—

प्रतीयमाना अप्यज्ञै र्ग्रम्यैः सपदि दुःखवत् ।
करुणाद्या रसाः प्राज्ञैः प्रौढानन्दमया मताः ॥ १०५

अलौकिकविभावत्वं नीतेभ्यो रसलीलया ।
सदुक्त्या च सुखं तेभ्यः स्याद् सुव्यक्तमिति स्थितिः ॥ १०६

तथा च नाट्यादौ—

करुणादावपि रसे जायते यत् परं सुखम् ।
सचेतसामनुभवः प्रमाणं तत्र केवलम् ॥
सर्वत्र करुणाख्यस्य रसस्यैवोपपादनात् ।
भवेद्रामायणादीनामन्यथा दुःखहेतुता ॥
तथात्वे राम पादाब्ज प्रेमकल्लोलवारिधिः ।
प्रीत्या रामायणं नित्यं हनुमान् शृणुयात् कथम् ॥

अपि च सुहृदां निजाभीष्टरसाश्रये भक्तविशेषे श्रीराधिकादिविषये सजातीय-भावभक्तानां परस्परं रत्या विषयाश्रयरूपाणां ललितादीनां सखीमुख्यानामेकाश्रया या रतिः सा यदि कृष्णविषयया रत्या समा स्यादूना वा स्यात् तदा कृष्णविषयाया रत्या सञ्चार्याख्य एव भावः स्यात् तन्मूलत्वात् तत्पोषणत्वाच्च। एवं मधुराख्ये रसे तु यदि क्वचित् कृष्णविषयाया अपि रत्या अधिका तथापि पुष्यमाणा सन्तताभिनिवेशेन सम्बर्द्धमाना स्यात्तदा सञ्चरित्वेऽपि वैंशिष्ट्यापेक्षया भावो लालासाख्यो भाव इष्यते। इति। तदिदं त्वत्रानुस्मृत्य लिखितमपि सञ्चारिणामन्ते योजनीयं तत्रैव सजातीयत्वात्। तथाचोक्तं हरिभक्तिरसामृतसिन्धोः दक्षिणविभागस्य पञ्चमलहर्यामिव—

संचारी स्यात् समाना वा कृष्णतुल्या सुहृद्रतिः।
अधिका पुष्यमाणा चेत् भावोल्लास इतीर्यते।

अथ पारिषदाः—

उद्धवो दारुको जैत्रः श्रुतदेवश्च शत्रुजित्।
नन्दोपनन्दभद्राद्याः पार्षदा यदुपत्तने॥ १८
नियुक्ताः सन्त्यमी मन्त्रसारथ्यदिषु कर्मसु।
तथापि क्वाप्यवसरे परिचर्यां च कुर्वते॥ १९
कौरवेषु तथा भीष्मपरीक्षिद्विदुरादयः।
एतेषां प्रवरः श्रीमानुद्धवः प्रेमविह्वलः॥ २०

योगसिद्धिः—

कृष्णेन संगमो यस्तु स योग इति कीर्त्यते।
उत्कण्ठिते हरेः प्राप्तिः सिद्धिरित्यभिधीयते॥ ४८

पुरसम्बन्धिनो यथा—

अर्जुनो भीमसेनश्च दुहिता द्रुपदस्य च।
श्रीदामा वसुदामाश्च रूखायाः पुरसंश्रयाः॥

प्रियसखा यथा—

वयस्तुल्याः प्रियसखाः सख्यं केवलमाश्रिताः।
श्रीदामा वसुदामा च दामा च वसुदामक॥
एषु प्रियवयस्येषु श्रीदामा प्रवरो मतः।

एवं पश्चिमविभागे शान्तभक्तिरसस्य प्रीतभक्तिरसस्य प्रेयोभक्तिरसस्य वत्सलभक्तिरसस्य, मधुराख्यभक्तिरसस्य च सविस्तरं विवेचनं श्रीमता रूपगोस्वामिना कृतमस्ति। तत्र तेषु प्रथमो यथा—

(१) शान्तभक्तिरसः—

वक्ष्यमाणैर्विनाभाद्यैः शमिनां स्वाद्यतां गतः ।
स्थायी शान्तिरतिर्धीरैः शान्तभक्तिरसः स्मृतः ।।१।४

अथालम्बनम्—

प्रायः स्वसुखजातीयं सुखं स्यादत्र योगिनाम् ।
विभुरित्यादिगुणवानस्मिन्नालम्बनो हरिः ।
चतुर्भुजाश्च शान्ताश्च तस्मिन्नालम्वना मताः ॥

तत्र चतुर्भुजो यथा--

श्यामाकृतिः स्फुरति चारु चतुर्भुजोऽयमानन्दराशिरखिलात्मतरङ्गसिन्धुः ।
यस्मिन् गते नयनयोः पथि निर्जिहीते प्रत्यक् पदात्परमहंसमुनेर्मनोऽपि ॥

अथोद्दीपना—

श्रुतिर्महोपनिषदां विविक्तस्थानसेवनम् ।
विद्याशक्तिप्रधानत्वं विश्वरूपप्रदर्शनम् ॥
ज्ञानिभक्तेन संसर्गो ब्रह्मसत्रादयस्तथा ।
एते साधारणा प्रोक्ताः बुधैरुद्दीपना अमी ।
पादाब्ज तुलसीगन्धशङ्खनादोमुरद्विषः ।
पुण्यशैलः शुभारण्यं सिद्धक्षेत्रं स्वरापगाः ।
विषयादिक्षयिष्णुत्वं कालस्याखिलहारिता ।
इत्याद्युदीपनाः साधारणा स्तेषां किलाश्रिताः ।

तत्र पादाब्ज तुलसीगन्धः—

तस्यारविन्दस्य पदारविन्दकिञ्जल्कमिश्रतुलसीमकरन्दवायुः ।
अन्तर्गतः स्वविवरेण चकार तेषां संक्षोभमक्षरजुषामपि चिततन्वोः ॥

अथानुभावा—नासाग्रन्यस्तनेत्रत्वमवधूतविचेष्टितम् ।

अथ संचारिणो यथा—

संचारिणोऽत्र निर्वेदो धृति हर्षो मतिः स्मृतिः ।
विषादोत्सुकतावेग वितर्काद्याः प्रकीर्तिताः ।

यथा विल्वमङ्गलस्तवे—

अद्वैतवींथी पथिकैरुपास्याःस्वानन्दसिंहासन लब्धदीक्षाः ।
शठेन केनापि वयं हठेन दासीकृताः गोपवधूविटेन ॥

विष्णुधर्मोतरेऽपि केवल शान्तरसो यथा—

नास्ति यत्र सुखं दुःखं न द्वेषो नच मत्सरः ।
समः सर्वेषु भूतेषु स शान्तः प्रथितो रसः ॥

(२) प्रीतभक्तिरसः—

आत्मोच्चितैः विभावाद्यैः कीर्तिरास्वादनीयताम् ।
नीता चेतसि भक्तानां प्रीतभक्तिरसो भवेत् । प० वि० १ ल० ३

तत्रालम्बनम्—

हरिश्च हरिदासाश्च ज्ञेया आलम्बना इह ।

तत्र हरिर्यथाः—

आलम्बनोऽस्मिन् द्विभुजः कृष्णो गोकुलवासिभिः ।
अन्यत्र द्विभुजः क्वापि कुत्राप्येष चतुर्भुजः ॥
नवाऽत्र सात्त्विकास्तन्यश्रावः स्तम्भादयश्च ते ।

स्तन्यश्रावो यथा—

तन्मातरो वेणुरवत्वरोत्थिता उद्गृह्यदोर्भिः परिम्य निर्भरम् ।
स्नेहस्नुतस्तन्यपयःसुधासवं मत्वा परं ब्रह्म सुतानपाययन् ॥

स्तम्भादयो यथा—

कथमपि परिब्धुं न क्षमास्तब्धगात्रा
कथयितुमपि नालं वाष्पपूरप्लुताक्षी ।
न च सुतमुपदेष्टुं रुद्रकण्ठी समर्था
दधतमचलमासीद् व्याकुला गोकुलेशाः ॥

अथ व्यभिचारिभावः—

अत्रापस्मारसहिता प्रीतोक्ता व्यभिचारिणः ।

तत्र हर्षो यथा—

यशोदा च महाभागा नष्टलब्धप्रजा सती ।
परिष्वज्याङ्कमारोप्य मुमोचाश्रुकलां मुहुः ॥

यथा वा विदग्धमाधवे—

जितचन्द्रपरागचन्द्रिका नलदेन्दीवर चन्दनश्रियम् ।
परितो मयि शैत्यमाधुरी वहति स्पर्श महोत्सवस्तव ॥

अथ स्थायी भावः—

संभ्रमादिच्युता च या स्यादनुकम्प्येऽनुकम्पितुः ।
रतिः सैवात्र वात्सल्यं स्थायी भावो निगद्यते ॥
यशोदादेस्तु वात्सल्यरतिप्रौढनिसर्गतः ।
प्रेमवत् स्नेहवद्भाति कदाचित् किल राजवत् ॥

वात्सल्यरति यथा—

नन्दः स्वपुत्रमादाय प्रोष्यागत उदारधिः ।
मूर्ध्नि अवघ्राय परमां मुदं लेभे कुरुद्वहः ॥

प्रोमवद् यथा—

प्रेक्ष्य तत्र मुनिराजमण्डलैः स्तूयमानमपि मुक्तसंश्रया ।
कृष्णमङ्गमपि गुकुलेश्वरी प्रस्तुता करभूमिः न्यवीविक्षत ॥

अथोद्दीपनाः—

उद्दीपनास्तु वात्सल्यस्मित-प्रेक्षादयो-हरेः ।

यथा—

अग्रे सानुग्रहं पश्यन्नग्रजं व्यग्रमानसः ।
गदापदारविन्दस्य विदधे दण्डवन्नतिम् ॥

अथानुभावाः—

अनुभवास्तु तस्याग्रे नीचासननिर्वसनम् ।
गुरोर्वर्त्मानुसारित्वं धुरस्तस्य परिग्रहः ॥

(३) प्रेयोभक्तिरसः—

स्थायीभावो विभावाद्यैः सख्यमालोचितैरिह ।
नीतश्चित्ते सतां पुष्टिं रसः प्रेयानुदीर्यते ॥ ३ । १ ॥

अत्रालम्बनाः—

हरिश्च तद्वयस्याश्च तस्मिन्नालम्बना मताः ।
द्विभुजत्वादिभागत्र प्राग्वदालम्बनो हरिः ॥ ३ । २ ॥

व्रजे यथा—

महेन्द्रमणिमञ्जुलद्युतिरमन्दकुन्दास्मितः
स्फुरत्पुटकेतकीकुसुमस्यपट्टाम्बरः ।
स्रगुल्लसदुरस्थलकर्णितवेणुरत्राव्रजन्
व्रजाघहरो हरत्यहह नः सखो नो मनः ॥

अथ तद्वयस्याः—

रूपवेशगुणाद्यैस्तु समा सम्यगनियन्त्रिताः ।
विस्तम्भ संस्मृतात्मनो वयस्यास्तस्य कीर्तिताः ॥ ३।५ ॥

यथा—

साम्येन भीतिविधुरेण विधीयमान भक्तिप्रञ्चमनुदञ्चदनुग्रहेण ।
विस्तम्भसारनिकुरम्व करम्बितेन वन्देतरामघहरस्य वयस्यवृन्दम् ॥

ते च द्विविधा भवन्ति-पुरसम्बन्धिनो व्रजसम्बन्धिनश्च । तत्र पुरसम्बन्धिनो यथा—

अर्जुनो भीमसेनश्च दुहिता द्रुपदस्य च ।
श्रीदामा भूसुराद्याश्च सख्यायः पुरसंश्रयाः ॥ ७ ॥

तत्र—

श्रेष्ठः पुरवयस्येषु भगवांश्च कपिध्वजः ।

अस्य रूपं यथा—

गाण्डीवपाणिः करिराजशुण्डो रम्योरुरिन्दीवरसुन्दराभः ।
रथाङ्गिना रत्नरथाधिरोही स रोहिताक्षः सुतरामराजीत् ॥

सख्यं यथा—

पर्यङ्के महति सुरारिहन्तुरङ्के निशङ्कप्रणयनिसृष्टपूर्वकायः ।
उन्मीलन्नवनवनर्मकर्मणेऽयं गाण्डीवी स्मितवदनाम्बुजो व्यराजीत् ॥

व्रजसम्बन्धिनो यथा—

क्षणाददर्शनतो दीना सदा सह विहारिणः ।
तदेकजीविताः प्रोक्ता वयस्या व्रजवासिनः ॥
अतः सर्ववयस्येषु प्रधानत्वं भजन्त्यमी ।

तेषां सख्यं यथा—

इत्थं सतां ब्रह्मसुखानुभूत्या दास्यं गतानां परदैवतेन ।
मायाश्रितानां नरदारकेण सार्द्धं विजह्रुः कृतपुण्यपुञ्जाः ॥

एषु श्रीकृष्णस्य यथा—

सहचरनिकुरम्बं भ्रातरार्य ! प्रविष्टं द्रुतमजठरान्तःकोटरे प्रेक्षमाणः ।
सबलशिखिरवाष्णक्षालितक्षामगण्डः क्षणमहमवसीदन् शून्यचित्तस्तदासम् ॥

एषां सख्यं यथा—

धुन्वन् धावति मण्डलाग्रममलं त्वं मण्डलीभद्र ! किं
गुर्वीमार्य ! गदां गृहाण विजय ! क्षोभं वृथा मा कृथाः ।
शक्तिं न क्षिप भद्रवर्धन ! पुरो गोवर्द्धनं गाहते
गर्जन्नेष घनो वली ननु वलीवर्दाकृति र्दानव ॥

त्वं नः प्रोज्झय कठोर ! यमुनातटे कस्मादकस्माद् गतः
दृष्ट्या दृष्टिमितोऽसि हन्त निविडाश्लेषैः सखीन् प्रीडय ।
ब्रूमः सत्यमदर्शने तव मनाक् का धेनवः के वयं
किं गोष्ठं किमभीष्टमित्यचरितः सर्वं विपर्यस्यति ॥

विभ्रद् गेण्डुं पाण्डुरोद्भासिवासः पाशावद्धोत्तुङ्गमौलिर्वलीयान् ।
वन्धूकाभः सिन्धुरस्पर्धिशीलो देवप्रस्थः कृष्णपार्श्वं प्रतस्थे ॥

रूपं यथा—

वासः पिङ्गं विभ्रतं शार्ङ्गपाणि-वद्धस्पर्द्धं सौहृदान्माधवेन ।
ताम्रोष्णीषं श्यामधामाभिरामं श्रीदामानं दामभाजं भजामि ॥

अथ प्रियनर्मवयस्याः—

राधासन्देशवृन्दं कथयति सुवलः पश्य कृष्णस्य कर्णे
श्यामा कन्दर्पलेखं निभृतमुपहरत्यर्जुनः पाणिपद्मे ।
पाली ताम्बूलमास्ये वितरति चतुरः कोकिलो मूर्ध्नि धत्ते
तारा दामेति नर्मप्रणयिसहचरस्तन्वि ! तन्वन्ति सेवाम् ॥

यथा—

वयस्यगोष्ठ्यामखिलेङ्गितेषु विशारदायामपि माधवस्य ।
अन्यैर्दुरूहा सुवलेन सार्द्धं संज्ञामयी काऽपि वभूव वार्ता ॥

किञ्च—

शक्ताऽस्मि मानमवितुं कथमुज्ज्वलोऽयं
दूतः समेति सखि ! यत्र मिलत्यदूरे ।
सापत्रपाऽपि कुलजाऽपि पतिव्रताऽपि
का वा वृषस्यति न गोपवृषं किशोरी ॥

यथा—

तुन्दं विन्दति ते मुकुन्द ! शनकैरश्वत्थपत्रश्रियं
कण्ठःकम्बुवदम्बुजाक्ष ! भजते रेखात्रयोमुज्ज्वलाम् ।
आरुन्धे कुरुविन्दकन्दलरुचिं भूचन्द्र ! दन्तच्छदो
लक्ष्मीराधुनिकी धिनोति सुहृदामक्षीणि सा काऽप्यसौ ॥

अथोद्दीपनाः—

उद्दीपना वयोरूपश्रृङ्गवेणुदरा हरेः ॥ २७ ॥
विनोदनर्मविक्रान्तिगुणाः प्रेष्ठजनास्तथा ।
राज-देवावतारादि-चेष्टानुकरणादयः ॥ २८ ॥

यथा—

विभ्रद् वेणुं जठरपटयो श्रृङ्गवेत्रे च कक्षे
वामे पाणौ मसृणकवलं तत्फलान्यङ्गुलीषु ।
तिष्ठन् मध्ये स्वपरिसुहृदो हास्ययन् नर्मभिः स्वैः
स्वर्गे लोके मिषति वुभुजे यज्ञभुग्वालकेलिः ॥

यथा वा—

वृन्दारण्ये समन्तात् सुरभिणि सुरभीवृन्दरक्षाविहारी
गुञ्जाहारी शिखण्डप्रकटितमुकुटः पीतपट्टाम्वरश्रीः ।
कर्णाभ्यां कर्णिकारे दधदलमुरसा पुल्लमल्लीकमाल्यं
नृत्यन् दोर्युद्धरङ्गे नटवदिह सखीन् नन्दयत्येष कृष्णः ॥

यथा —

यष्टिं हस्तत्रयपरिमितां प्रान्तयोः स्वर्णवद्धां
विभ्रन् मालां चटुलचमरीचारुचूडोज्ज्वलश्रीः ।
वद्धोष्णीषः पुरटरुचिना पट्टपाशेन पार्श्वे
पश्य क्रीडन् सुखयति सखे ! मित्रवृन्दं मुकुन्दः ॥

रूपं यथा—

अलङ्कारमलं कृत्वा तवाङ्गं पङ्कजेक्षण !
सखीन् केवलमेवेदं धाम्ना धीमन् ! धुनोति नः ॥

वणुर्यथा—

सुहृदो ! नहि यात कातरा हरिमन्वेष्टुमितः सुतां रवेः ।
कथयन्नमुमत्र वैणवध्वनिदूतः शिखरे धुनोति नः ॥

शङ्खो यथा—

पाञ्चालीपतयः श्रुत्वा पाञ्चजन्यस्य निस्वनम् ।
पञ्चास्य ! पश्य मुदिताः पञ्चास्यप्रतिमा ययुः ॥

अथानुभावाः—

नियुद्ध-कन्दुक-द्यूत-वाह्यवादादिकेलिभिः
लगुडालगुडिक्रीडा सङ्गरैश्चास्य तोषणम् ॥

नियुद्धेन तोषणं यथा—

आघहर ! जितकाशी युद्धकण्डूल-बाहु-
स्त्वमटसि सखिगोष्ट्यामात्मवीर्यं स्तुवानः ।
कथय किमु ममोच्चैश्चण्डदोर्दण्डचेष्टो
विरमितरणरङ्गो निःसहाङ्गः स्थितोऽसि ॥

अथ सात्विकाः, तत्र स्तम्भो यथा—

निष्क्रामन्तं नागमुन्मथ्य कृष्णं श्रीदामाऽयं द्राक् परिष्वक्तुकामः ।
लब्धस्तम्भौ संभ्रभारम्भशाली बाहूस्तम्भौ पश्य नोत्क्षेप्तुमिष्टे ॥

स्वेदो यथा—

क्रीडोत्सवानन्दरसं मुकुन्दे स्वात्यम्बुदे वर्षति रम्यघोषे ।
श्रीदाममूर्तिर्वरशुक्तिरेषा स्वेदाम्बुमुक्तापटली प्रसूते ॥

अश्रु यथा—

दावं सपीक्ष्य विचरन्तमिषीकतूलै-
स्तस्य क्षयार्थमिव वाष्पझरं किरन्ती ।
स्वामप्युपेक्ष्य तनुमम्बुजमालभारि-
ण्याभीरविथिरभितो हरिमावरिष्ठट ॥

व्यभिचारिभावा यथा—

औग्र्यं त्रासं तथाऽऽलस्यं वर्जयित्वाऽखिलाः परे ।
रसे प्रेयसि भावज्ञैः कथिता व्यभिचारिणः ॥ ३१-५३ ॥

तत्र हर्षो यथा—

निष्क्रम्य किल कालियोरगं वल्लवेश्वरसुते समीयुषि ।
सम्मदेन सुहृदः स्खलत्पदा स्तद्गिरश्च विवशाङ्गातां दधुः ॥

अथ स्थायी—

विमुक्तसंभ्रमा या स्यात् विश्रमात्मा रतिर्द्वयोः ।
प्रायः समानयोरत्र सा सख्यं स्थायिशब्दभाक् ॥ ३।५४

सख्यरति यथा—

मुकुन्दो गान्दिनीपुत्रः त्वया संदिश्यतामिति ।
गरुडाङ्क ! गुडकेशस्त्वां कदा परिरप्स्यते ॥

स्नेहो यथा—

अन्ये तदनुरूपीणि मनोज्ञानि महात्मनः ।
गायन्तिस्म महाराज ! स्नेहवल्किन्नधियः शनैः ॥

रागो यथा—

अस्त्रेण दुष्परिहरा हरये व्यकारि या पत्रिपङ्क्तिरकृपेन कृपीसूतेन !
उत्प्लुत्य गाण्डीवभृता हृदि गृह्यमाणा जातस्य सा कुसुमवृष्टिरिवोत्सवाय ॥

अथायोगे उत्कण्डितमं यथा—

धनुर्वेदमधीयानो मध्यमस्त्वयि पाण्डवः ।
वाष्पसंकीर्णया ! कृष्णः गिरा श्लेषं व्यजिज्ञपत् ॥

जागर्या यथा—

नीलाम्बुजद्वन्द्वमवेक्ष्य पूर्णं वाष्पाम्बुपूरेण वरूथपस्य ।
तत्रानुवृत्तिं किं यादवेन्द्र ! निर्विद्य निद्रामधुपी मुमोच ॥

उन्मादो यथा—

विना भवदनुस्मृतिं विरह-विभ्रमेणाधुना
जगद्व्यवहृतिक्रमं निखिलमेव विस्मारिताः ।
लुठन्ति भुवि शेरते वत हसन्ति धावन्त्यमी
रुदन्ति मथुरापते ! किमपि वल्लवानां गणाः ॥

मूर्च्छितं यथा—

दिव्यतीह मधुरे मथुरायां प्राप्य राज्यमधुना मधुनाथे
विश्वमेव मुदितं रुदितान्धे गोकुले तु मुहुराकुलताऽभूत् ॥
प्रोक्तेयं विरहावस्था स्पष्ट लीलानुसारतः ।
कृष्णेन विप्रयोगः स्यान्न जातु व्रजवासिनाम् ॥

तथा च स्कन्दपुराणस्य मथुराखण्डे—

वत्सैं र्वत्सतरीभिश्च सदा क्रीडति माधवः ।
वृन्दावनान्तर्गतः सरामो बालकैंर्वृतः ॥

अथ योगे सिद्धिर्यथा—

पाण्डवः पुण्डरीकाक्षं प्रेक्ष्य चक्रिनिकेतने ।
चित्राकारं भजन्नेव मित्राकारमदर्शयत् ।।

तुष्टिर्यथा—

तं मातुलेयं परिरभ्य निर्वृतो: भीमः स्मयन् प्रेम जवाकुलेन्द्रियः ।
यमौ किरीटी च सुहृत्तमं मुदा प्रवृद्धवाष्पाः परिरेभिरेऽच्युतम् ।।

यथा वा—

कुरुजाङ्गले हरिमवेक्ष्य पुरः प्रियसंगमते व्रजसुहृन्निकराः !
भुजमण्डलेन मणिकुण्डलिनः पुलकाञ्चितेन परिषस्वजिरे ।।

स्मितिर्यऽथा तत्रैव—

यत्पादपांसुबहुजन्मकृच्छ्रतो धृतात्मभिर्योगिभिरप्यलभ्यः ।
स एव यद्दृग्विषयः स्वयं स्थितः किं वर्ण्यते दिष्टमहो व्रजौकसाम् ।।

द्वयोरप्येकजातीय — भावमाधुर्यभागसौ ।
प्रेयान् कामपि पुष्णाति रसश्चित्ताचमत्कृतिम् ।।
प्रेमानेव भवेत् प्रेयानतः सर्वरसेष्वयम् ।
सख्यसम्पृक्तहृदयैः सद्भिरेवानुबुध्यते ।।

(४) अथ वत्सलभक्तिरसः—

विभावाद्यैस्तु वात्सल्यं स्थायी पुष्टिमुपागतः ।
एष वत्सलनामात्रः प्रोक्तो भक्तिरसो बुधैः ।।

तत्रालम्वना यथा—

कृष्णस्तस्य गुरुश्चात्र प्राहुरालम्वनान् बुधाः ।

तत्र कृष्णो यथा—

नवकुवलयदामश्यामलं कोमलाङ्गं
विचलदलकभृङ्गक्रान्तनेत्राम्बुजान्तम् ।
व्रजभुवि विरहन्तं पुत्रमालोकयन्ती
व्रजपतिदयितासीत् प्रस्नवोत्पीडदिग्धा ।।

वात्सल्यं यथा

अवलम्ब्य कराङ्गुलिं निजां स्खलदङ्घ्रि प्रसरन्तमङ्गने
उरसि स्रवदश्रुनिर्झरो मुमुदे प्रेक्ष्य सुतं व्रजाधिपः ।

अत्रोद्दीपना यथा—

कौमारादिवयोरूपवेषाः शैशवचापलम् ।
जल्पितास्मितलीलाद्या बुधैरुद्दीपना मताः ॥ १८ ॥

यथा—

त्रिचतुरदशनस्फुरन्मुखेन्दुः पृथुतरमध्यकुटीरकोरुसीमा ।
नवकुवलयकोमलः कुमारो मुदमधिकां व्रजनाथयो र्व्यनानीत् ॥

श्यामाङ्गो रुचिरः सर्वसलक्षणयुतो मृदुः ।
प्रियवाक् सरलो ह्रीमान् विनयी मान्यमानकृत् ॥
दातेत्यादिगुणः कृष्णो विभाव इह कथ्यते ।

अथानुभावाः—

अनुभावाः शिरोघ्राणं करेणाङ्गाभिमर्दनम् ।
आशीर्वादो निदेशश्च लालनं प्रतिपालनम् ॥
हितोपदेशदानाद्या वत्सले परिकीर्तिताः ।

तत्र शिरोघ्राणं यथा—

तदा क्षणोत्प्रेमरसाल्पुतादया जातानुरागा गतमन्यवोऽर्भकान् ।
उद्गृह्य दोर्भिः परिरभ्य मूर्ध्नि प्राणैरवापुः परमां मुदं ते ॥

यथा वा—

दुग्धेन दिग्धा कुचविच्युतेन समानमाघ्राय शिरः परिच्छदम् ।
करेण गोष्ठेशितुरङ्गनेयमङ्गानि पुत्रस्य मुहू र्ममार्ज ॥

चुम्बाश्लेषौ तथाह्वानं नामग्रहणपूर्वकम् ।
उपालम्भादयश्चात्र मित्रैः साधारणक्रियाः ॥

अथ सात्त्विकाः

नवात्र सात्त्विका स्तन्यस्रावः स्तम्भादयश्च ते ।

तत्र स्तन्यस्रावो यथा दशमे—

तन्मातरो वेणुरवत्वरोत्थिता उद्गृह्य दोर्भिःपरिरभ्य निर्भरम् ।
स्नेहस्नुतस्तन्यपयःसुधासवं मत्वा परं ब्रह्म सुतानपाययन् ॥

यथा वा ललितमाधवे—

निचुलितगिरिधातुस्फीति-पत्रावलिका-
नखिलसुरभिरेणून् क्षालयद्भि र्यशोदा ।
कुचकलशविमुक्तैः स्नेहमाध्वीकमेध्यै-
स्तव नवमभिषेकं दुग्धधारैः करोति ॥

वात्सल्यरतिर्यथा—

नन्दः स्वपुत्रमादाय प्रोष्यागत उदारधीः ।
मूर्ध्न्यवघ्राय परमां मुदं लेभे कुरूद्वहः ॥

तुष्टिर्यथा —

ताः पुत्रमङ्कमारोप्य स्नेह-स्नुत-पयोधराः ।
हर्षविह्वलितात्मानः सिषिचुनेत्रजै जंलैः ॥

नयनयोः स्तनयोरपि युग्मतः परिपतद्भिरसौ पयसां क्षरैः ।
अहह वल्लभराजगृहेश्वरी स्वतनयं प्रणयादभिषिञ्चति ॥

स्मृतिर्यथा ललितमाधवे—

अहह कमलगन्धेरत्र सौन्दर्यवृन्दे
विनिहितनयनेयं त्वन्मुखेन्दो मुंकुन्द ! ।
कुचकलशमुखाभ्यामम्बरंक्नोपमम्बा
तव मुहुरतिहर्षाद् वर्षति क्षीरधाराम् ॥

एषा रतिस्त्रयी प्रोक्ता प्रीतादिः परमाद्भुता ।
युधिष्ठिरस्य वात्सल्यं प्रीत्या सख्येन चान्वितम् ॥
आहुकप्रभृतीनां तु प्रीतिर्वात्सल्यमिश्रिता ।
जरदाभीरिकादीनां वात्सल्यं सख्यमिश्रितम् ॥

अथ योगेसिद्धिर्यथा -

विलोक्य रङ्गस्थललब्धसङ्गमं
विलोचनाभीष्टविलोकनं हरिम् ।
स्तन्यैरसिञ्चन्नवकञ्चुकाञ्चलं
देव्यः क्षणादानकदुन्दुभिप्रियाः ॥

द्वयोः (१५९-६०) पृष्ठयोरपि वात्संल्यरसश्चर्चितोऽस्ति ॥

(५) अथ मधुराख्यो भक्तिरसः

श्रीकृष्णविषयकतत्कान्तारतिस्पृष्टचित्तानां हृदयेषु आत्मोचितैं विभावाद्यैः पुष्टिं नीता मधुरारतिः मधुराख्यो भक्तिरसो भवति । तदुक्तं हरिभक्तिरसामृतसिन्धोः पश्चिमविभागस्य पञ्चमलहर्याम्—

आत्मोचितैं विभावाद्यैः पुष्टिं नीता सतां हरिः ।
मधुराख्यो भवेद्भक्तिरसोऽसौ मधुरा रतिः ॥ १ ॥

तत्रालम्बनाः —

आस्मिन्नालम्बनः कृष्णः प्रियास्तस्य च सुभ्रुवः ॥ २ ॥

तत्र कृष्णो यथा—

असमानोर्ध्वसौन्दर्यलीलावैंदग्ध्यसंपदाम् ।
आश्रमत्वेन मधुरे हरिलीलाम्बनो मतः ॥ ३ ॥

यथाह जयदेवकविः श्रीगीतगोविन्दे—

विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर-
श्रेणीश्यामलकोमलैंरपनयन्नङ्गै रनङ्गोत्सवम् ।
स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति ॥

अथ तस्य वयस्या यथाः—

नवनवमाधुरीधुरीणाः प्रणयतरङ्गकरम्बितान्तरङ्गाः
निजरमणतया हरिं भजन्तीः प्रणत ताः परमाद्भुताः किशोरीः ॥

भगवतः श्रीकृष्णस्य प्रियतमासु गोपिकासु वृषभानुसुता राधिकैवेका सर्वश्रेष्ठतमा प्रोक्ताऽस्ति—

प्रेयसीषु हरेरासु प्रवरा वार्षभानवी ।

अस्या रूपं यथा—

मदचकुरचकोरी चारुताचोरदृष्टि र्वंदनदमितराका रोहिणीकान्तकीर्तिः ।
अविकलकलधौतोद्धूतिधौरेयकश्री र्मधुरिममधुपात्री राजते पश्य राधा ॥

अथ राधायां कृष्णरतिर्यथा गीतगोविन्दे—

कंसारिरपि संसारवासनावद्धशृखलाम् ।
राधामाधाय हृदये तत्याज व्रजसुन्दरीः ॥

अथोद्दीपनाः—

उद्दीपना इह प्रोक्ता मुरलीनिस्वनादयः ।

यथा पद्यावल्यां--

गुरुजनगञ्जनमयशो गृहपतिचरितं च दारुणं किमपि ।
विस्मारयति समस्तं शिव शिव मुरली मुरारातेः ॥

अथानुभावाः—

अनुभावास्तु कथिता दृगन्तेक्षास्मितादयः ॥ ५ ॥

यथा ललितमाधवे--

कृपापाङ्गतरङ्गितद्युतिमणिजासंभेदवेणीकृते
राधायाः स्मितचन्द्रिका सुरधुनीपूरे निपीयामृतम् ।
अन्तस्तोयतुषारसंप्लवलवव्यालीढतापोद्गमः ।
क्रान्त्वा सप्त जगन्ति सम्प्रति वयं सर्वोर्ध्वमध्यास्महे ॥

अथ सात्त्विका यथा पद्यावल्यां--

कामं पुनः पुलकितं नयने धृतास्रे
वाचः सगद्गदमया सखि ! कम्पि वासः ।
ज्ञातं मुकुन्दमुरलीरवमाधुरी ते
चेतः सुधांशुवदने ! तरलीकरोति ॥

अथ व्यभिचारिभावाः--

आलस्यौग्र्ये विना सर्वे विज्ञेया व्यभिचारिणः ।

तत्र निर्वेदो यथा पद्यावल्यां--

मा मुञ्च पञ्चशर ! पञ्चशरीं शरीरे मा सिञ्च सान्द्रकमरन्दरसेन वायो ! ।
अङ्गानि तत्प्रणयभङ्ग विगर्हितानि नालम्बितुं कथमपि क्षमतेऽद्य जीवः ॥

अत्र स्थायीभावः--

स्थायीभावो भवत्यत्र पूर्वोक्ता मधुरा कृतिः ।

यथा पद्यावल्यां--

भ्रूवल्लिताण्डवकला मधुराननश्रीः कङ्केलिकोरककरम्बितकर्णपूरः ।
कोऽयं नवीननिकषपोलतुल्यवेषो वंशीरवेण सखि ! मानवशीकरोति ॥

राधामाधवयोरेव क्वापि भावः कदाप्यसौ ।
सजातीयविजातीयैर्नैव विच्छिद्यते रतिः ॥ ७ ॥

यथा--

इतो दूरे राज्ञी स्फुरति परितो मित्रपटली
दृशोरग्रे चन्द्रावलिरुपरि शैलस्य दनुजः ।

असव्ये राधायां कुसमितलतासंवृततनौ
दृगन्तश्रीर्लीला तडिदिव मुकुन्दस्य वलते ॥

सोऽयं प्रथममुक्तः मधुराख्यो भक्तिरसो द्विविधः--एक विप्रलम्भो द्वितीयः सम्भोगश्च । तथाहि–

स विप्रलम्भ-सम्भोग-भेदेन द्विविधो मतः ।

तत्र विप्रलम्भो हि पूर्वराग-मान-प्रवासादिभेदेन भवति बहुविधः––

स पूर्वरागो मानश्च प्रसादादिमयस्तथा ।
विप्रलम्भो बहुविधो विद्वद्भिरिह कथ्यते ।

तत्र पूर्वरागो यथा पद्मावल्यां—

अकस्मादेकस्मिन् पथि सखि ! मया यमुनातटं
व्रजन्त्या दृष्टो यो नवजलधरश्यामलतनुः ।
स दृग्भङ्ग्या किं वाऽकुरुत नहि जाने तत इदं
मनो मे व्यालोलं क्वचन गृहकृत्ये न वलते ॥

यथा वा श्रीमद्भागवतस्य दशमे स्कन्धे—

तथाहमपि तच्चित्तो निद्रां च न लभे निशि ।
वेदाहं रुक्मिणो द्वेषान्ममोद्वाहो निवारितः ॥ = १०।५३।२

मानो यथा गीतगोविन्दे—

विहरति वने राधा साधारणप्रणये हरौ
विगलितनिजोत्कर्षादीर्ष्यावशेन गताऽन्यतः ।
क्वचिदपि लताकुञ्जे गुञ्जनमधुव्रतमण्डली
मुखरशिखरे लीना दिनान्युवाच रहः सखीम् ॥

प्रवासो यथा पद्मावल्याम्

हस्तोदरे विनिदितैककपोलपाले रक्षान्तलोचनजलस्नपिताननायाः ।
प्रस्थानमङ्गलदिनावधिमाधवस्य निद्रालवोऽपि कुत एव सरोरुहाक्ष्याः ॥

यथा प्रल्हादसंहित्तामम‍ुद्धववाक्यम्

भगवानपि गोविन्दः कन्दर्पशरपीडितः ।
न भुङ्क्ते न स्वपिति च चिन्तयन् वो ह्यनिशम् ।

संभोगो यथा—

द्वयो र्मिलितयो योगः संभोग इति कीर्त्यते ।

यथा पद्यावल्याम्—

परमानुरागपरयाथ राधया परिरम्भकौशलविकाशिभावया
स तया सह स्मरसभाजनोत्सवं निरवाहयच्छिखिशिखण्डशेखरः ॥

एवं हरिभक्तिरसामृतसिन्धोरुत्तरविभागे श्रीमता रूपगोस्वामिना (१) हास्य (२) अद्भुत (३) वीर (४) करुण (५) रौद्र (६) भयानक (७) वीभत्साख्य भक्तिरसानां सोदाहरणं सम्यग् विवेचनं कृतमस्ति । तेषां किञ्चित् दिग्दर्शनं क्रियते यथा—

(१) हास्यभक्तिरसो यथा—

वक्ष्यमाणै विभावाद्यैः पुष्टिं हासरतिर्गता ।
हास्यभक्तिरसो नाम बुधैरेष निगद्यते ।
अस्मिन्नालम्बनः कृष्णस्तथाऽन्योऽपि तदन्वयी ।
वृद्धाः शिशुमुखा प्रायः प्रोक्ता धीरैस्तदाश्रयाः ॥

तत्रालम्बनो भगवान् श्रीकृष्णो यथा—

यास्याम्यस्य न भीषणस्य सविधे जीर्णस्य शीर्णाकृते
र्मातर्नेष्यति मां विधाय कपटादाधारिकायामसौ ।
इत्युक्त्वा चकिताक्षमद्भुतशिशावुद्वीक्षमाणे हरौ
हास्यं तस्य निरुन्धतोऽप्यतितरां व्यक्तं तदासीन्मुनेः ॥

उद्दीपनानुभावव्यभिचारिणो यथा—

उद्दीपना हरेस्तादृग्वाग्वेषचरितादयः ।
अनुभावास्तु नासौष्ठगण्डविस्पन्दनादयः ॥
हर्षालस्यावहित्थाद्या विज्ञेया व्यभिचारिणः ।
सा हास्यरतिरेवात्र स्थायिभावतयोदिता ।

यथा—स्वसास्मि तव निर्दये ! परिचिनोषि न त्वं कुतः ?
कुरु प्रणयनिर्भरं मम कृशाङ्गिः ! कण्ठग्रहम् ।
इति ब्रुवति पेशलं युवतिवेषगूढ़े हरौ
कृतं स्मितमभिज्ञया गुरुवपुस्तदा राधया ॥

(२) अथाद्भुतभक्तिरसो यथा—

आत्मोचितै विभावाद्यैः स्वाद्यत्वं भक्तचेतसि ।
सा विस्मयरति र्नीताऽद्भुतभक्तिरसो भवेत् ॥

भक्तः सर्वविधोऽप्यत्र घटते विस्मयाश्रयः ।
लोकोत्तरक्रियाहेतु र्विषयस्तत्र केशवः ॥
तस्य चेष्टा विशेषाद्या स्तस्मिन्नुद्दीपना मताः ।
क्रियास्तु नेत्रविस्तारस्तम्भाश्रुपुलकादयः ॥
आवेगहर्षजाड्याद्यास्तत्र स्यु र्व्यभिचारिणः ।
स्थायी स्याद्विस्मयरतिः स लोकोत्तरकर्मतः ॥

यथा—

एकमेव विविधोद्यमभाजं मन्दिरेषु युगपन्निखिलेषु ।
द्वारकामभिसमीक्ष्य मुकुन्दं स्पन्दनोज्झिततनु र्मुनिरासीत् ॥

यथ वा—

क्व स्तन्यगन्धिवदनेन्दुरसौ शिशुस्ते
गोवर्द्धनः शिखररुद्धघनः क्व चायम् ।
भो पश्य सव्यकरकन्दुकिताचलेन्द्रः
खेलान्निव स्फुरति हन्त किमिन्द्रजालम् ॥

यथा च

उन्मिल्य व्रजशिशवो दृशं पुस्ताद् भाण्डीरं पुनरतुलं विलोकयन्तः ।
सात्मानं पशुपटलीं च तत्र दावादुन्मुक्तां मनसि चमत्क्रियामवापुः ॥

(३) वीरभक्तिरसो यथा—

सैवोत्साहरतिः स्थायी विभावाद्यै र्नियोजितैः ।
आनीयमाना स्वाद्यत्वं वीरभक्तिरसो भवेत् ।
युद्ध-दान-दया-धर्मैश्चतुर्धा वीर उच्यते ।
आलम्बन इह प्रोक्तः एष एव चतुर्विधः ।
उत्साहस्त्वेष भक्तानां सर्वेषामेव संभवेत् ।

यथा वा हरिवंशे—

तथा गाण्डीवधन्वानं विक्रीडन् मधुसूदनः ।
जिगाय भरतश्रेष्ठं कुन्त्याः प्रमुखतः विभुः ॥

अनुभावा यथा—

कत्थिताद्याः स्वसंस्थाश्चेदनुभावाः प्रकीर्तिताः ।

तत्र कत्थितं यथा—

प्रोत्साहयस्यतितरां किमिवाग्रहेण मां केशिसूदनः विदन्नपि भद्रसेनम् ।
योद्धुं बलेन सममत्र सुदुर्बलेन दिव्यार्गलाप्रतिभटस्रपते भुजो मे ॥

दयावीरस्योद्दीपन हरणं यथा—

वन्दे कुड्मलिताञ्जलिं मुहरहं वीरं मयूरध्वजं
येनार्द्धं कपटद्विजाय वपुषः कंसद्विषे दित्सता ।
कष्टं गद्गदिताकुलोऽस्मि कथनारम्भादहो धीमता
सोल्लासं क्रकचेन दारितमभूत् पत्नीसुताभ्यां शिरः ॥

यथा वा सहजोत्साहरतिः—

संग्रामकामुकभुजः स्वयमेव कामं दामोदरस्य विजयाय कृतो सुदामा ।
सहायमत्र सबलः कुरुते बली चेज्जातो मणिः सजरितो वरहाटकेन ॥

(४) अथ करुणभक्तिरसः—

आत्मोचितैं विभावाद्यैं र्नीता पुष्टिं सतां हृदि ।
भवेच्छोकरति र्भक्तिरसोऽयं करुणाभिधः ॥
श्रीकृष्णविषयत्वेन रोध आलम्बनस्त्रिधा ।
अनुभावा मुखे शोष - विलाप - स्रस्तगात्रता ॥
श्वासक्रोशनभूपातघातोरस्ताटनादयः ।
आलस्यापस्मृतिव्याधि मोहाद्या व्यभिचारिणः ॥
हृदि शोकतयांशेन गता परिणतिं रतिः ।
उक्ता शोकरातिः सैव स्थायीभाव इहोच्यते ॥

उदाहरणं यथा श्रीमद्भागवते—

तं नागभोगपरिवीतमदृष्टचेष्टमालोक्य तत्प्रियसखाः पशुपा भृशार्ताः ।
कृष्णेऽर्पितात्मसुहृदर्थकलत्रकामा दुःखाभिशोकभयमूढधियो निपेतुः ॥

यथा—

मात र्माद्रि ! गता कुतस्त्वमधुना हा क्वासि पाण्डो पितः !
सान्द्रानन्दसुधाब्धिरेष युवयो र्नाभूद् दशां गोचरः ।
इत्युच्चै र्नकुलानुजो विलपति प्रेक्ष्य प्रमादाकुलो,
गोविन्दस्य पदारविन्दयुगलप्रोद्दामकान्तिच्छटाम् ॥

यथा—

कृष्णप्रियाणामाकर्षे शङ्खचूडेन निर्मिते ।
नीलाम्बरस्य वक्त्रेन्दु नीलिमानं मुहुर्दधे ॥

(५) अथ रौद्रभक्ति रसः

नीता क्रोधरतिः पुष्टिं विभावाद्यै र्नियोजते ।
हृदि भक्तजनस्यासौ रौद्रभक्तिरसो भवेत् ॥

कृष्णे हितोऽहितश्चेति क्रोधस्य विषयाद्विधा ।
कृष्णे सखीजरत्याद्या क्रोधस्याश्रयतां गताः ॥
भक्ता सर्वविधा एव हिते चैवाहिते तथा ॥

यथा विदग्धमाधवे श्रीकृष्णः

अन्तः क्लेशकलङ्किताः किल वयं यामोऽद्य याम्यां पुरं
नायं वञ्चन-सञ्चन-प्रणयिनं ह्रासं तथाऽप्युज्झति ।
अस्मिन् सम्पुटिते गभीरकपटैराभीरवल्लीविटे
हा मेधामिनि । राधिके ! तव कथं प्रेमा गरीयानभूत् ॥

यथावा—

उत्तीष्ठ मूढे ! कुरु माविलम्बं वृथैव धिक् पण्डितमानिनी त्वम् ।
त्रुट्यत्पलाशिद्वयमन्तरा ते वद्धः सुतोऽसौ सखि ! वंभ्रमीति ॥

(६) अत्र भयानको भक्तिरसः

वक्ष्यमाणै विर्भावाद्यैः पुष्टिं भयरति र्गताः ।
भयानकाभिधो भक्तिरसो धीरै र्निगद्यते ॥
कृष्णश्च दारुणाश्चेति तस्मिन्नालम्वना द्विधा ।
अनुकम्प्येषु सागःसु कृष्णस्तस्य च बन्धुषु ।
दारुणः स्नेहतः शश्वत्तदनिष्टाप्तिदर्शिषु ।
दर्शनाच्छ्रवणाच्चेति स्मरणाच्च प्रकीर्तिताः ॥

तत्रानुकम्प्येषु कृष्णो यथा —

किं शुष्यद्वदनोऽसि मुञ्च खचितं चित्ते पृथुं वेपथुं
विश्रम्य प्रकृतिं भजस्व न मनागप्यस्ति मन्तुस्तव ।
उष्मन्नक्षितमृक्षराज ! रभसाद् विस्तीर्य वीर्यं त्वया
पृथ्वी प्रत्युत योद्धुकौतुकमयी सैवेव मे निर्मिता ॥

बन्धुषु दारुणदर्शनाद् यथा—

हां किं करोमि तरलं भवनान्तराले गोपेन्द्र ! गोपय वलादुपरुध्य बालम् ।
क्ष्मामण्डलेन सह चञ्चलयन् मनो मे शृङ्गाणि लङ्घयति पश्य तुरङ्गदैत्यः ॥

स्मरणाद् यथा—

विरम विरम मातः पूतनायाः प्रसंगात्तदनुमियमधुनापि स्मर्यमाणा धुनोति ।
कवलयितुमिवाङ्कीकृत्य वालं घूरन्ती वपुरतिपरुषं या घोरमाविश्चकार ॥

(७) अथ वीभत्सभक्तिरसः—

पुष्टिं निजविभावाद्यैः जंगुप्सा रतिरागता ।
असौ भक्तिरसो धीरैः वींभत्साख्य इतीर्यते ।
अस्मिन्नाश्रित्य यानताद्या धीरैरालम्बना मताः ।
अत्र निष्ठीवनं नेत्र-कूणनं-घ्राण-संवृतिः ।
धावनं कम्पपुलकप्रेक्षाद्यश्च विक्रियाः ।
इह ग्लानिश्रमोन्मादमोहत्तिर्वेददीनता ॥
विषादचापलावेगजाड्याद्या व्यभिचारिणः ।
जगुप्सारतिरश्च स्यात् स्थायी सा च विवेकजा ।

उदाहरणं यथा—

पाण्डित्यं रतहिण्डिकाध्वनिगतो यः कामदीक्षाव्रती
कुर्वन् पूर्वमशेषषिड्गनगरी साम्राज्यचर्यामभूत् ।
चित्रं सोऽयमुदीरयन् हरिगुणानुद्बाष्पदृष्टिर्जने
दृष्टे स्त्रीवदने विकूणितमुखो विष्टम्य निष्ठीवति ॥

विवेकजा यथा—

घनरुधिरमये त्वचा पिनद्धे पिशितविमिश्रित विस्रगन्धभाजि ।
कथमिह रमतां वुधः शरीरे भगवति हन्त रते लवेऽप्युदीर्णे ॥

जुगुप्सा यथा—

असृङ्मूत्राकीर्णे घनशमलपङ्कव्यतिकरे
वसन्नेष क्लिन्नो जडतनुरहं मातुरुदरे ।
लभे चेतः क्षोभं तव भजनकर्माक्षमतया
तदस्मिन् कंसारे ! कुरु मयि कृपासागर ! कृपाम् ॥

रतिपतिभक्तावतंसेन रसिकोत्तंसेनालौकिकवर्णनप्रवीणेन भक्तशिरोमणिना कविनाऽपूर्वं एको भक्तिग्रन्थो निर्मितः प्रेमपत्तनं नाम । तत्र तेन प्रेमपत्तनं किम् ? को मधुरमेचकः ? का च रतिरितिजिज्ञासायामुक्तं यत्-प्रेमपत्तनं नाम पत्तनं गगनमण्डले वैकुण्ठादप्युपरि पञ्चाशत्कोटि योजने विराजमानं नित्यं वृन्दावनं धाम, मधुरमेचको नवनीरदवपुः शृङ्गाररसमयो नन्दनन्दनो व्रजनन्दनो भगवान् श्रीकृष्णः, रतिश्च व्रजराजराजेश्वरी वृषभानुसुता श्रीमती श्रीराधैव संसाधिता ।

अपि च प्रेमपत्तनस्य कथं गगने स्थितिः ? किञ्च तन्महत्त्वम् ? किमाकारकं भगवतो वासुदेवस्य श्रीकृष्णस्य स्वरूपं ? किञ्च तन्माहात्म्यम् ? कीदृशं च ह्लादिनी सारसम्विद्रूपायारते र्महत्त्वम् ? इति सर्वसाधारिणी जिज्ञासा विशदं विवेचिता ।

अतस्तत्तत्सम्प्रदायग्रन्थेभ्यः पुरावृत्तेभ्यश्च यत् किञ्चिदधिगतं तत् प्रस्तूयते तदभिधीयते च तत्रत्यं किञ्चिद् विलक्षणं तत्त्वरहस्यम् ।

प्रेमपत्तनं नाम नित्यं वृन्दावनं धाम

अनन्तकोटिब्रह्माण्डोपरि वर्ततेऽमन्दानन्दमयम् आश्चर्यचर्यापरिकल्पितं मञ्जुल-मञ्जुलनिकुञ्जलालितं मन्दारमरन्दबिन्दुवृन्दाञ्चितं सुरभिसन्दोहशोभितं परमरहस्यं विविधैश्वर्यपरम्परामण्डितं जायमाननृत्य-गीत-वाद्यनिरन्तरं स्थानमूर्धन्यमद्भुतं धाम नित्यं वृन्दावनं नाम । तदुक्तं पद्मपुराणस्य पातालखण्डे नवषष्ठितमे ऽध्याये—

गुह्याद् गुह्यतरं पुण्यं परमानन्दकारणम् ।
अत्यद्भुतं रहःस्थानं रहस्यं परमं पदम् ॥ ६९।६

सात्वतां स्थानमूर्द्धन्यं विष्णोरत्यन्तदुर्लभम् ।
नित्यं वृन्दावनं नाम ब्रह्माण्डोपरि संस्थितम् ॥ ६९।८

तत्र कैशोरवयसं नित्यमानन्दविग्रहम् ।
गीत-नाट्य-कथालापं स्मितवक्त्रं निरन्तरम् ॥ ६९।६२

शुद्धसत्त्वैः प्रेमपूर्णैर्वैष्णवैः तद्वदाश्रयैः ।
पूर्णब्रह्मसुखे मग्नैः स्फुरत्तन्मूर्ति तन्मयम् ॥ ६९।६३

भुजंगशत्रुनृत्याढ्यं सकलामोदविभ्रमम् ।
नानावर्णैः सुकुसुमैस्तद्रेणुपरिपूरितम् ॥ ६९।६५

पूर्णेन्दुनित्याभ्युदयं सूर्यमन्दांशुसेवितम् ।
अदुःखं दुःखविच्छेदं जरामरणवर्जितम् ॥ ६९।६६

अक्रोधं गतमात्सर्यमभिन्नमनहंकृतम् ।
पूर्णानन्दामृत—रसं प्रेमपूर्णसुखार्णवम् ॥ ६९।६७

गुणातीतं महद् धाम पूर्णप्रेमस्वरूपकम् ।
वृक्षादिपुलकैः यत्र प्रेमानन्दाश्रुवर्षितम् ॥ ६९।६८

किं पुनश्चेतनायुक्तै विष्णुभक्तैः किमुच्यते ।
गोविन्दाङ्घ्रिरजः स्पर्शान्नित्यं वृन्दावनं भुवि ॥६९।६९

सहस्रदलपद्मस्य वृन्दारण्यं वराटकम् ।
यस्य स्पर्शनमात्रेण पृथ्वी धन्या जगत्त्रये ॥ ६९।७०

गुह्याद् गुह्यतमं रम्यं मध्येवृन्दावनं भुवि ।
अक्षरं परमानन्दं गोविन्दस्थानमव्ययम् ॥ ६९।७१

गोविन्ददेहतोऽभिन्नं पूर्णब्रह्मसुखाश्रयम् ।
मुक्तिस्तत्र रजः स्पर्शात्तन्माहात्म्यं किमुच्यते ॥ ६९।७२

अपि च ब्रह्मवैवर्तस्य पुराणस्य श्रीकृष्णजन्मखण्डे चतुर्थाध्याये तु-

प्रणम्य देवताः सर्वा जग्मु र्गोलोकमुत्तमम् ।
विचित्रं परमं धाम जरामृत्युहरं परम् ॥ ६९।७६
ऊर्ध्वं वैकुण्ठतोऽगम्यं पञ्चाशत्कोटियोजनम् ।
वायुना धार्यमाणं च निर्मितं स्वेच्छया विभोः ॥ ६९।७७

पाञ्चरात्रे तु—

विष्वद्रीच्येव वाग्वेदा अद्रयः कनकाद्रयः ।
जलं ब्रह्मद्रवः साक्षाद् द्रुमाः सर्वे सुरद्रुमाः ॥
जनाः परिजना यत्र धेनवः कामधेनवः ।
श्रीमद् वृन्दावनस्यान्तः प्रदेशो रतिराज्यभूः ॥

अथानादयः श्रुतयोऽपि भगवन्तं प्रति प्रोचुः—

ब्रह्मेति पठ्यतेऽस्माभिर्यद्रूपं निर्गुणं परम् ।
वाङ्मनोगोचरातीतं ततो न ज्ञायते तु यत् ॥
आनन्दमात्रमिति यद्वत्तद्वदन्तीह पुराविदः ।
तद्रूपं दर्शयास्माकं यदि देयो वरो हि नः ॥
श्रुत्वैतद् दर्शयामास स्वं लोकं प्रकृतेः परम् ।
केवलानुभवानन्दमात्रमक्षरमध्यगम् ॥
यत्र वृन्दावनं नाम वनं कामदुघै द्रुमैः ।
मनोरमं निकुञ्जाढ्यं सर्वतुरससंयुतम् ॥
यत्र गोवर्द्धनो नाम सुनिर्झरदरीयुतः ।
रत्नधातुमयः श्रीमान् सुपक्षिगणसङ्कुलः ॥
यत्र निर्मलपानीया कालिन्दी सरितां वरा ।
रत्न-बद्धोभयतटी हंसपद्मादि-सङ्कुला ॥
नानासुरसोन्मत्तं यत्र गोपीकदम्बकम् ।
तत्कदम्बकमध्यस्थः किशोराकृतिरच्युतः ॥

दर्शयित्वेति च प्राह ब्रूते किं करवाणि व. ।
दृष्टो मदीयो लोकोऽयं यतो नास्ति परं पदम् ।।

वैकुण्ठाशिरूपस्य सर्वोपरि विराजमानस्य तन्नगरस्य कथमवनितलेऽवस्थितिरिति ? अत्रोच्यते ' यत्र-यत्रावतरति भगवान् तत्र-तत्र तत्रांशेन पूर्णस्वरूपेण वा वैकुण्ठमप्यवतरति तत्र तद्वनं च आयात्येव । यथाऽवतारिणो भगवतः पूर्णस्वरूपेणावतरणं विश्रुतचरं तथैव तन्नगरस्याप्यवतार इति न किमप्यसमञ्जसम् । अत एव स्कन्दपुराणेऽपि प्रोक्तमस्ति—

या यथा भुवि वर्तन्ते पुर्यो भगवतः प्रियाः ।
तास्तथा सन्ति. वैकुण्ठे तत्तलीलार्थमावृताः ।।

न च तस्य तादृङ्महिमा न सर्वैं नैयनगोचरी क्रियते इति वाच्यम्, भगवद्भक्ति-रसाप्लुतशरीराया रतेरनुज्ञया तदनुचरैं राजप्रवेशा रतिराज्यसीमानमुपगता एव केचन उक्तचरं तन्महिमानं नयनगोचरी कर्तुं शक्नुवन्ति, अन्ये बहिरेव तिष्ठन्तीति सिद्धन्तात् सायुज्यमुक्तिभाजोऽपि भगवच्चरणरतिं विना यत्र गन्तुं न शक्नुवन्ति तत्र अनासादितभक्तिगन्धानां प्राकृतानां न प्रवेश इति किमाश्चर्यम् । यथा किञ्चित् प्रविष्टा अपि केचन तादृशदृष्ट्यभावात् प्रपञ्चसदृशमेव तत्पुरं पश्यन्ति । ये पुनर्भगवदनुगृहीता भगवति वासुदेवे दृढमनुरागं बिभ्रति, ते तथैत्र तन्नगरमहिमानं नूनं पश्यन्ति । तथाहि यवनकविः भगवतः श्रीकृष्णस्य प्रेमपूरपरिप्लुतान्तः करणो रसखानो वृन्दावनसदृशंकान्तं त्रिलोक्यां किमपि नापश्यत् स्थानम् । स्थाने इति भगवद्भक्तिमतः तस्येदृशी सुमतिः समवद्, यया स गोकुले आसक्तमनाः सगद्गदमिदमुवाच हिन्दीभाषया—

मानुष हों तो वही रसखान बसौं संग गोकुल गाँव के ग्वारन ।
जो पशु हों तो वहा बसु मेरो चरौं नित नन्द की धेनु मंझारन ।।
पाहन हों तो वही गिरि को जो कियो हरि छत्र पुरन्दर धारन ।
जो खग हों तो बसेरो करौं मिलि कालिन्दि कूल कदम्ब की डारन ।।

अत एव गोकुलनिवासिनीनां भगवति श्रीकृष्णे परमानुरक्तानां भक्तिमतीनां गापीनामद्भुतं प्रेम पर्यालोच्य तासां चरणरेणुभिः परिपूते वृन्दावने वृक्षगुल्मलतौष-धीनां मध्ये किमपि जन्म वाञ्छता ज्ञानिनोद्धवेनापि सहृपमुक्तं श्रीमद्भागवते—

आसामहो चरणरेणुजुषामहं स्यां वृन्दावने किमपि गुल्मलतौषधीनाम् ।
या दुस्त्यजं स्वजनमार्यपथं च हित्वा भेजे मुकुन्दपदवीं श्रुतिभि विमार्ग्याम् ।।

प्रेमाञ्जनाक्तया दृशा भक्तप्रवराः तत्रत्यं करीलकुञ्जमपि कलधौतधामता मञ्जुलं पश्यन्ति । अतो नैवास्ति ब्रह्माण्डभाण्डोदरे तादृगपूर्वं किमपि स्थानम् । अत एवोक्तं भगवता व्यासदेवेनापि श्रीमद्भागवते—

न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धिमपुनर्भवं वा वाञ्छन्ति यत्पादरजःप्रपन्नाः ॥

मधुरमेचकः शृङ्गारमूर्तिः भगवान् श्रीकृष्ण एव

प्रेमपत्तने तस्मिन् मधुरमेचकपदेन मधुरमूर्तिः भगवान् श्रीकृष्ण एव विवक्षितः- मधुरः = शृङ्गाररसः एव मेचकःश्यामः यद्वा मधुरः =शृङ्गारसदृशो मेचकः = श्यामसुन्दरतनुः तेन शृङ्गाररसात्मको युवराज एव तन्नगरपालकः भगवान् श्रीकृष्णः । शृङ्गाररसमयत्वं चास्य पीयूषवर्षिणा महाकविना जयदेवेनाप्यभिहितम् यथा—

(क) विश्वेषानुरञ्जनेन जनयन्नानन्दमिन्दीवर—
श्रेणी श्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम् ।
स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि ! मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति ॥

(ख) विल्वमङ्गलो हि तं भगवन्तं श्रीकृष्णं शृङ्गारसारसर्वस्वं कथयति ।

अत एव प्रोक्तं कृष्णराजकविनापि—

राधासङ्गे यदा भाति तदा मदनमोहनः ।
अन्यथा विश्वमोहोऽपि स्वयं मदनमोहनः ॥

मत्स्य-कूर्म-वराह नृसिंहादयो यस्यांशावताराः सन्ति । अंशिरूपी च स भगवानस्ति तन्नगरस्याधिपतिः सर्वत्र एव विततोऽस्ति तस्य महिमा महत्तरः । तद्वक्तुं सहस्रफणः शेषोऽपि नेशः, न वा संकजशक्तिविशारदा शारदाऽपि साकल्येनाभिधातुं समर्था । किमुत कोऽपि साधारणो जनः तन्महिमानं वक्तुं प्रभवेत् । अत एव भगवन्तमाशुतोषमुद्दिश्योक्तं पुष्पदन्ताचार्येण स्वकीये महिम्नःस्तोत्रे—

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकाले
तदपि तव गुणानामीश ! परं न याति ॥

पद्मपुराणस्य पातालखण्डे एकोनसप्तत्यध्याये भगवान् वेदव्यासोऽपि वृन्दावनेश्वरस्य गोविन्दाख्यस्य भगवतः श्रीकृष्णस्य महिमानमित्थं व्यनक्ति—

यदङ्घ्रिनखचन्द्रांशु - महिमान्तो न विद्यते ।
तन्माहात्म्यं कियद्देवि ! प्रोच्यते त्वं मुदा शृणु ॥
अनन्तकोटिब्रह्माण्डे अनन्त-त्रिगुणोच्छ्रये ।
तत्कला कोटि कोट्यंशा ब्रह्मविष्णुमहेश्वराः ॥

सृष्टिस्थित्यादिना युक्तास्तिष्ठन्ति तस्य वैभवाः ।
तद्रूपकोटिकोट्यंशाः कलाः कन्दर्पविग्रहाः ॥
जगन्मोहं प्रकुर्वन्ति तदण्डान्तरसंस्थिताः ।
तद्देहविलसत्कान्ति-कोटि-कोट्यंशको विभुः ॥
तत्प्रकाशस्य कोट्यंशरश्मयो रविविग्रहाः ।
तस्य स्वदेहकिरणैः परानन्दरसामृतैः ॥
परमामोदचिद्रूपैर्निर्गुणस्यैक - कारणैः ।
तदंशकोटिकोट्यंशा जीवन्ति किरणात्मकाः ॥
तदङ्घ्रिपङ्कज - द्वन्द्व - नखचन्द्रमणिप्रभाः ।
आहुः पूर्णब्रह्मणोऽपि कारणं वेददुर्गमम् ॥
तदंशसौरभानन्त-कोट्यंशो विश्वमोहनः ।
तत्स्पर्शपुष्पगन्धादि - नाना-सौरभ-सम्भवः ॥
तत्प्रिया प्रकृतिस्त्वाद्या राधिका कृष्णवल्लभा ।
तत्कलाः कोटि कोट्यंशा दुर्गाद्यास्त्रिगुणात्मिकाः ॥
तस्या अङ्घ्रिरजः स्पर्शात् कोटिविष्णुः प्रजायते । ६९।११०-११८

अतो भक्तानन्दप्रदाता बुद्धिदाता च भगवान् श्रीकृष्ण एवास्ति मुख्यं भागवत-तत्त्वम्, अन्ये च मत्स्य-कूर्म-वराह-नृसिंहादयोऽवताराः समस्तशक्तिसम्पन्नस्य तस्य भगवतः श्रीकृष्णस्य सन्ति विलासांशाः । तथा चोक्तं श्रीमद्भागवतस्य प्रथमे स्कन्धे—

एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे-युगे ॥ १।३।२८

किञ्च—अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल ।

सौन्दर्यसारसर्वस्वस्य माधुर्यौकसः तस्य भगवतः श्रीकृष्णस्य सौन्दर्य-माधुर्ये अपि वर्णनातीते स्तः । अतएव स भगवान् माधुर्यनिधिः, स्वम् अपरिकलितपूर्वं माधुर्यपुरं सौन्दर्यं मणिमुकुरे प्रतिबिम्बितं विलोक्य राधिकामिव समुपभोक्तुं कामयते । तथा हि—

माधुर्य्यैको नाधुना वर्णनीयं रूपं यूनोरीहते यत् समीक्ष्य ।
रत्नादर्शे हन्त ! कृष्णः सतृष्णं राधाभावं राधिका कृष्णभावम् ॥

तथा च प्रणतपटलीनां गोपाङ्गनानाम् एकीभूतस्य मधुरिम्णो प्रेम्णो निर्यासस्य तस्य भगवतः श्रीकृष्णस्याद्भुतं माधुर्यं वर्णनातीतमिति नाश्चर्यकरम् । भगवतः तस्य नामाक्षरयोरपि यत् माधुर्यं भावुका भक्ता अनुभवन्ति, तस्य तुलना त्रिलोकेऽपि

नास्ति । विषयेऽत्र पण्डितराजस्य जगन्नाथस्य वक्ष्यमाणं पद्यं सर्वेषां विपश्चितां रसनारङ्गे नारीनृत्यति निरन्तरम् । तथाहि—

मृद्वीका रसिता सिता समशिता स्फीतं निपीतं पयः
स्वर्यातेन सुधाप्यधायि कतिधा रम्भाधरः खण्डितः ।
सत्यं ब्रूहि मदीयजीव ! भवता भूयो भवे भ्राम्यता
कृष्णेत्यक्षरयोरयं मधुरिमोद्गारः क्वचिल्लक्षितः ॥

रतिश्च वृषभानुनन्दिनी श्रीराधिकेव

रतिस्तु सौन्दर्यमाधुर्यनिधे व्रजेन्द्रनन्दनस्य तस्य प्रेमपत्तनाधिपतेः भगवतो श्रीकृष्णचन्द्रस्य ह्लादिनीशक्तिः वृषभानुसुता श्रीराधिकैव । तथा चोक्तं श्रीगोस्वामी कडचायाम्—

राधाकृष्णप्रणयविकृतिह्लादिनीशक्तिरस्माद्—
एकात्मानावपि भुवि परं देहभेदं गतौ तौ ।
चैतन्याख्यं प्रकटमधुना तद्द्वयं चैक्यमाप्तं—
राधाभावद्युतिशवलितं नौमि कृष्णस्वरूपम् ॥

श्रीमद्भिः प्रबोधानन्दपादैरपि श्रीचैतन्यचरितामृते प्रतिपादितम्—

सिंहस्कन्धं मधुरमधुरस्मेरफुल्लाननान्तं
दुर्विज्ञेयोज्ज्वलरसमयाश्चर्यनानाविकारम् ।
बिभ्रत्कान्तिविकचकनकाम्भोजशोभाभिरामं-
मेकीभूतं वपुरवतु वो राधया माधवस्य ॥

देवीभागवतानुसारं सप्त तत्त्वानि नित्यानि सन्ति-आत्मा, नभः, दिशः, कालः विश्वगोलक, गोलोकः, प्रकृतिश्च—

नित्य आत्मा नभो नित्यं कालो नित्यो दिशो मया ।
विश्वानां गोलकं नित्यं नित्यो गोलोक एव च ॥
नदे[illegible]देशो वैकुण्ठो नभ्रभागानुसारकः ।
तथैव प्रकृतिर्नित्या बाह्यलीला सनातनी । ९।२।५-६

स्वप्रकृत्या राधया सह आदिपुरुषो भगवान् श्रीकृष्णो गोलोके नित्यं विराजते । सा हि प्रकृतिस्वरूपा श्री राधिका अग्नौ दाहिका शक्तिरिव, चन्द्रमसि चन्द्रिकेव, दुग्धे धावल्यमिव, पृथिव्यां गन्ध इव, जले शैत्यमिव शब्देऽर्थ इव, सागरे तरङ्ग इव, प्रभाकरे प्रभेव, गायके गानमिव ईश्वरेऽभेदेन तिष्ठति । तदुक्तवती ब्रह्मवैवर्ते भगवती पार्वती देवी श्रीराधिकां प्रति—

यथा क्षीरेषु धावल्यं यथा वह्नौ च दाहिका ।
भुवि गन्धो जले शैत्यं तथा कृष्णे स्थितिस्तव ॥ २७।२१२

अपि च स्वयमेव भगवान् श्रीकृष्णो ब्रह्मवैवर्ते महापुराणे कथयति—

त्वं मे प्राणाधिका राधे ! प्रेयसी च वरनने !
यथा त्वञ्च तथाऽहञ्च भेदो हि नावयोर्ध्रुवम् ॥
यथा क्षीरे च धावल्यं यथाग्नौ दाहिका सती ।
यथा पृथिव्यां गन्धश्च तथाऽहं त्वयि सन्ततम् ॥
विना मृदा घटं कर्तुं विना स्वर्णेन कुण्डलम् ।
कुलालः स्वर्णकारश्च न हि शक्तौ कदाचन ॥
तथा त्वया बिना सृष्टिमहङ्कर्तुं न च क्षमः ।
सृष्टेराधारभूता त्वं वीजरूपोऽहमच्युतः ॥ = १५।५७।६०

प्रकृति हिं सर्वंशक्तिस्वरूपा अस्ति तया प्रकृत्या युक्तः परमात्मा शक्तिमान् स्वेच्छामयोऽसौ देवः साकारो-निराकारश्च बोभवीति । समाधिस्था योगीराजाः तं परमात्मानं तेजोमयं निराकारं निरन्तरं ध्यायन्ति, वैष्णवाः भक्तास्तु परमानन्दमीश्वरं सर्वद्रष्टारं सर्वेशं सर्वेषां कारणं ब्रह्म वदन्ति । तथाचोक्तं देवीभागवते नवमस्कन्धस्य द्वितीयेऽध्याये—

तेजोमण्डलमध्यस्थं ब्रह्मतेजस्विनं परम् ।
स्वेच्छामयं सर्वरूपं सर्वकारणकारणम् ॥
अतीव सुन्दरं रूपं विभ्रतं सुमनोहरम् ।
किशोरवयसं शान्तं सर्वकान्तं परात्परम् ॥
नवीननीरदाभासधामैकं श्यामविग्रहम् ।
शरन्मध्याह्नपद्मौघ. शोभामोचनलोचनम् ॥
मुक्ताच्छविविनिन्द्यैकदन्तपंक्तिमनोरमम् ।
मयूरपिच्छचूडञ्च मालती-माल्य-मण्डितम् ॥
सुनसं सस्मितं कान्तं भक्तानुग्रहकारकम् ।
ज्वलदग्निविशुद्धैकदन्त पंक्ति मनोरमम् ॥
द्विभुजं मुरलीहस्तं रत्नभूषणभूषितम् ।
सर्वाधारञ्च सर्वेशं सर्वशक्तियुक्तं विभुम् ॥
सर्वैश्वर्यप्रदं सर्वस्वतन्त्रं सर्वमङ्गलम् ।
परिपूर्णतमं सिद्धं सिद्धेशं सिद्धिदायकम् ॥
ध्यायन्ते वैष्णवाः शश्वतद् देवदेवं सनातनम् ।
जन्ममृत्युजराव्याधि शोकभीतिहरं परम् ॥

वयसो ब्रह्मणो यस्य निमेष उपचर्य्यते ।
स चात्मा स परं ब्रह्म कृष्ण इत्यभिधीयते ॥९।।१७-२३

'स एकाकी न रमते' इत्यनुसारमखिलान्तरात्मा परमात्मा स द्वितीयमभिषन् यदा सृष्टिं कर्तुमुद्यतः तदा स आत्मानं द्विधा विधत्ते। तस्य वामभागः वामारूपः दक्षिणभागश्च पुरुषरूपो बभूव। तया वामभागजन्यया चन्द्रवदनया वामया सह रासोल्लासे रसिकः स रासमण्डले चीरं चिक्रीड । ब्रह्मणो दिनपर्यन्तं सुखसंभोगं कुर्वन् परिश्रान्तः स तदवसाने तस्यां वीर्यमाधत्त । परिश्रान्तायास्तस्या वामायाः श्रमजलेन समस्तं विश्वलोकं परिपूर्णमजायत। तदन्तरं सा गर्भवती चिच्छक्तिः शतमन्वन्तरं तेजसा जाज्वल्यमाना सुवर्णाभमेकमतिपृथुलं डिम्भमसूत ।

तमालोक्य दन्दूयमाना सा ब्रह्माण्डगोलके जले तं निक्षिप्तवती। (२६।४८)

तस्य तं परित्यागमवलोक्य भगवान् श्रीकृष्णः तदानीं हाहेति विलपन् तां शप्तवान्-हे कोपशीले ! यतस्त्वं बालमेनं जले निक्षिप्तवती, अतोऽद्य प्रभृति त्वमपत्य-हीना भव, अग्रे त्वदङ्गादुत्पद्यमाना सर्वा अपि स्त्रियः त्वत्समाना एवापत्यरहिता नित्ययौवनाश्च भविष्यन्ति—

यतोऽपत्यं त्वया त्यक्तं कोपशीले ! च निष्ठुरे !
भव त्वमनपत्यापि चाद्यप्रभृति निश्चितम् ॥
या या त्वदंशरूपाश्च भविष्यन्ति सुरस्त्रियः ।
अनपत्याश्च ताः सर्वास्त्वत्समा नित्ययौवनाः ॥ ९।२।५०।५१

इत्येवं तस्मिन्नेवावसरे शप्तायास्तस्या जिह्वाग्रात् शुक्लवर्णा मनोहरा कन्यका प्रादुरभवत्। तदन्तरं सा द्विधारूपा समजनि। तस्याः वामार्द्धात् कमला, दक्षिणार्द्धाच्च राधिका देवी बभूव तु। तस्मिन्नेव काले भगवान् श्रीकृष्णोऽपि द्विधा अजायत दक्षिणार्द्धो द्विबाहुः, वामार्द्धश्चतुर्भुजः। देव्या जिह्वाग्रात् समुत्पन्नां शारदां कमला-लयाञ्च श्रीकृष्णः चतुर्बाहवे भगवते नारायणाय विष्णवे प्रादात्। भगवान् विष्णुश्च ते उभे गृहीत्वा वैकुण्ठमगच्छत् ।

स जगाम च वैकुण्ठं ताभ्यां सार्द्धं जगत्पतिः। ९।२।५७

राजेश्वरी राधा देवी तु गोलोकाधिपतेः भगवतः श्रीकृष्णस्य सन्निधिमल-ङ्कृतवती।

वैकुण्ठे समुपस्थितस्य भगवतो विष्णोः शरीरात् सहस्रशः पार्षदाः कमलालया-शरीराच्च कोटिशो न्यक्कृताप्सरसो दास्यः संबभूवुः। तथैव गोलोकनिवासिनो भगवतः श्रीकृष्णस्य लोमतः वयसा तेजसा च सदृशाः, असंख्याताः गोपा सम्बभूवुः राधायाश्च रोमकूपेभ्यः वयसा रूपेण च तत्समाना एव गोपकन्यकाः अजायन्त। भगवतः शापात् ताः सर्वाः अपि अनपत्या एवाभूवन्—

राधाङ्गलोमकूपेभ्यो बभूवु गोंपकन्यकाः ।
राधातुल्याश्च ताः सर्वा राधादास्यः प्रियम्वदाः ॥
रत्नभूषणभूषाढ्याः शश्वत्सुस्थिरयौवनाः ।
अनपत्याश्च ताः सर्वा पुंसः शापेन सन्ततम् ॥९।२।६२-६८

जले प्रक्षिप्तः सोऽर्भकस्तु वहुकालपर्यन्तं तत्र तिष्ठन् द्विधाभवत् । तन्मध्ये सहस्रकोटिसूर्यसमप्रभः क्षुत्क्षामकण्ठो रोरूयमाण एकः शिशुरदृश्यत । स च अनाथवद् उर्ध्वं पश्यन् अतिस्थूलकलेवरः सन् विराड्नाम्ना प्रसिद्धः । स च भगवतः श्रीकृष्णस्य षोडशांशः सर्वविच्च राधाप्रकृतेरुत्पन्नत्वात् प्राकृतो महाविष्णुरभिधीयते । अस्य प्रत्येकं लोमकूपेषु सन्ति अनेके ब्रह्माण्डाः तद्ब्रह्माण्डानां तत्संख्याका एव ब्रह्मविष्णु शिवादयो भवन्ति । पातालाद् ब्रह्मलोकपर्यन्तमेकं ब्रह्माण्डमभिधीयते । तत्र भवन्ति अनेके लोकाः तेषामुपरि ब्रह्माण्डाद्बहिः विर्णोर्धाम वैकुण्ठं तदुपरि च विराजते श्रीकृष्णवदनन्तमहिमा पञ्चाशतकोटियजनः सत्यस्वरूपो नित्यो गोलोकः—

पातालद् ब्रह्मलोकान्तं ब्रह्माण्डं परिकीर्तितम् ।
तत उर्ध्वं च वैकुण्ठो ब्रह्माण्डाद्बहिरेव सः ॥
तत ऊर्ध्वं च गोलोकः पञ्चाशत्कोटियोजनः ।
नित्यः सत्यः स्वरूपश्च यथाकृष्णस्तथाप्ययम् ॥ = ९।३।८.९

नित्यौ गोलोकवैकुण्ठौ प्रोक्तौ शश्वदकृत्रिमौ ।
प्रत्येकं लोमकूपेषु ब्रह्माण्डं परिकीर्तितम् ॥
प्रत्येकं प्रतिब्रह्माण्डं ब्रह्म-विष्णु-शिवादयः ।
सृष्टीनां प्रलयानां च ब्रह्माण्डानां च नारद !
ब्रह्मादीनां च ब्रह्माण्डे सख्यां जानाति कः पुमान् ॥
ब्रह्माण्डानां च सर्वेषामीश्वरश्चैक एव सः ।
सर्वेषां परमात्मा च सच्चिदानन्दरूपधृक् ॥

स्कन्दपुराणस्य वैष्णवखण्डे वासुदेवमाहात्म्ये षोडशसप्तदशयोरध्याययो गौंलकस्य महिमा इत्थमुपवर्णितोऽस्ति

मेरुशृङ्गं समारूढो नारदो दिव्यया दृशा ।
श्वेतद्वीपे च तत्रस्थान् पश्यन् मुक्तान् सहस्रशः ॥
वासुदेवे भगवति दृष्टिमाबध्य तत्क्षणम् ।
उत्पपात महायोगी सद्यः प्राप च धाम तत् ॥
प्राप्य श्वेतं महाद्वीपं श्वेतान् चन्द्रप्रभान् शुभान् ।
पूजयामास शिरसा मनसा तैश्च पूजितः ॥

दिदृक्षुर्ब्रह्म परमं स च कृच्छ्रपरः स्थितः ।
भक्तमेकान्तिकं विष्णो र्बुद्ध्वा भागवतास्तु ते ॥
तमूचुस्तुष्टमनसो जपंश्च द्वादशाक्षरम् ।

श्वेतमुक्ता ऊचुः—

मुनिवर्य ? भवान् भक्तः कृष्णस्यास्ति यतोऽत्र नः ।
दृष्टवान् देवदुर्दशान् किमिच्छन्नथ तृप्यति ॥

नारद उवाच—

भगवन्तं परं ब्रह्म साक्षात् कृष्णमहं प्रभुम् ।
द्रष्टुकामोऽस्मि भक्तेन्द्रास्तं दर्शयत तत्प्रियाः ॥

स्कन्द उवाच—

तदैकः श्वेतमुक्तस्तु कृष्णेन प्रेरितो हृदि ।
एहि ते दर्शये कृष्णमित्युक्त्वा पुरतोऽभवत् ॥
प्रहृष्टो नारदस्तेन साकमाकाशवर्त्मना ।
पश्यन् धामानि देवानां तत ऊर्ध्वं ययौ मुनिः ॥
सप्तर्षींश्च ध्रुवं दृष्ट्वाऽनासक्तः कुत्रचित् स च ।
महर्जनतपोलोकान् व्यतीयाय द्विजोत्तमः ॥
ब्रह्मलोकं ततो दृष्ट्वा श्वेतलोकानुगो मुनिः ।
कृष्णस्यैवेच्छयाऽवानं प्रापाष्टावरणेष्वपि ॥
भूम्यप्तेजोऽनिलाकाशाहम्महत्प्रकृतीः क्रमात् ।
क्रान्त्वा दशोत्तरगुणा प्राप गोलोकमद्भुतम् ॥
धाम तेजोमयं तद्धि प्राप्यमेकान्तिकैर्हरिः ।
गच्छन् ददर्श विततामगाधां विरजां नदीम् ॥
गोपी - गोपगण - स्नानधौतचन्दनसौरभाम् ।
पुण्डरीकैः कोकनदै रम्यामिन्दीवरैरपि ॥
तस्यास्तटं मनोहारि स्फटिकाश्ममयं महत् ।
प्राप श्वेतहरिद्रक्तपीतसन्मणि - राजितम् ॥
कृष्णस्य राधिकायाश्च प्रियं तत्क्रीडनं स्थलम् ।
तद्वीक्ष्य हृष्टः संप्राप्य गोलोकपुरमुज्ज्वलाम् ॥
कृष्णमन्दिरमासाद्य सर्वाश्चर्यं मनोहरम् ।
श्रीदामानं च नत्वाऽसौ प्रविष्टोऽन्तस्तदाज्ञया ॥
महाचतुष्के वितते तेजोऽपश्यद् महोच्चयम् । १६।१ ६३

तत्त्वेककालसम्भूत-कोटि कोट्यर्कसन्निमम् ।
दिशश्च विदिशः सर्वा उर्ध्वाधो व्याप्नुवच्च यत् ॥
कृष्णस्यानुग्रहो यस्मिन् स तेजसि समीक्षते ।
केवलं तेज एवान्ये पश्यन्ति न तु तं मुने ॥
दण्डवत्तं नमस्कृत्य नारदः प्रेम - विह्वलः ।
वद्धाञ्जलिपुटस्तस्थौ वीक्षमाणस्तदाननम ॥
तं मानयामास हरिः पृष्ट्वा स्वागतमादरात् ।
भक्तमेकान्तिकं स्वस्य स्वेनैव च दिदीक्षितम् ॥
१७।१--२,५--६

तादृशीमेवावस्थामनुभूय श्रीमन्तः चैतन्यमहाप्रभुपादा अपि ब्रुवते—

नाहं विप्रो न च नरपति र्नापि वैश्यो न शुद्रो
नो वा वर्णी न च गृहपतिर्नो वनस्थो यतिर्वा ।
किन्तु प्रोद्यन्निखिल - परमानन्दपूर्णामृताब्धे-
र्गोपीभर्त्तुः पदकमलयोर्दासदासानुदासाः ॥

एवमेव श्रीमतां दार्शनिकसार्वभौमशिरोमीणनां पूज्यपादानां श्रीशङ्कराचार्यागामपि कथनमस्ति—

न वर्णा न वर्णाश्रमाचारधर्मा
न मे धारणाध्यान - योगादयोऽपि ।
न माता पिता वा न देवा न लोका
न वेदा न यज्ञा न तीर्थं ब्रुवन्ति ॥

यस्तु केचन पद्यमिमवलोक्य श्रीमन्तः आचार्यचरणाः वर्णाश्रमाचारधर्मान् नाद्रियन्ते, अतो ते सन्ति अनाचारप्रवर्तकाः । अतोऽश्रद्धेयं तद्वचनमिति । अत्रोच्यते-पूज्यपादैः भगवद्भिः श्रीशंकराचार्यैः कृतब्रह्मसाक्षात्कारं ब्रह्मीभूतं ज्ञानिनमुदिश्यैव तस्य पारमार्थिकीमवस्थामभिलक्ष्य विरक्तं प्रति पद्यमिदं प्रोक्तं नतु व्यवहारिकीं दशाममाश्रित्य पूर्वोक्त मुक्तम् । सर्वत्र श्लोकान्तेषु 'तदेकोऽवशिष्टः शिवः केवलोऽहम्" इत्युक्तत्वात् । सैषा प्रेमपत्तनप्रणाली पराभक्तिमतां त्रिगुणातीतानां भगवत्प्रमिणां भक्तानामेव कृते प्रोक्ता, न खलु सर्वसाधारणानां कृतेऽपि ॥ अतएव—

त्रिगुणातीतानामेव योगिनां कृते विधिनिषेधाश्रयणमनावश्यकमित्युक्तम् । तथाहि—

यदा यस्यानुगृह्णाति भगवानात्मभावितः ॥
सः जहाति मतिं लोके वेदे च परिनिष्ठिताम् ॥
अधर्मो धर्मतामेति ह्यादृते परमेश्वरे ।
धर्मोऽप्यधर्मतामेति तमनादृत्य भावितः ।

अपि च—

निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः !

तथा च भगवत्प्रेमपुरपरिप्लुतान्तःकरणानां निर्मलमानसानां महात्मनां धर्माधर्मबन्धनं न भवति तेषां भगवत्तत्वसाक्षात्कारेण समेषां व्यवहाराणां विलयात्। एतादृशानेव भगवद्भक्तिशिरोमणीन् उद्दिश्य श्रीस्वामी हरिवंशमहानुभावैरप्युक्तम्—

कैशोराद्भुतमाधुरीभरधुरीणाङ्गच्छविं राधिकां
प्रेमोल्लासभराधिकां निरवधि ध्यायन्ति ये तद्धियः।
त्यक्ताः कर्मभिरात्मनैव भगवद्धर्मेऽप्यहो निर्ममाः
सर्वाश्चर्यगतिं गता रसमयीं तेभ्यो महद्भ्यो नमः॥

प्रेमपत्तने हि इतरनगररचनावैपरीत्यमेवाविष्कृतं कविनाऽऽह्लादिनीसारसविद्रूपया रत्या धर्मत्वेन यो मार्गः समाश्रित आसीत्, ततो विपरीतमेव प्रदर्शितम्। यथा—

धर्मोऽधर्मत्वेन आहृतः, अनाचार आचारत्वेन स्वीकृतः, असत्यं सत्यत्वेन गृहीतः, असन्तोषः सन्तोषत्वेन, अनादर आदरत्वेन, अविनयो विनयत्वेन च प्रतिपादितो विद्यते। किं बहुना सर्वोऽपि व्यवहारो वैपरीत्यं नीतः। यत्रानलङ्कृतिरेवालङ्कृतिः-स्त्रिय एव पुरुषाः, पुरुषा एव स्त्रियः, ज्ञानमेवाज्ञानम्, सुखमेव दुःखम्, दुःखमेव-सुखम्, निकृष्टत्वमेवोत्कृष्टत्वम्, तम एव प्रकाशः, निषेध एव विधिः, अनुत्तरमेवोत्तरम्, अशिरस एव सहस्रशिरसः, अचक्षुष एव सहस्रचक्षुषः, अबाहव एव सहस्र-बाहवः, अपद एव सहस्रपदः, अनिद्रितत्वमेव निद्रितत्त्वम्, वियोग एव संयोगः, मरणमेव जीवनम्, जीवनमेव मरणम्, लघुत्वमेव गुरुत्वम्, स्तुतिरेव निन्दा, निन्दैव स्तुतिः, व्यय एव लाभः, विस्मरणमेव संस्मरणम्, अगर्वत्वमेव, सगर्वत्वम् सकामत्वमेव अकामत्वम्, रविरेव चन्द्रः, असन्त एव सन्तः, असतीत्वमेव सती-त्वम्, अकीर्तिरेव कीर्तिः, निग्रह एवानुग्रहः, अकवय एव कवयः, शिष्या एव गुरवः प्रदर्शिताः। दिङ्मात्रमुदाहरणानि यथा—

यत्र दुःखमेव सुखम्—

काचित् सहचरी कान्ताकान्तयोः (श्रीराधाकृष्णयोः) निरवद्यं मन्मथवेद्यं परमप्रेष्ठतमं प्रेम दूरादवलोक्य साश्चर्यं निजसखीपुरतोऽनुवर्णयति—

पश्यालि! विष्वग् गुरवः ससंभ्रमं
भ्रमन्ति दावानलभीतचेतसः।
तदातपे राधिकया स्वसंमुखं
मुखं मुकुन्दस्य सुखं समीक्ष्यते॥ ५५॥

हे आलि = अयि प्रियसखि! इदं पश्य अवलोकय-गुरवः = सर्वे गुरुजनाः विष्वक् = समन्ततः ससंभ्रमं = सवेगं यथा स्यात्तथा भ्रमन्ति = इतस्ततो धावन्ति।

कृदृशा बुरवः इति चेत् दावानलभीतचेतसः—कालीयदमनान्तरं ग्रीष्मातपनीरसे कालिन्दीरोधसि निशीथे सहसोद्भूतेन दावानलेन भीतानि भययुक्तानि चेतांसि = मनांसि येषां ते तथोक्ताः ! राधिकया तु भयानकेऽपि तस्मिन् समये मुकुन्दस्य परमानन्दप्रदस्य निजप्रियतमस्य श्रीकृष्णस्य स्वसंमुखं = निजपुरतो वर्तमानं मुखं = आननं तदातपे = तस्य दावानलस्य आतपे = परमप्रकाशे सुखं = यथेच्छं यथास्यात्तथा समीक्ष्यते = सम्यगालोक्यते । एवं तस्मिन्नतिदुःखमयेऽपि समये तयोः सुखमेवाभूदिति दुःखसुखयोर्विपर्ययो मधुररतिकृतः स्फुट एव । तथा हि स्पष्टमत्र दुःखमेव सुखम् ।५५।

व्याकरणचित्रं यथा—

काचित् कृष्णदयिता सखीसंसदि किमप्यपूर्वं वृत्तं विलोक्य सानन्दमाह—

शृण्वन्तु सख्यः ! सुखमेकमद्य
श्रीकृष्ण - सौन्दर्यसुधां निपीय ।
अहं यथा यूयमहो महोग्रा
मन्दा ननन्दाऽपि भृशं ननन्द ॥ ५७ ॥

हे सख्यः = अयि सहचर्यः ! एकमपूर्वं सुखं = आनन्दकरं वृत्तान्तं शृण्वन्तु = भवत्य आकर्णयन्तु-श्रीकृष्णसौन्दर्यसुधां = श्रीकृष्णस्य = सर्वचित्ताकर्षकस्य सौन्दर्यं = मनोहरत्वमेव सुधा = पीयूषं तां श्रीकृष्णसौन्दर्यसुधां निपीय = सादरमवलोक्य अहोः आश्चर्यं महोग्रा = अत्युग्रस्वभावा अतिभयप्रदा अतएव मन्दा रसानभिज्ञापि ननन्दा = भर्तृभगिनी यथा अहं ननन्द, यथा वा यूयं ननन्द, तथा साऽपि भृशं ननन्द = आनन्दमनुभूतवती । अत्र पद्ये टुनदि धातोः प्रथमपुरुषैकवचनं मध्यमपुरुषैकवचनम् उत्तमपुरुषैकवचनं च ननन्देतिपदेनोक्तमिति व्याकरणचित्रमवधेयम् ॥५०॥

काचित् सखी यत्नसहस्रैरपि गुरुमानवतीं कान्तामनुनेतुमनीशा तत्कान्तमेव तदन्तिकमानीतवती । सोऽप्यगत्य तच्चरणतलं शिरसा स्प्रष्टुमिच्छति तत्कृपयाविरतेति मानिनीं दाक्षिण्यविशेषेणार्थयति—

कृष्णस्त्वया यो नयनाञ्जनीकृतो
हारीकृतो नीलमणीन्द्रमञ्जुलः ।
मानिन्ययं सम्प्रति गन्तुमीहते
प्रियोऽनुरक्तः पदयोरलक्तताम् ॥ ५९ ॥

हे भानिनि ! अयं पुरतोऽञ्जलिं वध्वा स्थितः तव पादयोः अलक्ततां यावकत्वं गन्तुं प्राप्तुमीहते= वाञ्छति । यः=कान्तः त्वया नयनाञ्जनीकृतः = लोचनयोरञ्जनतां नीतः । यतः स कृष्णः श्यामसुन्दरः । हारीकृतः = हृदयाहारतां नीतः हृदयेन सदामलंकृत इत्यर्थः । यतः स नीलमणीन्द्रमञ्जुलः नीलश्चासौ मणीन्द्रो नीलमणीन्द्रः ततोऽपि

मृदलाङ्गत्वेन मञ्जुल । सम्प्रति = इदानीं तु अनुरक्तोऽतीवानुरागवान् । अत एवालक्तता यावकत्वमिच्छतीति भावः । नेत्रकण्ठाभ्यामलंकृत्य परमाहृतः । अत एवेदानीमागतवैयात्यः परमानुरक्तः सन् यावकवत्तव पादतलसंलग्नतयाऽऽत्मानं शोभयितुमिच्छति । मम तव चरण संलग्नत्वमेव यथा सदैव स्यात्तथैवाधुनानुग्रहो विधेय इति प्रच्छन्नप्रार्थनया सदा मानाभावं प्रार्थयति । एवं नेत्रहृदयनिवासिनः तस्य पदयावकत्वरूपप्रार्थनापराजयः स्फुट इति तयो मधुररतिकृतोऽयं विपर्ययः ॥५९॥

यत्र निषेध एव विधिः

कदाचिद् भगवान् श्रीकृष्णो नवानुरागवत्या कयाचित् कान्तया सह निशि नव सङ्गमसुखमनुभूय प्रातर्निजप्रियसखस्य सुदाम्नः पुरतो रहसि तदानुभूतं सुखविशेषमनुवर्णयति अनुमतिः = संमतिः, नवाङ्गनानां = पूर्वानुरागवतीना मित्यर्थः—

असंमुखालोकनमाभिमुख्यं निषेध एवानुमतिप्रकारः ।
प्रत्युत्तरं मुद्रणमेव वाचो नवाङ्गनानां नव एष पन्थाः ॥ ६० ॥

यत्र तम एव प्रकाशः

घनघोरतमायामिलायां घनान्धकारे भवनं विहाय वने गमनं कर्तुमीहमाना मार्गज्ञानाभावात् कथमभिसरामीति वदन्तीं श्रीकृष्णे नवानुरागवतीं कामपि कान्तां काचित् सहचरी प्रेमाभिसारप्रक्रियामार्गमुपदिशति—

रभसादभिसर्तुमुद्यतानां
वनितानां सखि ! वारिदो विवस्वान् ।
रजनी दिवसोऽन्धकारमर्चि-
र्विपिनं वेश्म विमार्ग एव मार्गः ॥ ६० ॥

हे सखि ! रभसादभिसर्तुं = प्रणयसंभ्रमात् प्रियान्तिकं गन्तुमुद्यतानां वनितानां जातात्यन्तानुरागाणां वारिदः = वर्षन् मेघः, विवस्वान् = सूर्यः, रजनी = रात्रिः, दिवसः = दिनम्, अन्धकारः = तमः, अर्चिः = दीपः, विपिनं=वनमेव वेश्म = गृहम्, विमार्गः = मार्गत्याग एव मार्गः=पन्थाः । अतःप्रेम्णो गति विपरीतेति मत्वा सुखमभिसरेतिभावः ।

उत्तरमेव प्रत्युत्तरम्

कदाचित् गुरुमानवनीमपनेतुं तदन्तिके सख्या नीतं श्रीकृष्णं प्रति बहिःसादरां धीरां पुनस्तदनुनयैर्गतमानां तत एवावलम्बितमौनां विज्ञाय काचित् चतुरा सहचरी भगवन्तं श्रीकृष्णमनुवदति—

सुभग ! सुमानवतीनां सम्मानमेव मानसं मानम् ।
मौनममौनमिदानीं मामनुजानीहि जानीहि ॥ ६३ ॥

हे सुभग ! = हे सुन्दर ! सुमानवतीनामुत्तममानवतीनां संमानं मनसि भवं मानमेव सम्मानम् । अयं भावः अनया यावद् भवतः संमाननं न कृतं तावदेव तन्मनसि स्थितं मानं जानीहि । अत एवेयं भवदन्तिके स्वस्था सती स्थिता । इदानीं=सांप्रतं तु अनया= मानवत्या मौनमालम्बितं मौनमङ्गीकृतम् । मौनमेव प्रतिवचनं जानीहि । अतो मामनु जानीहि - अन्यत्र गन्तुमाज्ञापय, अतःपरं ममात्रस्थितौ प्रयोजनाभावात् । त्वमनया सह यथेच्छं रमस्वेति तात्पर्यम् ।

यत्राशिरस एव सहस्रशिरसः

काचिद् भगवति श्रीकृष्णे परमानुरक्ता सती दुःखशतैरपि यथाकथञ्चित् तत्सङ्ग-सम्बन्धं समीहमानां श्रीवृन्दावने सखिभिः सह लगुडकन्दुकक्रीडाभिरतं निजदयित-मवलोक्य प्रेम्णा शनैः प्रतिवदति—

सखि ! मम शिरोऽस्य लगुडीसङ्गमसुखसङ्गि कन्दुकं भवतु ।
एवमशिरसां पुरतः सहस्रशिरसो वताशिरसः ॥

हे सखि ! अत्र कार्ये किञ्चित् साहाय्यं त्वमेव रचय । मम शिरः अस्य पुरतो दृश्यमानस्य श्यामसुन्दरस्य कन्दुकं = क्रीडनकं भवतु इति प्रार्थये । कीदृशं कन्दुकं ? लगुडीसङ्गमसुखसङ्गि--लगुडी = ईषद्भङ्गुराग्रा यष्टिः तस्याः सङ्गमः तत्र सुखं तस्य सङ्गोऽस्यास्तीति तथोक्तम् = एतत्करकमलसंसर्गिलगुडसंसर्गसुखानुभवभाग्यभाजनम् । वचनमेतन्निशम्य सा सखी तां सविस्मयमाह-एवं = यथा त्वं स्वशिरः प्रियकन्दुकं कर्तुमिच्छति तथा अशिरसां = शिरोहीनां त्वद्विधानां पुरतः = अग्रे सहस्रशिरसः = शेषादयो बहुभारं वोढुमीशाः, अशिरसः—न शिरो येषां ते अशिरसः । वत इति खेदे । निजदयितमुखक्रीजनककन्दुकार्थं निजदेहात्प्रायो दूरीकृतशिरसः तवाग्रे शेषादयः अशिरसः, त्वमेव सहस्रशिरस्का इति भाव. । तेषां तथा प्रेमाभारासहत्वात् ।

यत्र स्त्रिय एव पुरुषाः

कदाचित् काचित् सहचरी नवयौवनाविर्भावितनिजमाधुर्यातिशयमादर्शे विलोक-यन्तीं तत्रासक्तिमतीं तदनुभावैरनुमीय अन्तरङ्गतया तदङ्गितज्ञानातिदूरतरं रसिक-शिरोमणिं तत्राभिसरणेनानन्दयितुं मिलितां सखीमाह——

दर्शनीयतममेव मृगाक्ष्या रूपमद्य यदवेक्ष्य दर्पणे ।
केलि-कौशल-वयोगुणाधिका राधिका दयितभावमीहते ॥ ४१ ॥

अद्य तस्या मृगाक्ष्या रूपं सर्वथा दर्शनीयम् । यद्रूपं दर्पणे = आदर्शे प्रतिबिम्बित-मवेक्ष्य=समलोक्य तत्रासक्तिमती सती केलिकौशलवयोगुणाधिका कामकेलिषु यत् कौशलं = दाक्षिण्यं तथा वयसः = नवतारुण्यस्य ये गुणाः = प्रगल्भादयः तैः अधिका =

परिपूर्णेति तथोक्ता = तत्तद्गुणातिशयपूर्णा राधिका वृषभानुनन्दिनी दयितवत् स्वयं तदुपभोगाय दयितभावं = व्रजेन्द्रनन्दनसारूप्यमीहते = वाञ्छति-स्वयमेव निजमाधुर्यस्य भोगानुपपत्तेः ।

यथा वा स्त्रिय एव पुरुषाः—

कदाचित् महातापसी पौर्णमासी प्रियावियोगविधुरतया वृन्दावने सखीभिः सह मनोविनोदयन्तं सविनयं कृतनमस्कृतिं व्रजनवयुवराजमाशीर्विशेषवितरणमिषेणैवाह—संप्रति राधा प्रेमावेशविशेषपरवशतयाऽङ्गीकृतभवद्वेषा वंशीस्वनवशीकृतसकलकला कलापकुशलललितादिसखीसहाया भवानिव रासं रचयतीति व्यञ्जयति इति त्वमपि तथैवाङ्गीकृततन्मूर्तिवेषपेशालः स्वस्य स्वप्रेयस्याः सखीसमूहस्य च मनोनयनान्यानन्दयन् तत्केलिरसस्यैतावतीमेवापरिपूर्तिं परिहरेत्युपदिशति—

कस्तूरिकापङ्कृताङ्गरागः
पीताम्बरालङ्करणाङ्कभागः ।
स कोऽपि वर्हार्पितभूरिभागः
पायात् सखीभिः कृतरासयागः ॥ ४२ ॥

स कोऽपि = परमानिर्वचनीयः परमाद्भुततमः श्रीराधाख्यो देवताविशेषः त्वां वियोगाधिसंभवात्तापात् पायात् = रक्षतु । कथंभूतः कस्तूरिकापङ्केन आत्मनः श्यामसुन्दरतासिद्धये कृतः = लिप्तः अङ्गरागो येन स तथोक्तः । पुनः कथंभूतः पीताम्बरेण अलङ्करणभूतौ अङ्कस्योर्ध्वाधोभागौ यस्य स पीताम्बरालंकरणाङ्कभागः । पुनः कथंभूतः वर्हेभ्यः=मयूरचन्द्रिकाभ्यः शिरसा धारणेन अर्पितो भूरिभागः बहुभाग्यं येन स वर्हार्पितभूरिभागः ।

एवमुभयलक्षणैरन्यैरपि प्रधासने वर्वद्वेषधरः स्वसमानवयोगुणाभिः सखीभिः नृपमण्डलीभिरिव सह कृतः = विहितः रास एव यागः राजसूयाख्यो येन स कृतरासयागः । अतः सर्वदा तद्वशवर्तिना व्रजराजकुमारेण राधारूपेण अवश्यं गत्वा तत्पूर्णता विधेयेति ध्वनिः । मधुररसकृतोऽयं व्यत्ययः ॥ ४२ ॥

यत्राज्ञानमेव ज्ञानम्

कश्चिद् गुरुतरगुरुचरणकरुणया युगलचरणकमलपरिचरणपरायणः व्रजजनचरणरेणुसर्वस्वः परमानन्यः निजान्तेवासिनं देशविशेषनिवासिनं पारमार्थिकसम्बन्धसंभवस्नेहनिबन्धनया करुणया शनैरुपदिशति—

प्रौढप्रेममयं भाति यद् व्रजे व्रजवासिनाम् ।
अज्ञानं तदभिज्ञानां विज्ञानादधिकं मतम् ॥ ४८ ॥

हे महापण्डित ! प्रौढं ज्ञानवैराग्यादिसहायानपेक्षतया परमसमर्थं यत्प्रेम तन्मयं प्रौढप्रेममयं प्रौढप्रेमात्मकं यत् व्रजवासिनां = व्रजनिवासिनामज्ञानं भाति =

प्रकाशते तद् बालदृष्ट्या शास्त्रदृष्ट्या वा अहन्ताममतात्मकत्वेन अज्ञानमिव भासमानमपि अभिज्ञानां, न तु त्वद्विधानां विज्ञानामपरोक्षब्रह्मज्ञानादधिकं मतं = संमतम् ।

तथा चाह श्रीमद्भागवतस्यैकादशेस्कन्धेविंशत्यध्याये उद्धवं प्रति भगवान् श्रीकृष्णः—

तस्माद् मद्भक्तियुक्तस्य योगिनो वै मदात्मनः ।
न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥ ११।१०।३१

तथा च भक्तिरसामृतसिन्धौ—

ब्रह्मानन्दो भवेदेष चेत् परार्द्धगुणीकृतः ।
नेतिभक्तिसुखाम्भोधेः परमाणुतुलामपि ॥

यथा वा हरिभक्तिसुधोदये—

त्वत्साक्षात्करणाह्लादविशुद्धाब्धिस्थितस्य मे ।
सुखानि गोष्पदायन्ते ब्रह्माण्यपि जगद्गुरो ॥

भावार्थदीपिकायामपि—

त्वकथामृतपाथोधौ विहरन्तो महामुदः ।
कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपमम् ॥

अतो वहिर्मुखजनोपदिष्टमसत्संप्रदायश्रद्धाभरमपास्य भक्तजनोपास्यतमं तमञ्जनत्विषं निःशङ्कं निरन्तरं भजेति निष्कर्षः । अत्र शिष्यविषयकवत्सलरतिकृतोऽयं तस्यान्यरसिकस्य मनस्युद्भूतः तयोर्विपर्ययः ।

यथा वा पराजय एव जय इत्यस्योदाहरणम्—

कदाचिद् भक्ताधिराजेन श्रीगोविन्दपदारविन्दमकरन्दलुब्धमधुपव्रतेन श्रीमतोमावल्लभेन सकलसंसारिकजनवृजिननिरसनायाङ्गीकृतसततपरिभ्रमणसुलभोऽजस्रं वल्लकीवल्लभो निजरमणगानरसमहासारवारिदो देवर्षि र्नारदः गोकुलपालकवालकस्य किञ्चिदुदन्तं कथयेति सस्पृहं संपृष्टः प्रेमामृतसिन्धुप्रविष्टोऽसौ जीवनमुक्तानामनुतापवर्णनव्याजेन प्रभोरानन्दप्रदत्वादिगुणवर्णनपूर्वकं घोषनिवासिनां प्रेमपरमोन्नतेः परम पुरुषार्थतां व्यञ्जयति—

अङ्गालङ्कृतभूषणे रतिपतेरङ्गप्रभादूषणे
वृष्णेर्वंशविभूषणे रसमये कृष्णे परे ब्रह्मणि ।
लोके गोकुलवासिनां प्रविलसन्नानानुरागात्मिका
विद्योद्योतमवेक्ष्य हन्त मुनयः शोचन्त्यविद्योज्झिताः ॥४९॥

श्रीकृष्णे भुवनत्रयस्य परमानन्ददानाय सच्चिदानन्दमयसर्वचित्ताकर्षकरूपे तमालश्यामत्विषि यशोदानन्दने गोकुलवासिनां व्रजवासिनां यशोदानन्दप्रभृतीनां सर्वेषां

प्रकर्षेण लसन्तः = ज्ञानयोगादिभिर्विराजमाना ये नाना = अनेकविधा अनुराग-प्रेमपर्यायाः तदात्मिकाः = तद्रूपा या अविद्या अज्ञानं तस्या उद्योतः = आतपः स तं प्रविलसन्नानानुरातिमिकाविद्योद्योतम् अवेक्ष्य = ज्ञात्वा, न तु दृष्ट्वा तेषां तादृशभाग्या-भावात् । हन्त इति खेदे मुनयः = जीवनमुक्ता मननशीला महात्मानः शोचन्ति पश्चात्तापं कुर्वन्ति, तादृग्विधप्रेमाभावात्, तेषां मनसि अनुतापेनाविर्भूतमित्यर्थः ।

कीदृशास्ते अविद्योज्झिताः—अविद्यया = अज्ञानेन उज्झिताः = त्यक्ताः । इदानीं तदज्ञानं यदि परावृत्यागतं स्यात्तदानुगतव्रजवासिजनकरुणया मनोऽभिलषितं कदा-चित् स्यादितिभावः । अतः तदज्ञानं निजज्ञानात् अधिकं मत्वा बन्धुमिव शोचन्ति

अथ पूर्वोक्तं परमानन्दप्रदत्वं षड्भिर्विशेषणैं विशदयति—कीदृशे श्रीकृष्णे अङ्गा-लङ्कृतभषणे—अङ्गैः = शरीरावयवैः अलङ्कृतानि = भूषितानि भूषणानि = अलङ्काराः येन स तस्मिन् तथोक्ते परमसौन्दर्येण सामान्यतया सर्वचक्षुष्मतां दर्शनीयतमत्वेन परमानन्दप्रदे । पुनः कीदृशे रतिपतेः = कन्दर्पस्य अङ्गप्रभादूषणे अङ्गस्य = शरीरस्य प्रभाः = कान्तिविशेषस्तास्या दूषणमिति स तस्मिन् तथोक्ते लावण्यातिशये त्रिभुवनभुवां चित्ताकर्षकत्वेन परमानन्दप्रदे, पुनः कीदृशे वृष्णिवंशविभूषणे वृष्णेवंशस्य गोपयदुकुलस्य परमशोभाप्रदे सकलकल्याणगुणनिलयत्वेन गोपानां यदूनां च निजवंशोत्तमत्वेन परमा-नन्दप्रदत्वम् । पुनः कीदृशे परे = परमेश्वरे सकाम-निष्कामाणां प्रीतिभक्तिमतां सर्व-पुरुषार्थप्रदत्वेन परमपुरुषार्थप्रदत्वेन च परमानन्दप्रदे । पुनश्च कीदृशे ब्रह्मणि परमात्मनि, ब्रह्मविदां शान्तभक्तिमतां सौन्दर्यानुभवेऽपि परमात्मत्वेनैव परमानन्दप्रदे ।

एवं हे भगवन् चन्द्रमौले ! आशुतोष ! भवत्प्रभोः नन्दनन्दनस्य व्रजनन्दनस्य भगवतः श्रीकृष्णस्य दिव्यैः सौन्दर्य-माधुर्यादिभि र्गुणैः समस्तं जगत् परमानन्दमवाप्नोति, किन्तु जीवनमुक्ता महात्मन एव तापेन भगवद्विरहवियोगजन्येन दुःखेन शोचन्ति = परमानुतापमनुभवन्ति । तस्माद् गोकुलवासिनां श्रीकृष्णानुरक्तानां भक्तिमतां जनानाम-ज्ञानमेव ज्ञानमिति सिध्यति । अत्र परमभक्तस्य देवर्षेर्नारदस्य दास्यरतिकृतोऽयं विपर्ययः ।

इत्थं 'न पारयेऽहं निरवद्यसंयुजाम्'इति पद्येन गोपीः प्रति युष्माभिः कृतं निरवद्य-प्रेमलक्षणमसाधारणमुपकारं कर्तुमहं न समर्थोऽस्मि, यद् युष्माकं प्रतिकृतं संभवेत् । सर्वसामर्थ्यवतोऽपि भगवतो वासुदेवस्य व्रजसुन्दरीविषयकमधुररतिकृतत्वात्तत्र पराजय-मनमपि जयादधिकम्, परमप्रेम्णस्तथैव स्वभावात् ।

यत्र तम एव प्रकाश इत्यस्योदाहरणम्—

यथा वा काचित् चतुरसहचरी निकुञ्जे कान्तविरहविवशां विलोक्य कान्तामभि-सारयितुमागता तत्र तां निजाभिजात्येन गोकुललोकावलोकनशङ्कया किञ्चिन्मन्थरा-

यमाणामाशाय सोपपत्तिकेन वचसा तत्र भयाभावमेव समर्थयन्ती तदङ्कान्त्योरेव अद्भूततां व्यञ्जयति—

नक्तं प्राक् पुनरम्बुवाहनिवहै व्योमावृतं सर्वतो
भूयः क्षमातलचुम्बिभि द्रुमचयै वृंन्दावनं गह्वरम् ।
राधे ! ताम्यसि किं भियान्धतमसि कृष्णो न दृश्योऽधुना
दैवाद् द्रागचिरद्युतिः स्फुरति चेत्त्वं नैव दृश्या जनैः ॥ ६० ॥

हे सखि ! शृणु, प्राक् = पूर्वम् इदानीं तु नक्तं = रात्रिमुखं तत्तु तमः तत्रापि अम्बुवाहानां = रससंभृततयाऽतिश्यामानां निवहैः = समूहैः सर्वतः = सर्वतोदिशं व्योम आवृतं व्याप्तम् । भूयः = पुनः क्षमातलचुम्बिभिः = आसारसमयसमुत्पन्नकिशलय-दलादिसमुत्पन्नतया भूतलस्पृग्भिः तत्रापि तेषां द्रुमाणां चयैः समूहैः वृन्दावनं स्वत एव वनत्वेन सघनमपि तै गंह्वरं = दुष्प्रवेशम् । ततः हे राधे ! = वृषभानुनन्दिनि ! प्रेमपरवशा किं ताम्यसि = किं करोमीतिचिन्तया कथं खिद्यसि, सत्वरमभिसर । ननु कदाचित् कोऽपि तत्रागत एव स्यात्तदा किं विधेयमिति चेत् तत्राह-शृणु युवयोः युगपदेकत्र दर्शने भयं भवेत् तत्राधुनैवंभूते गाढतमसि कृष्णः = श्यामसुन्दरो दृश्यो न = दर्शनयोग्यो न तेन न कोऽपि तं द्रक्ष्यति । ननु विद्युदुद्यतया बिभेमीति तत्राह-पूर्वं वर्षोन्मुखे घनतरे घने विद्युदेव न प्रकाशते, यदि दैवात् सा स्फुरति = प्रकाशते चेत्तर्हि सा अचिरद्युतिरिति क्षणमात्रमेव तत्प्रकाशः । ततोऽपि बिभेमीति चेत्तर्हि तदा विद्युत्प्रकाशे त्वं जनै नं दृश्या । सुवणवर्णां त्वां न कोऽपि द्रक्ष्यतीति सत्वरमभिसरेति-भावः । तथा च प्रकाश-तमसोः क्रमेणाभयकरत्वे तथा कार्यसाधकत्वाऽसाधकत्वे च प्रसिद्धे । अत्र तु अभयकरत्वात्. प्रियमिलनादिसर्वकार्यसाधकत्वात् तमस एव प्रकाशत्वमङ्गीकृतमिति ज्ञेयम् । एवं तयोर्मधुररतिकृतोऽयं तमःप्रकाशयो विपर्ययः

यत्र व्यय एव लाभ इत्यस्योदाहरणम्

श्रीव्रजेन्द्रनन्दने पूर्वानुरागवती रूपमाधुर्यगुणवती कापि गोपकुलयुवती क्रीडाविहा-राभ्यामतीव मुहुराकृष्यमाणा मनोविनोदाय सखीभिर्वनं नीता तत्र वृन्दावनस्य वसन्तकालकीनां शोभासम्पदामवलोकनेन सद्यः समुद्दीपितभावविशेषविवशा कामपि स्वप्रियसखीं दूत्यादिषु वहुधनदानेनापि तं कान्तं संगमय्य मां जीवयेति व्यञ्जयन्ती किञ्चित् सोपहासमुवाच—

वसन्तकाले विकसद्रसाले सुवर्णवल्ली विलसत्तमाले ।
लभ्येत चेत् सम्प्रति गोपमौलि लभिस्तनुप्राणधनव्ययोऽपि ॥ ९६ ॥

वसन्तकाले = पुष्पसमये यस्य स्मरणादिकमपि उद्दीपनं, किं पुनरागमनम् । कीदृशे वसन्तकाले इति चेद् विकसद्रसाले विकसन्तः = प्रफुल्लिताः रसाला आम्रतरवो

यस्मिन् स तस्मिन् विकस्वद्रसाले यद्वा विकसन्तः प्रमुदिताः रसालाः शुचिरससंसृताः = साक्षात्तद्रसमनुभवन्तो संयमिन यस्मिन् स तस्मिन् पुनः कीदृशे इति चेत् सुवर्णवल्ली-विलसत्तमाले सुवर्णवल्लीभिः विशेषेण लसन्तः = शोभायमानाः तमालाः = श्यामतरु-विशेषा यस्मिन्निति स तस्मिन् सुवर्णवल्ली विलसत्तमाले संप्रति = इदानीम्, एतस्मिन्नवसरे गोपमौलिः = गोपानां = व्रजवासिनां मौलिः=शिरोभूषणमिव शोभाप्रदः परमसौन्दर्यनिधिः भगवान् श्रीकृष्णः लभ्येत = प्राप्येत तर्हि = तदा तनुप्राणव्ययोऽपि तनुश्च प्राणाश्च तनुप्राणास्तेषां व्ययः = उत्सर्गः तनुप्राणधनव्यः = शरीरप्राणव्ययोऽपि लाभ एव । एवञ्च मधुररतिकृतोऽयं व्ययलाभयोः विपर्यासः स्फुट एव ।

अत्र स्त्रिय एव पुरुषाः, पुरुषा वा स्त्रिय इत्यस्योदाहरणे

कस्तूरिकापङ्ककृतपरागः पीताम्बरालङ्करणाङ्कभागः ।
स कोऽपि वर्हायितभूरिभागः पायात् सखीभिः कृतरासयागः ॥ ४२ ॥

अत्र कोऽप्यानिर्वचनीयो राधाख्यो देवतविशेषः त्वां पायादिति निष्कर्षार्थः । अथैकदा द्वारकाप्रतोल्यां स्त्रीवेषधारिणमभिमुखमायान्तं भगवन्तं श्रीकृष्णं दृष्ट्वा मोहितो देवर्षि नारदः प्राह—

मां स्नेहयति किमुच्चै र्महिलेयं द्वारकावरोधेऽत्र ।
आ ज्ञातं कुतुकार्थी वनितावेषः हरिश्चरति ॥

अत्र द्वारकावरोधे = द्वारकाप्रवेशमार्गे इयं महिला = एषा स्त्रीः मां = नारदं कथं = उच्चैः = अत्यन्तं स्नेहयति = स्नेहं कारयति । आ ज्ञातम्, कुतुकार्थी = कौतुकी वनितावेषः = स्त्रीवेषधारी हरिः = भगवान् श्रीकृष्णः चरति विचरति। अत्र भगवतः श्रीकृष्णस्य द्वारवतीपुरजनविषकवत्सलरतिकृतोऽयं विपर्ययः ।

सौन्दर्यसागरो रसिकशिरोमणिर्भगवान् श्रीकृष्णः कदाचित् रत्नदर्पणे स्वकीयं रूपमवलोक्य विस्मिततमः स्वयमेवाह—

अपरिकलितपूर्वः कश्चमत्कारकारी
स्फुरति मम गरियानेष माधुर्यपुरः ।
अयमहमपि हन्त ! प्रेक्ष्य यं लुब्धचेताः
सरभसमुपभोक्तुं कामये राधिकेव ॥

अयं दर्पणे प्रत्यक्षतो दृश्यमानः कोऽसाधारणः परमाद्भुतोऽनिर्वचनीयो निरुपमो मम = मदीयो, माधुर्यपुरः = मधुर्याणां लावण्यविशेषाणां पूरः = प्रवाहः स्फुरति = प्रकाशते । कथंभूतः—अपरिकलितपूर्वः—न परिकल्पितः अस्मिन् देशे देशान्तरेऽपि चित्रादौ स्वप्ने वा ममाप्यदृष्टचरः तथा लोकेऽस्मिन् परत्र वा पुरन्दरादिवत् अतीतानाग-

तविदां गर्गादिमुनीनां मुखादपि मयाऽश्रुतचरः तथा ध्याने मनोरथे च मनसाप्यननुभूतचरः। पुनः कथंभूतः चमत्कारकारी = ममापि चमत्कारजनकः। पुनः कथं भूतः गरीयान्ः गुरुतरः गिरिवरधरिणोऽपि ममः यथाकथञ्चिद्वोढुंशक्यः। यं = माधुर्यपुरं ससंभ्रमं प्रेक्ष्य = विलोक्य अहं = यस्यायं प्रतिविम्वः स विम्वरूपोऽपि लुब्धचेताः—भवितुं योग्यमयोग्यम्, उचितमनुचितं वेति विचारं विनैव लुब्धं = लोभाभिभूतं चेतो हृदयं यस्य स तथाभूतः सन् राधात्वं प्राप्य सरभसं = ससंभ्रममेवोपभोक्तुं कामये। यथा मे माधुर्यं राधा यथावदुपभोङ्क्ते तथा स्वमेव माधुर्यं तद्रूपः सन् भोक्तुं कामये इत्यर्थः। एवं स्वप्रतिविम्बविषयकमधुररतिकृतोऽयं तयोर्विपर्ययः।

यत्रासन्त एव सन्त इत्यस्योदाहरणम्

दूरदेशाद् भाग्योदयेन सद्यो वृन्दावने समागतया सेवितगीता-विष्णुसहस्रनामादिनिष्ठसामान्यभक्तसमूहया प्रेमपद्धतिमजानन्त्या शान्तभक्तमित्या कयाचित् तापस्या भाग्योदयात्तत्र मिलितः कोऽपि युगलमाधुर्यामृतजीवातुकः परिणतानन्यरसिकभक्तः सादरं पृष्टः—कथमत्रत्यानां वैष्णवानां गीतादिषु तथा परमादराभावः? ततः स तां सदयमाभाष्य विहस्य शनैरुपदिशति—

अन्यत्र पीतगीता भवमीता विषयवासनावीता।
सन्तस्तद्विपरीता हन्त सखि! प्रेमपत्तने गीता॥ १०२॥

अन्यत्र - देशान्तरे पीतगीताः —पीता = सादरं श्रुता गीता भगवदुक्तोपनिषदः यैस्ते पीतगीताः = संसृते मूर्तिभाजः, विषयवासनावीताः—तद्रहिताः सर्वे एव सन्तो वसन्ति तत् सत्यमेव ते तथैवाधिकारिणः, परन्तु अत्रास्तु तद्विपरीताः = अनाघ्रातगीतार्थाः यतो गीतायां क्रमेण कर्म-भक्ति-ज्ञानमयमध्यायषट्कत्रयं तत्र तत्रात्रत्यानामनधिकारात्। तथोक्तं श्रीमद्भागवते—

तावत् कर्माणि कुर्वीत न निर्विद्येत यावता।
मत्कथाश्रवणादौ वा यावच्छ्रद्धा न जायते॥ ११।२०।९

तथा—

तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः।
न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह॥ ११।२।३१

अपि च —

अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतम्।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा॥

इत्याद्युक्तलक्षणायां भक्तौ अधिकारिणोऽत्रत्याः, गीतोक्तायां साधनभक्तौ अनधिकारिण एव सिद्धदशायां साधनप्रयोजनाभावात्। पुनरत्रत्या भक्ता भवादपि न बिभ्यति। यथोक्तं भगवता रुद्रेण भगवतीं पार्वतीं प्रति श्रीमद्भागवते—

नारायणपराः सर्वे न कुतश्चिद् बिभ्यति ।
स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥६।१७।२८

यथा वा श्रीमद्भागवतस्य दशमस्कन्धे—

एवं नन्दादयो गोपा कृष्णरामकथां मुदा ।
कुर्वन्तो रममाणाश्च नाविदन् भववेदनाम् ॥

तथाऽत्रत्याः स्निग्धदेहाः सुवसनाः सुगन्धचन्दनाद्यालिप्ताङ्गा एव, नतु विषयवासना-बुद्ध्या तत्त्यागिनः । तदुक्तं श्रीमद्भागवतस्यैकादशे स्कन्धे भक्तप्रवरेणोद्धवेन—

त्वयोपभुक्तस्रग्गन्धवासोलङ्कार - चर्चिताः ।
उच्छिष्टभोजिनो दासाः तव मायां जयेमहि ॥

तस्मादत्रत्यानामेवं सिद्धान्तोत्तमपरिनिष्ठितानां परिपाटीमवधार्य विचिकित्सां विमुच्य कृपया हे सखि ! एवं भवितुं तवापि मनोरथश्चेत्तर्हि श्रीवृन्दावने निवस रसिक भक्तान् निष्कपटं भज, कालिन्दीजलसेवनं च कुरुष्व । तादृशत्वप्राप्तौ अयमेव रुचिर-उपचारः । प्रेमपत्तने श्रीव्रजमण्डले एवं रतिविशेषकृतः सदसतोः विपर्ययः स्फुट एव ।

यत्र पराजय एव जय इत्यस्योदाहरणम्

अथ दीपमालिकाया रजन्यां ललिताचन्द्रावलीप्रभृतिमुख्यसखीसहाययो राधा-कृष्णयोर्द्यूतकौतुकमवलोक्य काश्चन सख्यो नातिदूरं स्थिताः तत्सुखमन्योन्यमास्वाद-यन्त्यो विचारयन्ति—

विशङ्कमस्याः पिबतः स्वनिर्जयात्
समानमानन्दितमाननाम्बुजम् ।
द्यूते मुकुन्दस्य विनोदमोदभूः
पराजयोऽभूदयराजयादपि ॥ ५० ॥

हे सखि ! पश्य, पश्य अस्मिन् द्यूते मुकुन्दस्य परमानन्दप्रस्य श्रीकृष्णचन्द्रस्य मुग्धया राधया अजितस्य अपराजयात् विजयादपि विनोदमोदभूः = कौतुकमहानन्दास्पदम् अभूत् = अजायत । अस्याः सख्याः राधाया आननाम्बुजं मुखकमलं पिबतः सप्रेम समवलोकयतः । कीदृशमाननाम्बुजं स्वनिर्जयात् = स्वस्य आत्मनो निर्जयात् कान्ता-कर्मकपराजयादपि आनन्दितम् । पुनःकीदृशम् समानं = द्यूतकेलिवित्तया मया जित इति सगर्वम् । तत एव विशङ्कं = व्रीडापरित्यागोद्भूतसखीशङ्कारहितम् । एवं कान्त-विषयककान्ताश्रितमधुररतिकृतोऽयं जय-पराजयो विपर्ययः

यत्र सुखमेव दुःखमित्यस्योदाहरणम्

व्रजसीमन्तिनीनां प्रेमपरीक्षार्थं श्रीकृष्णेन विलिख्य प्रेषितमात्मतत्त्वमुपदिशन्तं तत्स्वरवायमुद्धवं प्रति गोप्यो ब्रुवन्ति—

ध्यायन्तु ते सुखधिया परमात्मतत्त्वं
यत्त्वं ब्रवीषि सुधियोऽनुगतस्वभावाः ।
एवा वयं मधुपकान्तिसुधातिसाद्र–
वृन्दावनेन्दुवदनेन्दु चकोरनेत्राः ॥ ५१ ॥

अर्थात्––ते प्रसिद्धाः सुधियः यत् त्वं ब्रवीषि = कथयसि तत् परं श्रेष्ठतममात्मतत्त्वं सुखधिया सुखबुद्ध्या ध्यायन्तु, तस्य दर्शनयोग्याभावात् ध्यानमात्रं कुर्वन्तु नाम, यतस्ते अनुगतस्वभावाः = हृदि संलग्नसुखानुभविनः । हे मधुप ! श्लेषेण मधुपेति सापेक्ष-सम्बुध्या सहसाऽधिक्षेपं तन्मन्दतां व्यञ्जयति । एता वयं गोप्यः कान्तिः = सौन्दार्यातिशायमेव सुधा = पीयूषं तया सान्द्रो घनीभूतः यो वृन्दावनेन्दो वृंन्दावनचन्द्रस्य वदनमेव इन्दुः = चन्द्रमाः तस्य चकोरा इव तद्धर्शनैकजीवनानि नेत्राणि नयनानि यासां ताः कान्तिसुधातिसान्द्रवृन्दावनेन्दुवदनेन्दुचकोरनेत्राः । ततोऽस्माकं तन्मुखदर्शने एव सुखबुद्धिः । तत्र दुःखबुद्धयः ते ज्ञानिन एव त्वदुपदेशाधिकारिणः, न तु तन्मात्रजीवना वयमिति भावः । अत्र मधुररतिकृतोऽयं सुखदुःखयोः तयोर्विपर्ययः ॥

यत्र दुःखमेव सुखमित्यस्योदाहरणम्

भगवतः श्रीकृष्णस्यानङ्गवर्धनं मुरलीध्वनिगीतं निशम्यागतानां गोपीनां स्वागतं-विधाय पातिव्रत्यधर्ममुपदिश्य च यदा परावर्तयितुमुक्तवान् श्रीकृष्णः तदा बत्यन्तं विह्वला दुःखेन ता वक्तुमारेभिरे—

सिञ्चाङ्ग ! नस्त्वदधरामृतपूरकेण
हासावलोककलगीतजहृच्छयाग्निम् ।
नो चेद्वयं विरहजान्युपयुक्तदेहा
ध्यानेन याम पदयोः पदवीं सखे ! ते ॥

श्री० भा० १०।२९।३५

अर्थात्—अङ्ग ! = भोः, त्वदधरामृतपूरकेण = भवदधरामृतप्रवाहेण हासावलोककलगीतजहृच्छयाग्निम्—तवैव यो हासावलोकः कलं = मधुरगीतं ताभ्यां जातः = उत्पन्नः यो हृच्छयाग्निः=कामाग्निः तं सिञ्च=आप्लावय, प्रशमय, नो चेत्=यदि न सिञ्चेस्तर्हि विरहजाग्न्युपयुक्तदेहाः = तव विरहादुत्पन्नो यो हृच्छयाग्निः तेन उपयुक्ता = उपयोगं नीता देहा यासां ता विरहाजाग्न्युपयुक्तदेहाः, प्रायोदशमीमवस्थां प्राप्ताः त्वद्ध्यानेन पुनर्जन्मान्तरे महाकितवस्य ते कदाचिद् दर्शनं स्यादिति महाविपद्गताः, यतो हि भवान् मनुष्यः, मनुष्यत्वं तु त्वयि प्रत्यक्षमेव दृश्यते । भगवतो ध्यानेन हि मुनयो मुक्ति यान्तीति भगवती श्रुति निर्दिशति । यदि सत्यं भवान् भगवान् तर्हि तव पुनः ध्यानेन वयमपि भवत्पादसम्वन्धिनीं सायुज्याभिधां गतिं यामः, यथा तव पुनः सम्वन्धोऽपि न स्यात् । हे सखे ! भवतोऽपि सख्यंशेन कदाचित् करुणयापि पुनर्विप्रति-

सारः स्यादिति मुग्धा वयं भयेन प्रार्थयामः। एवं तत्संगस्य दुःखरूपत्वेनात्यन्तिकप्रलयस्य सामान्यभक्तानामपि विषभक्षणादिवत् अनभीप्सितस्य सुखतया ताभिरङ्गीकारलक्षणो मधुररतिकृतो दुःखसुखयोर्विनिमयः स्फुट एव ।

यथा वा काश्चित् सख्यः कान्तया रागदशां प्राप्तं श्रीकृष्णविषयकं प्रेम परस्परं सानुरागमास्वादयन्ती ब्रुवते —

तीव्रार्कद्युतिदीपितैरसिलताधाराकारालाश्रिभिः
मार्तण्डोपलमण्डलैः स्थपुटितेऽप्यद्रेस्तटे तस्थुषी ।
पश्यन्ती पशुपेन्द्रनन्दनमसाविन्दीवरैरावृते
तल्पे न्यस्तपदाम्बुजेव मुदिता न स्पन्दते राधिका ॥

अर्थात्—हे सखि ? पश्य मार्तण्डोपलमण्डलैः=सूर्यकान्तमणिसमूहैः स्थपुटिते=नोन्नतीभूतेऽद्रेः गोवर्द्धनस्य तटे निकटस्थले तस्थुषी = स्थिता असौ प्रत्यक्षतो दृश्यमाना राधिका न स्पन्दते । कीदृशैः तैः तीव्रः मध्याह्नगतो योऽर्कः = सूर्यः तस्य दीप्तिभिः= आतपैः दीपितैः = सन्तापितैः पुनः कीदृशैः-असिरेव लता तस्य भागधारा तद्वत्कराला अश्रयः कोटयोऽग्रभागा येषां ते तैः = असिलताधाराकरालाश्रिभिः । कीदृशी राधिका इति चेत्—पशुपानां पशुपालकानामिन्द्रः श्रेष्ठो नन्दः तस्य नन्दनः स तं व्रजनवयुवराजचन्द्रं शेखरीकृतगोवर्द्धनं श्रीकृष्णचन्द्रं पश्यन्ती = अवलोकयन्ती अतएव मुदिता = प्रसन्नानना केव इन्दीवरैः रात्री विकशितयाऽतिशीतलैः नीलकमलैः आस्तृते = रचितास्तरणे तल्पे शय्यायां न्यस्ते=स्थापिते पादाम्बुजे = चरण-कमले यया सा न्यस्तपादाम्बुजा = शय्यास्थापितपादपद्मा सतीत्यर्थः । एवं प्रियमुखावलोकनसुखेन विस्मृतनिजाङ्गसखीगुरुजनसमूहा परमप्रसन्नतया न किञ्चित् चलतीति मधुररतिकृतो दुःखसुखयो व्यत्ययः स्पष्ट एव ।

यत्राविनय एव विनय इत्यस्योदाहरणम्

न दधिबिन्दुमितं मुषितं मया
न मम सुन्दरि ! संवृणु कन्दुकम् ।
इति गृहीतकुचस्य शिरोरभू-
दविनयो विनयादतिसुन्दरः ॥

अस्यार्थः स्पष्ट एव । अत्र शिशो तस्य भगवतः श्रीकृष्णचन्द्रस्य तासां वा गोपीनां मिथो निगुढरतिकृतोऽ विनय एव विनयो ज्ञेयः ॥

यत्रासतीत्वमेव सतीत्वमित्यस्योदाहरणम्

नन्दगोकुलवसतिना केनापि गोपकिशोरेण कृतकरग्रहां पितृभ्यां दत्तद्विरागमनां पत्या स्वभवनमुपनीतां विनीतां रूपादिगुणवतीं युवतीमस्माभिः सह सख्यं कुरु इति श्रीकृष्णानुरागवतीभिः गोपीभि र्बहुशोऽभ्यार्थतामपि तासु असतीबुद्ध्या रचिततद्वच-

नभिदर्शं पतिव्रतां मन्यां ताभिरुपेक्षितां पुनः कियद्दिनानन्तरं श्रीकृष्णचारुचपलापाङ्ग-सायकनिर्भिन्नहृदयां पूर्वानुरागवतीं विरहतापवतीं व्याधिविशेषबुद्ध्या गुरुजनैः कृता-नन्तौषधारां तदप्यलब्धोपशमां सखेदां निशम्य तासां संसदः सख्येन तदवलोकनव्याजेन तस्याः समीपमागता काचिद् गोपयुवति विरहविह्वलां तां तापोपशमनोपायं शनैरुपदिशति—

सन्ति रोगान्तरं हन्तुं संहितापथगामिनः ।
कृष्णानुरागरोगेऽस्मिन्नसतीसङ्गमौषधम् ॥ १०३ ॥

संहितापथगामिनः-चरक-सुश्रुतादिग्रन्थपद्धतिनिबद्धश्रद्धा बहवः चिकित्सका रोगान्तरं = विविधान् रोगान् हन्तुं = अपनेतुं सन्ति = समर्था वर्तन्ते, परन्तु हे सखि ! अस्मिन् श्रीकृष्णानुरागाभिधे महारोगे तु असतीनां-असाध्वीनां त्वया असतीत्वेन अना-दृतवचसामस्माकं सङ्ग एवौषधं = भैषज्यम्, नान्यदित्यर्थः । तस्मादसतीनामस्माकं त्वं सङ्गं कुरु, तदैव श्रीकृष्णप्राप्त्या तापोपशमः । अतः पूर्वमनादृतमपि मद्वचनमे-वाधुना स्वीकुरुष्व । एवं मधुररतिकृतोऽयमसती-सत्यो विपर्ययः समीचीनतया प्रस्फुट एव ।

अथावा

केकिपक्षधरः कोऽयमालि ! यस्यातिचञ्चलम् ।
लोचनं मोचयति मां सतीव्रतपिशाचतः ॥ १०४ ॥

अत्र सतीव्रतस्य पिशाचरूपकेणासतीत्वमेव सतीत्वम् ।

यत्र च सतीत्वमेवासतीत्वमित्यस्योदाहरणम्

दक्षप्रजापतिप्रभृतिशापाश्वरूढो लोकान् परिभ्रमन् भगवति श्रीकृष्णे प्रच्छन्न-परमानुरागवतीषु गोपयुवतीषु परमभक्तिमान् देवर्षिर्नारदः तासु सामान्यमतिमन्तं कमप्यशुद्धबुद्धिं वहिर्मुखं साधिक्षेपमुपदिशति—

कृष्णानुरागार्तिलसन्मतीनां
गोपीततीनामभिलक्ष्य भावम् ।
मतं सतां सत्कृतसत्पतीना-
महो सतीनामसतीत्वमेव ॥ १०५ ॥

कृष्णे = श्यामसुन्दरे योऽनुरागः = प्रेमपरिणामः तेन या आर्तिः = व्याकुलत्वं तया लसन्ती = सतीमतिभ्योऽपि शोभमाना मतिः = बुद्धि र्यासां ताः तासां तथोक्तानां गोपीततीनां = गोपीवधूश्रेणीनां भावं = मनोविकारविशेषमभिसारादिमनोमयमभिलक्ष्य= ज्ञात्वा अहो = इत्याश्चर्ये सतीनां पतिव्रताशिरोमणीनामरुन्धतीप्रभृतीनामसतीत्वमेव सतां सज्जनानां भक्तोत्तमानां मतम् = अभिमतम् । कथंभूतानां सतीनां सत्कृताः = परमादृताः सन्तः = सदाचारनिष्ठाः पतयः = स्वामिनो वशिष्ठप्रभृतयो याभिः ताः

तासां सत्कृतपतीनाम् । यतः सत्यः पाञ्चभौतिकशरीरवति सामान्यजीवे 'पतिरेव हि नारीणां दैवतं परमं मतम्, इत्यादिशास्त्रबलान्नरकपातभयेन यथा कथञ्चित् मनो वाक्कायकर्मभिः भगवन्मतिं विधाय प्रीत्या पातिव्रत्यं व्रतं साधयन्ति । एतास्तु गोपवध्वः साक्षात्परब्रह्मणि भगवति श्रीकृष्णे स्वारसिकानुरागिण्यः सत्यः तदर्थं त्यक्तैहिकामुष्मिकार्थाः । अत एव सत्य इति समुचितं सतां मतम्, त्वद्विधानां दोषदर्शिनीनां मतं सर्वथा अनुचितमितिभावः । अतएव—

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ।

इति श्रीमद्भागवतस्य तृतीयस्कन्धे स्वां मातरं देवहूतिं प्रति भगवान् कपिलो निर्गुणस्य भक्तियोगस्य लक्षणमुक्तवान् । श्रीरुक्मिणी देवी अपि तत्रैव तथा—

त्वक्श्मश्रुरोमनखकेशविनद्धमन्त-
मांसास्थिरक्तकृमि-विट्-कपवित्तवातम् ।
जीवच्छवं भजति कान्तमतिर्विमूढा
याते पदाब्जमकरन्दमजिघ्रती स्त्री ॥

एवं मधुररतिकृतोऽयं तयोर्विपर्यः स्फुट एव ॥

इत्थं यत्राकीर्तिरेव कीर्तिः, निग्रहः, एवानुग्रहः अकवय एव कवयः, शिष्या एव गुरवः इत्यादीनामुदाहरणानि च दत्तानि सन्ति । यथा—

नन्दकुमारेण समं ममास्तु मिथ्याभिशापोऽपि ।
इति पश्यति मुहुरबला भाद्रचतुर्थीकलानाथम् ॥

तथा—

मृदुचरणारुणताडनदण्डः कृपयैव चण्डि ! मयि रसिके ।
प्रतिकूलता तवेयं व्यञ्जितपरमानुकूलता जयति ॥

तथा—

विलोक्य कान्तं कवयन्तु कोविदाः
ससंमदा हन्त मनस्तु मामकम् ।
तदैव तद्वर्णयितुं समीहते
गन्धर्वमश्नाति तदैव दृग्द्वयी ॥

तथा वा—

यत्तासामुपदेशाय भवता मह्यमर्पितम् ।
जगद्गुरो ! गुरुत्वं तन्मया ताभ्यः समर्पितम् ॥

एवं प्रेमपत्तने सन्ति सहस्रशो रतिकृता विपर्यया उल्लिखिताः ते तत्रैव भक्तिरसिकैरवश्यं पठनीया मननीया अनुकरणीयाश्चेत्यलं पल्लवितेन ।

श्रीकृष्णकथायाः पृष्ठभूमिसमीक्षा

यत्पादपद्ममनिशं प्रणिपत्य भक्त्या
भक्ता भवन्ति भुवने परिपूर्णकामाः ।
कन्दर्पकोटिशतमोहनमद्भुतं तं
राधापतिं सकललोकगुरुं नमामि ॥

निखिललोककल्याणविधायकोऽपौरुषेयो वेदो हि विश्वस्मिन् सर्वतोऽधिकः प्राचीनः सर्वाभ्यर्हितो मान्यश्च प्रमाणमभिहितमस्ति शास्त्रकारैः । तथाहि गर्गसंहितायाः वचनम्–'वेदवाक्यं ब्रह्मवचः प्रमाणं हि महीतले ।' अतो वासुदेवश्रीकृष्णकथाया उद्गमस्यान्वेषणाय वेद एवाश्रियते सर्वैं मंनीषिभि रिति विवादः पन्थाः ।

यद्यपि वासुदेवशब्दो न संहितायां न वा ब्राह्मणे नापि आरण्यके उपलभ्यते, अथापि कतिपये वैष्णवा विद्वांसो वेदत एव श्रीकृष्णकथायाः स्रोतोऽङ्गी कुर्वते । भगवान् श्रीकृष्णः "अयं वा कृष्णो अश्विना हवते वाजिनीभिः ।" इति मन्त्रे ऋषिरूपेण व्यवहृतोऽस्ति । तेनैव पौराणिकश्रीकृष्णस्य तादात्म्यस्थापनाय वैष्णवा विपश्चितः साटोपं प्रयतन्ते । यद्यपि श्रीकृष्णकथाया बीजं मूलरूपेण वेदेष्वनिहितमस्ति तथापि यथा बीजाद् वृक्षस्य विकासः, पल्लवनं, परिवर्द्धनं चोत्तरोत्तरं जाजायते तथैव श्रीकृष्णकथाया वीजस्योत्तरोत्तरं विकासो ब्राह्मणारण्यकोपनिषन्महाभारतपुराणकाव्यनाटकादिग्रन्थेषु जातः, निरन्तरं जाजायते, यास्यति च ।

वैदिकवाङ्मये दृष्टिपातेन श्रीकृष्णकथाया बहूनां पात्राणामुल्लेखो यत्र तत्रावाप्यते। यथा गो-गोप-व्रज-वृषभानु-राधा-रोहिणी-कृष्णार्जुनादीनां लीलासम्बन्धिनश्च शब्दा अपि दरीदृश्यन्ते । अतो वैदिकसाहित्ये श्रीकृष्णलीलाविषयकप्रसङ्गेभ्यः तत्कथायाः प्रचुरं प्रमाणं प्राप्यते । पूतनास्तनचोषण–उलूखलवन्धन–यमलार्जुनोद्धार–गोवर्द्धनधारणादीनां सङ्केतः वैदिकमन्त्रेषु समुपलभ्यते । अतो विद्वांसः श्रीकृष्णलीलाया बीजं वेदमंत्रेषु सोपष्टम्भं समर्थयन्ति । यथा 'त्वं नृचक्षा वृषभानुपूर्वी कृष्णस्वग्ने अरुणो विभाहि (३।१५।३) इति ऋक्संहितायां भगवतः श्रीकृष्णस्य चर्चा विद्यते । तथैव 'विष्णुर्गोपाः परमं पाति पाथः प्रिया धामान्यमृता दधानः । (३।५५।१०) इति मन्त्रे गोपरूपस्य विष्णोर्वर्णनप्रसङ्गे गोपरूपधारिणो भगवतः श्रीकृष्णस्य स्मरणं कृतमस्ति। तावां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिश्रृङ्गा आयासः (१।१५४।६) इतिमन्त्रः सायणेन कृष्णकथापरत्वेन व्याख्यातः । यास्केनापि निरुक्ते 'तदुरुगायस्य विष्णोर्महात्मनः परमं पदं परार्ध्यस्थमवभाति भूरि' (२।६) इत्युक्तम् । गोलोकवर्णनपरत्वेनापि विद्वद्भिरयं मन्त्रो व्याख्यायते 'वृष्णस्य वर्षणशीलस्य

विष्णोः कृष्णस्योरगायस्य तत् परमं पदम् । तत्रैव भूरि शृङ्गा गावः आयासो गमनशीलाः सन्ति तत्रैव शोभनानि वस्तूनि सन्ति' पुराणेषु गोलोकस्य स्पष्टतो विष्णो नित्यधामत्वमुक्तमस्ति । तेन तत्र बृहच्छृङ्गा गमनशीला मुख्या एव गावो गृह्यन्ते । उरुगायस्य विष्णोः आदित्यमण्डलमपि स्थानम् । तेन तत्र रश्मय एव गाव उच्यन्ते । मन्त्रभागवते प्रोक्तमस्ति यत् "अन्यपरत्वेन प्रतीयमाना अपि मन्त्रा यथा कृष्णलीला परत्वेन योज्यन्ते तथैव राधा-राधस-शब्दा अपि योजनीयाः । तथाचान्यपरत्वेन प्रयुक्ता अपि शब्दाः प्रसङ्गानुसारेणान्यपरा योजयितुं शक्यन्ते"। तस्मात् परमार्थदृष्ट्या— **वेदैश्च सर्वैरहमेव वेद्य** इति गीतायाम् भगवद्वचनानुसारं वैदिकमन्त्राणां राधा-कृष्ण-परत्वयोजनं समुचीतमेव प्रतिभाति ।

पुनः त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् (१।२२।१८) इति ऋङ्मन्त्रे न केवलं बालरूपेण, अपितु तस्य युवरूपमेवाधिकांशतो दृष्टिगोचरी भवति, यतो हि सर्वशक्तिमत्तायाश्च शक्तेः साधनं मुख्यमुद्देश्यं वर्तते । एवं सामवेदेऽपि हरे र्वामनलीला-गोपाललीलादीनां बीजं निहितमस्ति **शिशुयज्ञानां-हरिं भृजन्ति** (१।३।४)

वेदेषु प्रसिद्धस्य पुरुषसूक्तस्य देवीसूक्तस्य च परमं तात्पर्यं मृग्यमाणं पूर्णशक्तिसम्पन्ने भगवत्येव प्रतितिष्ठति । अत एव स्पष्टतः प्रोक्तं श्रीमद्भागवते—

सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत् ।
तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति ॥ = २।६।१५।

तथाच सर्वस्य सूक्तजातस्य निरतिशयानन्दस्वरूपे परात्परतरे परमात्मनि तात्पर्य-मवसीयते । तदेव च राधायाः कृष्णस्य च प्रेम्णोरेकं पिण्डीभूतं रूपं सामरस्यमुपगतं सत् पूर्णमयंभूत्वा विश्वस्मिन् विलसति ।

अत एव गर्गसंहितायां मथुराखण्डे भगवान् श्रीकृष्णो दुग्धधावल्यवत् स्वस्मिन् राधायाञ्च भेदाभावं प्रतिपादयन् प्रेम्णः सर्वोत्कृष्टत्वमुक्तमस्ति—

मा शोकं कुरु राधे ! त्वं त्वत्प्रीत्याहं समागतः ।
आवयो र्भेदरहितं तेजश्चैकं द्विधा जनैः ॥
यथा हि दुग्धधावल्ये तथाऽवां सर्वदा शुभे ।
यत्राहं त्वं सदा तत्र विश्लेषो नहि चावयोः ॥
पूर्णं ब्रह्म परं चाहं तटस्था त्वं जगत्प्रसूः ।
विश्लेष आवयो र्मध्ये मृषाज्ञानेन पश्य सत् ॥ २०।१८-२०

गुणेषु सक्तं किल बन्धनाय रक्तं मनः पुंसि च मुक्तये स्यात् ।
मनो द्वयोः कारणमाहुराराज् जित्वाऽथ तत् कौ विचरेदसङ्गः ॥
सर्वं हि भावं मनसः परात् परं नह्येकतो भामिनि ! जायते ततः ।
प्रेमैव कर्तव्यमतो मयि स्वतः प्रेम्णा समानं भुवि नास्ति किञ्चित् ॥ २०।:५,२५

'रसो वै सः, रसं लब्ध्वैव ह्यानन्दी भवति' इत्यदि श्रुत्यनुसारं रसात्मकः परमात्मैवानन्दवान् । अतोऽद्वये परमात्मन्येव भवति वास्तविक आनन्दलाभः । अतः पूर्णतमे परमात्मनि स्वाभविकं प्रेमैव सर्वोत्कृष्टं साधनम् । सत्त्वगुणप्रधाने मानवे एवं सहजस्य प्रेम्णः प्राखर्यमभिव्यज्यते । अतो विश्वस्मिन् वस्तुभूतं मनुष्यत्व-मेव तत्त्वमङ्गीक्रियते विशेषज्ञैः । राधाकृष्णयो र्विकासादेव प्रेमलीलाया विलासः समुज्जृम्भते ।

राधाकृष्णौ स्तः प्रकृति-पुरुषौ । 'स एकाकी न रमते, द्वितीयमैच्छत्, तेन सदैव जायापत्यादिरूपेण विकसति' इति श्रुत्यनुसारं तत्र सहजायाः प्रेमधाराया विकासानन्तरं सर्वत्र परिस्फुरति प्रेम्णो धारायाः प्रवाहः । एवं श्रुत्युक्तं सर्वप्राणि-प्रेमास्पदमेकमेवात्मतत्त्वं गौर-श्याम-ज्योतिरात्मना विश्वस्मिन् विलसति । सौन्दर्य-सारसर्वस्वो भगवान् श्रीकृष्णोऽस्ति रसः, राधिका चास्ति रतिः । तत्सम्पर्कं विहरन् स वंशीस्वनेन सर्वान् जीवान् विमोहयति ।

त्रीणि श्रुति-स्मृति-पुराणानि सन्ति ज्ञानानां साधनानि, तेषामाश्रयेणैव राधाकृष्णयोः वास्तविकं स्वरूपं निर्णेयम् । शास्त्रेषु श्रुति-स्मृत्योः विप्राणां नेत्ररूपत्व पुराणानां च हृदयरूपत्वं नितरां प्रसिद्धम् । हृदयस्य सत्वे नेत्रयोरभावेऽपि कार्यं प्रचलत्येव किन्तु हृदयाभावे ते नेत्रे द्वे अपि निरर्थके एव भवतः । तत्रैकेन रहितः काणः, द्वाभ्यां हीनः अन्धः, प्रोच्यते, पुराणानभिज्ञश्च पुमान् हृदयशून्यो भवति । तथाहि

श्रुति - स्मृती उभे नेत्रे पुराणं हृदयं स्मृतम् ।
एकेन हीनः काणः स्याद् द्वाभ्यामन्धः प्रकीर्तितः ॥
पुराणहीनाद् हृच्छून्यात् काणावन्धौ क्वचिद् वरौ ।

अतः श्रुति-स्मृति-पुराणानां समन्वयेनैव राधा-कृष्णयोः स्वरूपनिर्णयः समुचितः । इतिहास-पुराणानामाश्रये-तदाश्रयेणैव महाकाव्येषु नाटकेषु च तत्स्वरूपं प्रदर्शनीयम् । तस्मात् श्रुति-स्मृति-पुराणेषु राधाकृष्णयो र्वास्तविकं स्वरूपं विस्तरत उपबृंहिणतम्, तदाश्रयैः काव्यैः नाटकैश्च तदुपवर्णितम् । णैव काव्यं निर्मातव्यमिति कविसम्प्रदायः । वेदोपनिषदादिभि र्विविधतर्कमीमांसाद्युपबृंहितैः प्रतीतमेव परमेश्वरतत्त्वं पुराणेषु राधा-कृष्णरूपेण वर्ण्यते, दार्शनिकैरागमिभिश्च वस्तु तत्त्वमेव परिष्कृतं प्रदर्श्यते, नतु निर्मूलम् । अतएव च श्रीमद्भागतस्य प्रथमे स्कन्धे गूढार्थेषु या भगवत्कथा

उपवर्णिता सैव सत्कथा गूढार्थवादिभि र्विद्वभिः सम्यग्विज्ञायोद्घाट्यते । तथाहि सूतशौनकसम्वादे सूत आह—

स वा अयं सख्यनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः ।
य एक ईशो जगदादिलीलया सृजत्यवत्ति न तत्र सज्जते ॥ १।१०।२४

तस्माद् वेदोपनिषदादिभिर्वर्णितैव राधाकृष्णकथा पुराणेषूपबृंहितेति निर्विवादम् ।

श्रीराम-कृष्णयोः लीलानां लोकप्रियतायै प्राक् प्राचीनभारते नाटकीयप्रदर्शनानां प्रचलनमासीत् । ततो विद्वद्भिर्लेखनद्वारा तत्स्वरूपमुपस्थापितम् ।

श्रीरामस्य कथाया उत्पत्तौ विकासे च विविधै विद्वद्भिः विस्तृताः सामग्र्यः प्रस्तुताः सन्ति, यत्र नित्यमभिनवानां तथ्यानां स्फुरणं जायते । कृष्णकथाया विचारकाणां मनीषिणां कृष्णकथायां तावत्यः सूक्ष्मा दृष्टयो न गताः, यावत्यः रामकथायामुपगताः । रामकथायाः साहित्यस्यावलोकनेन ज्ञायते यद्रामकथा कृष्णकथापेक्षया लोकेऽत्यन्तं लोकप्रियाऽस्ति । श्रीरामस्य मर्यादापुरुषोतमत्वे विद्वद्भि र्न कुत्राप्यवहेलना कृता, किन्तु कृष्णकथायाः शृंगारिकरूपत्वमभिव्यज्य तस्य परब्रह्म स्वरूत्वमाच्छादितम् । यत्र तत्र श्रीकृष्णब्रह्मस्वरूपस्य चर्चाया विद्यमानत्वेऽप्यधिकांशग्रन्थेषु तस्य शृंगारिकः पक्ष एवाधिको लोकप्रियो जातः । यतो हि प्राकृतानां मानवानां कृते तस्य तदेव रूपमभीष्टमस्ति ।

वस्तुतो भगवतः श्रीकृष्णस्य विराट्स्वरूपावहेलनं तत्स्वरूपस्यैव तिरोधानकरणमस्ति । श्रीमद्भागवतादिषु पुराणेषु भगवच्छीकृष्णस्य परब्रह्मस्वरूपमेव स्मृतमस्ति, किन्तु पुराणानां परिप्रेक्ष्ये एव जयदेवकविरूपगोस्वाभिप्रभृतिभिर्निर्मितेषु कृष्णकथाश्रितकाव्यनाटकेषु तस्य शृंगारिकरूपस्यैव विकासो दरीदृश्यते ।

वैदिका विद्वांसः प्रतीकात्मकार्थकरणे पक्षपातिनः सन्ति । अतो वैदिका महर्षयो यज्ञहवनादिसमयेषु देवनानां सादरमाह्वानं कुर्वन्ति तथा प्रतीकात्मकशैलीषु भगवतोऽलौकिकं रूपं वर्णयन्ति । राधा-कृष्ण-गोप-गोपी-पार्थप्रभृतानां नाम्ना सम्बन्धो न केवलं कृष्णलीलया सहैवास्ते, प्रत्युत ज्यौतिषसम्बन्धिभिर्नक्षत्रादिभिरपि वर्तते, यथा (क) स्तोत्रं राधानां पते (ऋ० वे० १।३।५) (ख) गवामपव्रजं वृधि (ऋ० वे० १।१०।७) (ग) दासपत्नीरधिगोपा अतिष्ठन् निरुद्धा (ऋ० वे० १।३२।११) (घ) त्वं नृचक्षा वृषभानुपूर्वी (अ० वे० ३।१५।३) (ङ) त्वमेतदवधारय कृष्णासु रोहिणीषु (ऋ० वे० ८।९३।१३)। राधे विशाखे सुहवानु राधा (अ० वे० १९।७।३) (च) कृष्ण रूपाण्यर्जुन विवोभये (अ० वे १०।२१।३) कृष्णं त एम रुशतः (अ० वे० ४।७।९) ऋग्वेदस्यैकस्मिन् मन्त्रे यमुनाया गवां चोल्लेखो विद्यते, यः कृष्णसहित्यस्य कृते महन् महत्त्वपूर्णं वरीवर्ति । 'यमुनायामधि श्रुतमुद्राधो गव्यं मृजे' (ऋ० वे० ५।५२।१७)

वेदे पृथ्वी कृष्णा प्रोक्ताऽस्ति सूर्यमण्डलमपि कृष्णमुक्तमस्ति । शतपथब्राह्मणे चन्द्रोऽपि कृष्णः कथितोऽस्ति । 'चन्द्रमा वै ब्रह्मा कृष्णः-१२।२।१।७ निरुक्तमपि त्रीन्-पृथ्वी-सूर्य-चन्द्रमसः कृष्णान् मनुते । शतपथे यज्ञोऽपि कृष्ण एव प्रोक्तो वर्तते । यज्ञो हि कृष्णः (३।२।१।१८) वेदे श्रीकृष्णः सौरमण्डलेन सह सम्बद्धो वर्तते । सूर्यमण्डले व्यावहारिककार्याणि सिध्यन्ति । अतः श्रीकृष्णः श्यामतेजोऽस्ति तथा राधा गौरतेजो विद्यते ।

ऐतिहासिकपौराणिकाख्यानानुसारं धार्मिकोपास्यरूपेण पूर्वं प्रचलितानां समेषामीश्वरस्वरूपाणामन्तर्भावो भगवति श्रीकृष्णे एव क्रियते । वैदिकप्रधानदेवतायाः विष्णोः गुणैरपि तादात्म्यं स्थापितमस्ति । विष्णुरेव वासुदेवकृष्णरूपेण महत्त्वपूर्णां भूमिकां प्रस्तौति । तथा चोक्तं भगवता व्यासदेवेन महाभारतस्य वनपर्वणि—

देवदेवो ह्यनन्तात्मा विष्णुः सुरगुरुः प्रभुः ।
प्रधानं पुरुषोऽव्यक्तो विश्वात्मा विश्वमूर्तिमान् ॥
स एव भगवान् विष्णुः कृष्णेति परिकीर्त्यते ।
अनाद्यनन्तमजं देवं प्रभुं लोकनमस्कृतम् ॥
यं देवं विदुषो गान्ति तस्य कर्माणि सैन्धव ! =२७२।३१।७२१

वेदेषु भगवतो विष्णोः सम्बन्धः अजेयेन गोपेन सह वर्वते, यस्य पराजयो न कथमपि संभवति । (ऋ० १।२२।१८) अत्रापि गोपशब्दः श्रीकृष्णं विष्णुना सह सम्बध्नाति । अमरकोशेऽपि भगवान् विष्णुः नारायण—कृष्णनाम्ना प्रोक्तो विद्यते । 'विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः ।' सूर्यमण्डलेन विष्णोः सम्बन्धस्य कारणं चरमोत्कर्षप्राप्ती विष्णुद्वारा दुःखानामुन्मूलनं प्रतीयते । आदित्यः प्रकाशद्वारा अन्धकारमपनयति । तिमिराच्छादितायां पृथिव्यां हेमन्तशिशिरयोः शैत्ये प्रकाशकारणं वसन्त उपतिष्ठते । अनेन समेषां सर्वं दुःखमोचनकारणेन विष्णुरादित्यदेवता मन्यते । गीतायां च भगवान् श्रीकृष्णः आत्मानमादित्यं मन्यते 'अदित्यानामहं विष्णुः' । गोशब्दस्यार्थं किरणमिति स्वीकारे कृष्णः सूर्यरूपो गोविन्दो निगद्यते ।

ब्रह्मसंहितानुसारं विष्णोः पदं गोलोकमुच्यते (३।२) नृसिंहतापिन्युपनिषदोऽनुशीलनेन प्रतीयते यद् यो भगवान् षोडशभिः कलाभिः युक्तः विचित्रप्रकारकैः तेजोभिः व्याप्तो भवति, स एव भगवान् विष्णुः, नृसिंहः पुरुषोत्तमो वासुदेवो देवकीपुत्रश्च जायते ।

गोपालपूर्वतापिन्युपनिषदि अपि भगवान् श्रीकृष्णः परमदेवता-गोपीजनवल्लभादिविशेषणैं विभूष्यते । तथाहि "कः परमो देवः, कुतो मृत्यु र्बिभेति, कस्य विज्ञानेनाखिलं विज्ञातं भवति, केनेदं विश्वं संसरतीति मुनीनां संप्रश्ने ब्रह्मदेव उवाच—कृष्णो वै परमं

दैवतम्, गोविन्दान्मृत्यु र्बिभेति, गोपीजनवल्लभज्ञानेनैतद्विज्ञातं भवति, स्वाहेदं विश्वं संसरतीति तस्माद् कृष्ण एव परमो दैवतं ध्येयम् 'तं यजेत्, तं रसयेत्' तं भजेत् । तदिह श्लोका भवन्ति—

सत्पुण्डरीकनयनं मेधाभं वैद्युताम्बरम् ।
द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम् ॥
गोपगोपीगवावीतं सुरद्रुमतलाश्रितम् ।
दिव्यालङ्करणोपेतं रत्नपङ्कजमध्यगम् ॥
कालिन्दीजलकल्लोल-सङ्गिमारुत-सेवितम् ।
चिन्तयन् चेतसा कृष्णं मुक्तो भवति संसृतेः ॥

गोपलोत्तरतापिन्युपनिषदः प्रारम्भे च कामासक्तानां व्रजवनितानां गोपालकृष्णस्य चोल्लेखो वरीवर्ति - एकदा व्रजस्त्रियः सकामाः शर्वरीमुषित्वा सर्वेश्वरं गोपालं कृष्ण-मुचिरे । तासां मध्ये हि श्रेष्ठा च गोपी गान्धर्वी प्रोक्तास्ति-श्रेष्ठा गान्धर्वी । अपि च

युगानुवर्तिनो लोका यजन्तीह सुमेधसः ।
गोपालं सानुजं कृष्णं रुक्मिण्या सह तत्परम् ॥

कृष्णोपनिषदि च सविस्तरमध्यात्मरूपकाणां वर्णनं विद्यते—"इदं शरीरं हि व्रज-भूमिः, इन्द्रियाणि गावः, कश्यप उलूखलः, अदितिः रज्जुः, वैकुण्ठं गोकुलम् , लोभ-क्रोधादयो दैत्याः, तत्रत्या द्रुमाः तापसाः, ब्रह्मा यष्टिका, रुद्रो वेणुः, इन्द्रः श्रृङ्गम् , शेषनागो वलरामः, श्रीकृष्णः शाश्वतं ब्रह्म, स्त्रियश्च ब्रह्मरूपा, उपनिषदः ऋचः, चाणू-रादयो द्वेषादयः, कंसः कलिः सुदामा शमः, अक्रूरोद्धवादयः सत्यादयः स्मृताः सन्ति ।

देवकी ब्रह्मपुत्रा सा या वेदैरुपगीयते ।
निगमो वसुदेवो यो वेदार्थः कृष्णरामयोः ॥
स्तुवते सततं यस्तु सोऽवतीर्णो महीतले ।
वने वृन्दावने क्रीडन् गोप-गोपी-सुरैः सह ॥
गोप्यो गाव ऋचस्तस्य यष्टिका कमलासनः ।
वंशस्तु भगवान् रुद्रः श्रृङ्गमिन्द्रः सगोसुरः ॥
गोकुलं वनवैकुण्ठं तापसास्तत्र ते द्रुमाः ।
लोभक्रोधादयो दैत्या कलिकालतिरस्कृतः ॥
गोपरूपो हरिः साक्षान्मायाविग्रहधारिणः ।
शेषनागोऽभवद्रामः कृष्णो ब्रह्मैव शाश्वतम् ॥

अष्टावष्टसहस्रे द्वे शताधिक्यः स्त्रियस्तथा ।
ऋचोपनिषदस्ता वै ब्रह्मरूपा ऋचः स्त्रियः ॥
द्वेषश्चाणूरमल्लोऽयं मत्सरो मुष्टिको जयः ।
दर्पः कुवलयापीडः गर्वो रक्षः खगो वकः ॥
अघासुरो महाव्याधिः कलिः कंसः स भूपतिः ।
शमो मित्रः सुदामा च सत्याक्रूरोद्धवादयः ।
यः शङ्खः स स्वयं विष्णुर्लक्ष्मीरूपो व्यवस्थितः ॥ ८–१६

नारायणोपनिषदि देवकीपुत्रस्योल्लेखो विद्यते । तत्र स मधुसूदनः, पुण्डरीकाक्षः, विष्णुः, तथाच्युतः कथितोऽस्ति ।

ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः ।
ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युतः ॥

वासुदेवोपनिषदि वा वासुदेवभक्तानां कृते शङ्ख-चक्र-गदा-पद्मधारिणो द्वारकावासिनः पुण्डरीकाक्षस्य गोविन्दस्य ध्यानमत्यावश्यकमुक्तमस्ति, गोपीचन्दनधारणस्योर्ध्वपुण्ड्रस्य च महन्महत्वमुक्तमस्ति—

शंख - चक्र - गदापाणे ! द्वारका - निलयाच्युत !
गोविन्द ! पुण्डरीकाक्ष ! रक्ष मां शरणागतम् ॥
ब्रह्मरन्ध्रे भ्रुवोर्मध्ये हृदये चिद्रविं हरिम् ।
गोपीचन्दनमालिप्य हरिं ध्यात्वाप्नुयात् परम् ॥
ऊर्ध्वं दण्डोर्ध्वरेताश्च ऊर्ध्वपुण्ड्रोर्ध्वयोगवान् ।
ऊर्ध्वं पदमवाप्नोति यतिरूर्ध्वचतुष्कवान् ॥

राधोपनिषदि च श्रीराधायाः स्वरूपस्य वर्णनेन सह भगवान् श्रीकृष्णः परमो देवः प्रोक्तोऽस्ति तथा राधा तस्या ह्लादिनी शक्ति वर्णिताऽस्ति ।

एवं वैदिक वाङ्मयस्यानुशीलनानन्तरं भगवतः श्रीकृष्णस्य जीवनवृत्तान्त-चित्रणं महाभारते सम्यगुपलभ्यते । तत्र हरिनारायणयोरेकं रूपं प्रोक्तमस्ति । यो नरः तथा हरिरस्ति स एव नारायणो निगदितः—

नरस्त्वमसि दुर्धर्ष हरिर्नारायणो ह्यहम् ।
काले लोकमिमं प्राप्तौ नरनारायणावृषी ॥
अनन्यः पार्थ ! मत्तस्त्वं त्वत्तश्चाहं तथैव च ।
नावयोरन्तरं शक्यं वेदितुं भरतर्षभ ॥ ३।१२।२३, २४

महाभारतस्यादिपर्वणि भगवान् श्रीकृष्ण एव चराचरस्यास्य जगतः उत्पत्तिस्थानं

कथितोऽस्ति । स हि परब्रह्मणोऽवतार उक्तो विद्यते । स एव लोकानामनुग्रहार्थं वसुदेवाद् देवक्यां मायामाध्यमेन प्रादुर्भूय जगतो हितं विधत्ते—

अनुग्रहार्थं लोकानां विष्णुर्लोकनमस्कृतः ।
वासुदेवात्तु देवक्यां प्रादुर्भूतो महायशाः ॥
अनादिनिधनो देवः स कर्ता जगतः प्रभुः ।
अव्यक्तमक्षरं ब्रह्म प्रधानं त्रिगुणात्मकम् ॥
आत्मानमव्ययं चैव प्रकृतिं प्रभवं प्रभुम् ।
पुरुषं विश्वकर्माणि सत्त्वयोगं ध्रुवाक्षरम् ॥ ६३।९९।१०१

शान्तिपर्वणि वासुदेवकथनस्य कारणमेवमुक्तमस्ति—

सर्वेषामाश्रयो विष्णुरैश्वर्यविधिमाश्रितः ।
सर्वभूतकृतावासो वासुदेवेति चोच्यते ॥ ३३५।८७

एतेन सम्यक् प्रतीयते यद् नारायण एव कालान्तरे वासुदेवात्मना परिणतः । अपि च धर्मराजेन पृष्ठो भीष्मपितामहः पुरातनमितिहासं ब्रुवन्नुवाच यद् आदिनारायणः सर्वस्य जगत आत्मा चतुर्मूर्तिः सनातनो देवोऽस्ति । स्वायम्भुवमन्वन्तरस्य सत्ययुगे धर्मस्य पत्न्यां तस्य चत्वारोऽवतारा बभूवुः—नरः, नारायणः, हरिः, कृष्णश्च । तत्र नरनारायणौ बदरिकाश्रमे सुवर्णमये रथे स्थितौ परमं तपस्तेपतुः । हरिः कृष्णश्च धर्मान्तरे प्रवृतौ । एवमेक एव नारायणो धर्मवंशपरम्पराया विस्तारायचतुर्षु विग्रहेषु आविरभूत्—

नारायणो हि विश्वात्मा चतुर्मूर्तिः सनातनः ।
कृते युगे महाराजः पुरा स्वायम्भवान्तरे ॥
नरो नारायणश्चैव हरिः कृष्णः स्वयम्भुवः ।

उद्योगपर्वणि पृथिव्याः सुखप्रदानाय भगवान् विष्णुरेव कृष्णनाम्ना व्यवह्रियते । कृष्णनाम्नो निर्वचनमपि तत्रैवं दृश्यते—

कृषिर्भूवाचकः शब्दो णश्च निर्वृत्तिवाचकः ।
विष्णुस्तद्भावयोगाच्च कृष्णो भवति सात्वतः ॥ ७०।५

वनपर्वणि दीर्घजीवी मार्कण्डेयो महामुनिः महामायाया लीलादर्शनप्रसंगे प्रलयकाले समस्तं जगत् आत्मसात्कृत्वा वटवृक्षस्य पत्रे शयानं विष्णुमेव श्रीकृष्णं बालस्वरूपं मनुते

यो हि देवो मया दृष्टः पुरा पद्मायतेक्षणः ।
स एव पुरुषव्याघ्रः सम्बन्धी ते जनार्दनः ॥ ३।१८९।५२

तेषां नारायणनरौ तपस्तेपतुरव्ययम् ॥
बदर्याश्रममासाद्य शकटे कनकामये ।
अत्र कृष्णो हरिश्चैव कारणान्तरसंस्थितौ ॥३३४।८-१०

अत एवोक्तम्—

करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि ।

शान्तिपर्वणो भीष्मस्तवराजे भगवान् श्रीकृष्णो विष्णुरूपेण स्तुतो विद्यते—

विश्वकर्मन् ! नमोऽस्तेऽस्तु विश्वात्मन् विश्वसम्भव !
विष्णो ! विष्णो ! हरे ! कृष्ण ! वैकुण्ठ ! पुरुषोत्तम !

सभापर्वणोऽर्घाभिहरणपर्वणि शिशुपालद्वारा भगवतः श्रीकृष्णस्याग्रपूजाया विरोधे क्रियमाणे धर्मराजः युधिष्ठिरः शिशुपालमुद्दिश्य—

वेद तत्त्वेन कृष्णं हि भीष्मश्चेदिपते ! भृशम् ।
नह्येनं त्वं तथा वेत्थ यथैनं वेद कौरवः ॥ (३८।५)

इति कथनानन्तरं कुरुवृद्धो भीष्मपितामहो भगवतः श्रीकृष्णस्य गुणवर्णनपूर्वकं विष्णुस्वरूपमेवं निर्दिष्टवान् प्रदर्शितवांश्च तदैश्वर्यमहत्त्वं विपुलम् । तथाहि—

क्षत्रियः क्षत्रियं जित्वा रणे रणकृतां वरः ।
यो मुञ्चति वशे कृत्वा गुरुर्भवति तस्य सः ॥
अस्यां हि समितौ राज्ञामेकमप्यजितं युधि ।
न पश्यामि महीपालं सात्वतीपुत्रतेजसा ॥
नहि केवलमस्माकमयमर्च्यतमोऽच्युतः ।
त्रयाणामपि लोकानामर्चनीयो महाभुजः ॥
कृष्णेन हि जिता युद्धे बहवः क्षत्रियर्षभाः ।
जगत् सर्वं च वार्ष्णेये निखिलेन प्रतिष्ठितम् ॥
तस्मात् सत्स्वपि वृद्धेषु कृष्णमर्चाम नेतरम् ।
एवं वक्तुं न चार्हस्त्वं मा ते भूद् बुद्धिरीदृशी ॥
ऋत्विग् गुरुस्तथाचार्यः स्नातको नृपतिः प्रियः ।
सर्वमेतद्धृषीकेश स्तस्मादभ्यर्चितोऽच्युतः ॥ ३८।७-२२

गर्गसंहितायामपि परिपूर्णतमस्य विष्णोः देवादीनां रक्षार्थं दैत्यानां वधार्थं च वसुदेवगृहे श्रीकृष्णरूपेणावतरणस्यास्ति चर्चा—

देवनां रक्षार्थं च दैत्यानां च वधाय हि ।
वसुदेवगृहे जातः परिपूर्णतमो हरिः । मा० ख० ६।२५

अपि च—

गो-विप्र-देव-श्रुति-साधु-धर्म—रक्षार्थमद्यैव यदोः कुलेजः ।
जातोऽस्ति कंसादिवधाय योऽसौ तस्मै नमोऽनन्तगुणार्णवाय ॥ ७।४

तत्रैव कंसं संबोध्य योगमाययाऽपि परिपूर्णतमस्य भगवतः श्रीकृष्णरूपेणावतरणस्य सूचना प्रदत्ता गोलोकखण्डे—

परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् स्वयम् ।
जातः क्व वा स ते हन्ता वृथा दीनान् दुनोषि वै ॥ १ ११।५९

एवं महाभारतस्य कियन्तः प्रसङ्गा भगवन्तं श्रीकृष्णं देवं मानवं वा प्रस्तुवन्ति । आश्वमेधिकपर्वणि अणुगीतायाम् उतङ्कमुनिद्वारा शापप्रदानोद्योगः कृष्णस्य मानवत्वं सङ्केतयति । (१४।२६।१०-२७)

वनपर्वणि शान्तिपर्वणि च भगवतः श्रीकृष्णस्य बालस्वरूपस्य वृत्तान्तं विद्यते ।

नैवं परे नापरे वा करिष्यन्ति कृतानि वा ।
यानि कर्माणि देव ! त्वं बाल्ये एव महाबलः ।।
कृतवान् पुण्डरीकाक्ष ! बलदेवसहायवान् ।
३।१२।४२।३।१२।१९४।६६।३

सभापर्वणि चीरहरणसमये द्रौपदीद्वारा प्रयुक्तानि गोपीजनवल्लभ इत्यादीनि विशेषणानि श्रीकृष्णस्य युवावस्थां द्योतयन्ति ।

महाभारते श्रीकृष्णस्य नाम्नः प्रसंगः सर्वप्रथम् आदिपर्वणि द्रौपदीस्वयम्बरे समागतोस्मि तथा कृष्णबलरामादीनां यदुवंशिनां तत्रोपस्थितेः चर्चा विद्यते । आदि पर्वणि । श्रीकृष्णार्जुनौ पूर्वजन्मनि नरनारायणनामानौ धर्मस्य पुत्रौ प्रियसखायौ ऋषी च प्रोक्तौ स्तः—

आस्तां प्रियसखायौ तौ नरनारायणावृषी ॥ २२०।५

द्रोणपर्वणि च तदेव प्रोक्तमस्ति—

पूर्वं देवौ महात्मानौ नर-नारायणावुभौ ॥ ११।४१

वनपर्वणि द्वादशाध्याये श्रीकृष्णस्य विविधयोनिषु जन्मग्रहणस्य, असुरवधस्य, यज्ञ-दान-तपः करणस्य च वर्णनं विद्यते । तत्र श्रीकृष्णः ऐतिहासिकप्रसिद्धिप्राप्त-मानवरूपेण विशिष्टबलाधानं कुर्वाणो जन्म ग्रहणं कुरुते । अतो महाभारतानुसारं भगवान् श्रीकृष्णः एकः परमो योद्धा तथा महायोगी एव सिध्यति । तत्र वासुदेव-शब्दस्य विस्तृता व्याख्या कृताऽस्ति—

श्रुतं मे वासुदेवस्य नाम निर्वचनं शुभम् ।
यावत्तत्राभिजानेऽहमप्रमेयो हि केशवः ॥
वासनात् सर्वभूतानां वस्तुत्वादेव योनितः ।
वासुदेवस्ततो वेद्यो वृहत्वाद्विष्णुरुच्यते ॥

तत्रैव प्रजापतिद्वारा मानवयोनौ वासुदेवावतारग्रहणस्य परमेश्वरं प्रति प्रार्थना कृताऽस्ति । एवं च तत्र परमात्मा नारायणो विष्णुश्च प्रोक्तोऽस्ति तथा वासुदेवेन सह तस्यैकत्वं च प्रतिपादितमस्ति । शान्तिपर्वणि श्रीकृष्णपरब्रह्मस्वरूपस्य सर्वाधिकं प्रकाशनं वरीवर्ति । तेन वासुदेवः परमात्मा सिध्यति ।

छादयामि जगद् विश्वं भूत्वा सूर्य इवांशुमान् ।
सर्वभूताधिवासश्च वासुदेवः ततो ह्यहम् ॥ १२।३३१।४१
सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ।
ततोऽसौ वासुदेवेति विद्वद्भिः परिगीयते ॥

महाभारते च समुपलब्धा या सूर्यं प्रति श्रीकृष्णस्योपास्यभावना तस्य मनुजत्वं साधयति । सत्राजिन्नामागोपः सूर्यद्वारा प्राप्तं श्यमन्तकमणिं परिधाय यदा श्रीकृष्णस्य सुधर्मसभायांमागच्छति तदा तत्रत्या समासदोऽनुभवन्ति यत् सूर्यदेवो भगवन्तं श्रीकृष्णं साक्षात्कर्तुमुपतिष्ठते । प्रसङ्गेनानेनानुमीयते यत् भगवान् आदित्यः श्रीकृष्णं परमात्मानं मत्वा साक्षात्कर्तुं प्रायः प्रत्यागच्छतिस्म ।

शान्तिपर्वणि धर्मराजो युधिष्ठिरः श्रीकृष्णस्तुतौ तं विष्णुं मनुते । पाणिनेरष्टाध्याय्यां वासुदेवस्योल्लेखो विद्यते । पतञ्जलेः महाभाष्ये कंसवध-वालिवधनामकयोः नाटकयोरभिनये, वासुदेवद्वारा कंसवधस्योल्लेखो विद्यते । तत्र हि पतञ्जलिः कृष्ण-वासुदेवौ अभिन्नावेव मनुते । स हि कृष्ण वासुदेवयोरन्तरं न स्वीकुरुते । अतो विष्णुभावना कृष्णवासुदेवयोः निहिताऽस्ति । एवं कंसवधनाटकानुसारं कंसवधकर्ता क्षत्रियो वासुदेव ऐतिहासिको वर्तते । तस्मात् कृष्ण-वासुदेवौ न भिन्नौ स्तः । तयोरैक्यस्य सर्वत्र दर्शनात् ।

तदनन्तरं सर्वप्रथमं नानाघाटशिलालेखे संकर्षण—वासुदेवयोर्नाम समागतं विद्यते । वेसनगरस्य शिलालेखे गरुडध्वजस्य मूर्तिरङ्किताऽस्ति । श्रीकहोलियोडरः आत्मानं भागवतं मनुते । अतस्तदानीं वासुदेवस्य पूजा सुदूरे पश्चिमे प्रचलिताऽस्ति । एवं पाणिनि-पतञ्जलि—महाभारत-प्राचीनशिलालेखानामाधारे पूर्वकाले वासुदेवस्यास्तित्वं विद्वद्भिर्मन्यते तथा वासुदेवस्य भागवतधर्मेण सम्बन्धोऽपि स्वीक्रियते । घटनामके बौद्धसाहित्येऽपि वासुदेवो मथुराप्रदेशस्योत्तरभागनिवासी राजवंशसन्ततिर्निगदितोऽस्ति । वासुदेव इति श्रीकृष्णस्य गोत्रजं नामाऽस्ति । ललितविस्तरस्यैकादशाध्यायेऽपि श्रीकृष्ण-

स्योल्लेखो विद्यते । पालिग्रन्थे निर्देशेऽपि वासुदेवस्य सत्ता स्थापिताऽस्ति । जैनग्रन्थकारा अपि नागनाथं श्रीकृष्णकालिकं कथयन्ति । गो० कृ० भाण्डारकरः ऐतिहासिकदृष्ट्या गोपालकृष्णस्य सम्बन्धम् आभीराणां बालदेवतया सह साधयति । आभीराणां बालदेवता-श्रीकृष्णस्योल्लेखः हरिवंशेऽपि प्राप्यते । एवं पद्मपुराणे भगवान् विष्णुः कथयति यन्ममाष्टमोऽवतार आभीरकुले भविष्यति । ७।२८

मेगस्थनीजस्य कथनमस्ति यत् श्रीकृष्णस्य पूजा बुद्धकालात् पूर्वतः प्रचलिताऽस्ति । स मथुरापरिसरे भगवानपि मन्यतेस्म ।

इत्थं समस्तवैदिकवाङ्मय-महाभारत-पाणिनेरष्टाध्यायी-पतञ्जलेर्महाभाष्य-बौद्ध-जैन-वैदेशिकयात्रि-पालिग्रन्थानां पर्यालोचनया निष्कर्षः निःसरति यद् वैदिकोः विष्णुरेव चरमावस्थायाम् श्रीकृष्णरूपेणोपस्थाय भागवतानां भक्तानामुपास्यदेवो जातः । स च समस्तेभ्यो देवेभ्यो विशिष्टः प्रदर्शितोऽस्ति । स एवहि देवशत्रुभिरसुरैः पीडितं समये लोकं समये च आविर्भूय परिपालयति । तदुक्तं श्रीमद्भागवते—

अन्ये चांशकला पुंसः कृष्णस्तुभगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥

एवं सत्यपि कृष्णकथाया वास्तविकं लोकानुरञ्जनकारि सर्वप्रियं स्वरूपं पौराणिके साहित्ये एवोपलभ्यते । यत्र वासुदेवश्रीकृष्णः भगवान् एको महान् ऐतिहासिको राजनीतिकः सामाजिको धार्मिकः सांस्कृतिकः जनसेवकः महान् योद्धा शरणागत-वत्सलो लीलाविहारी प्रणयी महापुरुषः शास्त्रसम्मतधर्मोपदेशः सद्गृहस्थश्च प्रोक्तोऽस्ति । वासुदेवस्य एषामेवोदात्तस्वरूपाणां स्थापना मुख्यतया श्रीमद्भागवत-विष्णुपुराण-पद्मपुराण-ब्रह्मवैवर्तादिपुराणेषु गर्गसंहितायां च कृताऽस्ति ।

वस्तुतः श्रीमद्भागवते राधा-कृष्णयोः केलिक्रीडायाः परवर्ति स्वरूपं नोपलभ्यते, अपितु व्रजे बाललीलाया एव माधुर्यमुपस्थापितमस्ति, किन्तु राधा-कृष्णयोः परवर्तिन्याः कल्पनायाः प्राञ्जलं रूपं ब्रह्मवैवर्ते, गर्गसहितायां च समवाप्यते । अतो राधा-कृष्णकथाया औचित्यविचारस्य चर्चाया नितान्तमस्ति आवश्यकता, येन वास्तविक-स्थितेः परिज्ञानं भवेत् । गर्गसंहितानुसारं भगवान् श्रीकृष्णः परात्परतरः परिपूर्णतमः असंख्यब्रह्माण्डाधिपतिः, साक्षात् पुरुषोत्तमोऽस्ति । स च सर्वदा गोलोके निवसति स हि एककार्यार्थं भूमण्डलेऽस्मिन् स मागस्य अनेकानिकार्याणि च कृतवान् । स एव पुरुषोत्तमः विद्वभिः श्रीकृष्ण इति कथ्यते—

परिपूर्णतमः साक्षाच्छीकृष्णो भगवान् स्वयम् ।
असंख्यब्रह्माण्डपतिर्गोलोके धाम्नि राजते ॥ १।१।१९

परिपूर्णतमः साक्षाच्छीकृष्णो नान्य एव हि ।
एककार्यार्थमागत्य कोटिकार्यं चकार ह ॥ १।१।३६

पूर्णः पुराणः पुरुषोत्तमोत्तमः
परात्परो यः पुरुषः परेश्वरः ॥
स्वयं सदाऽऽनन्दमयः कृपावित्
स एव कृष्णः प्राणिगद्यते बुधैः ॥

यथा पौराणिकः श्रीकृष्णो देवक्या अष्टमः पुत्रोऽस्ति तथैव सूर्यमण्डलस्वरूपेण विष्णुरपि अदितेः अष्टमः पुत्रो मन्यते । पौराणिककृष्णवत् मातृ-पितृद्वारा-निष्कासनस्य प्रसंगोऽत्राप्यस्ति । आदित्यस्य देवतास्वीकारकारणात् कृष्णस्य सूर्यलोकात्परं गोलोके निवासस्थानं कथितमस्ति । भगवति श्रीकृष्णे देवत्वस्य प्रतिष्ठापना विष्णोः मूलभूत-गुणानामाधारेण सर्वोत्कृष्टत्वं सूचयति । ऋग्वेदे विष्णुः महत्त्वपूर्णदेवतारूपेण न परिगणितोऽस्ति, किन्तु यजुर्वेदे यज्ञस्य महत्त्वेन साकं विष्णोः महत्त्वं प्रतिपदित-मस्ति । विष्णुः त्रिभिर्पदैः ब्रह्माण्डस्य संक्रमणेन ऋग्वेदे आदित्यमात्र स्वीकृतमस्ति अथवा शनैः शनैः चक्रपाणि-कृष्ण-केशव-वासुदेवादीनि तस्य नामानि जातानि । कृष्णेन रजसा द्यामृणोति सविता कृष्णा रजांसि दधानः । ऋग्वेदे (१।३५।२)

वौधायनधर्मसूत्रे विष्णुर्नरायण-माधवादिदेवतासहितः एकस्मिन् सन्दर्भे प्रयुक्तोऽस्ति । नारायणं तर्पयामि, माधवं तर्पयामि, गोविन्दं तर्पयामि केशवं तर्पयामि, विष्णुं तर्पयामि इत्यादि (५।९।१०) छन्दोग्योपनिषदि देवकीपुत्रः श्रीकृष्णः आंगीरसस्य शिष्यः प्रोक्तोऽस्ति । तत्र मानवरूपेण वर्णितोऽपि कृष्णः प्रसिद्धो देव आसीत् । यस्य तादात्म्यं विष्णुना सह जातम् । तनैव वैष्णवधर्मस्य विकासो जातः । छन्दोग्यप्रति-पादितस्य मतस्य भगवद्गीताया सिद्धान्तेन साम्यमस्ति । लोकमान्यतिलकानुसारं श्रीकृष्ण एक एवाऽस्ति नानेकः स एव ऐतिहासिकः महापुरुष आसीत्, येन पार्थाय भगवद्गीताया उपदेशो दत्तः । भाण्डारकरमतेन वैदिकवाङ्मये श्रीकृष्णो देवकीपुत्रः घोर आंगिरस्य शिष्यः ब्रह्मविद्याज्ञाता भुवनद्रष्टा चाऽस्ति । वेदस्य कृष्णः न देवता नाप्यवतारी आसीत् । तैत्तरीयारण्यकदशम प्रपाठस्य नारायणोपनिषदिच विवरणानुसारं नारायण एवास्ति वासुदेवः–"नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात् ।"

आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य ताः प्रोक्तास्तेन नारायणः स्मृतः ॥

स एव स्वकीयेन वास्तविकपरब्रह्मरूपेण व्यापित्वाद्विष्णुः तत्रैव कूर्मावतारस्य वासुदेवश्रीकृष्णस्य वर्णनमप्यस्ति ।

चरमोत्कर्षं प्राप्तो विष्णुः वैदिकदेवतया इन्द्रेण सह तादात्म्यं भजते। परिणामतः तद्गुणैः समन्वितः कृष्णोऽपि तेन सम्बद्धो भवति। वैदिकयुगे इन्द्रस्तुत्यनुसारं या इन्द्रकामिन्य आसन् ता एव द्वापरे गोप्यो भूत्वा कृष्णप्रियतमाः बभूवुरिति केषाञ्चन मतं न समीचीनं प्रतिभाति, यतो हि ततोऽतिसुन्दरतमं कमपि कान्तमुपलभ्य तत्प्रेयस्योऽपि प्रसज्जेरन्। तस्मादनर्गल मेव तन्मतम्।

पौराणिकवाङ्मयानुसारं राधाकृष्णकथायाः स्वरूपविमर्शः

कृष्णातीरे कोकिलाकेलिकीरे मुञ्जापुञ्जे देवपुष्पादिकुञ्जे।
कम्बुग्रीवौ क्षिप्तबाहू चलन्तौ राधाकृष्णौ मङ्गलं मे विधत्ताम्॥

पुराणान्तर्गतयोः श्रीराधाकृष्णयोः कथाविषयके अगाधे जलधौ प्रछन्नानां देदीप्यमानानाञ्च रत्नानामनुशीलनावसरे प्रथमं पुराणानां प्रामाणिकतायाः प्रसङ्ग एव न केवलमत्यावश्यकः, अपितु अनिवार्यतयैवोपतिष्ठते, येन पुराणानां प्रामाणिकता सम्पद्येत। अतो वेदेष्वेव पुराणप्रमाणिकताश्रयिणी बुद्धि र्मनसि अङ्कुरमुत्पादयति यद् अपौरुषेये वैदिकवाङ्मये पुराणानां चर्चा वर्तते न वा? इति

पुराणानां प्राचीनतानुशीलनविषये मत्स्यपुराणस्य कथनमस्ति यत् पुराणसाहित्यं सर्वेभ्यः शास्त्रेभ्यः प्राचीनतममस्ति, यतो हि सर्वतः प्राक् लोकपितामहेन ब्रह्मणा पुराणस्यैव स्मरणं कृतं तदनन्तरं तन्मुखेभ्यो वेदाः प्रादुरभवन्—

अतो वेदवदेव पुराणसाहित्यमपि नित्यसिद्धं प्राचीनं प्रमाणभूतं चास्ति। शतपथब्राह्मणे पुराणानां गणना वेदेष्वेव कृताऽस्ति (१३।४।३।१३, १५।६।१०।६०) पुराणेषु प्रायः भगवतः श्रीकृष्णस्य ब्रह्मस्वरूपमेवाभीष्टमस्ति "अन्ये चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्" (श्री० भा० १।४।२८) मनोबुद्धिभ्यामगम्ये निराकारे निर्विकारे ब्रह्मणि बुद्धि-मनसोः प्रवेशाय ये उपाया निर्दिष्टाः सन्ति तेषु अवतारवादः श्रेष्ठतमोऽस्ति।

स्वकलाद्वारा लोकसिसृक्षया आदिदेवो नारायण एवोपास्यदेवत्वेनाभिर्भूयास्माकं लोचनगोचरीभवति। भूमण्डलेऽस्मिन् अद्वितीयः, अरूपोऽपि परमात्मा यदाविर्भवति तन्मायाया माध्यमेनैवावतरति—

जगृहे पौरुषं रूपं भगवान् महदादिभिः।
संभूतं षोडशकलमादौ लोकसिसृक्षया॥ —श्री० भा० १।३।१

आनन्दमयोऽपीश्वरः स्वकीयया आह्लादिनीशक्त्या अन्तरङ्गलीलां दिव्यक्रीडां च कुरुते। नह्यानन्दमन्तरा रसस्यास्ति संभवः। अतो भगवान् रसरूपोऽप्यस्ति। तथा चोक्तं तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्याम्- रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति (२।७) वैष्णवसम्प्रदायानुसारं श्रीहरिः स्वविलासेच्छया नित्यप्रेमिणो भक्तान्

आस्वलीलायाः आस्वादनाय लोचननिरावृतान् करोति । येन ते तल्लीलाया अवलोकनं मथुरायां गोकुले वृन्दावने द्वारकायां वा प्रकुर्वन्ति । लीलास्वरूपं च श्रीमद्भागवतस्य सुबोधिन्यां श्रीवल्लभाचार्यमहाराजो विवृणोति—लीला नाम विलासेच्छा कर्मव्यतिरेकेणैव कृतिमात्रं न तया कृत्वा बहिः कार्यं जन्यते (३।७।१७) परवर्तिनां वैष्णवानामयं विश्वासो विद्यते यद् भक्तानुग्रहवाञ्छया स्वकीयाया लीलाया विस्तारहेतवे भगवान् मानवरूपेण प्रकटी भवति । अयमेव हेतुरुक्तो लघुभागवतामृतेऽपि–

स्वलीलाकीर्तिविस्ताराल्लोकेष्वनुजिघृक्षता ।
अस्य जन्मादिलीलानां प्राकट्ये हेतुरुत्तमः ॥ २४३

वस्तुतो भगवति रिरंसावृत्त्या सह सिसृक्षावृत्तिः तथा युयुत्सावृत्तिरपि तिष्ठतः परन्तु ते द्वे परवर्तिन्यौ वृत्ती सामयिक्यौ भवतः । रिरंसावृत्तिः तस्मिन् नित्यमेवावतिष्ठते । पराशक्तेः परिणामो रिरंसावृत्तिः । भगवतो नित्यं रिरंसावृत्तिरेव सच्चिदानन्दमयलीलारूपेण सर्वदा अभिव्यक्तीभवति । इदं हि लीला गोलोके नित्यं भवति । अतएवोक्तमथर्ववेदस्य पिप्पलादशाखायाम्—एको देवो नित्यलीलानुरक्तो भक्तव्यापी भक्तहृद्यन्तरात्मा ।

पुराणेषु नित्यलीलायाः प्रसङ्गः स्कन्दपुराणस्य वैष्णवखण्डे, पद्मपुराणस्य पातालखण्डे च प्राप्यते । यथा भगवतः स्वरूपं चिन्मयं नित्यं च वर्तते तथैवेश्वरस्य लीलाऽपि प्रपञ्चागोचरत्वादप्रकटलीलाऽस्ति । गोलोकस्य महिम्नो वर्णनं पद्मपुराणस्य पातालखण्डे, गर्गसंहितायां गोलोकखण्डे, बृहत्संहितायां, नारदपाञ्चरात्रे तथा ब्रह्मवैवर्त पुराणेऽपि प्राप्यते । स्कन्दपुराणस्य वैष्णवखण्डान्तर्गते वासुदेवमाहात्म्ये गोलकयात्राय विशदं वर्णनं विद्यते ।

गोलोको विश्वस्य नित्यलोकोऽस्ति नारदीयपुराणस्योत्तराध्याये तथा देवीभागवतस्य नवमस्कन्धेऽपि गोलोको विश्वस्य नित्यलोक उक्तोऽस्ति ।

भगवतो वासुदेवस्य पार्थिवलीलायाः प्रधानं धाम वृन्दावनं वरीवर्ति । गोलोकस्य द्वारकायाश्च परमैश्वर्यं वृन्दावने एवाश्रितमस्ति । पद्मपुराणस्य पातालखण्डे—

सात्वतां स्थानमूर्धन्यं विष्णोरत्यन्तदुर्लभम् ।
नित्यं वृन्दावनं धाम ब्रह्माण्डोपरि संस्थितम् ॥ ६९।८
पूर्णब्रह्मसुखैश्वर्यं नित्यमानन्दमद्वयम् ।
वैकुण्ठादि तदंशांशं स्वयं वृन्दावनं भुवि ॥

वृन्दावनं हि द्विविधं, नित्यमनित्यं च । नित्यं वृन्दावनं सर्वव्यापकमद्भुतं चास्ति, अक्षरब्रह्मणो हृदये स्थितं प्रकृतिस्पर्शरहितं च । वृन्दावनस्येयं लीला द्विविधा-वास्त-

विकी व्यावहारिकी च नित्यवृन्दावनस्य लीला प्रातिभासिकी तथा व्रजभूमिस्था लालास्ति व्यावहारिका । तदुक्तं स्कन्दपुराणस्य श्रीमद्भागवतमाहात्म्ये—

लीलेयं द्विविधा तस्य वास्तवी व्यावहारिकी ।
वास्तवी तत्स्वसंवेद्या जीवानां व्यावहारिकी ॥ १।२५
आद्यां विना द्वितीया न द्वितीया नाद्यका क्वचित् ।
उभयोर्गोचरेयन्तु तल्लीला व्यावहारिकी ॥ १।२६

ब्रह्मवैवर्तस्य श्रीकृष्णजन्मखण्डे भगवति श्रीकृष्णे परस्परं विरोधिगुणानामाश्रयो वरीवर्ति, यत्रैकस्याद्वितीयस्य तत्त्वस्य स्थापना कृताऽस्ति, यत्र भक्तेः सुकोमलया भावनया साकं सुकुमाराया भावनाया पूर्णोऽवकाशोऽस्ति । विष्णुपुराणे षष्ठांशस्य पञ्चमेऽध्यायेऽध्यात्मरूपाणां विशदं विवेचनमस्ति । परमधाम्नि विख्यातस्य परब्रह्मणोऽपरा संज्ञा भगवानस्ति, स वासुदेवनाम्नाऽभिहितोऽस्ति –

सर्वाणि तत्र भूतानि वसन्ति परमात्मनि ।
भूतेषु च स सर्वात्मा वासुदेवः ततः स्मृतः ॥ ५।५।८०

सांख्यदर्शनस्यानुसरणं कुर्वाणं भविष्यपुराणं निर्दिशति यद् भगवान् श्रीकृष्णः सृष्टेः स्वरूपभूतायाः चिच्छक्तेः प्रकृतेः त्रीन् गुणान् आश्रित्य दिव्यलीलायै सत्त्वरजस्तमसामाश्रयं गृहीत्वा लीलाया आश्रयीभूतानां परिकराणामुत्पत्तिमपि करोति—

कंसाद्यास्तामसा जाता दिव्यलीलाप्रकारिणः ।
राधाङ्गादुद्भवा गोप्यः त्रिंशत् कोट्यस्तथा क्रमात् ॥
ललिताद्याः सत्त्विकाश्च कुब्जाद्या राजसास्तथा ।
तामसाः पूतनाद्याश्च नाना हेला चरित्रकाः ॥
द्विधा जातः स वै कृष्णः राधादेवी तथा द्विधा ।
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥
पूर्वार्द्धात् सा तु वै जाता राधादेवी परार्धतः ।
पुरुषः प्रकृतिश्चोभौ तेपतुः परमं तपः ॥
(भ० पु० प्रतिसर्ग पर्व २५ ।)

विष्णुपुराणे प्रोक्तमस्ति यद् यथा अभिन्नरूपेण व्याप्तस्यैकस्यैव वायोः मुरलीछिद्रभेदद्वारा षड्जादिभेदा भवन्ति तथैव शरीरोपाधिद्वारा एक एव परमात्मा देवमानवदिभेदेनानेकभेदवान् भवति—

वेणुरन्ध्रप्रभेदेन भेद-षड्जादि संज्ञितः ।
अभेदव्यापिनो वायोः तथास्य परमात्मनः ॥
एकः स्वप्रभेदश्च वाह्यकर्मप्रवृतिजः ।
देवादिभेदेऽपध्वस्ते नास्त्येवावरणो हि सः ॥ २।१४।३२-३३

भगवान् श्रीकृष्णः स्वपरतरस्वरूपेण मनुष्येण साकं तादात्म्यं स्थापयित्वा तद्गतिविधीननुकुर्वन् ज्ञानैश्वर्यादीनि स्वतन्त्रस्थले गुह्यरूपेण स्थापयित्वा मनुष्यगुणमाध्यात्मिकतायामुपस्थापयति । सर्वत उत्कृष्टा कला अव्ययकला आनन्दोऽस्ति । स एव ब्रह्मणो मुख्यो स्वर इत्युक्तोऽस्ति । अस्य पूर्णो विकाशो नान्येष्ववातारेषु दृष्टिगोचरी भवति । भगवति श्रीकृष्णे आनन्दस्य सर्वाणि रूपाणि विकसन्ति । आनन्दांशस्य तिरोधाने जीवभावो भवति तथा ऐश्वर्य-वीर्य-यशः-श्री-ज्ञान-वैराग्याणां दैवीगुणानां तिरोभावो जायते । भागवतसम्प्रदाये ऐश्वर्यादिभिः षड्भिः गुणैरधिष्ठितो भगवान् वासुदेव एवास्ति । स एव चतुर्व्यूंहरूपेणोपतिष्ठते । व्यूहवादस्य प्राचीतमं रूपं ब्रह्मसूत्रे (२।२४।४२) प्राप्यते । श्रीमद्भागवते नागपत्नीनां श्रीकृष्णस्य चतुर्व्यूंह स्तुतौ व्यूहवादस्य चमत्कारो दृश्यते—

नमः कृष्णाय रामाय वासुदेवसुताय च ।
प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ॥ १०।१६।४५

चतुर्व्यूहस्य चर्चा कृताऽस्ति एवं श्रीमद्भागवतेऽक्रूरस्तुतावपि ।

नमस्ते वासुदेवाय नमः सङ्कर्षणाय च ।
प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ॥१०।४०।२१

भगवान् श्रीकृष्णोऽस्ति परं ब्रह्म तथा समस्ता सृष्टिः तस्यैवानन्दक्रीडाऽस्ति । अतः समस्तसृष्टौ आनन्दस्य कल्लोलिनी समुजृम्भते ।

स्कन्दपुराणे भगवान् श्रीकृष्ण एव पुरुषोत्तमः प्रोक्तोऽस्ति । तथाहि वैष्णवखण्डस्य वासुदेवमहात्म्ये—

वासुदेवः परं ब्रह्म श्रीकृष्णः पुरुषोत्तमः ।
देवोऽकामैः सकामैश्च पूज्यो मुक्तै र्नरैरपि ॥ २।११

ब्रह्मपुराणस्य १८० अध्याये श्रीकृष्णावतारात् पूर्वं व्यासद्वारा विष्णुस्तुतौ चतुर्व्यूहात्मकस्य निर्गुणस्य शाश्वतस्य विष्णोः स्तुति र्यथा—

नमस्कृस्य सुरेशाय विष्णवे प्रभविष्णवे ।
पुरुषाय पुराणाय शाश्वतायाव्ययाय च ॥
चतुर्व्यूहात्मने तस्मै निर्गुणाय गुणाय च ॥

ब्रह्माण्डपुराणस्य १८९ अध्याये गोपिकाभिः सह भागवतः श्रीकृष्यस्य रासलीलाया वर्णनं प्राप्यते । तथा १९२ अध्यायेऽक्रूरद्वारा यमुनाजलाभ्यन्तरे चतुर्व्यूहस्य वासुदेवस्य स्तुतेरुल्लेखोऽपि विद्यते । हरिवंशे विष्णुपुराणे चाक्रूरद्वारा जलाभ्यन्तरेऽनन्तस्य भगवतः श्रीकृष्णस्य ध्यानस्योल्लेखो विद्यते । श्रीमद्भागवतस्य दशमस्कन्धे तथा गर्गसंहितायां

चास्य वृत्तान्तस्याप्युल्लेखो विद्यते, परं तत्र भगवन्तं श्रीकृष्णं ब्रह्म मत्वैव स्तुतेरुल्लेखः कृतोऽस्ति । ब्रह्मवैवर्तस्य श्रीकृष्णजन्मखण्डेऽक्रूरः परात्परतरं निर्गुणं साकारं सर्वेश्वरं विश्वस्य कारणं च कथयित्वा नमस्करोति ।

ब्रह्माण्डपुराणानुसारं वैकुण्ठवासी भगवान् श्रीकृष्णः पुरुषोत्तमः श्वेतद्वीपनिवासी च नारायण एवास्तीत्युक्तमस्ति—

देवदेवो महातेजाः पूर्वं कृष्णः प्रजापतिः ।
विहारार्थं मनुष्येषु यज्ञे नारायणः प्रभुः ॥

तथा राधा नित्यकृष्णात्मिका एवं कृष्णो राधात्मकोऽस्तीत्युक्त्वा उभयोरभेदः स्थापितोऽस्ति । भविष्यपुराणेऽपि श्रीराधा निराकारस्य ब्रह्मणो विलासिनी शक्ति रुक्तास्ति, श्रीकृष्णो विलासिस्वरूपः तथा राधा तस्य सहचरीचोक्तास्ति । द्वयोः राधा-कृष्णयो रूपयोरेकं भूतमङ्गमव्ययात् परमात्मनः समुद्भूतं प्रोक्तमस्ति—

तदव्ययात् समुद्भूतो राधाकृष्णः सनातनः ।
एकीभूतं द्वयोरङ्गं राधाकृष्णो बुधैः स्मृतः ॥ प्र० प० २ ।१५६

मत्स्यपुराणे पद्मपुराणे च राधाऽपि रुक्मिण्या साकं कृष्णपरिणीताऽभिमतास्ति

रुक्मिणी द्वारवत्यां तु राधा वृन्दावने वने । (१३।३८, ७७।३७)

हरिवंशे योगनिद्राशब्देन प्रतीयत यद् भगवान् विष्णु र्योगिरूपेण समाधिस्थोऽपि भवति स्म—

विष्णु र्निद्रामयं योगात् प्रविष्टं तमसावृतम् । ४०।४८

हरिवंशे कालीयदमनस्य वृत्तान्तन्तूपलभ्यते, किन्तु नागपत्नीनां स्तुतेरुल्लेखो नास्ति, रासलीलावर्णनेन साकं हल्लीसस्याप्युल्लेखो विद्यते । रासमण्डलस्य चापराणि समुद्धरणानि अपि प्राप्यन्ते । ब्रह्मपुराणे हि रासमण्डलस्य चित्ताकर्षकं स्वरूपमुपस्थापितमस्ति तथा राधा गोपीरूपेण वर्णितास्ति । गुरुजनसामीप्येन कृष्णसान्निध्यात् सा वञ्चिता सती केवलं नेत्रोन्मीलनं विधाय ध्यानपरायणा जायते । श्रीमद्भागवते विष्णुपुराणे च रास-लीलाया विस्तारस्य वर्णनं विद्यते । वायुपुराणे भगवतः श्रीकृष्णस्य षोडश सहस्रपत्नीना-मुल्लेखो विद्यते, परं राधिकाया गोपिकाया पृथगुल्लेखो नास्ति, केवलं भगवान् श्रीकृष्णो राधाविलासरसिकः प्रोक्तोऽस्ति । यथा—

राधाविलासरसिकं कृष्णाख्यं परमं परम् ।
श्रुतवानस्मि देवेभ्यो यतस्तद्गोचरोऽभवत् ॥ १०४।५२

देवीभागवते संक्षेपरूपेण श्रीकृष्णजन्म - गोकुलगमन-विविधासुरवध - बाललीलाना-मुल्लेखो विद्यते । अत्र राधा एव प्रकृतिः कुलकुण्डलिनी शक्तिः प्रोक्तास्ति, श्रीकृष्णो परमात्मा पुरुषो वा निगदितः वृन्दावनं सहस्रदलकमलं गोपसुन्दर्यश्चान्तः करणस्य

वृत्तयः प्रोक्ताः सन्ति । श्रीकृष्णो नन्दनन्दनरूपेण न वर्णितोऽस्ति, प्रत्युत परब्रह्मरूपेण अभितोऽस्ति । यथा—

स आत्मा परं ब्रह्म कृष्ण इत्यभिधीयते ।

एवं ब्रह्मस्वरूपेण वर्णितो भगवान् श्रीकृष्णः स्वकीयया चिच्छक्त्या सह यद् विहारं कुरुते तदेवास्ति रासः । पद्मपुराणे वल्लवीकान्तः श्रीकृष्णो देवता प्रोक्तोऽस्ति—

देवता वल्लवीकान्तो गायत्री छन्द उच्यते । ९।२।२६।

अत्र राधा अन्यपुराभवद्वृषभानुकन्या न निगदितास्ति, किन्तु, यज्ञार्थं भूमिशुद्धि-समये प्राप्ता वृषभानुनाऽत्मीयां कन्यां मत्वा लालिता पालिता वर्धिता च श्रीकृष्णस्य स्नेहभागभवत् ।

ब्रह्मवैवर्तस्य प्रमुखप्रतिपाद्या या देवता सा भगवान् विष्णुः श्रीकृष्ण एवास्ति । अत्र परब्रह्मनाम्ना परमात्मनाम्ना च भगवतः श्रीकृष्णस्यैव प्रतिपादनमस्ति । प्रकृति-ब्रह्म-विष्णु-शिवादीनामाविर्भावो भगवतः श्रीकृष्णत एव जायते । अत्र गोलोकस्य विस्तृतं वर्णनं विद्यते । परमपवित्रमयो दिव्यातिदिव्यश्चिन्मयो नित्यो गोलोक एव लीलाभूमिः, यत्र परब्रह्मणि तेजोमण्डले परमः प्रकाशमयः पुरुषोत्तमः भगवान् श्रीकृष्णो राधया साकं नित्यं विराजते । गोलोकाद् राधायाः व्रजमण्डलेऽवतारग्रहणस्य कारणं श्रीदाम्नः शाप एव प्रोक्तोऽस्ति । भगवता श्रीकृष्णेन साकं गोलोके स्थिताया राधाया रोमकूपतः तत्समानसौन्दर्यवयोवचसः दिव्यरूपाः प्रियम्वदाः सहस्रशो गोपिकाः प्रादुर्भूताः तथा राधापि रासमध्ये श्रीकृष्णस्य वामाश्र्वतः समुत्पन्ना प्रोक्तास्ति—

राधाङ्गरोमकूपेभ्यो बभूवुर्गोपकन्यकाः ।
राधातुल्यास्तु ताः सर्वा नान्यतुल्याः प्रियम्वदाः ॥

(प्रकृतिखण्ड २।६४)

आविर्बभूव कन्यैका कृष्णस्य वामपार्श्वतः ।
धवित्वा पुष्पमानीय ददावर्घ्यं प्रभोः पदे ॥
रासे सम्भूय गोलोके सा दधाव हरेः पुरः ।
तेन राधा समाख्याता पुरा विद्भिर्द्विजोत्तमाः ॥

(ब्रह्मखण्ड ५।२५,२६)

राधास्वरूपनिर्धारणेऽस्य पुराणस्यातिमहत्त्वपूर्णं श्रेयो विद्यते । एवमेव राधोप-निषदि, गोपालतापिन्युपनिषदि, नारदपाञ्चरात्रे च राधायाः प्रमाणिकं दिव्यं स्वरूपं प्रतिपादितमस्ति । अत्र पुराणे विष्णुसमकक्षः भगवान् श्रीकृष्णो गोलेके द्विभुजः तथा वैकुण्ठे चतुर्भुज उक्तोऽस्ति । श्रीकृष्णो भगवतो विष्णोः एकमात्रं परमं सत्यं तत्त्वं तथा श्री राधा च भगवत्या लक्ष्म्याः परमं तत्त्वं प्रतिपादितमस्ति । पुराणमिदं राधाया

श्रीकृष्णेन सह भाण्डीरवने ब्रह्मद्वारा सम्पादितं विवाहवृत्तान्तं प्रस्तौति । गर्गसंहिताया गोलोकखण्डमपि श्रीकृष्णेन सार्कं राधाया ब्रह्मदेवेन विवाहः कारितः । अत्र राधा-कृष्णयोः लौकिकं विवाहस्य विधानं नाङ्कितमस्ति, अपि तु केवलं वरवरणमेव वर्णितं विद्यते । ब्रह्मदेवद्वारा तु लोकोत्तरविवाहस्याभिनयमात्रं प्रदर्शितमस्ति । वस्तुतो भगवान् श्रीकृष्णः परमेश्वरः अखण्डस्वरूपो देवातीतोऽस्ति तस्य लीला च अनन्ता अनिर्वचनीया च वर्तते ।

श्रीमद्भागवते पुराणे च ब्रह्मणः त्रिधः परिस्थितयः प्रदर्शिताः सन्ति, विशुद्धं ब्रह्म, ज्ञानमयः परमात्मा, षडैश्वर्यसम्पन्नो भगवानिति च । ज्ञानमार्गिणां कृते भगवान् श्रीकृष्णः परब्रह्मरूपेण स्वकीयां मनोमोहिनीं छविं दर्शयति, साधकयोगिनां कृते स परमात्मस्वरूपेणात्मानं प्रदर्शयति, स एव भक्तानां कृते च भगवद्रूपेण द्रष्टव्योऽस्ति । इत्थं तत्र ब्रह्मणः त्रयाणां स्वरूपाणां समाहारो भगवति श्रीकृष्णे दरीदृश्यते । तथाहि—

वदन्ति तत्तत्त्वविदस्तत्त्वं यज् ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ १।२।११

अथैकदा राहूपरागे सिद्धाश्रमे स्नानं कर्तुंगतानां वृन्दावनस्थानां गोपीनां द्वारका-स्थानां श्रीकृष्णपत्नीनां च परस्परसङ्गमे प्रेमवार्ताप्रसङ्गे प्रमुदिता भीष्मनन्दिनी रुक्मिणी राधायाः भगवति श्रीकृष्णेऽपूर्वं प्रेमपूरं भक्तिभावं च समीक्ष्य अत्यन्तं प्रमुदिता सती सहर्षं प्रोवाच—

धन्याऽसि राधे वृषभानुपुत्रि ! त्वद्भक्तिभावेन वशीकृतोऽयम् ।
वदत्यलं यस्य कथां त्रिलोकी स एव वार्तां वदति त्वदीयाम् ॥

ग० सं० द्वा० ख० १७।१४

श्रीमद्भागवतादिपुराणेषु नराकार-चतुर्भुज-रूपस्य निराकारस्य ब्रह्मरूपस्य च द्वयोरूपयोः प्रतिपादनमस्ति—

ब्रह्म हि परमं साक्षाद् भगवन्तमधोक्षजम् ।
मनुष्यदष्ट्या दुष्प्रज्ञो मर्त्यात्मानो न मेनिरे ॥

वेदान्तस्य निराकारं ब्रह्म एव श्रीमद्भागवते नराकारद्विभुजरूपेणावतीर्णोऽस्ति । भगवान् श्रीकृष्णो यदा कदाचित् समस्तस्य जगतो दृश्यावतारवदेव दृश्यते, यः परिजनानां कृते विशेषतः आनन्दकारी भवति । स्वमामयैव सोऽवतारं गृह्णाति न स्वरूपतः—वेदाहं पुरुषमवतीर्णं स्वमायया (३।२४।११) तस्य शरीरं शब्दब्रह्ममयं परब्रह्ममयं च वर्णितमस्ति–शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू (६।१६।५१)

श्रीमद्भागवते वसुदेव-देवकी—नन्द-यशोदाप्रभृतयो भगवतः श्रीकृष्णस्य परिकर-रूपेणोपस्थापिताः सन्ति तथा देवगणो गोपरूपेण श्रुतयः ऋचश्च गोपीरूपेणोपस्थाय

भगवतो दिव्यलीलायां सहायका भवन्ति । भगवल्लीलायां भागग्राहिणो गोप-गोपिकाः सन्ति, वसुदेवदेवकीनन्दयशोदायः कृष्णमाराधयन्ति । तत्रैकत्र तस्यैश्वर्यं प्रधानं रूपमुपतिष्ठते तर्हि अन्यत्र बालसुलभं मधुरं जीवनं दृश्यते ।

भगवतो योगमायायाः कन्यारूपेण वर्णनं तु विद्यते एव, परं पश्चात् सा दुर्गा-भद्रकाली-विजया-वैष्णवी–कुमुदा–चण्डिका–कृष्णा–माधवी-नारायणी-ईशानी-शारदा-अम्बिकादिनामभिः प्रसिद्धा । आकाशवाणीं श्रुत्वा ब्रह्मणा देव देवाङ्गनाव्रजेजन्मग्रहीतु-मादिश्य प्रोक्ता यद् भगवतो माया समस्तं जगन्मोहयित्वा भवतामुद्योगे साहाय्यं करिष्यति तदनुसारं ते गोप्यो भूत्वा भगवत्प्रित्यर्थं समस्ते कार्येसहाय्यमकार्षुः ।

वसुदेवगृहे साक्षाद भगवान् पुरुषः परः ।
जनिष्यते तत्प्रियार्थं सम्भवन्तु सुरस्त्रियः ॥
विष्णोर्माया भगवती यया संमोहितं जगत् ।
आदिष्टा प्रभुणांशेन कार्यार्थे संभविष्यति ॥ १०।१।२३, २५

इत्थं राधा-कृष्णकथाविषयकपुराणानामनुशीलनेन तत्र कृष्णसम्बन्धीनि वृत्तानि कल्पनात्मक-प्रतिष्ठात्मक-उभयात्मक धार्मिकानि आवरणानि यदि पृथक् क्रियेत तर्हि स पूर्णमानवः तथैतिहासिकः महापुरुषो नूनं दृष्टिगोचरी भवति ।

ब्रह्माण्डपुराणे तु भगवतः श्रीकृष्णस्य मनुष्यरूपेण जन्मग्रहणस्य चर्चाऽस्ति । यथा वसुदेवस्य तपसः फलत्वेन मानवयोनौ देवकीगर्भतो नारायण एव समुत्पन्नः—

देवक्यां वासुदेवेन तपसा पुष्करेक्षणः ।
चतुर्बाहुस्तु संयज्ञे दिव्यरूपश्रियान्वितः ॥
प्रकाश्यो भगवान् योगी कृष्णो मानुषतां गतः ।
अव्यक्तो व्यक्तलिङ्गश्च स एव भगवान् प्रभुः ॥ ३।७१।१९ १७ ७८

महापुराणे श्रीमद्भागवतेऽपि सङ्केतरूपेणेदमेव वृत्तान्तं कथितमस्ति —
अप्यद्य विष्णो मनुजत्वमीयुषो भारावतारस्य भुवो निजेच्छया ।१०।३८।१०

जन्मग्रहणसमये वसुदेवो भगवन्तं श्रीकृष्णं प्रकृतेरतीतं साक्षात् पुरुषोत्तमं कथयति, देवकीस्तुतौ च स निर्विकारब्रह्मरूपेण विष्णुरूपेण च प्रदर्शितोऽस्ति—

(क) विदितोऽस्ति भवान् साक्षात् पुरुषः प्रकृते परः ।
केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृक् ॥ १०।३।१३

(ख) रूपं यत्तत् प्राहुरयक्त माद्यं
ब्रह्म ज्योति र्निर्गुणं निर्विकारम् ।
सत्तामात्रं निर्विशेषं निरीहं
सत्वं साक्षाद् विष्णुरध्यात्मदीपः ॥ १०।३।२४

तत्रैव द्वितीयस्कन्धे श्रीकृष्णबलरामावापि भगवतो नारायणस्य श्वेतकृष्णकेश-रूपेण वर्णितौ स्तो यौ असुराणां वधायावतीर्णौ स्तः (२।७।२६) तथा दशमे गर्भस्तुतौ ब्रह्मणः स्तुतौ नारायणत्वेन तावुत्प्रोक्षितौ स्तः । अवतारसमये स स्वयमेवावतारी देवक्यां चतुर्भुजत्वेनावतीर्य पश्चाद् द्विभुजो यशोदानन्दनो गोपीजनवल्लभो वासुदेवः श्रीकृष्ण इत्यादिनाम्ना प्रसिद्धिं गतः । अयं षोडशकलः पूर्णावतारः, अन्ये चावतारा तस्य सन्ति अंशावताराः। "अन्ये चांशकलाः पुंसः कृष्णतु भगवान् स्वयम् ।" (१।३।२८) प्रसङ्गेऽस्मिन् श्रीकृष्णः आत्मानमुपादानकारणं सर्वात्मानमीश्वरं साक्षिणं स्वप्रकाशं सर्वोपाधिशून्यं परं ब्रह्म परमात्मानं स्वमायया जगतः स्रष्टारं पालकं संहारकं च कथयति—

अहं ब्रह्मा च शर्वश्च जगतः कारणं परम् ।
आत्मेश्वर उपद्रष्टा स्वयं दृगविशेषणः ॥
आत्ममायां समाविश्य सोऽहं द्विजमयी द्विजः ।
सृजन् रक्षन् हरन् विश्वं दध्रे संज्ञांक्रियोचिताम् ॥ ४।७।५०,५१

एवमखिलात्मा परमात्मा भगवान् श्रीकृष्णो जगतो हिताय मायामाध्यस्थ्या-विर्भवति देही व च प्रतीयते—

कृष्णमनमवेहि त्वमात्मानमखिलेश्वरम् ।
जगद्धिताम सोऽप्यत्र देहीवाभाति मायया । १०। ४।५८
यदा तदा हि धर्मस्य क्षयो वृद्धिश्च पाप्मनः ।
तदा तु भगवानीशः आत्मानं सृजते हरिः ॥ ९।२४।५५
न ह्यस्य जन्मनो हेतुः कर्मणो वा महीपते ।
आत्ममायां विनेशस्य परस्य द्रष्टु - रात्मनः ॥ ९।२४।५७

श्रीमद्भागवते भगवतः श्रीकृष्णस्य समस्तैश्वर्यमाधुर्यसमन्वितं रूपं वर्णितमस्ति । वस्तुतः स न कस्यचित् पुत्रः, नापि पिता, न च सुतादयः, न वाऽऽत्मीयः परश्चास्ति तस्य, किन्तु निर्गुणः प्रकृतिपुरुषयोरप्युपरीश्वरत्वेनोत्प्रोक्षितोऽस्ति —

न माता न पिता तस्य न भार्या न सुतादयः ।
नात्मीयो न परश्चस्ति न देहो जन्म एव च ॥
सत्त्वं रजस्तम इति भजते निर्गुणो गुणान् ।
क्रीडन्नतीतो गुणैः सृजत्यवत्ति हन्त्यजः ॥ १०।४६।३८-४०

अत्र सांख्यदर्शनस्य दृष्टिः प्रतिपादितास्ति । यथेश्वरशक्तिः प्रकृति-पुरुषाभ्यां भिन्नास्ति तथैव राधाकृष्णावपि सांख्योक्ताया जडायाः प्रकृतेः साक्षिणः पुरुषस्य च भिन्नौ मतौ स्तः । वेदान्तिनां परमसाध्यस्य ब्रह्मण उत्तमाः कृष्णभक्ता श्रीकृष्णस्याङ्ग-

च्छटया प्रतिपादिताः । यथाऽऽदित्यः केन्द्रस्थानीयः तथा तन्मण्डलं तत्प्रतिच्छायास्ति तथैव भगवान् श्रीकृष्णः केन्द्रोऽस्ति तथा ब्रह्म तस्यास्ति अङ्गज्योतिः ।

ब्रह्मसंहितानुसारं कोटि-कोटिब्रह्मणः क्षित्यादिपृथग्भूतेषु योऽधितिष्ठति तस्य निष्कलानन्ताशेषस्वरूपस्य ब्रह्मणो या प्रभावशालिनी गोविन्दस्य प्रभास्ति तां वयमाराधयामः—

यस्य प्रभा भगवतो जगदण्डकोटि-
कोटिष्वशेषवसुधादिविभूतिभिन्नम् ।
तद्ब्रह्म निष्कलमनन्तमशेषभूतं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ५।४६

वायुपुराणेऽपि एवमेव श्रीकृष्णस्य षष्ठावताररूपणेणोल्लेखो विद्यते—

तदा षष्ठेन चांशेन कृष्णः पुरुषसत्तमः ।
वसुदेवाद् यदुश्रेष्ठाद् वासुदेवो भविष्यति ॥ ३।२०६

श्रीमद्भागवते श्रीकृष्णलीलाया निकटतमः परिकरो बलरामः प्राक् देवक्या एव गर्भे प्रदर्शितोऽस्ति । अनन्तरं भगवता विष्णुना आदिष्टया योगमायया रोहिणीगर्भे स्थापितः । अतस्तस्यापरं नाम सङ्कर्षण इत्यजायत लोकरमणाद्बलाधानाच्च बलरामोऽपि तस्य नाम प्रसिद्धम्—

देवक्या जठरे गर्भे शेषाख्यं धाम मामकम् ।
तत् संनिकृष्य रोहिण्यां उदरे संनिवेशय ॥ १०।२।८
गर्भसंकर्षणात्तं वै प्राहुः संकर्षणं भुवि ।
रामेति लोकरमणाद्बलं बलवदुच्छ्रयात् ॥ १०।२।१३

श्रीमद्भागवतानुसारं कंसः आकाशवाणीतो देवक्या अष्टमसन्ततिद्वारा आत्मनो निधनं ज्ञातवान्, हरिवंशे नारदेन तद्वधस्य सूचना प्रदत्तास्ति । इत्थं भगवतः श्रीकृष्णस्य विष्णुरूपेण प्रदर्शनं पुराणजातस्य प्रमुखं लक्ष्यमस्ति । भगवान् श्रीकृष्णः बाल्यकालादेवालौकिककर्मसम्पादनादसाधारणो महापुरुषोऽभिमतः । तस्य बाल्यकालीना लीला रहस्यपूर्णाः सन्ति, तासामाध्यत्मिकसंकेतः प्रच्छन्नोऽतिविलक्षणश्चास्ति । वस्तुतो विभिन्ना विद्वांसो वेदमन्त्रवद् राधाकृष्णलीलास्वपि आध्यात्मिकं रहस्यं स्फोरयितुं सन्ति प्रवृत्ताः । राधाकृष्णलीलासम्बन्धिनामुपकरणनामध्यात्मिकार्थकरण-कर्तारः कथयन्ति-यद्भगवतः । श्रीकृष्णस्य मङ्गलमयाविर्भावसमये एवाद्भुतचमत्कार-पूर्णस्य प्रारम्भो जात आसीत् । पूतना-तृणावर्तादिलीला ऐश्वर्यप्रधाना लीलाः सन्ति । हरिवंशे पूतना कंसस्य धात्रीरूपेण वर्णिता, तस्य निशीथे शकुनिरूपेण च गोकुले प्रवेशो वर्णितो वर्तते—

धात्री कंसस्य भोजस्य पूतनेति परिष्कृता ।
ततोऽर्द्धरात्रसमये शकुनिः प्रत्यदृश्यत ॥ वि० प० ५०।२०

महाभारतेऽपि शकुनिरूपेणैव पूतनाया आख्यानं वर्णितमस्ति । ब्रह्मवैवर्ते पूतना कंसस्य भगिनी कथितास्ति, या ब्राह्मणी भूत्वा कृष्णस्यान्तिमुपजगाम । सुश्रुते पूतनानामकस्य भयङ्करस्य बालरोगस्योल्लेखो विद्यते । गर्गसंहितायां षोडशवर्षीया दिव्यरूपधारिणी पूतना बालघातिनी प्रोक्तास्ति ।

केचन अध्यात्मवादिनो भगवन्तं श्रीकृष्णमात्मानं तथा गोपिका वृत्तीः मन्यन्ते । तासां वृत्तीनामावरणनाशः चीरहरणलीलाऽस्ति । आत्मनो लीनभवनं रासोऽस्ति । श्रीमद्भागवते गोपीनां वृत्तित्वं न दार्शनिकवादः, नापि प्रतीकवादः, प्रत्युत तासु आध्यात्मिकवातावरणस्य स्थापनाय प्रयासः कृतोऽस्ति । तत्रानन्दस्य भावना सर्वत्र लीलाप्रधानाऽऽसीत् । श्रीकृष्णस्यावतारभावनया परब्रह्मभावनया च भावनीय-प्रणयाभिव्यञ्जनानामत्यन्तं स्थूलवृत्तीनामाश्रयं गृहीत्वा आध्यत्मिकावरणमत्यन्त-मुदात्तं कृतमस्ति ।

प्रत्येकं प्राणिनाभभ्यन्तरे सौन्दर्यं प्रति अतृप्ता लालसा तिष्ठति । सौन्दर्यसागरे निमग्नो भूत्वा प्राणी अपरिमितस्यानन्दस्योपलब्धि कर्तुं निरन्तरं चेष्टते, यत्र तस्य रागात्मिका वृत्तिः सौन्दर्योपयुक्ता स्यात् । पुराणेषु राधा-श्रीकृष्णयोः स्वरूपं तु सौन्दर्यस्य विशाल एवास्ति समुद्रः, यस्यामृतकुण्डे निमग्नो भूत्वा संसारी अमरो भवितु मीहते । राधा-कृष्णयोः मनोमुग्धकारिणी छटा रसिकभक्तगणस्यान्तस्तलं सौन्दर्य-पूरितं विधत्ते । येन स मन्त्रमुग्धः सन् तत्सौन्दर्यरसमनुभवति ।

भगवतः श्रीकृष्णस्य सगुणं लौकिकरूपमतएव प्रियमस्ति यतस्तत्रैव भक्तजन-स्यात्यधिका आनन्दानुभूति र्भवति । तस्य मयूरमुकुटं, वंशीध्वनिः, मधुरलीलादि च अलौकिकमानन्दमेव प्रस्तुवते । तदद्भुत आनन्दोऽयं न केवलं पृथ्वीतलमेवानन्दयति, अपितु समस्तं ब्रह्माण्डमपि आनन्दनिमग्नं विधत्ते । भगवतः श्रीकृष्णस्य चिरसङ्गिन्याः श्रीराधायाः श्रीमद्भागवते विष्णुपुराणे च चर्चाया असत्वेऽपि ब्रह्मवैवर्तेपद्मपुराणे स्कन्दपुराणे च इदृशं मनोहरि चित्रमुपस्थापितमस्ति, येन प्रतीयते यद् राधा-कृष्णयोः क्रीडारथत्री रम्यमयं रूपं धृत्वा तयोश्चरणसेवायै रासलीलोपादानभूतां सौन्दर्य-सामग्रीं गृहीत्वा तत्समक्षमुपस्थाप्य सर्वं सुखयति । अतो जडचेतनात्मको सकलो लोको राधाकृष्णयोराराधानायां संलग्नो भूत्वा तयो र्नीराजनं कुर्वन्नि दृश्यते । एवं पुराणेषु प्रतिपादितं राधाकृष्णयो र्मनोमोहकं स्वरूपं परवर्तिनां साहित्यकाराणां मनांसि मधुररसलुब्धमधुकरवदाकृष्टं करोति, येन ते स्वलोभस्य सवरणमकृत्वा स्वासु स्वासु कृतिषु विशुद्धमाधुर्यभावस्य रुचिरं दिग्दर्शनं निरन्तरं कुर्वन्ति, करिष्यन्ति च ।

कवेः विशिष्टंवैदुष्यं तस्य कृतेः पर्यालोचनानन्तरमेव समुद्भवति । कोऽपि कविः स्वस्यान्तरिकस्योद्गारस्य यावद् विम्बात्मकं चित्रं प्रस्तौति तावदेव तदाधारेण तद्भावानां गभीरं प्रत्यभिज्ञानमनुभूयते । भावनाभिव्यक्तीकरणे एव कवेः प्रतिभाया उत्कर्षः प्रतीयते यत् स मानवानामन्तर्विद्यमानभावानां मनोवैज्ञानिकमनुशीलनं कृतं नवा ? । कवेः कल्पना भवति अलौकिकी, यत्र स रूपरसास्वादनमपि अलौकिके एव धरातले विधत्ते तथा तस्य परब्रह्मानन्दोपलब्धिवदेवानन्दप्राप्तिः भवति स सहृदयहृदयान् तदानन्दपानं कारयितुं प्रयासं कुरुते, किन्तु तत्रानेन कियत् साफल्यमवाप्तमित्येतत् तत्कृतिषु एवान्विष्यते मर्मज्ञैः विद्वद्भिः ।

राधा-कृष्णौ द्वावेव परब्रह्मरूपेण विज्ञैः विज्ञाताविति तयोः रतिक्रीडाया वर्णनं यदा सत्कविः सहृदयानां रसिकानां समक्षे समुमस्थापयति तदा सः तयोः द्वयोः दिव्यत्वाद् अश्लीलतां नोपस्थापयति, यतस्तयोरुभयो र्लीला प्राकृतमानवसमाना न भवति । यदा कदाचित् प्रसंगोऽयमुपतिष्ठते यद् राधा-कृष्णयोर्दिव्यत्वात् सहृदयानां रसानन्दावाप्ति र्न तादृशी भवति यादृशी भवति प्राकृतनायकनायिकयो रति-क्रीडायां, यतः स स्वकीयाया रागात्मिकायाः वृत्तेः तादत्म्यं स्थापयति । राधा-कृष्णयोः परस्परप्रेम्णि ईदृशी व्याकुलता भवति येन तदीयं क्षणमात्रमपि युगायते । राधाकृष्णयोश्चरितमलौकिकंमनोंमुग्धकारि च विद्यते, यतस्तौ लौकिक-माचरणं कुर्वाणौ प्रतीयेते, कुत्रापि सीता रामादिवदादर्शमयमर्यादायाः प्रदर्शनं न कुरुतः, किन्तु एकमात्रं स्वस्या लीलाया, एव प्रदर्शनं कुरुतः । अतो भगवान् श्रीकृष्णो लीलापुरुषत्तमो मधुररससंवलितः ऐश्वर्यमाधुर्मशिरोमणिरेव स्मर्यते । स स्वकीयेन सौन्दर्येण भक्तिशिरोमणीनामन्तः करणं न रत्यात्मनि, किन्तु विशुद्धे प्रेमरसे निमज्ज-यति येन तेषामन्तारात्मनो विविधानि भावदलानि मुकुलितानि कुरुते । राधाकृष्णयोः रूपं चेष्टा, धाम, परिकरादीनि सर्वाणि सुमधुराणि भवन्ति । अतः प्रथमं तद्रूपस्य ततः प्रेम्णः प्रकृत्या सह तादात्म्यं स्थापयित्वा जडचेतनयोः सौन्दर्यस्याकलनं कर्तव्यम् । यथा श्रीमद्भागवते—

वर्हापीडं नाटवरवपुः कर्णयोः कर्णिकारं
विभ्रद् वासः कनकपिशं वैजयन्ती च माला ।
रन्ध्रान् वेणोरधरसुधया पूरयन् गोपवृन्दै-
र्वृन्दारण्यं स्वपदरमणं प्राविशद् गीतकीर्तिः ॥

(श्री० भा० १०।२१।५)

इति पद्यानुसारं मयूरपिच्छ-कर्णिकारकुसुम-पीतांबरधारिणोवैजयन्तीमालालङ्कृतस्य-वेणुं वादयतो नटवरवपुषो भगवतः श्रीकृष्णस्याकृतेर्यथा गुणगानं कृतमस्ति । तथैव

विदग्धमाधवेऽपि नाटके रूपगोस्वामिना तद्गुणगानं राधायाश्चाद्भुतं परब्रह्मानन्द-प्रातिकरं सौन्दर्यादिकं च चर्चितं विद्यते ।

भगवल्लीलास्थलविमर्शः

भागवतः प्रेम्णो मधुरभावानाञ्च स्पन्दनं लीलाधामस्वेव मूर्त्तं रूपं धत्ते । प्रेमक्रीडा-हि प्रकृतेः सुरम्यस्थल्यामेव सम्भवति, नान्यत्र । यत्र हि भगवान् स्वकीयया नित्य-सहचर्या साकं नित्यं दिव्यलीलां कुरुते, तदेव तदुत्कृष्टं नित्यं धाम भवितुमर्हति । यथा भगवान् श्रीकृष्णोऽस्ति दिव्यो महापुरुषः तथैव तत्सहचरी तदंशाः तत्परिकराश्च सन्ति दिव्या एव । भगवानिव भगवल्लीलाधामापि नित्यं वरीवर्ति । ईश्वरस्यालौकिकी लीला तु समस्ते ब्रह्माण्डेऽप्रत्यक्षतयाऽजस्रं प्रचलत्येव, किन्तु भक्तशिरोमणीनां मानव-मणीनामवलोकनार्थं वैकुण्ठे नित्यं विराजमानोऽपि भगवान् विष्णुः, ततो भूमाववतीर्य-समये समयेऽस्माकं लोचनगोचरी भवति ।

वस्तुतो निराकार-निर्गुण-निर्विकार-चिन्मये रूपे भगवतो न किञ्चत् स्वरूपं, नापि किमपि वास्तविकं धामास्ति, यत्र स शाश्वतिकमानन्दमभ्यक्ती कर्तुं प्रभवेत् । अथापि भक्तानामनुग्रहार्थं भगवतो विष्णोः परमं धाम वैकुण्डमेवाभिहितमस्ति, यत्र नित्य-मानन्दरसनिर्झरणी प्रस्रवति । भगवतः श्रीकृष्णस्य विष्णुना साकं तादात्म्यस्थापनात् वैकुण्ठादपि तस्य सम्बन्धो भवितुमुचितः प्रतिभाति । भगवतः श्रीकृष्णस्य धाम वैकुण्ठं तु न क्वचन निर्दिष्टमस्ति । यदि महाभारते पुराणेषु च भगवतः श्रीकृष्णस्य धाम्नोऽ-वलोकनं क्रियेत तर्हि तस्य नित्यं धाम गोलोकमेव वर्णितं विद्यते ।

गोलोकम्

महाभारतस्य शान्तिपर्णणि भगवतः श्रीकृष्णस्य गोलोकं ब्रह्मलोकसमानमुक्तमस्ति (३४२।१३८) हरिवंशे गवां लोकस्य गोलोकस्य चर्चासमये भगवतः श्रीकृष्णस्यापि नाम समुत्थापितमस्ति (वि० पर्व १९।३४) ब्रह्मवैवर्ते तु गोलोकस्य विस्तृतं विवेच-कृतमस्ति । कोटि-कोटि सूर्यसमानं प्रकाशमानं यन्मण्डलाकारं तेजः पुञ्जमस्ति तदभ्यन्तराले भगवतः श्रीकृष्णस्य नित्यं धाम प्रच्छन्नमस्ति, यस्याभिधेयमस्ति गोलोकः । पद्मपुराणस्य ब्रह्मखण्डे प्रकृतिखण्डे च एतत् वैकुण्ठादप्युपरि पञ्चाशत्कोटियोजनमुपरि स्थितं नित्यं प्रोक्तमस्ति, यद् गोभि र्गोपाङ्गनाभिश्च परिवेष्ठितं रासमण्डलमण्डितं चास्ति । वृन्दावनेनाच्छन्नस्य विराजानन्दीसुशोभितस्यास्य गोलोकधाम्नो देदीप्य-मानस्य चित्रणं तत्र कृतमस्ति । एवं विविधैरनुपमैः श्रेष्ठरत्नैः निर्मिते राजसिंहासने आसीनो भगवान् श्रीकृष्णः प्रदर्शितोऽस्ति, यो निजया आभया कामदेवस्यापि त्रिभुवन-मोहनं लावण्यं तिरस्करोति । एवं तत्तत्पुराणेषु भगवतोऽप्रगटलीलायां सहायकधाम-

रूपेण गोलोकस्य चित्रणं कृतमस्ति । एवमेव गर्गसंहिता-बृहद्ब्रह्मसंहिता-नारदपाञ्च-रात्र-अनन्तसंहितास्वपि पुराणवदेव गोलोकस्य रमणीयं वर्णनं वर्तते ।

बृहत्संहितायां गोलोकं भगवतः श्रीकृष्णस्य नित्यं धाम प्रोक्तमस्ति । देवी-महेशादि-धाम्नोऽपि गोलोकमुत्तमं निर्दिष्टमस्ति (४।५) अनन्तसंहितायां तु महावैकुण्ठादुपरि प्रकृतेः परं गोलोकस्य स्थितिः प्रदर्शिताऽस्ति, यत् नित्यगुणैः नित्योत्सवैश्च युक्तमुक्त-मस्ति ।

(५) गर्गसहिताया गोलोकखण्डे तु गोलोकस्य धाम्नः सौन्दर्यस्य मनोमोहकं चित्र-मुपस्थापितं वर्तते । ईश्वरस्य ब्रह्मरूपेण प्रदर्शनाय गोलोकाधिपतेः भगवतः श्रीकृष्णस्य वर्णनं कृतमस्ति । गोलोकमिदं शेषनागस्याङ्के प्रतिष्ठितं निर्दिष्टमस्ति यन्महालोक-नाम्नाऽभिहितं वर्तते ।

तस्योत्सङ्गे महालोको गोलोको लोकवन्दितः ।
यत्र कालः कलयतामीश्वरो धाममानिनाम् ॥ २।१८

अस्यां संहितायामपि ब्रह्मवैवर्तवदेव गोलोकं गोपिकाभिः गोगणैरावृतं रासमण्डल-मण्डितं दिव्यवृन्दावनसुशोभितमुक्तमस्ति । अस्य गोलोकस्यापूर्वं सौन्दर्यं पृथ्वीतले न कुत्रापि अभिव्यक्तं दृश्यते । यदा भुवो भारावताराय भगवान् पृथिव्यामस्यामवतरति तदा तेन साकं तद्धामापि अवतरति । गोलोके तत्प्राणवल्लभा राधाऽपि पार्थिवं देहं धत्ते । तदुक्तं देवर्षिणा नारदेन राधिकामुद्दिश्य वृषभानुं प्रति—

भुवो भारावताराय कंसादीनां वधाय च ।
ब्रह्मणा प्रार्थितः कृष्णो बभूव जगतीतले ॥
श्रीकृष्णपट्टराज्ञी या गोलोके राधिकाभिधा ।
त्वद्गृहे साऽपि संजाता त्वं न जानासि तां पराम् ॥ १५।५५।५८

यद्दर्शनं दुर्लभमेव दुर्घटं
वेदैश्च यज्ञैर्नरजन्मभिः किमु ।
सविग्रहां तां तव मन्दिराजिरे
लक्षन्ति गुप्तां बहुगोपगोपिकाः ॥ २।१५।६४

एवं तत्र भगवतः श्रीकृष्णस्याप्रकटलीलाया धाम्नो गोलोकस्य पर्याप्ता चर्चाऽस्ति परं पृथिव्यां प्रकटलीलायाः गोलोकस्याभिव्यक्तिः चतुर्षु स्थानेषु दृश्यते—गोकुले, मथुरायां द्वारवत्यां वृन्दावने च । तत्र गोकुलस्य महत्वं मथुरा-द्वारकातोऽप्यधिकतरं प्रतीयते, यतो हि अत्रैव भगवतः श्रीकृष्णस्यबालमाधुरी सर्वतोऽधिका विराजते ।

गोकुलम्—

गोकुलं हि भगवतः श्रीकृष्णस्य मधुरमयं बालक्रीडास्थलम् । तदेव द्वापरे बालसुलभाया मनोरमाया लीलाया गोपालबालकैः साकं समेषां ब्रजवासिनां मनांसि

समाकर्षयति । गोकुलं व्रजमपि प्रोक्तमस्ति । अस्य परमं सौभाग्यमस्ति यदनेन बाल्य-कालतो यावज्जीवनं भगवदीयलोकोत्तरं सौन्दर्यं निरन्तरं निरीक्षितम् । अतो भगवताषि स्वप्रियभक्तवदेव एतद्गोकुलमेवान्तरङ्गं धाम स्वीकृतम् । मनोमुग्धकारिण्यः सर्वा अपि भगवतः श्रीकृष्णस्य मनोहरा बाललीला गोकुले एव सम्पन्नाः । अत एव पद्मपुराणास्य पातालखण्डे बालगोपालस्य स्मरणायोपदेशो प्रदत्तोऽस्ति—

बाल्य-पौगण्ड-कैशोरं वयो वन्दे मनोहरम् ।
बाल गोपाल गोपालं स्मर गोपालरूपिणम् ।

देवर्षिणा नारदेनापि नन्दं प्रति तन्माहात्म्यमेवमभिहितम्–

भव-ब्रह्मादयोऽप्यस्य प्रीतिं वाञ्छन्ति शाश्वतीम् ।
चरितं चास्य बालस्य सर्वेषामेव हर्षणम् ॥७१।११

अत एव दीर्घायुषा महर्षिणा मार्कण्डेयेन मुनिना प्रलयकाले बालगोपाल एव स्मृतः—

करारविन्देन पदारविन्दे मुखारविन्दे विनिवेशयन्तम् ।
बटस्य पत्रस्य पुटे शयानं बालं मुकुदं मनसा स्मरामि ॥

रूपगोस्वामिना तु स्वकीये लघुभागवतामृते मथुराया महिम्नो व्याख्यानं विहितं तथा तस्या महिमा-वैकुण्ठतोऽप्यधिकोऽङ्गीकृतोऽस्ति । अथापीदं स्पष्टं वक्तुं शक्यं यत् त्रिविधं लोलाधामापि भगवतः श्रीकृष्णस्य मधुरमाधुरीतः परिपूरितं सत् स्वस्वसुषमया सकलान् भक्तप्रवरान् समाल्हादयति भगवदुन्मुखांश्च विद्यत्तो निरन्तरम् । एवं समस्तं व्रजमेव गुणातीतस्य भगवतः श्रीकृष्णस्य चेतनांशः कथ्यते । श्रीमद्भागवते व्रजाय सर्वाधिकं महत्त्वं प्रदत्तमस्ति यद् गोपिकाभिश्च स्वीकृतं ज्ञानिनाप्युद्धवेन सर्वथाभिमतं स्पष्टमुद्घोषितमस्ति—

वृन्दावनम्—

वृन्दावनमपि गोकुलवदेव श्रीकृष्णभक्तानां कृते सर्वाधिकं महिमशक्तिशालि सर्वसौन्दर्यसम्पन्नपरममनोहररूपं वर्तते तथा चोक्तं ब्रह्मपुराणे—

श्रीमद्वृन्दावनं रम्यं पूर्णानन्दरसाश्रयम् ।
भूरिचिन्तामणिस्तोयममृतं रसपूरितम् ॥५९।६०

बृन्दावन्दे कृता भगवता श्रीकृष्णेन लौकिकी लीला सहृदयानां रसिकभक्तानां हृदयानि सर्वतोऽधिकं हठादाकर्षति । गोपालतापिन्युपनिषदि अपि भगवतः श्रीकृष्णस्य क्रीडाधामरूपेणैव वृन्दावनमभिहितमस्ति । तत्र बृन्दावनं गोपालपुरीनाम्नाऽभिहित-मस्ति । यथा सरोवरे कमलं सुरक्षितं तिष्ठति तथैव चक्रस्थितभूमौ मथुरापुरी वद् गोपालपुरी स्थितास्ति । एवमेव कृष्णोपनिषदि अपि श्रीबृन्दावनं भगवतः

श्रीकृष्णस्य नित्यक्रीडास्थली प्रोक्ताऽस्ति । गर्गसंहितायामपि मथुरा-बृन्दावन-यमुना-दीनामपूर्वं महत्वमुक्तमस्ति । बृन्दावनस्य लीलाभिरोतप्रोतं पीयूषवर्षिणो जयदेवकवेः गीतगोविन्दमस्ति यद्रसिकशिरोमणीनां भक्तानां ध्यानं श्रीकृष्णस्य क्रीडासु समाकर्षति । भगवतः श्रीकृष्णस्य निजधामरूपेण बृन्दावनं सुप्रसिद्धमस्ति । गोकुलं भगवतो नन्दनन्दस्य प्रियं धाम मन्यमाना अपि वैष्णवा भक्ता बृन्दावनं भगवतः श्रीकृष्णस्य सर्वोत्तमं धाम मन्यन्ते, यतस्तत्र महान्ति विघ्नानि श्रीकृष्णस्यालौकिकानि अपि कृत्यानि अवलोक्य विघ्नव्यूहविदारणपूर्वकं राक्षसेभ्यो भगवतः श्रीकृष्णस्य सुरक्षार्थं गोपैः क्रियमाणं बृन्दावने गमनस्य विधानं स्पष्टतया दृष्टिगोचरी भवति—

यावदौत्पत्तिकोऽनिष्टो व्रजं नाभिभवेदपि ।
तावद्बालानुपादाय यास्यामोऽन्यत्र सानुगाः ॥
वनं वृन्दावनं नाम पशव्यं नव काननम् ।
गोप-गोपी-गवां सेव्यं पुण्याद्रितृणविरुधम् ॥ १०।११।२७,२८

प्रायः सर्वा लीला बृन्दावने एव सम्पन्नाः अभूवम् । अथ कदा केदारनृपते बृंन्दानाम्नी कन्या महत्तपः कृतवती तेन प्रसन्नो भूत्वाऽभीष्टं वरं दातुं यदा भगवानाविर्बभूव तदा सा तस्य जगन्मोहनमलौकिकं मधुरं रूपमवलोक्याकृष्टा सती पतिरूपेण तमेव वव्रे । तदनुसारं तेन तदाकङ्क्षापूर्तये सापि गोलेके समानीता राधावत् प्रिया च संमानिता । अतो यदा भगवान् श्रीकृष्णो गोलोकात् पृथिव्यामवतरति । तदा सापि भगवता सहैव वृन्दावनरूपेणावतरति । वृन्दातपःकारणात्तस्य नाम वृन्दावनं जातम् ।

बृन्दा यत्र तपस्तेपे तत्तु वृन्दावनं स्मृतम् ।

ब्रह्मवैवर्तपुराणस्य श्रीकृष्णजन्मखण्डेऽपि प्रोक्तमस्ति यद् यत्र बृन्दया तपस्तप्तं क्रीडा वा कृता तत् स्थानं वृन्दावनमुच्यते—

तस्याश्च तपसः स्थानं तदिदं च तपोधन !
तेन बृन्दावनं नाम प्रवदन्ति मनीषिणः ॥ १७। १२

राधायाः षोडशसु नामसु बृन्दापि एकं नाम श्रुतावुक्तमस्ति । तस्या बृन्दानामधारिण्या राधाया इदं क्रीड़ास्थलत्वादपि बृन्दावनं कथ्यते । विश्वकर्मणा बृन्दावने मणिमयपरकोटं युक्तमेकं रासमण्डलं निर्मितं, विविधपुष्पोद्ध्यानमणिमणिक्यरत्नकलश सरोवरैः सुशोभितस्य बृन्दावनस्य निर्माणं विधाय तेनस्वयमेव निजनिर्माणकलायाः सुप्रशंसा कृता, यतो हि तद् राधामाधवयोः कृतेऽपूर्वं क्रीडास्थलं संजातम् ।

पुराणानुसारं हि भक्तशिरोमणिभिः वृन्दावनस्य रूपद्वयं कल्पितंमस्ति । एकं नित्यमपरमनित्यम् । तत्र नित्यं वृन्दावनं शाश्वतमस्ति यत् प्रलयेऽपि न विनश्यति ।

अनित्यं तु जगदवदेवोद्भवति प्रविलीयते च समये समये । यथाऽनित्यवृन्दावने प्रगटलीला प्रचलति तथैव नित्यवृन्दावनेऽपि तल्लीला प्रचलत्येव निरन्तरम् । प्रगटलीलाया ये सहायकाः सन्ति, ते नित्यं लीलायामपि नित्यवृन्दावने भवन्ति सहयोगनिनः—

दास्यः सखायः पितरौ प्रेयस्यश्च हरेरिह ।
सर्वे नित्याः मुनिश्रेष्ठा वसन्ति गुणशालिनः ।
यथा प्रकटलीलायां पुराणेषु प्रकीर्तिताः
तथा ते नित्यलीलायां सन्ति वृन्दावने भुवि ॥ प० पु०।८३।३४

अतएव भगवन्तं महेशं प्रति भगवान् श्रीकृष्णःस्वयमेव ब्रुवन्नाह—

इदमानन्दकन्दाख्यं विद्धि वृन्दावनं मम ।
यस्मिन् प्रवेशमात्रेण न पुनः संसृतिं विशेत् ॥८२।७३।७६

अत एवान्ते सिद्धान्तितं देवर्षिं नारदमुद्दिश्य भगवता सदाशिवेन पद्मपुराणे—

त्रैलोक्ये पृथिवी मान्या जम्बूद्वीपं ततो वरम् ।
तत्रापि भारतं वर्षं तथापि मथुरा पुरी ॥
तत्र वृन्दावनं धाम तत्र गोपीकदम्बकम् ।
तत्र राधा सखीवर्गस्तत्रापि राधिका वरा ।
विहराम्यनया सार्द्धं नित्यं प्रेमवशीकृतः ।
इमां तु मत्प्रियां विद्धि राधिकां परदेवताम् ॥
पाताल खण्डे ८१।५९।६०।

सा तु साक्षान्महालक्ष्मीः कृष्णो नारायणः प्रभुः ।
नैतयो विद्यते भेदः स्वल्पोऽपि मुनिसत्तम ! ॥
अहो भारतवर्षेऽस्मिन् पुण्यं वृन्दावनं वनम् ।
राधापादाब्जसंस्पर्शरजःयूतं सुरेप्सितम् ॥ ७९।३५

यस्मिन् स्थले वृन्दावनं, यमुना नदी, गोवर्द्धनगिरिश्च न सन्ति । तस्मिन् स्थले राधाया मनसः सुखं न संभवति । यथा चोक्तं तया स्वयमेव —

यत्र वृन्दावनं नास्ति न यत्र यमुना नदी ।
यत्र गोवर्द्धनो नास्ति तत्र मे न मनः सुखम् ॥ १।३।३२

अपि च स्वयमेव भगवता श्रीकृष्णेनापि प्रोक्तमस्ति—

इदं वृन्दावनं रम्यं मम धामैव केवलम् ।
यत्रे मे पशवः साक्षाद् वृक्षाः कीटा नरामराः ॥
ये वसन्ति ममान्ते ते मृता यान्ति ममान्तिकम् ।
पञ्चयोजनमेवं हि वनं मे देवरूपकम् ॥ ७५।८

वृन्दावनपरित्यागो गोविन्दस्य न विद्यते ।
सुलभं व्रजनारीणां दुर्लभं तन्मुमुक्षुणाम् ॥ ७७।६१

पद्मपुराणस्य पातालखण्डे पञ्चदशाध्यायेषु वृन्दावनस्यात्युत्कृष्टं महत्वं वर्णितमास्ति । नित्यं वृन्दावनं धाम समस्तब्रह्माण्डादुपरि संस्थितमुक्तमस्ति । गोलोकस्य गोकुले तथा द्वारवत्यां वैकुण्ठस्य च समस्तमैश्वर्यं प्रतिष्ठितमस्ति—

सात्वतां स्थानमूर्धन्यं विष्णोरत्यन्तदुर्लभम् ।
नित्यं वृन्दावनं नाम ब्रह्माण्डोपरि संस्थितम् ॥
गोलोकैश्वर्यं यत् किञ्चिद् गोकुले तत् प्रतिष्ठितम् ।
वैकुण्ठवैभवं यद्वै द्वारकायां प्रतिष्ठितम् ॥ ६९।८-१०

वैकुठण्ठं परमं धाम जरामृत्युहरं परम् ।
वायुना धार्यमाणं च ब्रह्माण्डादूर्ध्वमुत्तमम् ॥
कोटियोजनमूर्ध्वं च ब्रह्मलोकात्सनातनम् ।
पद्मरागैरिन्द्रनीलै राजमार्गैं र्विभूषितम् ॥
(ब्र० वै० ४।४।५३।५४

यथा नित्या च प्रकृतिस्तथैव विश्वगोलकः ।
गोलोकश्च तथा नित्यस्तथा वैकुण्ठ एव च ॥ ८४।५९

प्रणम्य देवताः सर्वा जग्गु र्गोलोकमद्गुतम् ।
विचित्रं परमं धाम जरामृत्यहरं परम् ॥
उर्ध्वं वैकुण्ठतोऽगम्यं पञ्चाशत् कोटियोजनम् ।
वायुना धार्यमाणं च निर्मितं स्वेच्छया विभोः ॥ ब्र० वै० ४।७६-७७

पुराणेऽस्मिन् स्वयं भगवता श्रीकृष्णेन यमुना-मथुरा-वृन्दावनानि नित्यानि प्रोक्तानि तथा गोप्यो गोपालबालाश्च नित्याः कथिताः सन्ति—

नित्यां मे मथुरां विद्धि वनं वृन्दावनं तथा ।
यमुनां गोपकन्याश्च तथा गोपालबालकाः ॥ ७३।२७

वृन्दावनं पूर्णानन्दमयरसस्याश्रयोऽस्ति तथा यमुनाजलमपि अमृतसममेवास्ति या पित्वा मर्त्या अमरत्वं प्राप्नुवन्ति । एतस्मिन् सौन्दर्याविष्टे वृन्दावने घनश्याम शरीरो भगवान् श्रीकृष्णो निरन्तरं विराजते तथा,तत्र मधुरं संगीतं गीयते येनानिर्वचनीयानन्दस्य समुपलब्धिर्भवति । वृन्दावनस्य सम्बन्धे कथितमस्ति यत् परब्रह्मणः क्रीडास्थली एव पृथिवीतलेऽवतीर्यं अद्भुतानन्दस्य सृष्टिं कुरुते । वृन्दावनस्य गुल्म-तृण-लतादिकं सर्वैश्वर्यदिव्यतागन्धेन सुवासितं वर्तते । न तत्र कुत्राणि प्राकृतगन्धस्य

आभासो भवति । एवं प्रतीयते यत् स्वयं वृन्दावनं भगवतः श्रीकृष्णस्य चरणकमल-सेवार्थं तत्क्रीडास्थली भूत्वा निरन्तरं दिव्यतां प्रकाशयति ।

भगवान् श्रीकृष्णः स्वयमेव वृन्दावने स्वाविर्भावतिरोभावौ कथयति । इदं तेजस्विरूपं न चर्मचक्षुभि र्द्रष्टुं शक्यते । यो मम कृपापात्रं भवति तस्य तत्प्रभावेण तत्स्वरूपस्यावलोकनं भवितुमर्हति । अनया वृन्दावनसुषुमया समाकृष्टो भक्तप्रवरो ज्ञानी उद्धवोऽपि तत्रस्थगुल्मलतादिभूत्वा स्थातुं कामनां कुरुते (१०।४७।६) वृन्दावनं प्रति उद्धवस्य चरमावस्थास्थिति र्यत् आराध्यदेवस्य क्रीडास्थलीत्वात् तत्रत्यं सर्वमपि प्रियं जातमस्ति । पद्मपुराणेऽपीदं वृन्दावनं नित्यरास–रासोत्सवपूर्ण-महश्यं परमं गुह्यं पूर्णप्रेमरसात्मकमुक्तमस्ति—

स्थिरं वायुधृतं नित्यं सत्यं सर्वसुखात्मकम् ।
नित्यं वृन्दावनं नाम नित्यं रासमहोत्सवम् ।
अपश्यत् परमं गुह्यं पूर्णप्रेमरसात्मकम् ॥ ७४।४९

एवं वृहत्संहितायां समस्तवनापेक्षया वृन्दावनमेव दिव्यतमं सर्वश्रेष्ठं वनमभिहि-तमस्ति (३।२।१०)

श्रीकृष्ण केलिक्रीडाश्रयस्य वृन्दावनस्य स्थितौ दृष्टौ ह्रीयमानायां न कुत्रापि अलौकिक प्रतिकात्मक—पार्थिव-वृन्दावनस्य स्थितेः दर्शनं जायते । रासप्रसङ्गे केवलमस्य दिव्यतायां किञ्चित् प्रकाशो लक्ष्यते । श्रीमद्भागवते वृन्दावनस्य दिव्यतायाः प्रतिपादनं न पद्मपुराणवद् विस्तरेण कृतमस्ति । वृन्दावने प्रवहन्त्या कलिन्दपर्वत-निर्गताया यमुनाया महत्त्वस्य वर्णनं पद्मपुराणे प्रसृतमस्ति । तत्रत्यं यमुनाजलं मुक्तिदायकं प्रोक्तमस्ति । तत्र भगवदङ्घ्रिस्पृष्टधूलिस्पर्शनमात्रेण मानवो नूनमुच्यते इति तस्य वृन्दावनस्यास्ति महन्महत्त्वम्

गुह्याद् गुह्यतरं रम्यं मध्ये वृन्दावनं भुवि ।
अक्षरं परमानन्दं गोविन्दस्थानमव्ययम् ॥
गोविन्ददेहतोऽभिन्नं पूर्ण - ब्रह्म - सुखाश्रयम् ।
मुक्तिस्तत्र रजःस्पर्शात्तन्माहात्म्यं किमुच्यते ॥ ६९।७१, ७२

इह यमुनाजले आनन्ददायिनीसुधाधिष्ठितमकरन्दनिस्पन्दस्य प्रतिष्ठास्ति । अतएव स्वसुगन्धिना सा मनुष्याणां मनांसि स्वस्विन्नाकर्षति । वृन्दावनं सर्वश्रेष्ठं भगवतो धमेति कथयन्तो विपश्चितो मन्यन्ते यत् मधुरमूर्तिर्भगवान् श्रीकृष्णः वृन्दावने एव नित्यं निवसन्ति विहरति तत्क्रोडे क्रीडां च कुरुते, या लीला तत्र शाश्वतं प्रचलति । अतः तत्र तद्वियोगस्य न कदाचिदवकाशोऽस्ति । एवं भगवतः श्रीकृष्णस्य श्रीराधया साकं शाश्वतप्रणयविलासविलसितं वृन्दावनं ; तद्भक्तानां हृदयाह्लादकरं

सर्वतोऽधिकं समाकर्षकमिति निष्प्रपञ्चम् । लघुभागवतामृते लिखितमस्ति यद् भगवान् श्रीकृष्णो वृन्दावनं परित्यज्य न कुत्रापि गच्छति, किन्तु द्विभुजरूपेण एकमा राधया साकं क्रीडन् तत्र नित्यमेव विराजते

कृष्णो हि यदुसम्भूतो यः पूर्णः सोऽस्त्यतः परः ।
वृन्दावनं परित्यज्य स क्वचिन्नैव गच्छति ।
द्विभुजः सर्वदा सोऽत्र न कदाचिच्चतुर्भुजः ।
गोप्यैकया युक्तस्तत्र परिक्रीडति सर्वदा ॥ १६५ ॥

अपि च

देवीकृष्णमयी प्रोक्ता राधिका परदेवता ।
सर्वलक्ष्मीस्वरूपा सा कृष्णाह्लादस्वरूपिणी ॥
ततः सा प्रोच्यते विप्र ! ह्लादिनीति मनीषिभिः । ८१।४३

मथुरापुरी—

वृन्दावनस्यापूर्वया सुषुमया सह मथुराया महिम्नो गुणगानमपि पद्मपुराणे कृतमस्ति । मनोरमायाः दिव्यपुर्या मथुराया स्तुतिं देवराज इन्द्रः, नागराजोऽनन्तः, महान्तो मुनीश्वराः, पर्याप्तानि पुराणानि अपि कुर्वन्ति । मथुरानिवासिनो जना सन्ति धन्यतमाः यैः प्रत्यहं मुक्तिदायिन्या अस्या पुर्या दर्शनं क्रियते । विष्णुपुराणे मथुरापुरी पापहन्त्री शुभ्रपुण्या पुरी अभिहितास्ति यतोहि तत्र साक्षात् पूर्णतमः पुरुषोत्तो भगवान् विष्णुः कृष्णरूपेन आविर्भूतोऽस्ति । एवं मथुराया वर्णनं स्कन्दपुराणेऽपि प्राप्यते, यत्र स्वर्लोक-पाताल--अन्तरिक्ष--मनुष्यलोकेषु मथुरां प्रति स्वाभाविकं प्रेम प्रदर्शितमस्ति । सर्वतीर्थापेक्षया मथुराया महत्ता व्यापिकास्ति यतोहि तत्र भगवता श्रीकृष्णेन जन्म गृहीतमस्ति । अत एव सुरेन्द्र-नागेन्द्र-मुनीन्द्रादयो मुक्तकण्ठेनैनां भगवतः प्रियां सनातनीं नगरीं कथयन्ति । तथाचोक्तं भगवता स्वयमेव पद्मपुराणे—

अहो न जानन्ति नरा दुराशयाः पुरीं मदीयां परमां सनातनीम् ।
सुरेन्द्र-नागेन्द्र-मुनीन्द्रसंस्तुतां मनोरमां तां मथुरां पुरातनीम् ॥ ७३।४३

पुराणेषु प्रामुख्येन मोक्षदात्रीणां सप्तानाम्-अयोध्या-मथुरा-माया-काशी-काञ्ची-अवन्तिका-द्वारवतीपुरीणामुल्लेखो वर्तते—

अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारावती चेति सप्तैता मोक्षदायिकाः ॥

आसु स्थिता मानवा मनोवाक्कायकर्मभिः सत्कर्मानुष्ठानं कुर्वन्तो भजन्तश्चाजस्रं भगवन्तमन्ते नूनं शाश्वतं पदं प्राप्य मुक्ता भवन्ति । तासु सप्तसुपुरीषु मथुरा धन्या या चतुर्भिः प्रकारैः मुक्तिं प्रददाति—

काश्यादयो यद्यपि सन्ति पुर्यस्तासां तु मध्ये मथुरैव धन्या ।
या जन्ममौञ्जीव्रतमृत्युदाहै नृ`णां चतुर्धा विदधाति मुक्तिम् ॥ ७३।४४

विमात्रा कटुवचनेन विमानितः पञ्चवर्षवयस्को भक्तराजो ध्रुवः सावधानेन मनसा निजेन्द्रियाणि नियम्य यत्र भगवन्तमाराध्य परमं विशुद्धं सर्वेभ्योऽप्यूर्ध्वं लोकमासदितवान् तत्स्थानस्य लोकोत्तरमहत्त्वकथने कोऽस्ति समर्थः? तथाहि पद्मपुराणस्य पातालखण्डेभगवतास्वयमेवोक्तम्—

बालकोऽपि ध्रुवो यत्र ममाराधनतत्परः ।
प्राप स्थानं परं शुद्धं यन्न युक्तं पितामहैः ॥ ७३।५३

इत्थं वैदिकवाङ्मय-पुराणसाहित्य-महाभारतानन्तरं साम्प्रदायिकवैष्णवग्रन्थेषु संस्कृतस्य काव्येषु नाटकेषु च राधा-कृष्णयोः रुचिकरं मधुरं चरितं रसक्रीडासु संसक्तमस्ति। प्राकृत-अपभ्रंश-हिन्दीसाहित्येष्वपि राधा-कृष्णयोः रुचिरं चरित्रं चर्चितमास्ति। प्राकृतपैङ्गले भगवतः श्रीकृष्णस्य व्रजलीलया सह सम्बद्धानि कियन्ति पद्यानि दृष्टिपथमावर्जयन्ति। अपभ्रंशसाहित्ये तु पुष्पदन्तद्वारा रचिते महापुराणे श्रीमद्भागवत-हरिवंशवदेव राधा-कृष्णयोः चरित्रस्य चर्चा कृतासि। परवर्ति हिन्दी साहित्यं तु राधा-कृष्णयोः सारसया मधुरलीलया ओतप्रोतमस्ति। व्रजभाषायां रचिते श्रीकृष्ण-चरिते सुन्दररूपेण राधा-कृष्णयोः मधुरकथायाः तल्लीलायाश्च मनोमुग्धकारि चित्रणमुपस्थापितमस्ति। एवं वंगला-मराठी-गुजराती-तेलगु-तामिल-कन्नडप्रभृतिषु भाषासु अपि राधा-कृष्णयो माधुरी कथा प्रस्फुटिताऽस्ति।

चैतन्यसम्प्रदाये दीक्षितो रूपगोस्वामी अपि राधा-कृष्णयोः मधुरे सरसे च प्रेम्णि समासक्तचित्तः षड्गोस्वामिष्योऽधिकः प्रसिद्धिं प्राप्तवानस्ति, यस्य हरिभक्तिरसामृत-सिन्धु-उज्ज्वलनीलण्यतिरिक्ते द्वे विदग्धमाधव-ललितमाधवनामके नाटके संस्कृत साहित्ये राधाकृष्णसम्बन्धिना देदीप्यमानचरितपुञ्जेन नितरां प्रकाशयतः, उपकुरुतश्च राधा-कृष्णभक्तिरसरसिकानां भक्तप्रवराणां मनोमधुपान्।

आधुनिकैः कृष्णकथाकारैः कविभि. लेखकैश्च पौराणिकपृष्ठभूमेराधारेण स्वकीय-कल्पनाशक्तिः धरातले राधाकृष्णकथाया अभिनवं रूपं प्रदाय यत् निजप्रतिभाया प्रदर्शनं क्रियते तत्रेदमेव वक्तव्यमस्ति, यदि पुराणेषु आस्थां विधाय तेषामनुशीलनपूर्वकं राधाकृष्णकथाया वास्तविकं रहस्यमवगत्यैव कल्पनावैभवविमाने समारुह्य स्वेच्छया विचरणीयमित्यलं पल्लवितेन।

राधानामनिवचनम्—

ब्रह्मवैवर्ते महापुराणे राधा-कृष्णयो नाम्नो निर्वचने प्रोक्तमस्ति—

रेफो हि कोटिजन्माघं कर्मभोगं शुभाशुभम् ।
आकारो गर्भवासं च मृत्युं च रोगमुत्सृजेत् ॥
धकार आयुषो हानिमाकारो भववन्धनम् ।१३।६३

अपि च

रेफो हि निश्चलां भक्तिं दास्यं कृष्णपदाम्बुजे ।
धकारः सहवासं च तत्तुल्यकालमेव च ॥
ददाति सार्ष्टिसारूप्यं तत्त्वज्ञानं हरेः समम् ।
आकारस्तेजसां राशिः दानशक्तिः हरौ यथा ॥ = १३।७-८

अपि च—

राशब्दस्तु महाविष्णुर्विश्वानि यस्य लेमसु
विश्वप्राणिषु विश्वेषु धा धात्रीमातृ वाचकः ॥
धात्री माताहमेतेषां मूलप्रकृतिरीश्वरी ।
तेन राधा समाख्याता हरिणा च पुरा वुधैः ॥१११।५७,५८

कृष्णशब्दार्थनिदर्शनं यथा—

कृष्णवर्णः कलौ श्रीमान् तेजसां राशिरेव च ।
परिपूर्णतमं ब्रह्म तेन कृष्ण इति स्मृतः ॥

अपि च—

ब्रह्मणो वाचकः कोऽयमृकारोऽनन्तवाचकः ।
शिवस्य वाचकः षश्च णकारो धर्मवाचकः ।
राशब्दोच्चारणादेव स्फीतो भवति माधवः ।
धाशब्दोच्चारणात् पश्चाद् धावत्येव संभ्रमः ॥
आदौ राधां समुच्चार्य पश्चात् कृष्णं विदुर्बुधाः ।
आदौ पुरुषमुच्चार्य पश्चात् प्रकृतिमुच्चरेत् ॥
स भवेन्मातृघाती च वेदातिक्रमणेन च ॥ ४३।३८
जात्याहं कृष्णरूपश्च परिपूर्णतमः स्वयम् ।
गोलोके गोकुले रम्ये क्षेत्रे बृन्दावने वने ॥
द्विभुजो गोपवेशश्च स्वयं राधापतिः शिशुः ।
गोपालै र्गोपिकाभिश्च सहितः कामधेनुभिः ॥
चतुर्भुजोऽहं वैकुण्ठे द्विधारूपः सनातनः ।९४।८५-८६

भगवतो विष्णोरस्ति रूपद्वयं चतुर्भुजत्वं द्विभुजत्वं च। तत्र गोपरूपेण द्विभुजो गोभिः गोपालकैः गोपिकाभिश्च सह गोलोके, गोकुले, वृन्दावने च विराजते, किन्तु वैकुण्ठे चतुर्भुज रूपेण लक्ष्म्या साकं तिष्ठति तथाहि ब्रह्मवैवर्तस्य श्रीकृष्णजन्मखण्डे स्वयमेवाह भगवान् श्रीकृष्ण प्राह—

किञ्च—

कृषि निश्चेष्टर्वचनो षकारो भक्तिवाचकः ।
अकारो दातृवचनः तेन कृष्ण इति स्मृतः ॥

आहोस्वित्—

कर्मनिर्मूलवचनः कृषिर्णो दास्यवाचकः ।
अकारः प्राप्तिवचनस्तेन कृष्ण इति स्मृतः ॥१३।५६।६२
अकारो विषगे वंचनः श्वेतद्वीपनिवासिनः ।
नर-नारायणार्थस्य निसर्गो वाचकः स्मृतः ॥
सवेषां तेजसां राशिः सर्वमूर्तिस्वरूपकः ।
सर्वाधारः सर्ववीज स्तेन कृष्ण इति स्मृतः ॥

धर्मोऽपि प्राह—

श्रीकृष्णश्च द्विधारूपोः द्विभुजश्चतुर्भुजः ।
चतुर्भूजश्च वंकुण्ठे गोलोके द्विभुजः स्वयम् ॥८६।४३

अनन्तकल्याणगुणगणाकरस्य कर्तुमकर्तुमन्यथा कर्तुं सर्वथा समर्थस्य भगवतो जगद्गुरो भक्तमन्दिरविहारिणः सर्वशक्तिमतः परमेश्वरस्य अघटितघटनापटीयस्या योगमायया निर्मितेऽस्मिन् प्रपञ्चे प्रेक्षावद्भिः परमार्थतया परमात्मैव सर्वोत्कृष्टतं तत्त्वं निर्द्धारितमस्ति। तदेव च तत्त्वं पुराणमूर्धन्ये वैष्णावांना परमप्रिये श्रीमद्भागवते महापुराणे तत्त्वविदो विद्वांसोऽद्वयम् अनन्तं स्वप्रकाशं सर्वोपद्रवशून्यं परमानन्द-स्वरूपं परमसत्यं च तत्त्वं वदन्ति, तदेव च तत्त्वं बृंहत्त्वाद् ब्रह्म, आत्मत्वात् परमात्मा, अनन्तैश्वर्यभोगभागसम्पन्नत्वाद् भगवान् इति शब्दैः प्रोच्यते। तदुक्तं प्रथम स्कन्धस्य द्वितीयेऽध्याये—

वदन्ति तत्तत्त्वविद स्तत्त्वं यद् ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ १।२।११

वस्तुतोऽनन्तगुणगणाकरस्य भगवतोऽनन्तस्य संस्तवे वाङ्मनोऽतीतत्वादनन्तगुणगणाकरत्वाच्च ब्रह्मादिदेवानामपि असामर्थ्यं तर्हि साधारणानां मानवानां का कथा ?

धर्मस्येवेश्वरस्यापि वेदादिशास्त्रसमधिगम्यत्वमेवाङ्गीक्रियते आचार्यवर्यैः। तस्मात्तत्र वेदशास्त्राणमेव मुख्यं प्रामाण्यं संभवति। अनुमानादयस्तु ततत्सहकारितया उपयुज्यन्ते, नतु स्वातन्त्र्येण। तस्माद् वस्त्रवेष्ठितस्य महामहेन्द्रनीलमणेरिव मायावृतस्य भगवतः श्रीकृष्णस्याविर्भावो जगतः कल्याणायैवेति निश्चप्रचम्। सर्वकारणे-परमेश्वरे सर्वस्य याथात्म्यं पर्यवस्यति। सर्वाधिष्ठाने स्वप्रकाशे परमात्मन्येव कारणत्व-स्यापि पर्यवसानात्। यथा तरङ्गाणां समुद्रेण स्वाभाविकः संबन्ध स्तथैव जीवानामपि भगवतैव स्वाभाविको नित्यश्चास्ति संबन्धः।

यथा अपक्वाम्रफलं पक्वाम्रफलहेतुत्वं प्रतिपद्यते तथैव अपक्वभक्तिरेव पक्वभक्तिहेतुत्वं प्रतिपद्यते। रसात्मकस्य भगवतः विश्वमूलकत्वात् सर्वानुस्यूतत्वं नितरां संगच्छते। यथा इक्षोः पाकभेदेन गुडादयो भवन्ति तथैव प्रेम्णोऽवस्थाभेदेन स्नेहरागादयो भेदा भवन्ति—

वीजमिक्षुः स च रसः सगुडः खण्ड एव च।
शर्करा च सिता सा च सा यथा स्यात् सितोपला।

यूनोः परस्परं या रतिः स शृङ्गारः, देव गुरु-पित्रादिषु या रतिः सा भक्ति-र्निगद्यते। यथा शृङ्गारे मनोऽनुकूले सुखसंवेदनरूपाया रतेः भक्तौ च स्नेहरूपाया रतेः तथात्वेन भेदः। सात्त्विकचित्तद्रवतायामेव रतिपदस्य रूढत्वेन तद्विशिष्टभगवत्ता यामपि रतिपदप्रयोगे वाधाभावः। तत्सुखसुखित्वसारत्वादेव ब्रह्मविद्वरिष्ठो मोहनोऽपि भगवान् श्रीकृष्णो गोपाङ्गनाभि र्मोमुह्यतेतत्प्रीत्यतिशयात्। अतएव निम्नाङ्कितं पद्यं संगच्छते—

पत्न्यस्तु पोडशसहस्रमनङ्गवाणैर्यस्येन्द्रियं विमथितुं कुहकैर्न शेकुः।

रसो हि द्विविधः प्राकृतः अप्राकृतश्च। तस्य च प्रकृतलौकिकविषयालम्बनतया प्राकृतत्वम्। अप्रकृतभगवदालम्बनतया अप्राकृतत्वम्। रसशास्त्रकारै र्भरतादिभिः प्राकृताधिकारिणां प्राकृतरसपरिचयेन अप्राकृतरसनिरतिशयानन्दस्वरूपात्मनि चेतोऽव-धारयितुं प्राकृतरसस्य वर्णनं कृतम्। एवं चापरिशीलितपरमपुरुषार्थमार्गा सुकुमार-मतयः ये सन्ति काव्यचिन्तनचतुरा रसिकाः तान् अप्राकृतरसे प्रवर्तयितुं ते रसाचार्याः प्राकृतरसमास्वदयन्ति। यावत्प्राकृतरसो नानुभवगोचरी क्रियेत, तावत् कथं दिव्यरसानुभवः संभवेत्। दिव्यरसानुभवस्तु श्रवणमननादिभिः साधनैः सर्वानर्थ-निवर्तकज्ञानसाध्यभक्तियोगेनैव भवितुमर्हतीति। तत्तत्पुराणेषु तस्य सम्यक् निरूपणं कृतम्।

एवं प्राकृतरसवर्णनेन भगवदालम्बनकेऽप्राकृतरसेऽवतार एव मुख्यं रसशास्त्रकाराणां तात्पर्यम् तस्यैव सर्वशेषित्वप्रसिद्धे। तत्र—

मद्गुणश्रुतिमात्रेण मयि सर्वगुणाश्रये ।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ॥

इत्यादिरीत्या भगवद्गुणगणश्रवणादिना द्रुतस्य मनसो धारावाहिकतायां गतायां भगवदाकाराकारितयां वृत्तौ तदभिव्यक्ते निरूपमं संवित्सुखमुपजायते ।

श्रीमद्भागवते रसो भक्तिरस एवाभिप्रेतः—

अस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे ।
भक्तिरुत्पद्यते पुंसः शोकमोहतमोऽपहा ॥

अपि च

निगमकल्पतरोर्गलितं फलंशुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ १।१।३

इति भक्त्यर्थमेव तस्यश्रीमद्भागवतस्यप्रणयवकथनात् । अतो भक्तिरसस्य शृङ्गाररसातिरिक्तत्वं निष्प्रत्यूहम् ।

'**रसो वै सः**, रसं लब्ध्वा ह्यानन्दी भवति' इति तैत्तिरीयश्रुत्या रसस्य ब्रह्मरूपतया अखिलगुणगणाश्रयो भगवानेव रसः, तदंशभूतो जीवोऽपि सिन्धो र्बिन्दुरिव तत्स्वरूप एव । अतः सर्वैः दार्शनिकैरात्मनो नित्यानन्दस्वरूपत्वं संप्रतिपन्नम् । '**विभावानुभावव्यभिचारिसंयोगद्रसनिष्पत्तिः**' इति भरतसूत्रानुसारं विभावयन्ति = आविर्भावयन्ति, उद्बोधयन्ति प्रसुप्तं स्थायिनमिति विभावाः, ते च द्विविधाः, आलम्बनविभावाः, उद्दीपनविभावाश्च । तथा च विषयता सम्बन्धेन स्थायिविशिष्टमालम्ननम् । स्वोद्बोधकतासम्बन्धेन स्थायिविशिष्टमुद्दीपनम् । स्थायिकार्यत्वे सति आलम्बनचेष्टारूपोऽनुभावः । आलम्बनावच्छेदेन आविर्भविष्णुः स्थायिपोषको व्यभिचारी च । तदुक्तं—काव्यप्रकाशस्य चतुर्थे उल्लासे—

कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥
विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तैर्विभावाद्यैः स्थायीभावः रसः स्मृतः ॥ ४।२७,२८

तथा च प्राकृतरसे ललनादिभिरालम्बनविभावैः स्थायी रत्यादिको जनितः, उद्यानादिभिरुद्दीपनविभावैरुद्दीपितः कटाक्षभुजक्षेपणादिभिरनुभावैः प्रतीतियोग्यः कृतः, व्यभिचारिभिरुत्काण्ठादिभिः परिपोषितः रामादावनुकार्ये रस उत्पद्य पुष्टितां नीतः, नरे तत्तुल्यतानुसन्धानबलाद् आरोप्यमाणः सामाजिकानां चमत्कारजनको भवति । अलौकिके दिव्यरसे तु दिव्यगुणगणालङ्कृतो भगवानेव आलम्बनविभावः, उद्दीपनविभावः तुलसीचन्दनादिः, अनुभावो नेत्रविक्रियादिः, व्यभिचरिणश्च निर्वेदादयः ।

तैर्व्यक्तो भगवदाकारतारूपरसाख्यः स्थायिभावः परमानन्दसाक्षात्कारात्मकः प्रादुर्भवति । स एव भक्तियोगः पुरुषार्थः । एवं भक्तिरसे परमानन्दस्वभावस्यालम्बनविभावस्य भगवतो नित्यत्वात् सर्वगतत्वाच्च श्रवणादिना सगुणसाकाररूपेण रसिकानां भक्तानां हृत्सरोजे प्रादुर्भवति । ततो भगवद्रसानुभूतिर्जायते । अत एव श्रीमद्भागवतस्य तृतीयस्कन्धे विदुर-मैत्रेययो र्भगवत्कथाप्रसङ्गे ब्रह्मणो वाक्यम्—

त्वं भावयोग - परिभावितहृत्सरोजे
आस्से श्रुतेक्षितपथो ननु नाथ ! पुंसाम् ।
यद् यद् धिया त उरगाय ! विभावयन्ति
तत्तद्वपुः प्रणमसे सदनुग्रहाय ॥ ३।९।११

श्रीमन्मधुसूदनसरस्वतीपादप्रणीतभक्तिरसायनानुसारं स्वभावकठिनं जतुद्रव्यं तापकानलसंयोगेन जलमिव द्रुतं सत् निर्मलं भवति । तत्र प्रक्षिप्तरङ्गस्य सर्वांशेन प्रवेशः स्थिरत्वं च जायते । तत्र काठिन्ये द्रवतायां च यथा रङ्गविश्लेषो न भवति तथैव चित्तमपि काम-क्रोध-भय-स्नेह-हर्ष-शोक-दयादिभिस्तापकैर्द्रुतं तच्छान्तौ भूयः कठिनं भवति । द्रुते चित्ते वस्तुनो यः स्वाकारः प्रक्षिप्यते स एव संस्कार-वासना भाव-भावनादिशब्दै र्व्यपदिश्यते । एवं चित्तस्य द्रवीभावपूर्वकं विषयाकारतापत्तेर्निरूपणं भगवत्पूज्यपादैः मधुसूदनसरस्वतीभिः स्वकीये भक्तिरसायने ग्रन्थे सोपष्टम्भं कृतमस्ति । तथाहि—

मूषासिक्तं यथा ताम्रं तन्निभं दृश्यते तथा ।
घटादिव्याप्नुवच्चित्तं तन्निभं जायते ध्रुवम् ॥
चित्तद्रव्यं तु जतुवत् स्वभावात् कठिनात्मकम् ।
तापकैर्विषयैर्योगे द्रवत्वं प्रतिपद्यते ॥
काम - क्रोध - भय - स्नेह - हर्ष - शोक - दयादयः ।
तापकाश्चित्तजतुनः तच्छान्तौ कठिनं तु तत् ॥
द्रुते चित्ते विनिक्षिप्तः स्वाकारो यस्तु वस्तुनः ।
संस्कार - वासना - भाव - भावनाशब्दभागसौ ॥
शिथिलीभावमात्रं तु मनोवाञ्छत्यतापकैः ।
न तत्र वस्तुविशति भावनात्वेन किञ्चन ॥
द्रवतायां प्रविष्टं सत् यत् काठिन्यदशागतम् ।
चेतः पुनर्द्रुतौ सत्यामपि तन्नैव मुञ्चति ॥

यथा राधा-कृष्णयोः प्रेमलता मदनाम्बुदेन सिक्ता सती पुष्यति तथैव प्रेमिकामयीं लीलामुपजीव्य तत्सखीनां प्रेमलता पोपुष्यते । यथा प्राणोपयोगेन इन्द्रियाणि

तृप्यन्ति यथा वा कल्पलतामूलसेचनेन पल्लव-पत्राणि मोदमाप्नुवन्ति तथैव राधा-माधवयोः कामक्रीडया गोपिका अपि तृप्यन्ति—

प्रेष्ठयोः सङ्गमोद्भूतसुरताम्बुजसौरभात् ।
आस्वाद्यास्वाद्य तृप्यन्ति सुसख्यस्तन्मदोन्मदाः ।
सख्यस्तु तन्मध्वमृतासवोन्मदास्तदीयलीलासु निमग्नमानसाः ।
तावेव जानन्ति वदन्ति शाश्वतं तावेव पश्यन्ति समाहितात्मना ॥

राधा-माधवयोर्लोकोत्तरं विशुद्धं प्रेमतत्त्वमेव वृन्दावने गौरश्यामरूपेण निरन्तरं विराजते । समानया प्रेमतृष्णया विवशं राधामाधवयुगलं सर्वथैक्यमापन्नम् । तेन तत्र युष्मदस्मत्प्रयोगोऽपि न सोढुं शक्यते । तथाहि राधासुधानिधौ—

प्रेयांस्तेऽहं त्वमपि च मम प्रेयसीति प्रवादः
त्वं मे प्राणाः अहमपि तवास्मीति हन्त ! प्रलापः ।
त्वं मे ते स्यामहमपि च यत्तच्च नो साधु राधे !
व्याहारे नौ नहि समुचितो युष्मदस्मत्प्रयोगः ॥

उभयो राधामाधवयोः समाना वयोमनोहृदयाभिरुचयः, अद्भुतानि सौन्दर्यवसनालङ्कारादीनि सन्ति । उभावपि परस्परप्रेमसौन्दर्यसंवलितौ सदैव जलमीनायमानौ प्रफुल्लवदनेन्दुसमानलोचनाभ्यामन्योऽन्यं निरीक्ष्य परस्परं प्रतिविम्बितौ भवतः । तेन तयोः प्रेमात्मकं सौन्दर्य्यात्मकं प्रेम चाभिव्यक्तं भवति । प्रेमैव सौन्दर्यमयो भगवान् श्रीकृष्णः, सौन्दर्यं च प्रेममयी राधा । सौन्दर्येण प्रेमतत्त्वं प्रेम्णा च सौन्दर्यमोतप्रोतमस्ति । एवं प्रेमसौन्दर्यमययो राधा-माधवयोर्वास्तविकं रूपं विवेक्तुं न शक्यते, नापि कः प्रेमसारसर्वस्वः कश्च सौन्दर्यसारसर्वस्व इति गौरश्यामतया निर्णेतुं शक्यम्—

रतिरङ्गसमासक्तौ परिरब्धौ निरन्तरम् ।
परस्परपरिष्वङ्गलम्पटौ मोहितावुभौ ॥
प्रत्यभिज्ञाविरहितौ को गौरः कश्च श्यामलः ।

अथवा

अन्विष्यान्विष्य रसिकाः परिश्राम्यन्ति नित्यशः ।
कः प्रेमा किञ्च सौन्दर्यं तयोर्नैवाधियन्तिरे ॥

इत्थमुभयोर्नितान्तमैक्येऽपि राधासुधानिधौ तयोर्वैलक्षण्यमेवमुत्प्रेक्षितमेव—

एके काञ्चनचम्पकच्छविपरं नीलाम्बुजश्यामलं
कन्दर्पोत्तरलं तथैकमपरं नैवानुकूलं वहिः ।
किञ्चैकं बहुमानभङ्गि रसवच्चाटूनि कुर्वत् परं
वीक्षे कुञ्जनिकुञ्जसीम्नि तदहो द्वन्द्वं महामोहनम् ॥

यत्र भगवदात्मकस्य प्रेम्ण एव परं प्रेमास्पदत्वं तत्र तु तदमितमाधुर्येणैव प्रेमभक्तिरुदयते । भगवदैश्वर्यमपि प्रेममयमेव समस्तस्य जगतः तत्तद्रूपेण प्रेम्णा एवाभिव्यक्तिः आनन्देन रसात्मकतयां भास्यते ।

अपि च राधासुधानिधावुक्तमस्ति यदैकदा श्रीराधायाः कुचद्वयकुड्मलयोः स्वकीयं प्रतिविम्बद्वयमवलोक्य संमोहितो मदनमोहनो भगवान् श्रीकृष्णः ससंभ्रममुपहासपूर्वकमपृच्छत्—प्रिये ! त्वत्कुचयुगले यदेतन्नीलेन्दीवरवृन्दकान्तिलहरीचौरकिशोरद्वयं चकास्ति तत् किमिदं तन्मन्मनःसंमोहनम् ? तस्मात् मामात्मसखीं स्वीकुरु येन तदद्वयं दृढं श्लिष्यति । तादृशं प्रियसंमोहनम्बलोक्य जातं राधास्मितं नः पातु—

नीलेन्दीवर–वृन्द–कान्तिलहरीचौरं किशोरद्वयं
त्वय्येतत्कुचयोश्चकास्ति किमिदं रूपेण संमोहनम् ।
तन्मामात्मसखीं कुरु द्वितरुणीतां नौ दृढं श्लिष्यति
स्वच्छायामभिवीक्ष्य मुह्यति हरौ राधास्मितं पातु नः ॥ २४५ ॥

निकषोपले इव श्यामसुन्दरे भगवति श्रीकृष्णे सुवर्णवर्णाया श्रीराधायाः सहस्थितिमालोक्य चन्द्रानना चन्द्रावती ललितां सहचारीं कथयति–सखि ! ललिते ! प्रेमपूर्वकं पश्य—श्यामलतमालतरौ कनकवल्लीव निकषोपले सुवर्णरेखेव गौरवदना कीर्तिसुता श्रीराधिका श्रीकृष्णस्य समीपे नितरां सुशोभते—

तमालश्यामले कान्ते माधवे कीर्तिनन्दिनी ।
निकषे स्वर्णरेखेव भ्राजते विमलाशया ॥

परमानन्दसुधासारसर्वस्वस्य भगवतः श्रीकृष्णस्य माधुर्यसारसर्वस्वाधिष्ठात्री श्रीराधिका तदात्मभूतापि कदापि लीलाविशेषावसरे दुर्लभा प्रतीयते । यस्या राधिकाया नीलाञ्चनखेलनोत्थेन वायुना योगीन्द्राणामपि दुर्गमगति भगवान् श्रीकृष्णोऽपि आत्मनं कृतार्थः = धन्यतमं मन्यते । तया कीर्तितनयया राधिकया आधिष्ठात्र्यै दिशेऽपि नमः ।

यस्याः कदापि वसनाञ्चलखेलनोत्थ--
धन्यातिधन्यपवनेन कृतार्थीमानी ।
योगीन्द्रदुर्गमगतिर्मधुसूदनोऽपि
तस्यै नमोऽस्तु वृषभानुभुवो दिशेऽपि ॥ १ ॥

पूर्णानुरागरससागरसर्वस्वशरीराया वृषभानुसुताया श्रीराधिकाया चरणकमलनखमणिप्रभाया विस्फूर्जनप्रभावदेव गोपाङ्गनासु मदनमोहनस्य मोहनसामर्थ्यमजायत । तस्या एव श्रीराधिकाया कृपाकटाक्षं कामयन्ते रसिकशिरोमणयो मानवमणयः । तथाहि राधासुधानिधौ —

यत्पादपद्मनचन्द्रमणिच्छटाया
विस्फूर्जितं किमपि गोपवधूष्वदर्शि ।
पूर्णानुरागरससागरसारमूर्तिः
सा राधिका मयि कदापि कृपां करोतु ॥ १० ॥

प्रणयलोलविलोचनायाः श्रीराधाया सरसपयोधेस्तरङ्गैरिवाङ्गैः परिरम्यमाणः-श्रृङ्गारससारसर्वस्वसागरसमुद्भूतश्चन्द्रमा इव भगवान् श्रीकृष्णो विचित्रां चमत्कृतिं दधाति । श्यामसुन्दरसन्दर्शनेन चम्पकलतेव चमत्कृताङ्गी मुरलीस्वनश्रवणेन विह्वलाङ्गी कामकोटिबाणव्यथितहृदयस्य भगवतः श्रीकृष्णस्य सञ्जीवनीव सुखदात्री निर्जैरलौकिकगुणैरगाधा प्रशमिताशेषबाधा श्रीराधा भक्ताभीष्टदात्री कल्पलतेव दिव्येन प्रेम्णा करीलकुञ्जे भगवन्तं श्रीकृष्णं सुखयन्ती विराजतेतरां निरन्तरम्—

दिव्यप्रमोदरससारनिजाङ्गसङ्ग-
पीयूषवीचिनिचयैरभिषेचयन्ती ।
कन्दर्पकोटिशरमूर्च्छितनन्दसूनु—
सञ्जीवनी जयति कापि निकुञ्जदेवी ॥ ५ ॥

अथैकदा प्रियां श्रीकृष्णविमुखीं मत्वा तत्प्रियसखी चन्द्रावती सपरिहासं तां वृषभानुनन्दिनीं प्रसादयति-अयि = आलि ! यद्यपि भवत्या सर्वदा कृष्णः पक्षः, कृष्णं कमलम्, कृष्णसारो मृगः, कृष्णो मेघः, नीलः तमालश्चातीव प्रियो विद्यते । अपि च कृष्णेति नाम्ना रूपेण च कृष्णा कालिन्दी यमुना नदी परमप्रेमास्पदा विद्यते । अथापि मोहनश्याममूर्तौ श्रीकृष्णे तव कस्माद्विमुखतेति परिहसितमुखीं श्रीराधा-मालोक्य सहर्षं तत्कामनां व्यनक्ति—

कृष्णः पक्षः नवकुवलयं कृष्णसारस्तमालो
नीलाम्भोदस्तनरुचिपदं नामरूपैश्च कृष्णा ।
कृष्णे कस्मात्तव विमुखता मोहनश्याममूर्ता-
वित्युक्ता त्वां प्रहसितमुखीं किन्नुपश्यामि राधे ॥ ८८ ॥

यस्याः पदनखमणिचन्द्रिकाज्योतिःप्रभाभारस्नापितस्वान्तःकरणानां भक्त-शिरोमणीनां मानवमणीनां हृदयारविन्दे काऽपि सानन्दा सरसा भक्तिरुदेति । सा गोपगोकुलकिशोरी वृषभानुसुता श्रीराधिका श्रुतिशिखररहस्यं दास्यं कदा मे दास्य-तीति निरन्तरं कामयन्ते भक्तराजाः—

यस्याः स्फूर्जत्पदनखमणिज्योतिरेकच्छटायाः
सान्द्रप्रेमामृतरसमहासिन्धुकोटिविलासः ।
सा चेद्राधा रचयति कृपादृष्टिपातं कदाचिन्
मुक्तिस्तुच्छा भवति बहुशः प्राकृता प्राकृतश्रीः ॥१३६॥

वस्तुतं वृषभानुतायाः राधाया माधुर्यं भगवान् वासुदेवो माधवो वेत्ति माधवस्य च सौन्दर्यातिशयं श्रीराधैव जानाति । श्रीवृन्दावनधाममहिम्ना तयो र्युगलयोः सौन्दर्य-माधुर्ये राधाकृष्णसहचरीणां निरन्तरमनुगोचरोभवतः । प्रेमघनाकृतेर्भगवतः श्री-कृष्णस्य माधुर्यसारसर्वस्वायाः राधायाश्च पदकमलयो निरन्तरं भक्ता आश्रयं काम-यमानास्तिष्ठन्ति । तथाहि तेषां मनोकामना सततमुदेति—

तस्याः प्रेमघनाकृतेः पदनखज्योत्स्नाभरस्नापित-
स्वान्तानां समुदेति कापि सरसां भक्तिश्चमत्कारिणी ।
सा मे गोकुलभूपनन्दनमनश्चोरी किशोरी कदा
दास्यं दास्यति सर्ववेदशिरसां यत्तद्रहस्यं परम् ॥ २०४ ॥

'आत्मां तु राधिका प्रोक्ता शरीरं कृष्ण एव च ।' इत्यादि प्रमाणानुरोधात् श्रीराधा भगवतः श्रीकृष्णस्य चन्द्रस्य चन्द्रिकेव, भानोः प्रभेव, जलस्य तरङ्गा इव, सिन्धोः वीचय इव परमान्तरङ्गा स्वात्मभूतैव । अतस्तस्यामेवं स्वात्मारामस्य भगवतः श्रीकृष्णस्य सर्वदा रमणं संभवति । अन्यासु तासु तासु गोपिकासु तदैव रमणं जायते यदा तासां प्रादुर्भावः । अतस्तस्या उपासनया तत्तादात्म्यमासाद्यैव भगवद्रतिः सम्प-द्यते । श्रीराधां प्राप्यैव भगवतः श्रीकृष्णस्य संभोगप्राप्तिर्भवितुमर्हति । तदुक्तं राधा सुधानिधौ—

अनाराध्य राधा-पदाम्भोजयुग्म-
मनासेव्य वृन्दाटवीं तत्पदाङ्काम् ।
असंभाव्य तद्भाव - गम्भीरचित्तान्
कथं श्यामसिन्धोः रसस्यावगाहः ॥

श्रीमद्भागवतस्य दशमस्कन्धपूर्वार्द्धे कंसद्वारा समायोजिते धनुर्यज्ञावसरप्रसंगे रङ्गशालायामुपस्थितस्य बलरामसहितस्य भगवतः श्रीकृष्णस्य वर्णनं यथा—

मल्लानामशनि र्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्
गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ।
मृत्युर्भोजपते विराडविदुषां तत्त्वं परं योगिनां
वृष्णीनां परदेवतेति विदितो रङ्गं गतः साग्रजः ॥ १०।४३।१७

अस्मिन् पद्ये भगवति श्रीकृष्णे रौद्र-अद्भुत-शृङ्गार-हास्य-वीर-करुण-भयानक-वीभत्स-शान्तरसा अभिव्यज्यन्ते । अतएव रससारसर्वस्वस्वरूपस्य तस्य भगवतः श्रीकृष्णस्य माधुर्यसारसर्वस्वाधिष्ठात्र्यां राधायां रमणमपि सुतरामात्मारमणत्वं संगच्छेत ।

अद्भुतसौन्दर्योपेतो भगवान् श्रीकृष्णो मधुलोलुपो भ्रमरो दिव्यसौरभसनाथे मनोरमे कुसुमेऽइव दिव्यदेहवैभवविभूषितयां श्रीराधयां सततं समासक्तचेता अपि न

कदापि तृप्तिमवाप्नोति, नापि सा दिव्यं श्रीकृष्णमुखाम्भोजं भूयो भूयो निर्विशेषं निरीक्षन्ती भगवद्भक्तास्तच्चरणारविन्दमिव तृप्तिमवाप्नोति। तथाहि श्रीमद्भागवतस्य दशम स्कन्धे द्वात्रिंशदध्याये—

अपरा निमिषद्दृग्भ्यां जुषाणा तन्मुखाबुजम्।
आपीतमपि नातप्यत् सन्तस्तच्चरणं यथा॥ १०।३२।७

उभयो राधा-कृष्णयोः परस्परं जले मेघे च मीनमत्स्ययोरिवापूर्वा प्रीतिरासीत्।

सर्वासु राधिकासखीषु विहारन्नपि स श्रीराधायामेव परमानन्दसन्देहमश्नुतेस्म। मधुपस्यारविन्दमकरन्दे इव तस्यामासीत्तस्य सततं संसक्तिः। राधा हि रङ्कोपलब्धं मणिमिव प्रतिपलं विश्वमोहनं मोहनं पश्यति स्म। अतएवोक्तम्

चातकीं वृत्तिमाश्रित्य ध्येयनिष्ठो भवेद् यदि।
तत्रैव परमानन्द - रसावाप्ति विशिष्यते॥
नीरदे चातकप्रीति निरपेक्षैव दृश्यते।
मोघायामपि याच्ञायां प्रीतिवृद्धिर्हि दृश्यते॥
जडे जले तथा मेघे प्रीतिशून्येऽपि तादृशे।
प्रीतिर्भवति दुष्प्राया मनश्चातकयोरिह॥
किमुवाच्यं तदा नित्य सान्द्रसच्चित्सुखात्मनि।
दिव्य - दाम्पत्य - सस्नेह - रसक्रीडामुपेयुषी॥
भृङ्गनिष्ठा रसिकता मत्स्यनिष्ठा ह्यनन्यता।
कोटि - कोटि - गुणोपेता राजते माधवे खलु॥

अतएव विविधैश्वर्यमाधुर्यरससिन्धुः सर्वशक्तिः सर्वेश्वरः परात्परः परमेश्वरो भगवान् वासुदेवोऽपि सर्वसौष्ठवौदार्यमाधुर्यलावण्यसुधासिन्धुराधापाङ्गविलोकनं विधायैव निश्चलचित्तो भवति स्म—

सर्वेश्वरः सर्वरूपः सर्वोत्कृष्टः परात्परः।
विविधैश्वर्यं - माधुर्यं - सिन्धुरद्भुत - विक्रमः॥
सौष्टवौदार्य - माधुर्यं - लावण्योद्रेक - भूमिषु।
सुन्दरीषु प्रफुल्लासु संश्लिष्टास्वपि नित्यदा॥
राधापाङ्गसुधासिन्धु - माधुर्याहृतमानसः।
यथा मधुकरः शश्वत् नित्य - नूत्न सुगन्धिषु॥
मकरन्दरसं भुङ्क्ते पुष्पेषु चापलाश्रयः।
तथैव माधवो नूनं विविधासु सखीषु च॥
सर्व - सौन्दर्य - माधुर्यं - लावण्य-गुणशालिनीम्।
प्रेमासिन्धुं सुधाधारारसनिर्यासरूपिणीम्॥

गुणागाधां निराबाधां सर्वारधां विनोदिनीम्।
सुसाधां माधवो राधां प्राप्य निश्चलमानसः।
वृत्तिं मधुकरीं त्यक्त्वा राधानिष्ठो बभूव हि॥

यथा भास्करप्रभाया न कदाचिदपि भास्कराद्वियोगः, न वा चन्द्रमसो ज्योत्स्नातो वियोगः, न चामृतसिन्धोः तन्माधुर्यविश्लेषः तथैव परमानन्दसुधासारसर्वस्वस्य भगवतः श्रीकृष्णस्य माधुर्य - सौन्दर्यौदार्यादि - सर्वस्वाधिष्ठात्र्या श्रीराधिकाया न कदापि वियोगकल्पनापि संभवति। रागप्राप्ते भोजनपानादिविधेर्विधानाभावात् पति-पुत्रादिप्रीतौ रागप्राप्तत्वेन विधानं न संभवति, परे परमेश्वरेऽलौकिकत्वात् तत्र शास्त्रेषु प्रीतिविधानं दृश्यते। तथाहि श्रीमद्भागवते—

यस्मान्नः सम्पदो राज्यं दाराः प्राणाः कुलं प्रजाः।
आसन् सपत्नविजयो लोकाश्च यदनुग्रहात्॥ १।१४।९

यथा पत्न्याः प्रेमपूर्णे पत्यौ, मातुः स्वहेभाजने पुत्रे, कामिन्याः तदीप्सिते कामुके प्रेम न विधीयते, नापि शिक्ष्यते अथापि उत्तरोत्तरं तत्र नैसर्गिकं प्रेम प्रवर्द्धते एव तथैव निखिलरसामृतमूर्तौ परमानन्दसुधासागरे भगवति श्रीकृष्णे राधादीनां प्रेमपूरं पर्याप्तं पर्यालोच्यते एव।

वस्तुतो हि ब्रह्मादिदेव दुर्गमगतेः श्रीराधाया माधुर्यं रसं कन्दर्पकोटिदर्पदलनशीलो भगवान् श्रीकृष्णएववेत्ति तस्य च सौन्दर्यमाधुर्यातिशयं सदानन्ददयिनी कीर्तिकिशोरी श्रीराधैव जानाति श्रीमद्वृन्दावनधाममहिम्ना तद्युगलमाधुर्यमपि तत्सहचारिभिरप्युपलभ्यते। परिशुद्धप्रेमसौन्दर्यरूपिणो राधामाधवयो र्मनागपि भेदो न विद्यते। अत एव तत्रानेकाः कल्पना सञ्जायन्ते। अव एवोक्तमस्ति—

गौरश्यामशरीरौ तौ चिदानन्दौ परात्परौ।
विजह्रतुर्निकुञ्जे हि सुखपुञ्जे सुखावहे॥

लोकोत्तरलावण्यललिताया महाकविभिः स्वाभाविकतयोपवर्णिताया श्रीराधाया नैसर्गिकं सौन्दर्यं सम्यग्ज्ञातुं न शक्यते। वस्तुतो वृजभानुसुतायाः कीर्तिकन्याया राधाया अद्भुताङ्गकान्तिसमक्षे समुत्कृष्टा गुणाः, लोकोत्तराःकलाः, विविधं चातुर्यं च विक्रीयन्ते। तच्चरणनखमणिज्योतिःप्रकाशं प्रेक्ष्य द्वादशादित्या अपि लघुत्वमुपयान्ति। अतो विशुद्धप्रेमसौन्दर्यरूपिणो राधामाधवयोर्न कमपि भेदं कल्पयन्ति कविवरा भक्तप्रवराः। अतो राधाकृष्णोपासनासमासक्तचेतसो भक्तप्रवराः सर्वोत्कृष्टं तद्युगलतत्त्वं परमया श्रद्धया सततमुपासते। राधामाधवयोः मधुरप्रेमयस्य परमोज्ज्वलस्य रससमुद्रस्यापरिमिताः तरङ्गा एव तास्ता भगवतो लीला सन्तितरां नितराम्। कदाचिद् अद्भुतशक्तिमद्भिः कैश्चिद् व्यक्तिविशेषैः भुवो रजःकणाः, नभसो नक्षत्राणि, वारिदस्य

विन्दवो गणयितुं शक्यन्ते, परं सर्वशक्तिमतोऽघटितघटनापटीयसो भगवतः श्रीकृष्णस्य सख्यः तल्लीलाप्रकाराश्च गणयितुमशक्या एव । तथाचोक्तम् ।

रजःकणा उडुगणा गण्यन्ते मेघविन्दवः ।
राधामाधवयोः सख्यो लीलाश्चागणिता सदा ॥

नन्दलाल—ब्रजवालानां यमुनापुलिने मनोरमे रासमण्डले तदभ्यन्तरे च निकुञ्जेश्वर्या राधाया तत्सहचरीभि.साकं नन्दनन्दनस्य भगवतः श्रीकृष्णस्य नित्यं रासलीला प्रचलति 'तथाचोक्तं राधासुधानिधौ—

कौशोराद्भुतमाधुरीभरधुरीणाङ्गच्छविं राधिकां
प्रेमोल्लासभराधिकां निरवधि ध्यायन्ति ये तद्धियः ।
त्यक्ताः कर्मभिरात्मनैव भगवद्धर्मेऽप्यहो निर्ममाः
सर्वाश्चर्यमयीं गतारसमयीं तेभ्यो महद्भ्यो नमः ॥ ८० ॥

एकस्मिन्नेव भगवति श्रीकृष्णेऽनेकासां ब्रजगोपिकानामनन्यप्रेमनिष्ठाऽऽसीत् तथा ईश्वरत्वाद् भगवतः श्रीकृष्णस्य तासु सर्वासु पूर्णमतं प्रेमासीत्, यतः स सर्वेश्वरः सर्वशक्तिमांश्च विद्यते । अतएवेश्वरस्यैकत्वं जीवानां च बहुत्वं संगच्छते । अतएव च रासलीलासमये सर्वशक्तिमत्वादनेकरूपता भगवत आविर्भूता प्रत्येकगोपीकृते भिन्नाभिन्ना श्रीकृष्णभिव्यक्तिरजायत । तदुक्तं विल्वमङ्गले—

अङ्गनामङ्गनामन्तरा माधवो माधवं माधवं चान्तरेणाङ्गना ।
इत्थमाकल्पिते मण्डले मध्यगः संजगौ वेणुना देवकीनन्दनः ॥

तथाच भक्तभेदेन भगवतोऽपि भेदो जायत एव । परमानन्दसुधासारसिन्धुर्भगवान् श्रीकृष्णो माधुर्यसारसर्वस्वरूपां राधां प्रति तु सर्वथैवानन्यो भवति । तथा हि राधासुधानिधावुक्तम् ।

दूरे सृष्ट्यादिवार्ता न कलयति मनाङ् नारदादीन् स्वभक्तान्
श्रीदामाद्यैः सुहृद्भिर्न मिलति हरति स्नेहवृद्धिं स्वपित्रोः ॥
किन्तु प्रेमैकसीमां परमरससुधासिन्धुसारैरगाधां
श्रीराधामेव जानन् मधुपतिरनिशं कुञ्जवीथिमुपास्ते ॥२३५॥

यथा भक्तशिरोमणयः एकस्मिन्नेव भगवति श्रीकृष्णे नन्दनन्देने ब्रजेन्द्रनन्दने वृन्दावनबिहारि-मथुरानाथ-द्वारकानाथादिरूपान्तरमङ्गीकुर्वन्ति तथैव तस्य निकुञ्जाधीश्वरश्रीकृष्णरूपेण श्रीराधैकनिष्ठत्वमप्युररी कुर्वन्ति । अतएव तत्र सर्वज्ञत्व-सर्वपालकत्व-सर्वेश्वरत्वादिना अन्यनिष्ठत्वेऽपि आत्मनिष्ठत्वं संगच्छते ।

यथा स्वल्पमपि सुवर्णकणमवलोक्य कनकमयं सुमेरुमनुमातुं शक्यते तथैव कविभिरुपवर्णितं श्रीराधाया सहजं सौन्दर्यं माधुर्यं च ज्ञातुं शक्यते । विश्वस्मिन् यावत्यो द्युतयः सर्वोत्कृष्टाः कान्तयश्च वर्तन्ते ताः सर्वा अपि श्रीराधायाः अङ्गकान्तिमालोक्य

विलज्जन्ते । तस्याः पदनखमणिप्रभाप्रकाशमालोक्य सूर्यकोटयोऽपि लघुत्वमुपयान्ति । यतो राधामाधवयोः विशुद्धप्रेमसौन्दर्यरूपिणोः मनागपि भेदो नास्त्येव । अतएव तत्रानेकाः कल्पनाः समञ्जसाः भवन्ति । तथाचोक्तं राधासुधानिधौ भक्तशिरोमणिभिर्मानवमणिभिः —

प्रेम्णः सन्मधुरोज्ज्वलस्य हृदयं शृङ्गारलीलाकला—
वैचित्री परमावधिर्भगवतः पूज्यैव कऽपीशता ।
ईशानी च शची महासुखतनुः शक्तिः स्वतन्त्रा परा
श्रीवृन्दावननाथपट्टमहिषी राधैव सेव्या मम ॥ ७८ ॥

प्रेममाधुर्यस्य तरङ्गा इव अविच्छिन्नतया राधामाधवयोः तास्ता लीला निरन्तरं जायन्ते । यथा तरङ्गेषु प्रतिकणं जलव्याप्तिः तथैव राधायां माधवव्याप्तिः, माधवे च तद्व्याप्तिः । अत्रैव तरङ्गत्वम् उभयोरेव जलत्वमुभयोरेव परमानन्दसुधासारसिन्धुत्वम् उभयोरेव तन्माधुर्यसारसर्वत्वं विद्यतेतराम् ।

यथा वीच्यां जलव्याप्ति र्जले वीचय आश्रिताः ।
यथा नन्दसुधासिन्धौ माधुर्यं व्याप्य संश्रितम् ॥
तथैव परमेशाने श्रीकृष्णे राधिकाश्रिता ।
राधिकाया तथा कृष्णेऽप्येवमेवमुपाश्रिता ॥
परस्परं सुविदित्वार्था परस्परदृश्यते किल ।
रोचते दिव्यदम्पत्योरन्योन्यानुगतिः सदा ॥
राधायाः माधवः प्रेयान् तनुप्राणात्मकोऽधिकः ।
माधवः स्वात्मप्राणादीन् निर्मञ्छायति तामधि ॥
यच्चावरणनिर्मुक्तं तत्त्वं सच्चित्सुखात्मकम् ।
तदेव निर्मलं ज्योती राधामाधवनामकम् ॥

यथा श्रीराधिका दिव्यगन्ध-वर्णोपेतमद्गुतं कुसुममस्ति तथैव भगवान् श्रीकृष्णोऽपूर्वो रसग्राही मधुपो वर्तते उभयो । राधाकृष्णयोः चन्द्रचन्द्रिकयोरिव, प्रभाभास्करयोरिव शब्दार्थयोरिव जलतरङ्गयोरिव, दुग्ध--धावल्ययोरिव अविभाज्योऽस्ति सम्बन्धः । तथा चोभयोः विम्वप्रतिम्बयोरिव कनककुण्डलयोरिव अशांशिभावाख्यः सम्बन्धो निरन्तरं विराजते । अतः परमानन्दरसामृतसिन्धोर्भगवतः श्रीकृष्णस्य माधुर्यसारसर्वस्वा श्रीराधैवान्तरङ्गा तदंशरश्मिभूतास्तु वहिरङ्गा सर्वाः सख्य आसन् ।
अपि च

चन्द्र-चन्द्रिकयोरेव प्रभा-भास्करयोस्तथा ॥
शब्दार्थयोर्यथा वा स्याद् यथा जलतरङ्गयोः ।
तथैव दिव्यदम्पत्योः सम्बन्धः सुमोहरः ॥

तस्मात् 'तरति शोकमात्मवित्' इति श्रुत्यनुसारं शोकसन्तरणस्योपाय आत्मज्ञानमेव निगदितमस्ति । आत्मज्ञानस्य च सुलभं साधनं भगवद्भक्तिरेव तत्तत्पुराणेषु प्रतिपादिता । अतएव श्रीमद्भागवतस्यैकादशस्कन्धे उद्धवं प्रति भगवान् श्रीकृष्णो भक्तेरुत्कृष्टत्वं प्रदर्शितवान् । तृतीयेस्कन्धे निजजननीं देवहूतिं प्रति भक्तेः श्रेष्ठत्वमभिहितवान् महामुनिः कपिलोऽपिः—

न युज्यमानया भक्त्या भगवत्यखिलात्मनि ।
सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये ॥ ३।१५।२९

अखिलरसामृतसिन्धुः परमानन्दस्वरूपो लीलापुरुषोत्तमो भगवान् श्रीकृष्णो गीतायामर्जुनं प्रति भक्ति भंगवतो यथार्थज्ञानस्य साधनं प्रोक्तमस्ति—

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ १८।५५

एकादशेऽध्याये चात्मनो विराट्स्वरूपप्रदर्शनप्रसङ्गेऽपि भगवान् श्रीकृष्णः आह—

भक्त्या त्वनन्यया शक्य अहमेवं विधोऽर्जुन !
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ! ११।५४

अतः सर्वसंप्रदायसाधकानां कृते सिद्धेरपेक्षितत्वात् साधनमार्गे सफलताप्राप्तये भक्तिः सर्वश्रेष्ठा सुलभा सर्वाश्रया च निगदिताऽस्ति । अत एवोक्तम्—

यथा समस्तलोकानां जीवनं सलिलं स्मृतम् ।
तथा समस्तसिद्धीनां जीवनं भक्तिरुच्यते ॥

विद्या तपः प्राण निरोध मैत्री तीर्थाभिषेक व्रतदानजप्यैः ।
नात्यन्तशुद्धिं लभतेऽन्तरात्मा यथा हृदस्थे भगवत्यनन्ते ॥
सङ्कीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसाम् ।
प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवातिवातः ॥
तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसो महोत्सवम् ।
तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकयशोऽनुगीयते ॥

सांसारसिन्धुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो भगवतः पुरुषोत्तमस्य ।
लीलाकथारसनिषेवणमन्तरेण पुंसो भवेद्विविधदुःखदवार्दितस्य ॥

॥ इत्युत्तरार्द्धं समाप्तम् ॥

अथ परिशिष्टम्

पाञ्चरात्रमतसारांशः

पाञ्चरात्रं हि न केवलं वेदमूलकमस्ति प्रत्युत एकायनवेदनाम्नाभिहितमस्ति। महर्षिणा शण्डिल्येनेदमेकायनवेदाख्यं कलेरन्ते स्वयं संकर्षणादवाप्य सुमन्तु--जैमिनि-भृगु-औपगायनमौञ्जायना अध्यापिताः। ते चाग्रे प्रचारितवन्तः प्रसारितवन्तश्च दार्शनिक जगति तत् पाञ्चरात्रं दर्शनम्।

पाञ्चरात्रे येषां विषयाणां प्रकाशः प्रदर्शितः, ते सन्ति मुख्यतया ज्ञानं, योगः, क्रिया, चर्या च। तत्र ज्ञाने दार्शनिकतत्त्वस्य, यन्त्र--मन्त्रादीनां विवेचनं विद्यते। योगे ध्यानविधेर्वर्णनं वर्तते। क्रियायां मूर्तिमन्दिरादीनां निर्माणविधिर्वर्णितोऽस्ति, चर्यायां चोर्ध्वपुण्ड्रव्रतोत्सवादीनां विधानमस्ति।

महाभारते पाञ्चरात्रं सर्ववेदसमन्वितं महोपनिषदित्युक्तमस्ति। यथा–'इदं महोपनिषत् सर्ववेदसमन्वितम्। महोपनिषदतिरिक्तमेतदर्थं शास्त्र-तन्त्र-आगम-संहिता-शब्दानामपि प्रयोगो भवति। यथा-पाञ्चरात्रशास्त्रम्, पाञ्चरात्रतन्त्रम्, पाञ्चरात्रागमः, पाञ्चरात्रसंहितेति। पाञ्चरात्रेऽनेकैर्मनीषिभिः ग्रन्था लिखिताः, येषां नामभिः पाञ्चरात्रं सम्बद्धमस्ति। नारदपाञ्चरात्रे पञ्चप्रकारकाणि पञ्चरात्राणि समुल्लिखितानि विद्यन्ते। यथा वासिष्ठपाञ्चरात्रम्, कापिलपाञ्चरात्रम्, गौतमीयपाञ्चरात्रम्, नारदीयपाञ्चरात्रं च,

पाञ्चरात्रसम्बन्धिनामुपदेशानां च संग्रहः संहितानाम्ना प्रसिद्धोऽस्ति। अनन्तरं शनैः शनैः शतद्वयसंहिता निर्मिताः, परं पाञ्चरात्रसम्प्रदाये १०८ संहितानामेवादरो विद्यते। संहितानां सात्विक-राजस-तामसभेदेन त्रयो वर्गाः सन्ति। भगवत्प्रोक्ताः संहिता दिव्याः कथ्यते। अष्टोत्तरशतसंहितामालायां तिस्रः संहिताः सन्ति सुमेरुमणिसमानाः (१) सात्त्वतसंहिता (२) जयाख्यसंहिता (३) पौष्करसंहिता च। तिसृष्वपि आसु संहितासु न किञ्चिदस्ति पारस्परिको विरोधः। पदशैले सात्त्वतसंहितायाः, श्रीशैले पौष्करसंहितायाः, हरिशैले च जयाख्यसंहिताः समादरो विद्यते। पाञ्चरात्रसिद्धान्तमन्तारो नरा पाञ्चरात्रिकाः प्रोच्यन्ते।

यामुनाचार्येण आगमप्रामाण्यनामकं पुस्तकं विलिख्य पाञ्चरात्रशास्त्रस्य महन् माहात्म्यं साधितमस्ति। श्रीरामानुजाचार्येण ब्रह्मसूत्रभाष्ये महताऽऽडम्बरेण पाञ्चरात्रशास्त्रस्य प्रमाण्यं स्थापितमस्ति। अतोहि श्रीसम्प्रदायवैष्णवेषु भक्तेषु पाञ्चरात्रशास्त्रसिद्धान्तानां परमः समादरो वोभवीतितमाम्।

उत्तरभारतस्य परमप्रसिद्धे विशाले वृन्दावनस्य रङ्गमन्दिरे पाञ्चरात्रागमविध्यनुसारमेव सम्पद्यते प्रत्यहं भगवतः सेवादिकार्यजातम्, यत्र उषाकाल-आगमनकाल-समाराधनकाल-पूज्याकाल-शयनकालानां सेवा मुख्यास्ति, या दक्षिणात्यैरर्चकैः सम्पाल्यते । उत्तरे भारते अयमेक एवास्ति विशलो दिव्यदेशः । वैष्णवसम्प्रदायमान्यतानुसारं दिव्यदेशः स उच्यते, यत्र पाञ्चरात्रविध्यनुसारं पूर्णपरम्परानिर्वाहपूर्वकम् अरुणोदयादारभ्य रात्रिपर्यन्तं भगवतः पूजा-भोग-शृंगारादिसमाराधनं विधिपूर्वकं क्रियते ।

भगवतो विष्णोः भक्ता भवन्ति सत्त्वगुणभूयिष्ठाः । ते हि भगवदुपासनायां प्रायः पत्र-पुष्प-फल-जल-दुग्ध-दधि-घृत-हविष्यान्नानामेवोपयोगं कुर्वन्ति । पशुहिंसायाः ते सन्ति सर्वथा विरोधिनः । अत एव ते सात्त्वता उच्यन्ते । तेषां धर्मोऽपि सात्त्वतधर्मः प्रोच्यते । सात्त्वतधर्मश्चास्ति द्विधा-एकः पाञ्चरात्रो द्वितीयश्च वैखानसः ।

भगवता विष्णुना आदिनारायणेन पञ्चसु रात्रिषु क्रमशः पञ्चभ्यः अनन्त-गरुड-विष्वक्सेन-ब्रह्म-रुद्रेभ्यो यो हि उपदेशो दत्तः स पाञ्चरात्र इति प्रोच्यते । यद्वा स्वकीयपञ्चानामामुधानामंशरूपेभ्यः--शाण्डिल्य-औपनायन–मौञ्जायन-कौशिक--भरद्वाजेभ्यो जगत्प्रभुर्भगवान् पृथक् पृथक् यत् शास्त्रमुपदिष्टवान् तत् पाञ्चरात्रमित्युच्यते । पाञ्चरात्रमते क्रिया-चर्यातिरिक्तयोः प्रेम-माधुर्ययोरपि अप्रत्यक्षरूपेण स्वीकारः कृतोऽस्ति ।

विखनसा = जगत्स्रष्ट्रा ब्रह्मणा उपदिष्टत्वाद् द्वितीया शाखा वैखानसशाखाख्या कथ्यते । वैखानस आमगोऽपि वैष्णवसाधनायाः प्रेरकोऽस्ति, किन्तु माधुर्यभक्तितः तस्य साक्षात् सम्बन्धो न दृष्टिगोचरी भवति । वैखानस आगमो वैदिकपरम्परायाः समीपे अस्ति तथा मर्यादामार्गे बलं ददत् साधनायां विधानं कुरुते । मरीच्यनुसारं सन्ति साधनायाश्चत्वरो मार्गाः—जपः, अग्निहोत्रम्, अर्चनाः तथा ध्यानम् । वैखानसमते याज्ञिकं कर्मकाण्डं विशेषरूपेण मान्यमस्ति । अतो माधुर्यभक्तेः पृष्ठभूमौ अस्य योगदानं न स्वीकर्तुं शक्यते ।

माध्वचैतन्यमतविमर्शः

यद्यपि चैतन्यदेवस्य व्यक्तित्वे प्रबलमाकर्षणं तथा तन्नेतृत्वे विलक्षणं संमोहनमासीत् तथापि तेन स्वनाम्ना कस्यचन मतस्य संप्रदायस्य वा प्रवर्तनं न कृतम् । तस्य जीवनकार्येषु ध्याने दीयमाने स्पष्टतया परिलक्ष्यते यत्तस्य जीवनमियद् दुर्धर्षमासीद् यत्संपर्के समागत्य बहवो जना तत्प्रवाहे स्वं जीवनं नूनं प्रवाहितन्तः । परिणामतश्चैतन्यमतस्य स्वयमेव समुदयो जातः । नहि तज्जीवने धर्मप्रवर्तनस्य संप्रदायस्थापनस्य च कश्चनोत्साहः प्रत्यक्षतयाऽप्रत्यक्षतया वा परिलक्ष्यतेस्म । यत् कियद्भिः भक्तजनैः तन्मार्गोऽङ्गीकृतः तर्हि तद्व्यक्तित्वेनाकृष्टाः सन्त एव ते तन्मार्गं स्वीकृतवन्तः ।

चैतन्यमहाप्रभोर्जीवनं धर्मपरायणभक्तजीवनसदृशं लोकसंग्रहविमुखं परमेश्वरं प्रति सर्वदोन्मुखमासीत् । निरन्तरं भगवत्सन्निध्यमनुभवन् स तत्र समुत्सुकः नितान्तमुत्कण्ठितश्च तिष्ठति स्म ।

भगवता चैतन्यदेवेन न कोऽपि नवीनो ग्रन्थः प्रणीतः, न कश्चन मठः स्थापितः, नवा किमपि प्रस्थानत्रये भाष्यं लिखितम्, किन्तु स वैष्णवकुलतिलकं पुराणमूर्धन्यं श्रीमद्भागवतं महापुराणमेव वेदान्तस्य भाष्यं, व्याख्यानं, टीकामुपटीकां च मत्वा धर्मग्रन्थत्वेन प्रमाणमङ्गीकृत्य परमया भक्त्या भगवत्सान्निध्यमनुभवन् जीवनं यापयामास । गयातीर्थयात्रानन्तरमनायासं तच्चतुर्दिक्षु शिष्यमण्डली मित्रवृन्दं चैकत्री बभूव । तेन कदाचिदपि संघटनात्मककार्यस्य कृते कस्मै चिदपि किमपि प्रोत्साहन न दत्तम् । चैतन्यसम्प्रदायप्रवर्तनं तु तच्छिष्यैरेव समारब्धं यत्र विशेषतो वृन्दावन निवासिनां षड्गोस्वामिनां प्रमुखं योगदानमासीत् । नवद्वीपस्य चैतन्यशिष्येषु भक्तिभावनायाः प्राबल्यमासीत् । अतस्तैश्चैतन्यमतसमुद्घाटनस्य कश्चन प्रयासो न विहितः । वृन्दावनस्थाः षड् गोस्वामिनस्तु तत्त्ववेत्तारो विद्वांस आसन् । अतस्तैः चैतन्यमतप्रचार-प्रसारयोः कृते शास्त्रनिर्माणस्य कार्यं समारब्धम् । तत्र तैः भक्ति शास्त्रीयतुलायां स्थापयित्वा विशुद्धां विधातुं साहित्यशास्त्रपरम्पराया अवहेलनमसंभवं मन्यमानैः भक्तिरसनिरूपणे ध्यानं प्रदाय भक्ते रसत्वं पञ्चमपुरुषार्थत्वं च युक्तिप्रत्युक्तिभ्यां महताऽऽडम्बरेण संसाधितम् । भक्तिरसामृतसिन्धौ, उज्ज्वलनीलमणौ च रूपगोस्वामिना भक्तिरसस्य निपुणतया महत्त्वपूर्णं विवेचनं कृतमस्ति ।

चैतन्यसम्प्रदायस्य दार्शनिकसिद्धान्तसम्बन्धेऽधिक-दिनं यावद् विवादः प्रचलन्नासीद् यतो न स्वयं चैतन्यप्रभुणा तद्विषये किमपि लिखितमासीत् । परवर्तिभि र्वृन्दावननिवासिभि गोस्वामिभि र्यल्लिखितमासीत् तद्भक्तिस्वरूपनिर्धारणे सक्षमं सदपि दार्शनिकदृष्ट्या सर्वथा अपुष्टमव्यवहार्यं चासीत् ।

चैतन्यमतस्य दार्शनिक-भक्तिविषयकसिद्धान्तानामनुशीलनेनेदं स्पष्टतया समक्षमुपतिष्ठते यच् चैतन्यमतस्य मूलाधारो माध्वसंप्रदायो नास्ति । उभयो र्दार्शनिकसिद्धान्ते पर्याप्तोऽस्ति मौलिको भेदः । अतश्चैतन्यमतं मध्वमतानुगामीति साधनस्य प्रयासः सर्वथा व्यर्थो भवति । चैतन्यमतसिद्धान्तानां प्रवर्तयितारो रूप-सनातन-जीवगोस्वामिप्रभृतयो मनीषिणो माध्वपरम्परायाः कुत्रापि स्वग्रन्थेषु अनुगामनं न कृतवन्तः । तै र्भक्तेः रसस्वरूपं स्वकीयमौलिककल्पनाभिरेव स्थिरीकृतम् । कुत्रापि मध्वाचार्यस्य च चर्चा न कृतास्ति, न वा चैतन्यमतप्रवर्तकाचार्यरूपेण स क्वापि स्वीकृतो विद्यते ।

यद्यपि बलदेवविद्याभूषणेन स्वकीये गोविन्दभाष्ये प्रमेयरत्नावल्यां च चैतन्यमतं माध्वसंप्रदायान्तर्गतं साधयितुं महान् प्रयासः कृतः, अपि च कविकर्णपूररचि-

तायां गौरगणोद्देशदीपिकायां गुरुपरम्परायाः संकेतो विद्यते, यत्र माध्वनामोल्लेखादयं माध्वसम्प्रदायी अभिमतः, परन्तु न तत् प्रामाणिकं प्रतिभाति । रूपगोस्वामिप्रभृतिभिश्चैतन्यमतानुयायिभिः मनीषिभिः कुत्राप्यनुल्लेखाद् उभयोः सम्प्रदाययोः सिद्धान्ते मतभेदाच्च चैतन्यमतं न मध्वमतानुयायि भवितुमर्हति ।

मध्वाचार्यमतम्

मध्वाचार्यवर्या हि एकादशशताब्द्यामवनिमण्डलमिदममण्डयन् । भगवच्छ्रीकृष्णसेवासमाराधनसमासक्तमानसैः महामहिमशालिभिरेतैः अनेके मठाः संस्थापिताः प्रतिष्ठापितश्च माध्वसंप्रदायः । तदर्थं लिखिता बहवोऽमूल्या ग्रन्थाः । एषां संक्षेपेणायमस्ति मतवादः—मध्वाचार्याणां मते नारायण एवास्ति सकलकारणकारणम्, सगुणः सविशेषश्च । जीवोऽणुपरिमाणः भगवतो दासः । वेदा नित्या अपौरुषेयाश्च । पाञ्चरात्राध्ययनं जीवस्य परममावश्यकम् । तन्मते जगदस्ति तत्त्वतस्तथ्यं नेदं मरुमरीचिकेव, गगनमलिनिमेव, शूक्तिरजतमिव भ्रान्तिकलितम् । ऐषां मते पदार्थौ द्विविधः एकः स्वतन्त्रः, अचरश्चास्वतन्त्रः । अशेषसद्गुणसमवेतो भगवान् स्वतन्त्रः पदार्थः । जीवो जडं जगच्च अस्वतन्त्रं तत्त्वमस्ति ।

जीवात्मपरमात्मनोः, जीवयोः, परमात्मजगतोः, जीवजगतश्चास्ति परस्परं भेदः । सन्ति तेषामत्रामी दृष्टान्ताः—महोपनिषदि द्रष्टव्याः—

यथा पक्षी च सूत्रञ्च नानावृक्षरसा यथा ।
यथा नद्यः समुद्राश्च शुद्धोदलवणे यथा ॥
चौर्यापहार्यौ च यथा यथा पुंविषया अपि ।
यथा जीवेश्वरौ भिन्नौ सर्वदैवविलक्षणौ ॥
वैलक्षण्यं तयो र्ज्ञात्वा मुच्यते बध्यतेऽन्यथा ।
ब्रह्मा शिवः सुराद्याश्च शरीरक्षरणात् क्षराः ॥
लक्ष्मीरक्षादेहत्वादक्षरातः परो हरिः ।
स्वातन्त्र्यशक्ति विज्ञानसुखार्थैरखिलैर्गुणैः ॥
निःसीमत्वेन ते सर्वे तद्वशा सर्वदेवताः ।
विष्णुः सर्वगुणैः पूर्णं ज्ञात्वां संसारवर्जितः ॥
निर्दुःखानन्दभुङ् नित्यं तत्समीपे च मोदते ।

अत एव मध्वाचार्याः सर्वथा द्वैतवादिन उच्यन्ते । एषां मते जीवो भगवतो दासः । ते कथयन्ति यदि दासः प्रभोः समानकक्षः स्यात्तर्हि प्रभुस्तं दण्डयेत् । तथैव जीवो यदि अहं ब्रह्मास्मीतिभावमङ्गीकृत्य सकलकारणकारणेन नारायणेन सहात्मनोऽभेदभावं विदध्यात् तदा स तमधो नयति । तन्मते निर्वाणमुक्तिस्तु शशशृङ्गं खपुष्पं कूर्मक्षीरं

वन्ध्यापुत्र इवालीककथनम् । नारायणस्योत्कर्षः ज्ञानेन, तस्मिन्ननन्यया भक्त्या परमानुरागेण च सारूप्य--सालोक्य--सायुज्यादयो मुक्तयो भवितुमर्हन्ति । स्वतन्त्रस्य सेव्यस्य भगवतः प्रसादोपलब्धिरिव अस्वतन्त्रस्य सेवकस्य जीवस्य चरमः पुरुषार्थः । भगवद्गुणोत्कर्षज्ञानमन्तरेण परमपुरुषार्थलाभो दुर्लभः । तत्त्वमसि, 'अहं ब्रह्मास्मि, इत्यादि श्रुतिमौलिकवाक्यश्रवणजेन ज्ञानेन तत्प्राप्तिरतीवदुःशका । केवलयोपासनयैव तत्प्रप्ति र्भवितुमर्हति । तन्मते तत्त्वमसीत्यादीनि वाक्यानि तु अग्निर्माणवकः, सिंहो बालक इत्यादिवत् सादृश्यवोधकानि सन्ति ।

मध्वाचार्यमते •भगवदुपासना तावत् वत्रिविधा—अङ्कनं नामकरणं भजनं च । तत्राङ्कनं नाम शङ्खचक्रादिभि र्देहस्य लाञ्छनम् । नामकरणं नारायणनामानुसारि पुत्रपौत्रादीनां नामकरणम् । भजनन्तु दशधा विभज्यते । तत्रादौ कायिक--वाचिक--मानसिकभेदेन त्रिधा । तत्रापि कायिकं दान-परिरक्षण देवपूजनभेदान्त्रिधा, वाचिकं तथ्यकथन--हितकथा--प्रियवचन--स्वाध्यायायभेदाच्चतुर्धा, मानसिकमपि दया--श्रद्धा--नारायणनुप्रभेदात्त्रिविधं विभज्यते । एतदेव सम्प्रदाय ममुमनुसरतां विपश्चितां लक्ष्यं, ततो नापरं कर्त्तव्यमवशिष्यते किञ्चिदपि ।

मध्वाचार्या हि समामनन्ति यद् गुणातीतो नारायणो मायासम्प्रयोगेण त्रिगुणमयानि ब्रह्म -विष्णु--महेश्वररूपाणि स्वीकृत्य सर्ग-स्थिति--प्रलयान् विदधाति । कर्मानुसारमुच्चावचयोनीः जीवेभ्यः प्रददाति । एते निर्विकल्पकं ज्ञानं नाङ्गी कुर्वन्ति । एषैव भित्तिरेषां मतस्य । यत्र नास्ति ज्ञानस्य निर्विकल्पकत्वं तत्र विषयस्यावश्यं सत्यत्वम् । अतोऽमीषां मते जगत् सत् । ज्ञेयस्यासत्यतायां ज्ञानस्य स्फूर्तिरेव न भवितुमर्हति—

मध्वाचार्यमते मोक्षस्य साधनम् अन्याचार्येभ्यो भिन्नप्रकारकं विद्यते । मध्वमते मोक्षार्थं भेदपञ्चकस्य ज्ञानमत्यावश्यकमस्ति । तद् यथा-(१) जीवेश्वरयोर्भेदः (२) जीवप्रकृत्योर्भेदः (३) ईश्वरप्रकृत्योर्भेदः (४) प्राकृतिकपदार्थानां पारस्परिको भेदः (५) जीवानां च परस्परं भेदः । मध्वमते भेदपञ्चकज्ञानं विना मोक्षस्य संभवो न भवति । मोक्षस्य सर्वप्रधानं साधनं भगवत्साक्षात्कार एवास्ति । साक्षात्कारस्य चोपायाः सन्ति वैराग्यं, शमः, शरणागतिः, परमात्मभक्तिश्च । अथापि मोक्षावस्थायां जीवब्रह्मणोरभेदो भवितुं नार्हति । एवं विशुद्धस्य द्वैतभावस्य स्थापनां विधाय विविधासूपनिषत्सु समुपलब्धानामभेदपरकवाक्यानां संगति र्भिन्नप्रकारेण क्रियते तैः । तत्त्वमसीति महावाक्यस्यार्थः—तस्य त्वमसि । अर्थात् त्वं तदीयोऽसि । ब्रह्मविद् ब्रह्मैव भवति, इत्यस्यार्थः-ब्रह्मविद् ब्रह्मसदृशो भवतीति स साक्षात् ब्रह्मभवनं न मन्यते ।

मध्वाचार्यमते नवसंख्याकाः सिद्धान्ताः स्वीक्रियन्ते । तथाहि (१) भगवान् विष्णुरेव परमं तत्त्वं विद्यते (२) जगत् सत्यमस्ति (३) जीवब्रह्मणो र्वास्तविको भेदो वर्तते (४) सर्वे जीवाः सन्ति हरेरनुचराः (५) जीवेषु नीचोच्चतारतम्यमस्ति (६) स्ववास्तविकस्वरूपानुभूतिरेवास्ति मुक्तिः (७) निर्मला भक्तिरेवास्ति मोक्षस्य साधनम् (८) त्रयः प्रत्यक्षानुमानशब्दा एव सन्ति ज्ञानसाधकप्रमाणानि (९) सर्वै र्वेदै र्ज्ञातव्यो भगवान् विष्णुरेवास्तितराम् । माध्वसम्प्रदायस्य सिद्धान्तानां निरूपणमेकस्मिन्नेव श्लोके एवं कृतमस्ति—

श्रीमन्मध्वमते हरिः परतरः सत्यं जगत्तत्त्वतो
भेदो जीवगणा हरेरनुचरा नीचोच्चभावं गताः ।
मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनम्
ह्यक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः ॥

चैतन्यचर्चा तत्सम्प्रदायश्च

गौडीय सम्प्रदायस्यास्ति वङ्गे प्रचुरः प्रचारः प्रसारश्च । अस्य द्वितीयं नाम चैतन्यसम्प्रदाय इति विद्यते । चैतन्यमहाप्रभुर्हि स्वजन्मना १९८५ तमे ईशवीये वर्षे नवद्वीपं विभूषयामास । पुण्यपरा अस्य पितृचरणा आसन् जगन्नाथमिश्रनामानः ते पुरन्दरेत्यपरनाम्नापि प्रथितिमुपगता आसन् । जननीचास्य सौशील्येन, सौन्दर्येण, सौभाग्येन च जयन्तजननी शचि महेन्द्रमिवानुकुर्वाणा तमन्वसरत् । तस्याः पतिपरायणाया एव पुण्यपुञ्जेनायं बाल्यकालादेव भगवद्भक्तो जातः ।

चैतन्यदेवो हि गङ्गाधरनाम्नः कस्यचिच्छाब्दिकस्य शालायां शब्दविद्यामनुशीलयत् । अचिरेण कालेनायं व्याकरणे सफलप्रयासः संवृत्तः । यदायमासीद् द्वादशवर्षवयस्कःतदामुष्य जनकाः पुरन्दरमहाभागाः पुरन्दपुरातिथयो बभूवुः । पितृवियोगाद् भृशमाकुलोऽप्ययं चैतन्यमहाप्रभुः महापुरुषतया स्वाध्यायान्न विरराम, अपितु सर्वं प्रत्यूहव्यूहं धैर्येण प्रसह्याधिकमनोयोगेनाध्ययने प्रवृत्तोऽभवत् । पितृवियोगाद् वर्षत्रयानन्तरं नवद्वीपनिवासिनो वल्लभाचार्यस्यात्मजया साकमभूदस्य विवाहसंस्कारः ।

एष एव महानुभावो वर्तते गौडीय सम्प्रदायस्य प्रवर्तयिता । न केवलं प्रवर्तयिता एव अपितूपास्यदेवोऽप्यभिमतः तत्संप्रदायविद्भिः । सम्प्रदायोऽसौ मध्वसम्प्रदायमनुकुरुते । मध्वसम्प्रदाये सन्ति नव सिद्धान्ताः प्रसिद्धाः । तेषु षट्सिद्धान्ताः तु चैतन्यसंप्रदाये आविकला एव स्वीकृता, अवशिष्टानां त्रयाणां परिष्कारोऽनेनैव महानुभावेन विहितोऽस्तीति विश्रुतचरम् ।

एवं च चैतन्यसम्प्रदायस्यामी सन्ति संक्षिप्ताः सिद्धान्ता हितोपदेशाश्च । व्रजेन्द्रनन्दनन्दनो भगवान् श्रीकृष्ण एवास्ति सम्प्रदायस्यास्य परमोपास्य आराध्यो देवः । गो-गोप-गोपीमण्डल-मण्डितं, दिव्यं वृन्दावनमस्ति धाममूर्धन्यं तीर्थम् । गोपीवर्गेण कल्पिता प्रेममयी सदुपासनैवास्ति श्रेयस्करी सपर्या । वैष्णवकुलतिलकं पुराणमूर्धन्यं श्रीमद्भागवतमहापुराणमेवास्ति परमं प्रमाणम् । अमन्दानन्दकन्दे नन्दनन्दने व्रजनन्दने भगवति श्रीकृष्णेऽनन्यप्रेमैवास्ति परमं पुरुषार्थः । आराध्यदेवे देवकीनन्दने भगवति वासुदेवे निरतिशयप्रेमोत्पादनं मनोवाक्कायकर्मभिः तदनुगमनं च भजनमभिधीयते । अत एव लीलापुरुषोत्तमस्य भगवतः श्रीकृष्णस्य भक्तिरेवास्ति तन्मते श्रेयस्करी । तदर्थं प्रेम्णा संकीर्तनमत्यावश्यकम् ।

एतन्मते भक्तेः सन्ति तिस्रो विधाः (१) साधनभक्तिः (२) भावभक्तिः (३) प्रेमभक्तिश्च । प्रथमं तावद्भगवद्भक्तौ श्रद्धा, ततः सतां सङ्गः, तदनु भगवत्सपर्या, तदनन्तरं समुदयस्य हानिः, तत्पश्चान्निष्ठारुचिः, ततो भावोदयः, तदनन्तरञ्च समुदेति प्रेमभक्तिः, सैव पराकाष्ठा परमः पुरुषार्थः । यद्यपि तन्मते व्रजेन्द्रनन्दनन्दन एवास्ति केवलमुपास्यदेवः अथाप्यन्येषां देवानां परिचर्याविधिर्न निन्द्यः । विशुद्धं प्रेमैवास्ति परो धर्मः । भगवति श्रीकृष्णे विशुद्धं प्रेमैवास्ति फलभक्तिः । भक्तेः प्रोन्नतिरेव श्रीकृष्णभक्तानां चरमं कर्म । भगवत्सेवायां रतं रसिकैः साकं मधुरभागवतरसास्वादे नामसंकीर्तने च येषामभिरुचिः ते सन्ति धन्यतमाः भगवद्भक्ताः ।

अत्रानन्द एव रसः । स द्विविधः–चिदानन्दो जडानन्दश्च । चिदानन्द एव परं विशुद्धं निष्कामश्च भगवत्प्रेम । जडानन्दस्तु तस्यैव प्रेमाकारस्य विकारः अणोरपि अणीयानंशरूपः । स च लोके दाम्पत्य-प्रणयापत्य-प्रेमसखिसौहार्दरूपेण प्रसरति प्रचरति समस्तं लोकं व्याप्नोति च ।

सर्वे एव जनाः प्रेमभक्त्यधिकारिणो भवितुमर्हन्ति । प्रेमभक्तिमन्तरेण भगवतः साक्षात्कारो भवितुं नार्हति । भावपरवशो हि भगवान् । स च भावः शान्त-दास्य-सख्य-वात्सल्य-मधुरभेदेन पञ्चविधः । मधुरभावस्यापरं नाम कान्तभाव इति । उपासनायां परिपूर्णायां भवति भावानामुदयः । मधुरभावो हि समस्तेष्वपि भावेषु भवति श्रेयान् । यथा पतिव्रतपरायणा नारी पतिदेवचरणकमलयोः निष्काममात्मसमर्पणं कुरुते तथैवानन्यशरणो भक्तो भगवच्चरणारविन्दे सश्रद्धमात्मानं समर्पयति । एष एव तस्य श्रेयसे परमो धर्मः ।

प्रथमं साधनभक्त्या भावभक्तिरुदेति, ततः प्रेमभक्तिर्यस्यापरमभिधानं रतिरिति । सा केवलं चिन्मयावस्थायामेवोद्भवति । केवलया भगवतः श्रीकृष्णस्य कृपयैव रतिरुदेति, सा च सतां सङ्गेन पुष्यति, विद्यन्ते च स्वेदकम्पादयः तस्याः परिचायकाः ।

रतेर्हि सन्ति चत्वारो भेदाः—(१) भागवतीरतिः (२) छायारतिः (३) जडरतिः कपटरतिश्च । प्रथमाया भगवद्रतेरेवाद्याऽवस्थास्ति छायारतिः । मद्यवाराङ्गनाद्यासक्तानां या रतिरुदेति सा जडरतिः । जनान् प्रदर्शयितुं दम्भेन या खलु प्रीतिः क्रियते सा कपटरतिः ।

केचन वैष्णवा वैष्णवधर्ममेव श्रेयांसं मन्यमाना अन्यधर्मानधिश्रयन्ति । केचिद् वैष्णवचिन्हानि दधाना अपि न वैष्णवधर्ममनुतिष्ठन्ति । कतिपये वैष्णववंशे गृहीतजन्मानोऽपि अभक्ता जायन्ते । एते सन्ति वैष्णवसमाः, परं नैते सन्ति वस्तुतो वैष्णवाः ।

हरिनामश्रवणेन पापानि नश्यन्ति, शरीरं पूतं भवति, हृदयं प्रसीदति, मनो हि भगवद्भक्तिप्रवणं भवति ? भगवद्भक्ति प्रवणे मनसि अमित्राण्यपि मित्रतां यान्ति, दुःखं च निःशेषं नश्यति । तस्मात् प्रत्यवायापनोदनपूर्वकं कामशोधनाद्यर्थं मुहुर्मुहुरुच्चैर्हरिनाम नूनं कीर्तनीयम् । वैष्णवानां प्रभुवाः सन्ति चत्वारो धर्माः—(१) शमः = अन्तःकरण संशोधनम् (२) दमः=वाह्येन्द्रियवशीकारः (३) तितिक्षा = शीतोष्णादिद्वन्द्वसहिष्णुता तथा (४) वैराग्यं = नश्वरेषु समेषु वस्तुषु हेयबुद्धिः । श्रद्धासत्सङ्ग-भजन-निवृत्तिभिरुत्पन्नायां भगवद्भक्तौ वैष्णवानां हृदयेषु समुत्पद्यते कोऽप्यपूर्वो धर्मो यं विरक्तिपदेनाभिदधाति वैष्णवाग्रगण्या भगवद्भक्ताः । जातायां विरक्तौ ते कौपीनमात्रवसनाः कन्द-मूल-फलासना निरशना निरन्तरं भगवन्तं ध्यायन्तोऽमन्दमानन्दमनुभवन्ति ।

अवस्थामेनामेवोद्दिश्याभिहितमेतत् पद्यं कृष्णद्वैपायनेन भगवता वेदव्यासेन वैष्णवकुलतिलकस्य पुराणमूर्धन्यस्य श्रीमद्भागवतस्यैकादशे स्कन्धे—

> क्वचिद्रुदन्त्यच्युतचिन्तया क्वचिद्
> हसन्ति नन्दन्ति वदन्त्यलौकिकाः ।
> नृत्यन्ति गायन्त्यनुशीलयन्त्यजं
> भवन्ति तुष्णीं परमेत्य निर्वृत्ताः ॥ ११।३।३२ ॥

एष एव परमहंसानां वैष्णवानां परमो धर्मः । गृहिणां वैष्णवाणां कर्म तु कामनां तत्फलाभिषङ्गं च विहाय सप्रीतिनिष्कामं भजनकरणमेव । जातायां विरक्तौ वैष्णवा परमहंसास्तु कौपीनमात्रावशेषं वेषं विधाय विहाय च वर्णाश्रमधर्मान् गुणातीताः सन्तः परमहंसवृत्तयो वैष्णवं धर्ममाश्रयन्ते । शितलतेव सलिलस्य, दाहकतेवानिलस्य, हिंस्रकवृत्तिरिव पशोः वैष्णवानां भगवति विशुद्धप्रेमोत्पादनमस्ति स्वाभाविको धर्मः । तन्मते संसारदुःखदावानलदग्धानां प्राणिनां कृते भगवन्नामसंकीर्तनं जीवातुरूपम् । सत्ययुगे तपसा, त्रेतायां ध्यानेन, द्वापरे यज्ञेन तथा कलियुगे केवलेन भगवन्नामसङ्कीर्तनेन भगवत्पदप्राप्तिरित्यत्र नास्ति कश्चन सन्देहलेशवसरः--

हरेर्नामैव नामैव नामैव मम जीवनम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥

येषां परमोदाराणां भक्तावतंसानां वदनारविन्देषु हरिरित्यक्षरद्वयं निरन्तरं विराजते । तेषां नास्ति कस्यापि तीर्थविशेषस्य यज्ञादेर्वावश्यकता भवति । अनेकानि शास्त्राण्यालोच्य वैष्णवविद्वद्भिरिदमेव निर्णीतमस्ति यन्नारायणपरायणस्य पुंसो नारायणध्यानमेवास्ति परमं श्रेयः साधनम् । हरिनामानलं पुनर्जन्महेतुभूतं पापबीजं भर्जयित्वा पुनः प्ररोहप्रतिकूलं विधत्ते । यथा गुल्ममध्यस्थितोऽणुरपि वह्नि मन्दमन्देन वायुना ध्मायमानोऽखिलमपि विपिनं भस्मसात् कुरुते तथैव भक्तमानसावासो भगवानपि सकलानपि पापपुञ्जान् विनाशयति, विश्वस्मिन् समेऽपि प्राणिनः स्व-स्व-कर्मानुरूपं फलं भुञ्जते, परन्तु यथा भर्जितानि धान्यबीजानि अङ्कुरोत्पादने न क्षमाणि भवन्ति तथैव वैष्णवानां भक्तानां पापकर्माण्यपि पापाङ्कुरमुत्पादयितुं न क्षमन्ते । भक्तवत्सलो भगवान् हरिस्तेषां स्वभक्तानां पापकर्मफलानि प्रथमत एव नाशयति ।

असारेऽस्मिन् संसारे 'चतुरशीति लक्षान्ते मानवः' इत्यनुसारं चतुरशीति लक्षयोनीः अतिक्रम्य महता सौभाग्येन परमं दुरापं मनुजजन्म लभते मनुष्यः । तदुपलभ्य यैर्मानवैरिन्द्रियाणि परमपुरुषचरणारविन्देऽलिसमूह इव संयोजितानि तेषामेव जन्म सफलं, त एव सन्ति धन्यतमा मानवमणयः । निष्कामया भक्त्यैव भगवत्प्राप्तिः सुलभा नान्यैस्तपोदानज्ञानादिभिरिति श्रीमद्भागवतादौ बहुशः प्रतिपादितम् ।

अत एव वहिर्मुखव्यक्तीनां संपर्कं विहाय मनो हि ततः प्रेमपद्धतिरुध्यते-बहुशास्त्राभ्यासव्यसनं च परिहाय वि[illegible]या श्रद्धया भगवति निर्मलं प्रेमैव विधेयम्—

वहिर्मुखानां संगेन तच्छास्त्रश्रवणेन च ।
शास्त्र[illegible] बहुनाऽसजातीयातिसङ्गतः ॥
अपि सत्तीर्थशिष्याणां रुध्यते प्रेमपद्धतिः ॥

तस्माच्चैतन्यमते सर्वं विहाय श्रद्धया सततं हरिकीर्तनपूर्वकं भगवद्भजनमेव मानवजीवनस्य प्रमुखं कर्तव्यं मनुष्यजन्मनश्च वास्तविकमस्ति फलम् ।

अचिन्त्यभेदाभेद :

चैतन्यदेवस्य दार्शनिकसिद्धान्तोऽचिन्त्यभेदाभेद उच्यते । जीवगोस्वामिना षट्सन्दर्भान्तर्गते भागवतसदर्भेऽचिन्त्यभेदाभेदस्य व्याख्यां कुर्वता प्रोक्तमस्ति यत् "स्वरूपाद्यभिन्नत्वेन चिन्तयितुमशक्यत्वाद् भेदः, भिन्नत्वेन चिन्तयितुमशक्यत्वादभेदश्च प्रतीयते । इति शक्तिशक्तिमतो र्भेदाभेदौ अङ्गीकृतौ, तौ च अनित्यौ । स्वमते तु अचिन्त्यभेदावेव अचिन्त्यशक्तित्वात्"

अचिन्त्यभेदाभेदस्य दार्शनिकसिद्धान्तरूपदानसमये गोस्वामिनां समक्षे माध्व संप्रदायस्य काचिद् दार्शनिकी मान्यता नासीत् । द्वैतवाददृष्ट्या नायं चैतन्य—सिद्धान्तः स्वीकृतः । अत एव रूपगोस्वामिना लघुभागवतामृते सिद्धान्तितम्—

एकत्वं च पृथक्त्वं च तथांशत्वमुतांशिता ।
तस्मिन्नेकत्र नायुक्तम् अचिन्त्यानन्तशक्तितः ॥

'भगवान् पुरुषोत्तमो विभुचित् तथा जोवः, अणुचित् इति स्वीकाराद् उभय च चेतनता अक्षुण्णा । अत उभयत्राभिन्नता स्वीक्रियते । भगवान् विभुः जीवश्चाणुः । अतस्तयोर्भेदोऽङ्गीक्रियते । अतश्चैतन्यमते फलतो भेदाभेदस्य सिद्धान्तः सुतरां निष्पद्यते । अस्यैव सिद्धान्तस्य विस्तरतः स्पष्टीकरणं बलदेवविद्याभूषणेन स्वकीये गोविन्दभाष्ये कृतमस्ति । तन्मते ईश्वरः, जीवः, प्रकृतिः, कालः, कर्म चैतानि पञ्च स्थिराणि सन्ति ।

तत्र ईश्वरो विभुः चैतन्यः, सर्वज्ञः, स्वतन्त्रः, मुक्तिदाता, विज्ञानरूपश्च प्रोक्तः । जगतो निमित्तोपादानकारणमीश्वरो जगद्रूपेण परिणमन्नपि स्वरूपतयाऽभिन्न एव तिष्ठति । जीवः, अणुः, चेतनः, अनादिः, मायामोहितः, बद्धश्चास्ति । स ईश्वरावि-मुखतया बन्धने परिपतति, ईश्वरकृपया च मुक्ति लभते । स हि मुक्त्यवस्थायामीश्वर-समानमेवानन्दमनुभवति, किन्तु ईश्वरात् पृथगेव तिष्ठति । प्रकृतिः नित्या, ब्रह्मणः शक्तिस्वरूपा, ब्रह्मण्याश्रिता च । कालः परिवर्तनशीलो जडद्रव्यमस्ति । प्रलयः सृष्टे-र्निमित्तरूपो वर्तते । कर्म अनादि, नश्वरं, जडमीश्वरस्य शक्तिरूपं चास्ति ।

एवं विधस्य चैतन्यमतदार्शनिकसिद्धान्तस्य भक्तिविषयककर्मकाण्डस्य च स्वरूप-स्थिरीकरणे वृन्दावनस्य षण्णां गोस्वामिनां प्रमुखं योगदानमासीत् । वस्तुतो गोस्वा-मिनां सर्वतो मुख्यया तीव्रतरया प्रतिभया चैतन्यमतस्य धार्मिकं साहित्यिकं दार्शनिकं च स्वरूपं प्रकाशे समागतम् । गयातीर्थयात्रातः परावृत्य चैतन्यमहाप्रभुः, अध्ययनाध्या-पनाभ्यां विरतः पाण्डित्यप्रदर्शनाद्विमुखः सन् भक्तिभावनया परमेश्वरचिन्तायां निमग्नो बभूव ! तथा च शास्त्रचर्चा-पाण्डित्यप्रदर्शनं प्रति तस्य मोहो व्यपगतः । तेन स्वकीया-भ्यन्तरिकानुभवानां भाषण-लेखनद्वारा व्यक्तिकरणे प्रयासस्त्यक्तः । गभीरशास्त्रीय-तत्त्वचिन्तनप्रक्रियायां तस्य रुचिरवरुद्धा, किन्तु स निजविचाराणां प्रचारप्रसारार्थं स्वप्रियशिष्यौ सहोदरौ सनातन-रूपगोस्वामिनौ वृन्दावने गन्तुं प्रैरयत् । ताभ्यामतीव प्रखरबुद्धिभ्यां द्वाभ्यां भ्रातृभ्यां पुण्यं वृन्दावनमुपस्थाय तत्रत्यैरन्यैश्चैतन्यमतानुयायिभि-र्भक्तशिरोमणिभि मिलित्वा ग्रन्थान् प्रणीय चैतन्यमतस्य शास्त्रीयं स्वरूपं प्रदत्तम् । तत्र रूपगोस्वामिना स्वकीये भक्तिरसामृतसिन्धौ उज्ज्वलनीलमणौ च साहित्यशास्त्रे स्वीकृतानां शृङ्गारादिरसानां विवेचनं कुर्वता ते भक्तिरसे पर्यवसिताः । भक्तिरसं मुख्यं

मत्वाऽन्ये साहित्यिकरसा तदङ्गरूपेण वर्णिताः । रसस्य समस्तानि उपकरणानि एवं भक्तौ संघटितानि यथा भक्तेः रसरूपतास्वीकरे काव्यशास्त्रदृष्ट्या न काऽपि बाधा समुपतिष्ठेत । विभावानुभावसंचारिभावेषु यथावद् ध्यानं ददता तेन स्थायिभावस्य भगवद्रतेः स्थापनं विधाय भक्तिरसः साहित्यिकधरातले संस्थापितः । रूपगोस्वामिना विवेचितस्य भक्तिरहस्यस्य सम्यग् हृदयङ्गमं विधातुं रससिद्धान्तस्य साहित्यिकप्राचीन-परम्परायाः परिचयः परमावश्यको विद्यतेतराम् । अनन्तरं यतिवर्यैः पूज्यपादैः मधुसूदनसरस्वतीभिस्तु भक्तिरसायनं लिखित्वा साटोपं गम्भीरविवेचनापूर्वकं भक्तेः पञ्चमपुरुषार्थत्वं संसाधितम् ।

वृन्दावननिवासिषु चैतन्यमतानुयायिषु षड् गोस्वामिनः प्रमुखा विद्वांस आसन्—रूपगोस्वामी, सनातनगोस्वामी, जीवगोस्वामी, रघुनाथदासः, रघुनाथभट्टः, गोपालभट्ट-श्च । ते च चैतन्यमतस्य प्रचारार्थं प्रसारार्थं तदाचरणार्थं च निरन्तरं प्रयतितवन्तः ।

एवं चैतन्यदेवस्य जीवनं धर्मपरायणभक्तजीवनसदृशमासीत् । स्वयं तेन न कस्यापि नवीनस्य ग्रन्थस्य प्रणयनं कृतम्, नापि कस्यचन सम्प्रदायस्य प्रचालनं विहितम्, न वा कश्चन मठः स्थापितः । स हि श्रीमद्भागवतं महापुराणं वेदान्तभाष्यं मन्यमानो निरन्तरं भक्त्या भगवत्सान्निध्यमनुभवन् स्वकीयं जीवनं यापितवान् । चैतन्य-सम्प्रदायस्य स्थापनं तु तच्छिष्यैरेव जातम्, यत्र विशेषरूपेण वृन्दावनस्थानां षण्णां गोस्वामिनां महत्त्वपूर्णं योगदानमासीत् ।

चैतन्यस्य मते भक्तिरेव मुक्तेः मुख्यं कारणं स्वीकृतमस्ति । तत्र भक्तेः पञ्च भेदाः स्वीकृताः सन्ति (१) शान्ताभक्तिः (२) दास्याभक्तिः (३) सख्याभक्तिः (४) वात्सल्य-भक्तिः (५) मधुरभक्तिश्च विश्वनाथचक्रवर्तिना चैतन्याभिमतभक्तिसिद्धान्तं विवृण्वता संक्षेपतः प्रोक्तं यत्, चैतन्यदेवस्य सिद्धान्ते व्रजराजनन्दनन्दनो यशोदावत्सलो भगवान् श्रीकृष्ण एवैकः आराध्यदेवोऽस्ति, तस्य स्थानं गो-गोप-गोपीनां नृत्य-गीत-मण्डितं मनोरमं वृन्दावनं विद्यते, तदुपासनापद्धतेरादर्शः गोपीनां मनोरमोपासना पद्धतिरेव, श्रीमद्भागवतं महापुराणमेव प्रमाणग्रन्थः, भगवति श्रीकृष्णेऽनन्यं प्रेमैव, परमदुर्लभस्य मानवजीवनस्य परमः पुरुषार्थोऽस्ति । तत्रैवादरो विधेयोऽस्मभिर्भक्तशिरोमणिभि-र्नवमणिभिः । तथाहि—

आराध्यो भगवान् व्रजेशतनयस्तद्धाम वृन्दावनं
रम्या काचिदुपासना व्रजवधूवर्गेण या कल्पिता ।
शास्त्रं भागवतप्रमाणममलं प्रेमा पुमर्थो महान्
श्रीचैतन्यमहाप्रभोर्मतमिदं तत्रादरो नः परः ॥

भक्तिधर्मपरम्परावर्णनप्रसंगे प्रोक्तमस्ति महाभारते यत् सर्गादौ ब्रह्मणा दक्षप्रजा-

पतयेऽयं धर्मः उपदिष्टः, तेनात्मने दौहित्रे आदित्याय, तेन स्वलघुभ्रात्रे विवस्वते, तेन त्रेतायुगारम्भे मनवे, तेन चेक्ष्वाकवे प्रदत्तः, तेन च समस्ते जगति प्रचरितोऽयं धर्मः । महाभारतानुसारं देवर्षिणा नारदेन सरहस्यो भक्तिधर्मः साक्षान्नारायणादवाप्तः । अतोऽयं भक्तिमार्गो नारायणवत् सनातनो विद्यते । क्षीरोदधेरुत्तरे तीरे श्वेतद्वीपनिवासिनो मुनयो भक्तिभावेनयाएवेनं सततं भगवन्तमुपासते ।

वस्तुतो भगवान् जगतः साक्षी तथा सर्वव्यापीश्वरोऽस्ति । अतः एव न देवादीनां नाप्यसुराणां नवा महर्षीणां न च राजर्षीणां नहि मानवानां च भगवत आदिमध्यावसानानां वास्तविकं ज्ञानमुपजायते । यतोहि स अनादिः, अमध्यगः, अनन्तश्चास्ति । अत एत एव तेन धनञ्जयं प्रत्युक्तं महाभारतस्य शान्तिपर्वणि—

न चादि न मध्यं तथा चैव नान्तं
कदाचिद् विन्दते सुराश्चासुराश्च ।
अनाद्योह्यमध्यस्तथा चाप्यनन्तः
प्रगीतोऽहमीशो विभुर्लोकसाक्षी ॥ ३४२।९०

अये कुन्तीनन्दन ! एवं एनेकविधं रूपं धृत्वाहं पृथिव्यां विचरामि, ब्रह्मलोके तिष्ठामि, सनातने गोलोके च नित्यं विहरामि—

एवं बहुविधैः रूपैश्चरामीह वसुन्धराम् ।
ब्रह्मलोकं च कौन्तेय ! गोलोकं च सनातनम् ॥ ३४२।१३८ ॥

ज्ञानिनो जना नारायणमेव समस्तशास्त्राणां परमं लक्ष्यं कथयन्ति तदतिरिक्तः तत्समानः कश्चिदरन्यो नास्ति । साङ्ख्यं योगश्च द्वे सनातनशास्त्रे वेदावेदान्ता ऋषयो महर्षयश्च नारायणमेव विश्वस्य कारणं कथयन्ति । स्वर्गेऽन्तरिक्षे भूतले जले वा सर्वत्र यत् किञ्चित् शुभमशुभं वा कर्म जायते, तत्सर्वं नारायणसत्तयैव भवति । अतः सर्वस्य जगतो मूलं कारणं नारायण एवास्तीति निश्चप्रचम् । तथाहि ।

साङ्ख्यं च योगं च सनातने द्वे ।
वेदाश्च सर्वे निखिलेन राजन् !
सर्वैः समस्तैः ऋषिभिर्निरुक्तो-
नारायणो विश्वमिदं पुराणम् ॥
शुभाशुभं कर्मसमीरितं यत्
प्रवर्तते सर्वलोकेषु किञ्चित् ।
तस्मादृषेस्तद्भवतीति विद्याद् ।
दिव्यन्तरिक्षे भुवि वाप्सु चेति ॥
(म० भा० शा० प० मोक्षधर्म ३४९।७३,७४)

जीवानां क्रमिकविकासविमर्शः

जीवानां क्रमिकविकासे विवेचनीये तत्कारणमपि समालोचनीयतामर्हतीत्यभिप्रेत्य तत्सम्बन्धेऽपि किञ्चिदनुसन्धीयते । शक्तिशक्तिमतोरभेदनियमाद् ब्रह्मणि तदीयशक्तौ चाभेदो लक्ष्यते । अत एव ब्रह्मणि तदीयशक्तिरूपिण्यां मूलप्रकृतौ च शास्त्रेषु अभिन्नता प्रतिपादिताऽस्ति । यथा गानपरायणस्य पुंसो गानशक्तिः गानमकुर्वति तस्मिन् अव्यक्तदशायां तिष्ठति । तदानीं च कश्चिदपि नावधारयितुमर्हति यदयं गायकोऽस्ति, किन्तु गानसमये सर्वोऽपि विजानाति यदस्मिन् गानशक्तिर्विद्यते, तथैव ब्रह्मशक्ति प्रकृतिर्यदा ब्रह्मण्यव्यक्तावस्थायां तिष्ठति तदा जागतिकप्रपञ्चानां विलयः, किन्तु यदा सा सृष्टिकाले व्यक्तावस्थामापद्यते, तदा सूक्ष्मस्थूलभावपरिपूर्णं सृष्टिवैचित्र्यमभिलक्ष्यते ।

यद्वा यथा गानपरायणं पुमांसमदृष्ट्वापि श्रोता तद्गानेन विमुग्धो भवति तथैव ब्रह्मस्वरूपानभिज्ञोऽपि जीवो महामायायां ब्रह्मशक्तौ ग्रस्तो मोमुह्यमानो दरीदृश्यते । अत एव शक्तिमता पुरुषेण सह शक्तिस्वरूपिण्याः प्रकृतेः नाणीयानपि अस्ति भेदः । अग्नौ दाहिकाशक्तिरिव भगवति शक्तिस्वरूपिणी प्रकृतिर्निहिता तिष्ठति । सर्गादौ समष्टिजीवप्रारब्धानुसारेण परमेश्वरे यदा जगतः सिसृक्षा समुत्पद्यते तदा शक्तेरेतस्या विकासो जायते । तथा चोक्तम्—

शक्तिशक्तिमतोर्भेदं वदन्ति परमार्थतः ।
अभेदं चानुपश्यन्ति योगिनस्तत्त्वचिन्तकाः ॥
योगेनात्मसृष्टिविधौ द्विधारूपो बभूव ह ।
पुमांश्च दक्षिणार्द्धांशो वामार्द्धा प्रकृतिः स्मृता ॥
सा च ब्रह्मस्वरूपा च नित्या सा च सनातनी ।
यथात्मा च तथा शक्तिर्यथाग्नौदाहिका स्थिता[1] ॥

देवीभागवते तु—

स्वयं पुमांश्च प्रकृतिस्तावभिन्नौ परस्परम् ।
यथा वह्नेस्तस्य शक्तिर्न भिन्नाऽस्त्येव कुत्रचित् ॥
सेयं शक्तिर्महामाया सच्चिदानन्दरूपिणी ।
रूपं बिभर्त्यरूपा च भक्तानुग्रहहेतवे[2] ॥

श्रीमद्भागवते च प्रोक्तमस्ति यत् सृष्टेः पूर्वं दृश्यमानमिदं समस्तं प्रपञ्चं यदा जले निमग्नमासीत् तदैकमात्रं श्रीमन्नारायणः शेषशय्यायां शयनो योगनिद्रामाश्रित्य निमीलितनयनः आनन्दमनुभवति स्मः । यथानलः स्वां दाहिकां शक्ति स्वस्मिन्नन्तर्भाव्य

१. कालिकापुराणे ७ । २. ४. ५ । २. देवीभागवते–९।३८।२७–२९

काष्ठे व्यापकरूपेणावतिष्ठते तथैव नारायणोऽपि निखिलजीवानां सूक्ष्मशरीराणि स्वस्मिन्यन्तर्भाव्य जले शयानः तिष्ठति, सृष्टिकाले च पुनः स्वां कालशक्ति प्रेरयति—

उदाप्लुतं विश्वमिदं तदासीद्
यन्निद्रया मीलितदृङ्न्यमीलयत् ।
अहीन्द्रतल्पेऽधिशयान एकः
कृतक्षणः स्वात्मरतौ निरीहः ॥
सोऽन्तः शरीरेऽर्पितभूतसूक्ष्मः
कालात्मिकां शक्तिमुदीरयाणः ।
उवास तस्मिन् सलिले पदे स्वे
यथाऽनलो दारुणि रुद्धवीर्यः[१] ॥

तस्या एव ईश्वरशक्तेः शास्त्रेषु विभिन्नानि नामानि श्रूयन्ते । ते ते आचार्याः स्वस्वकृतिषु तामीश्वरशक्ति विभिन्नैर्नामभिर्व्यवहरन्ति, यया स दृश्यमानमिदं समस्तं विश्वं विरचयति । तत्र केचनाचार्यास्तां तप इति ब्रुवते, केचित्तम इति कथयन्ति, अन्ये जड इत्यभिदधति, इतरे अज्ञानमिति ज्ञापयन्ति, अपरे प्रकृतिमिति प्रख्यापयन्ति, एके प्रधानमिति निगदन्ति, भिन्ना अजामिति बोधयन्ति, शाक्ताः शक्तिमिति सम्बोयन्ति, अद्वैता अविद्यामिति उच्चारयन्ति, पौराणिकाश्च मायामिति व्यापदिशन्ति तथाहि पद्मपुराणस्य सप्तमे क्रियायोगसारखण्डे स्पष्टं तया प्रोक्तमस्ति—

आद्या प्रकृतिरेतस्य महाविष्णोः परात्मनः ।
निदानं भूतविश्वस्य विद्याऽविद्येति गीयते ॥[२]
केचित्तां तप इत्याहुस्तमः केचिज्जडं परे ।
ज्ञानं मायां प्रधानञ्च प्रकृतिं शक्तिमप्यजाम् ॥[३]

अपि च—

सा विद्येत्यभिधीयते श्रुतिपथे शक्तिः सदाद्या परा ।
सर्वज्ञा भवबन्धछित्तिनिपुणा सर्वाश्रये संस्थिता ॥[४]

सा वा एतस्य संस्रष्टुः शक्तिः सदसदात्मिका ।
माया नाम महाभाग ! ययेदं निर्ममे विभुः ॥[५]

---

१. श्रीमद्भागवते–३।८।१०–११ । २. पद्मपुराणे च–७।२।७ । ३. देवीपुराण ५।२।७ । ४. कालिकापुराण ९।२१ । ५. आ० वि० वि० ५१ ।

देवीभागवतेऽपि—

> मूलप्रकृतिरेवैषा सदा पुरुषसङ्गता ।
> ब्रह्माण्डं दर्शयत्येषा कृत्वा वै परमात्मने ॥[1]

यथा दृश्या अनुभवगम्याश्च सर्वे पदार्थाः त्रिप्रकारा भवन्ति तथैव विश्वसृष्टिरपीयम् आध्यात्मिकी, आधिदैविकी, आधिभौतिकी चेति भेदात् त्रिधा विभक्ता परिदृश्यते विश्वस्मिन् किञ्चिदपि निर्गुणात्मकं नास्ति—

> वस्तुमात्रं तु यद् दृश्यं संसारे त्रिगुणं हि तत् ।
> दृश्यं च निर्गुणं लोके न भूतं न भविष्यति ॥[2]

कारणे ब्रह्मणि भावत्रयसत्वात् कार्यब्रह्मस्वरूपसर्गेऽप्यत्र सर्वत्रैव त्रयो भावा भवन्ति । अतः परम-पुरुषोऽसौ आध्यात्मिकाधिदैविकाधिभौतिक-त्रिविधरूपेण साधकानां दृष्टिगोचरतामापद्यते । तस्य ब्रह्मणः अध्यात्मिकं रूपं मायातीतं निर्गुणपरब्रह्मपदवाच्यम्, आधिदैविकं सगुण-परमेश्वरनाम्ना अभिधीयते, आधिभौतिकञ्च अनाद्यनन्तविराट्पुरुषसंज्ञया स्वीकृतमास्ते । अतः त्रिगुणात्मिकां स्वां प्रकृतिं मायामधिष्ठाय विश्वस्मिन्नवतीर्यं त्रिधा विभज्य त्रिविधां सृष्टिमसौ विधत्ते—

> योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः ।
> यस्तत्रोभयविच्छेदः पुरुषो ह्याधिभौतिकः ॥
> एकमेकतराभावे यदा नोपलभामहे ।
> त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ॥
> अधिदैवतमध्यात्ममधिभूतमिति प्रभुः ।
> अथैकं पौरुषं वीर्यं त्रिधामित्यथ तच्छृणु ॥[3]

श्रीमद्भागवतेपि—

> एष ह्यशेषसत्त्वानामात्मांशः परमात्मनः ।
> आद्योऽवतारो यत्राऽसौ भूतग्रामो विभाव्यते ॥
> साध्यात्मः साधिदैवश्च साधिभूत इति त्रिधा ।[4]

कूर्मपुराणस्य पूर्वार्द्धे तु—

> इयं सा परमा शक्तिर्मन्मयी ब्रह्मरूपिणी ।
> माया मम प्रियानन्ता ययेदं धार्यते जगत् ॥

---

१. देवीभागवत ३।६।६९, २. श्रीमद्भावगत ६।२६।१०
३. त० वि० ४२, ४३, ४४। ४. श्रीमद्भागवत ३।६।८९ ।

अनयैव जगत् सर्वं सदेवासुरमानुषम् ।
मोहयामि द्विजश्रेष्ठा ग्रसामि विसृजामि च ॥
सैषा सर्वजगत्सूतिः प्रकृतिस्त्रिगुणात्मिका ।
प्रागेव मत्तः सञ्जाता स्त्रीकल्पे पद्मवासिनी ॥[१]

प्रकृतेः त्रैविध्यात्तत् सम्बन्धेनैव भगवतः त्रिविधमिदं स्वरूपं समुपवर्ण्यते, न वास्तविकम् । अन्यथा "एकमेवाद्वितीयं ब्रह्म" इति श्रुतिप्रतिज्ञा व्याहन्येत । देवी-भागवते च—

एकमेवाद्वितीयं वै ब्रह्म नित्यं सनातनम् ।
द्वैतभावं पुनर्याति काले उत्पित्सुसंज्ञके ॥[२]

सृष्टिस्तावत्त्रिविधा—आध्यात्मिकी, आधिदैविकी, आधिभौतिकी च । तत्र भगवतः स्थूलशरीरस्वरूपः विराट्सृष्टिप्रवाहः आध्यात्मिकसृष्टिसंज्ञया शास्त्रेष्वभिधीयते, आधिदैविकी सृष्टिः ब्रह्माण्डसृष्टिः कथ्यते, आधिभौतिकी च पिण्डसृष्टिर्निगद्यते । तत्राद्या अनाद्यनन्ता, द्वितीया तृतीया वा सादी सान्ते च विज्ञातव्ये ।

आध्यात्मिक्याः सृष्टेः अनाद्यनन्तत्वाद् ब्रह्मसत्तावत् प्रकृतिरपि अनाद्यनन्ता यतो हि सा ब्रह्मस्वरूपिणी । अतः तस्या अनाद्यनन्तता स्वतः सिद्धाः । प्रकृतेरव्यक्तावस्थायां परमात्मा ब्रह्मनाम्ना अभिधीयते, व्यक्तदशायां सगुणत्वाद् ईश्वरनाम्ना व्यवह्रियते, सृष्टेरनाद्यनन्तधारासम्बन्धेन च विराट्-पुरुषसंज्ञया व्यपदिश्यते । आध्यात्मिक्याः सृष्टेः अनाद्यनन्तत्वाद् यस्या महाप्रकृतेः गर्भे आध्यात्मिकी सृष्टिर्बोभवीति तस्याः किल अनाद्यनन्तत्वे का संशीतिः । तथा चोक्तम्—

"त्वं सर्वादिरनादिस्त्वं कर्त्री हन्त्री च पालिका" ।[3]

वस्तुतः अनन्तानि ब्रह्माण्डानि सन्ति । तत्र प्रत्येकब्रह्माण्डे पृथक्-पृथक् ब्रह्म-विष्णु-महेश्वराः सन्ति । तदीयाः कार्यविभागा अपि स्वतन्त्रा भिन्ना भिन्ना भवन्ति, अतएव विभिन्नानां ब्रह्माण्डानां सृष्टि-स्थिति-प्रलया अपि विभिन्नतामुपयन्ति—

संख्या चेद्रजसामस्ति विश्वानां न कदाचन ।
ब्रह्म-विष्णु-शिवादीनां तथा संख्या न विद्यते ॥
प्रतिविश्वेषु सन्त्येवं ब्रह्मविष्णुशिवादयः ।
पातालाद्ब्रह्मलोकान्तं ब्रह्माण्डं परिकीर्तितम् ॥
प्रत्येकं लोमकूपेषु ब्रह्माण्डं परिनिश्चितम् ।
प्रत्येकं प्रतिब्रह्माण्डं ब्रह्मविष्णुशिवादयः ॥[४]

---

१. कू० पु० उ० ११३४.३५.३८ । २. देवीभागवत ।६।४।
३. कालिकापुराण २।११ । ४. देवीभागवते ९।७.८.१७ ।

यथा स्थूलशरीरस्य जरारोगमृत्यवो भवन्ति तथैव प्रत्येकब्रह्माण्डे ब्रह्मणो दिवसावसाने खण्डप्रलयो रुद्रस्यायुषोऽन्ते च महाप्रलयो बोभवीति । तदा त्रिमूर्तौ ब्रह्मविलीनायां ब्रह्माण्डस्यैकस्य महाप्रलयः सम्पद्यते । अखिलब्रह्माण्डनायकस्य योगमायायाः अक्षिपक्ष्मसञ्चालनमात्रेणापि समस्तं विश्वमुत्पद्यते, अपि च तस्या एव प्रभावेण ब्रह्मविष्णुमहेश्वराणामपि सृष्टिस्थितिप्रलया बोभवन्तीति—तथा चोक्तं देवीभागवते—

या नेत्रपक्ष्मसञ्चलनेन सम्यग्
विश्वं सृजत्यवति हन्ति निगूढभावा ।
सैषा करोति सततं द्रुहिणाच्युतेशान्
नानावतारकलने परिभूयमानान् ॥[1]

अपिच—

जानीहि त्वं महाराज ! योगमायावशे जगत् ।
ब्रह्मादिस्तम्बपर्यन्तं देवमानुषतिर्यगम् ॥
मायातन्त्रीनिबद्धा ये ब्रह्म-विष्णु-हरादयः ।
भ्रमन्ति बन्धमायान्ति लीलया चोर्णनाभवत् ॥[2]

अनाद्यनन्तसृष्टिप्रलयप्रवाहे प्राणिनामुत्पत्तिमुक्तिविषये एवं प्रमाणमुपलभ्यते—

निखिला एव संस्काराः साद्यन्ताः सम्प्रकीर्तिताः ।
अतो जीवप्रवाहेऽस्मिन् अनाद्यन्तेऽपि जन्तवः ॥
मुक्तिशीलास्तथोत्पत्तिशालिनः सन्ति सर्वथा ।
नैवात्र विस्मयो कार्यो भवद्भिरमृतान्धसः ॥[3]

एवमेकब्रह्माण्डीयजीवानां स्थूलानि सूक्ष्माणि वा शरीराणि नूनं प्रणाशमापद्यन्ते । तस्माद् ब्रह्माण्डं पिण्डं (जीवदेहः) चोभे विनश्वरे भवतः । त्रिगुणात्मिकायाः प्रकृतेः वैभवस्वरूपे ब्रह्माण्डपिण्डे द्वे अपि त्रिगुणविलासपार्थक्यात् सृष्टि-स्थिति-प्रलयाधीने भवतः—

यदा सिसृक्षुः परमात्मनः परो
रजः सृजत्येष पृथक् स्वमायया ।
सत्त्वं विचित्रासु रिरंसुरीश्वरः
शयिष्यमाणस्तम ईरत्यसौ ॥[4]

---

१. देवीभागवत ५।१।२९ । २. तत्रैव ५।१।५३-५४ ।
३. श्रीमद्भागवत ७।१।७० । ४. देवीपुराण ३।१७ ।

अनन्तब्रह्माण्डमयी आध्यात्मिकी सृष्टिधारा अनाद्यनन्ता, किन्तु प्रकृतेः त्रिगुणमयत्वात् प्रत्येकं ब्रह्माण्डं नश्वरमभ्युपगन्तव्यम् । भगवतो रुद्रस्यायुषा सह ब्रह्माण्डस्यैकस्यायुः निर्णीतम् । रुद्रायुषोऽन्ते यश्च विष्णुः यो वा ब्रह्मा स्तः ताभ्यां सहैव ब्रह्माण्डं विलीयते । अतो व्यष्टिरूपेण प्रत्येकं ब्रह्माण्डस्य सृष्टि-स्थिति-विलया भवन्ति । अस्मादेव कारणात् प्रतिब्रह्माण्डं सृष्टिकर्ता ब्रह्मा, स्थितिकर्ता विष्णुः, संहारकर्ता च रुद्रः पृथक् पृथक् विद्यन्ते । ब्रह्माण्डवज् जीवदेहात्मकः पिण्डोऽपि नश्वरः ।

जीवोऽत्र संसारे क्रमशः उद्भिज्जस्वेदजाण्डजजरायुजयोनिषु उत्पन्नो भूत्वा नैजं प्रारब्धं भुञ्जानोऽन्ते निधनं प्रपद्यते । एवं च सर्वेऽपि जीवा स्वस्वकर्मफलभोगानन्तरं विलयमुपगच्छन्तीति नात्र कश्चनास्ति सन्देहः । स्मर्यते चात्र—

यदिदं दृश्यते किञ्चिज्जगत् स्थावरजङ्गमम् ।
पुनः संक्षिप्यते सर्वं जगत्प्राप्ते युगक्षये[1] ॥

पुराणानुसारं निर्विकारः, अजन्मा पुराणपुरुषः, पुरुषोत्तमो यदा सत्त्वादिगुणानां जन्मादिकर्मणाञ्च कारणभूतायां मायाशक्तिप्रकृतौ चिदाभासं रूपं वीर्यं निधत्ते तदा प्रपञ्च एष समुत्पद्यते । तथाचोक्तमिन्द्रियाधिष्ठात्रीभिः देवताभिः—

त्वं नः सुराणामसि सान्वयानां कूटस्थ आद्यः पुरुषः पुराणः ।
त्वं देवशक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविरादधेऽजः[2] ॥

अपिच—

स आदिः स मध्यः स चान्तः प्रजानां
स धाता स धेयः स कर्ता च कार्यम् ।
युगान्ते प्रसुप्तः सुसंक्षिप्य लोकान्
युगादौ प्रबुद्धो जगद्व्युत्ससर्ज[3] ॥

ईश्वरः किल सृष्टिकर्मणि बीजदाता पितृस्थानीयः क्षेत्रस्वरूपा च प्रकृतिः जननी निर्द्धारिता । यथाऽङ्कुरोत्पत्तक्षेत्रे बीजमुप्यते तथैव प्रकृतिक्षेत्रे परमपुरुषस्य बीजवपनेन सृष्टिविस्तारो जायते । मानवजगति यथा सृष्टिविस्तारहेतवे मातु रुदरे पितुर्वीर्यमाधीयते तथैव क्षेत्रे परमेश्वरस्य वीर्याधानेन अनन्तकोटिब्रह्माण्डरूपिण्या विराट्सृष्टेः समुद्भवो भवति । तथाचोक्तं श्रीमद्भगवद्गीतायाम्—

१. कालिकापुराण ५।७ । २. श्रीमद्भागवत ३।५।४९ ।
३. महाभारत शान्ति पर्व मोक्षधर्म ३४०।१०० ।

मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।
सम्भवः सर्वभूतानां ततो भवति भारत ।
तेषां ब्रह्म महद् योनिरहं बीजप्रदः पिता[1] ॥

मनुस्मृतावपि विज्ञानमेतद् भगवता मनुना समर्थितमास्ते

द्विधा कृत्वाऽऽत्मनो देहमर्द्धेन पुरुषोऽभवत् ।
अर्द्धेन नारीतस्यां सं विराजमसृजत् प्रभुः[2] ॥

श्रुतिश्च "ततो विराडजायत"। इयमेव मातृस्थानीया ब्रह्मशक्तिस्वरूपिणी प्रकृतिः शास्त्रेषु संस्त्यानशक्तिः सलिलस्वरूपा प्रोक्ता । इमामेव विश्वस्य संस्थानशक्तिमभिलक्ष्य भगवता पतञ्जलिना महाभाष्ये "संस्त्यानरूपा स्त्रीः प्रवृत्तिरूपः पुरुषः" इति सोपष्टम्भं प्रोक्तम् । संस्त्यानसंहनन-सम्मिलन-शक्तिसद्भावाद् अप एव प्रकृतेर्नाम । यतोऽप्सु मेलनशक्तिर्वर्तते । महाप्रलयकाले समस्तब्रह्माण्डोपादानभूतं सर्वमपि प्रच्छन्नरूपेण प्रकृतेरङ्के विलीनं तिष्ठति। तदा सदसत् किमपि नासीत्, केवमलम्भ एवाभवत्। अस्यामेवानन्तजीवसंस्कारसम्बलितायामव्याकृतप्रकृतौ सर्वतः प्रथमं परमपुरुषेण वीर्यप्रदानपूर्वकं गर्भाधानं क्रियते । एवं त्रिगुणमय्या प्रकृत्या साकं लीलापूर्वकगर्भाधानद्वारा अनन्तकोटिजीवोत्पत्तिप्रकारोऽवसेयः । परमपुरुषवीर्याधानेनैव क्रमशो महत्तत्त्वादयः समुत्पन्नाः सृष्टिविकासं समेधयन्ति । एतदेव मनुसंहितायां प्रकारान्तरेण व्यक्तं समुपलभ्यते—

सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु बीजमावासृजत्[3] ॥

एवञ्च प्रलयदशायां सदसतोरभावात् कस्यापि वस्तुनः सत्ता नासीत् । केवलमव्याकृतप्रकृतिगर्भे विलीनाः संस्कारसमूहास्तदवबोधकोऽद्वितीयचैतन्यमयः परमात्मैवाविद्यत । स एव सृष्टिप्रारम्भसमये एकत्वाद् बहुत्वकामनया प्रलयगर्भविलीनजीवसंस्कारानुसारेण कल्पसृष्टिं प्रकाशयति । एकभावापन्नः परमात्मैव स्वं शरीरं द्विधा विभज्य प्रकृतिं विकाशयति । तस्या एव गर्भे विराड् विश्वमुत्पादयति । अतो दर्शनशास्त्रे सत्यस्वरूपस्य ब्रह्मणः शक्तिसमुत्पन्नायाः सत्यस्वरूपिण्याः प्रकृतिमातुर्लीलावैभवरूपं जगदपि सत्यमेव प्रतिभातीति सिद्धान्तितम् । अस्यां जडचेतनात्मकप्रकृतिपुरुषश्रृङ्गारसमुत्पन्नसृष्टिलीलायां प्रवाहद्वयमभ्युपगम्यते । एक ऊर्ध्वगामी चेतनप्रवाहः, द्वितीयश्चाधोगामी जडप्रवाहः । तत्र जीवो नानायोनिषु परिभ्राम्यन् ऊर्ध्वगाहिनीं

---

१. श्रीमद्भागवद्गीता १४।३.४ २. मनु स्मृति १।३३ ३. म० स्मृ० १।८

चेतनधारामवलम्बमानः क्रमशः समुन्नमन् अन्ते तदुन्नतिपराकाष्ठां मुक्ति लभते । ततस्तदन्तर्गतो जडांशः प्रकृतिधारायां निलीयते । चेतनधारायाः पराकाष्ठा ब्रह्मसद्भावो यत्र प्रकृतेः पृथक् सत्ता विलीयते । एवं च चेतनप्रवाहः प्राकृतिकं रजस्तमोमयं राज्यमतिक्रम्य सत्त्वे समुपस्थितः समुन्नतेः परायां काष्ठायां व्यापिकायां चेतनधारायां विलीयते । तदीयो देहः मृत्योरनन्तरं चैतन्याभावात् प्रणाशमुपच्छति । यया प्राण-शक्त्या देहान्तर्गताः परमाणवः परस्परं विच्छिन्नाः सन्तः जडायाः प्रकृतेरधोगतिरूपं तमोऽभिमुखं प्रयान्ति ।

प्रकृतिः परिणामिनी चञ्चला चेति हेतोः चेतनप्रवाहः क्रमशः समुन्नतो भवन् सत्त्वराज्यमतिक्रमन् त्रिगुणमय्याः प्रकृतेः स्वभाविकीं धारां निस्तीर्य परिणामरहितः सन् स्थिरो जायते, किन्तु जडप्रवाहः नियतपरिणामशीलायाः प्रकृतेः नित्यमन्तर्ग-तत्वात् परिणामशून्यः स्थिरो भवितुं नार्हति । जडायाः प्रकृतेः अन्तिमा सीमा प्रस्त-रादयः स्थावरपदार्थाः सन्ति । इयमेव तमोगुणस्य परा काष्ठा ।

यथा किल सामुद्रिकास्तरङ्गा घातप्रतिघाताभ्यां तीरमायाताः अग्रे गतिनिरोध-धसत्त्वात् पुनः समुद्राभिमुखं प्रयान्ति तथैव प्राकृतिको निम्नगामी प्रवाहः क्रमशो निम्नत्वमुपढौकमानः तमोगुणस्य परां काष्ठां प्राप्तोऽग्रे स्थानमनवाप्य पुनरपि तमो-गुणाद् रजोगुणाभिमुखं (जडतश्चैतन्याभिमुखम्) स्वभावत एवाग्रे सरति । तदानीं तमोगुणतो रजोगुणाभिमुखं प्रतिष्ठमानस्य प्रकृतिप्रवाहस्य किञ्चित् समुन्नत्या तमो-गुणमालिन्यापसृत्या तत्र ईषत् स्वच्छताया आविर्भावो जायते । यथा भगवतो सूर्यस्य किरणच्छायायाः सर्वत्र विद्यमानत्वेऽपि मलिनो दर्पणः प्रतिबिम्बग्रहणासमर्थः, किन्तु स एव यदि निर्मलीकृतो भवेत्तदा तत्र व्यापकस्य सूर्यस्य प्रतिबिम्बं प्रतिफलत्येव तथैव सर्वं व्यापकस्यात्मनः चित्सत्तायाः सर्वत्र सत्त्वेऽपि सा तामसिकप्रवाहमालिन्याद् तत्र नैव विकासमापद्यते, किन्तु प्राकृतिकः प्रवाहः तमोगुणस्यान्तिमकाष्ठातः किञ्चित् समुन्नततां प्रपद्यते । तदा तत्र स्वच्छीभूते सूक्ष्मप्रकृतिकेन्द्रे व्यापकस्य परमात्मना यः प्रतिबिम्बो निपतति, स एव ब्रह्मणः प्रतिबिम्बो जीवसंज्ञां धत्ते । तथाहि –

> अविद्यायां च यत् किञ्चित् प्रतिबिम्बं नगाधिप ।
> तदेव जीवसंज्ञं स्यात् सर्वं दुःखाश्रयं पुनः ॥[1]

श्रीमद्भगवद्गीतायामपि भगवान् श्रीकृष्णः प्रोवाच—

> ममैवांशो जीवलोके जीवभूतः सनातनः[2] ।
> अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।

अपिच— जीवभूतां महाबाहो ! ययेदं धार्यते जगत्[3] ॥

१. देवीभागवत २।७।४५ २. ३. श्रीमद्भगवद्गीता १५।७, ७।५

महाभारतस्य शान्तिपर्वणि मोक्षधर्मेऽपि जीवात्मा परमात्मनोंऽशः स्वीकृतोऽस्ति—

जीवमात्मगुणं विद्यादात्मानं परमात्मनः[1] ।

एवं हि अंशशब्देन कल्पितस्य जीवात्मनः प्रथमविकाससमय अविद्यायाः प्रबलेनान्धकारेण समाच्छन्ने तमोमयान्तःकरणे एतावत्तारल्यभावमापन्नमात्मज्योतिः प्रतिफलति यद् यच् चिदाभासतः चित्प्रतिबिम्बाद् वा अन्यत् किमपि अभिधातुं न शक्यते। तदेव ज्योतिः प्रकृतिराज्ये समुन्नमद् यथा-यथा अविद्यान्धकारतो विमुच्यते तथा-तथा तत् स्वीयां तां ज्ञानमयीं प्रभां प्रदर्शयति यया व्यापकेन चिन्मयस्वरूपेण सह तस्य अंशांशिभावसम्बन्धो ज्ञानराज्यविचरणशीलैः साधकैः सदैवानुभूयते । विषयमिमं स्पष्टयितुं भगवान् महर्षिवेदव्यासः स्वकीये वेदान्तदर्शने सूत्रयाञ्चकार—

"अंशो नानाव्यपदेशात्" [2]।। इति

यथा एक एव आकाशो घटाकाश-मठाकाशादिना भिद्यते तथैव अन्तःकारणोपाधिभेदेन एकमेव ब्रह्म संख्यातीतरूपेण परिव्याप्तं विलोक्यते। तस्मादेक एव विभुः परमात्मा उपाधियुक्तः सन् अंशस्वरूपतो नानात्वं भजते । अत एवोक्तम्—

वालाग्रशतभागस्य शतधा कल्पितस्य च ।
जीवो भागः स विज्ञेयः स चानन्त्याय कल्पते[3] ।।

यथा वा एक एव निराकारोऽग्निः साकाररूपेण प्रज्वलितः सन् आधारभेदाद्भिन्नः प्रतीयते तथैव जीवमात्रेऽन्तर्यामितया सर्वत्र स्थित एक एव परमात्मा विभिन्नप्राणिषु तदनुरूपतया विविन्नरूपोऽनुभूयते । वस्तुत एक एवेश्वर आधारभूतस्य बस्तुनः शरीरादेरनुरूपयता विश्वस्मिन् जीवरूपेण अनेकः प्रतीयते । तथाहि --

अग्निर्यथैको भुवनं प्रविष्टो
रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा
रूपं रूपं प्रतिरूपो बभूव[4] ।।

प्रकृतेः अतिसूक्ष्मोंऽशो यत्र चैतन्यं भवति स एव कारणशरीरनाम्ना निगद्यते। ततः प्रकृत्या सम्बन्धनिबन्धनस्य जीवस्य इच्छया सूक्ष्मशरीरमुत्पद्यते। तद्गतसंस्कार समूहतीव्रवेगानुसारेण च दृश्यमानं स्थूलं शरीरमुद्भवति । एवं शरीरत्रयेण

---

१. म० भा० शा० प० १४१।१९ । २. ब्रह्मसूत्र २।३।४३ ।
३. कौशितकी उपनिषद् ५।१ । ४. कठोपनिषद् २।२९ ।

भोगादिना बद्धो जीवः उद्भिज्ज-स्वेदज-अण्डज-जरायुजानां योनीरतिक्रमन् मानवयोनिमुपढौकते ।

मनुष्ययोनौ असंख्याकविभिन्नगतिलाभाद् मानवयोनिसंख्या शम्भुगीतायां निर्धारिता विलोक्यते । तदनुसारं विंशतिलक्षसंख्याकाः स्थावरयोनयः सन्ति, कृमियोनय एकादशलक्षसंख्याकाः, जलचरयोनयो नवलक्षसंख्याकाः, पक्षियोनयो दशलक्षसंख्याकाः, पशुयोनयः त्रिंशल्लक्षप्रकाराः, वानवयोनयश्च चतुर्लक्षविधा भवन्ति । तथाचोक्तम्—

स्थावरे लक्षविंशत्यो कृमिजं रुद्रलक्षकम् ।
जलजं नवलक्षं च पक्षिजं दशलक्षकम् ॥
पश्वादीनां लक्षत्रिंशच्चतुर्लक्षं च वानरे ।
ततो हि मानवा जाताः कुत्सितवादे विलक्षमम् ॥[1]

तथा च संकलनया चतुर्विधभूत संघस्य-(२० + ११ + ९ + १० + ३० + ४ = ८४) चतुरशीति-लक्ष-प्रकारा योनयो भवन्ति।" चतुरशीतिलक्षान्ते मानवः, इति वचनानुसारं जीवः पूर्वं प्रोक्तचतुरशीतिलक्षसंख्याकासु विविधासु योनिषु जन्म गृहीत्वा मनुष्ययोनौ जन्म गृह्णाति । तत्र सत्कर्मणा समुन्नतिम् असत्कर्मणा चावनतिं लभमानः तत्फले सुखदुःखे अनुभवति ।

तत्त्वनिरूपणप्रसङ्गे देवर्षिनारदमुपदिशता ब्रह्मणा देवीभागवतेऽपि चतुरशीतिलक्षसंख्याका जीवयोनयः प्रोक्ता । तथाहि—

सर्वे जीवा मिलित्वैव ब्रह्माण्डांशसमुद्भवाः ।
चतुरशीतिलक्षाश्च प्रोक्ता वै जीवजातयः[2] ॥

मानवेतरचतुर्विधभूतसंघस्य योनिषु स्वाभाविकसंस्काराश्रयेण तद्गता जीवा क्रमोर्ध्वगामिनो भवन्ति, किन्तु मानवयोनौ जीवः स्वतन्त्रः सन् संस्काराधीनो जायते । अतोऽसौ क्रमोन्नतिमप्राप्तो निजकर्मानुसारेण कदाचिदुन्नतः कदापि चावनतो भिन्नां भिन्नां गतिमासादयति ।

उद्भिज्जयोनिमारभ्य जरायुजयोनिपर्यन्तं जीवो निर्बाधं क्रमोन्नतिमासादयति, यतो हि तासु योनिषु बुद्धेर्मालिन्येन जीवः स्वकर्मणः स्वतन्त्रसंस्कारार्जनं न कर्तुं पारयति, केवलं प्रकृतिरेव माता शिशुमिव स्वाभाविकसंस्काराननुसृत्य क्रमशो जीवान् सम्वर्द्धयति । यथा नद्या प्रवहमाणः काष्ठखण्डोऽपवेगेनैव समुद्राभिमुखमानीयते तथैव

१. शंभुगीता १७, १८ । २. शंभुगीता २५ ।

मानवभिन्ना जीवाः, प्रकृतेरूर्ध्वगामिना प्रवाहेण उद्भिज्ज-स्वेदज-अण्डज-जरायुजान्तं क्रमशः समुन्नतां योनिं नीयन्ते । तदानीं प्रकृतिमातुरधीनत्वाज् जीवानां क्रमोन्नति-र्निर्बाधं जायते, परन्तु मानवयोनिमधिगते जीवे पूर्णरूपेण पञ्चकोषा विकाशं प्राप्नुवन्ति तत्राहङ्कारबुद्ध्योरपि विकासो जायते । तदानीं मानवः प्रकृतौ स्वामित्वं स्थापयति, प्रकृतिमातुरधीनतां च परित्यजति । अतः प्रागेव प्रकृतिदायित्वस्य तिरोधाने स्वयं मानवः स्वकृतानां कर्मणां दायित्वं भजते । अतो मानवयोनौ धर्माधर्मयोरधिकारः समाम्नातः । तथाचोक्तम्--

मानुषेषु महाराज ! धर्माधर्मौ प्रवर्ततः ।
न तथान्येषु भूतेषु मनुष्यरहितेष्विह ॥
इयं हि प्रथमा योनिः यां प्राप्य जगतीपते !
आत्मा वै शक्यते त्रातुं कर्मभिः शुभलक्षणैः ॥

मनुष्ययोनौ कर्मानुष्ठानाधीनत्वात् स्वीयपुरुषार्थैर्मानवः स्वीयां समुन्नतिमनुष्ठातुमर्हति, स्वीयेन पापकर्मणा च नीचामपि पापयोनिमसादयितुं शक्नोति । अतः शास्त्रेषु सर्वापेक्षया मानवजन्मनोऽभ्यर्हितत्वमुपपादितम् । अहङ्काराक्रान्तचित्तो मानवः प्रकृतेरूर्ध्वगामिनं प्रवाहं परित्यजन् स्वेच्छाचारी सन् विपरीतगतिस्वरूपामवनतिं लभते । तस्मिन् समये धर्मो हि मानवसाहाय्यमाचरन् शास्त्रीयविधानद्वारा तस्या-वनतिं निरुध्य क्रमोन्नतिमार्गे तं परिचालयति । तथाचोक्तं स्मृतौ —

उन्नतिं निखिला जीवा धर्मेणैव क्रमादिह ।
विदधाना सावधाना लभन्तेऽन्ते परं पदम् ॥

आनन्द एव जीवस्य जीवनशक्तेरखिलपुरुषार्थानाञ्च मौलिकोऽस्ति आधारः । आनन्दप्रवासी जीव आनन्दकन्दसच्चिदानन्दचरणसरसीरुहमाश्रयन् क्रमशः आनन्द-दायिनीं समुन्नतिकक्षामतिक्रमन् कृतकृत्यतामधिगच्छति ।

ये भगवद्गुणानुरक्तमात्मनो मनः एकवारमपि भगवच्चरणकमलयोः निवेशयन्ति न तेषां कदाचिदपि यमाद् यमपाशहस्तेभ्यो यमदूतेभ्यो वा किञ्चिद् भयं जायते । भगवति मनोनिवेशमात्रेणैव ते निर्धूतपापा भवन्ति, तथा चोक्तं श्रीमद्भागवते भगवता शुकदेवेन राजानं परीक्षितं प्रति श्रीमद्भागवतस्य षष्ठे स्कन्धे —

सकृन्मनः कृष्णपदारविन्दयोर्निवेशितं तद्गुणरागि यैरिह ।
न ते यमं पाशभृतश्च तद्भटान् स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः ॥ १९

अतएव सारग्राहिणो गुणज्ञा सकलदोषदुष्टस्यापि कलेः एवं प्रशंसां कुर्वन्ति, यत्र-तत्र भगवतो गुणनामकीर्तनेनैव मानवः, सत्ययुगे ध्यानस्य, त्रेतायां यज्ञस्य, द्वापरे

भगवत्सेवायाश्च फलं लब्ध्वा सर्वविधं पुरुषार्थं प्राप्य कृतार्थो जायते तथाहि श्रीमद्भागवते—

कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः ।
कीर्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत् ॥
कृते यद् ध्यायतो विष्णुं त्रेतायां यजतो मखैः ।
द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात् ॥ १२।३।५२.५३

ध्यान-अध्ययन-दान-सत्य-लज्जा-सरलता-क्षमा-वाह्याभ्यन्तरशौच-पवित्रता-आहार शुद्धीइन्द्रियाणां निग्रहादयो योगस्य साधनमुक्तं महाभारस्य शान्तिपर्वाणि मोक्षधर्मप्रकरणे साधकानां तेजोवर्द्धने । स एवं पापपनुदति, तस्य सङ्कल्पाः सिध्यन्ति हृदये च विज्ञानस्य ज्योतिराविर्भवति—

ध्यानमध्ययनं दानं सत्यं ह्रीरार्जवं क्षमा ।
शौचमाहारतः शुद्धिरिन्द्रियाणां च संयमः ॥
एतैरपि वर्द्धते तेजः पापानमुपहन्ति च ।
सिध्यन्ति चास्य संकल्पा विज्ञानं च प्रवर्तते ॥ २७४।१५.१६

एवं यदा पापं विधूयते तथा साधकः तेजस्वी, मिताहारी जितेन्द्रियश्च जायते । स हि कामक्रोधौ । विजित्य ब्रह्मपदं प्रतिष्ठते । चित्तस्य स्थिरतया निष्कामभावेन च मनो वाणीन्द्रियाणां संयमो मोक्षस्य स्वच्छो निर्मलो मार्गो वर्तते । अतस्तदनुष्ठानाय सततं प्रयत्नो विधेयः, येन मानवजीवनस्य लक्ष्यं सिद्धं स्यात्—

धूतपापः स तेजस्वी लघ्वाहारो जितेन्द्रियः ।
कामक्रोधौ वशे कृत्वा निनीषेद् ब्रह्मणः पदम् ॥२७४।१७
एष मार्गो हि मोक्षस्य प्रसन्नो निर्मलः शुचिः ।
तथा वाक्कायमनसां निग्रहः कामतः सदा ॥ २७४।१९

इदमेव जीवभावविकासकमभिव्यक्तिविज्ञानस्य सारभूतं तत्त्वम्, एतदेव च चिज्जडग्रन्थिस्वरूपजीवविज्ञानस्य रहस्यम् अवगन्तव्यम्—

स आदिः स मध्यः स चान्तः प्रजानां
स धाता च धेयं स कर्ता च कार्यम् ।
युगान्ते प्रसुप्तः सुसंक्षिप्य लोकान्,
युगादौ प्रबुद्धो जगद्व्युत्ससर्ज ॥

अथ शाण्डिल्यभक्तिसूत्रम्

अथ प्रथमोऽध्यायः

१ अथातो भक्तिजिज्ञासा ॥ १ ॥

२ सा पराऽनुरक्तिरीश्वरे ॥ २ ॥

३ तत्संस्थस्यामृतत्वोपदेशात् ॥ ३ ॥

४ ज्ञानमिति चेन्न द्विषतोऽपि ज्ञानस्य तदसंस्थितेः ॥ ४ ॥

५ तयोपक्षयाच्च ॥ ५ ॥

६ द्वेषप्रतिपक्षभावाद्रसशब्दाच्च रागः ॥ ६ ॥

७ न क्रिया कृत्यनपेक्षणाज्ज्ञानवत् ॥ ७ ॥

८ अत एव फलानन्त्यम् ॥ ८ ॥

९ तद्वतः प्रपत्तिशब्दाच्च न ज्ञानमितरप्रपत्तिवत् ॥ ९ ॥

(इति प्रथमाध्याये प्रथममाह्निकम्)

१० सा मुख्येतरापेक्षितत्वात् ॥ १ ॥

११ प्रकरणात् ॥ २ ॥

१२ दर्शनफलमिति चेन्न, तेन व्यवधानात् ॥ ३ ॥

१३ दृष्टत्वाच्च ॥ ४ ॥

१४ अत एव तद्भावाद्वल्लवीनाम् ॥ ५ ॥

१५ भक्त्या जानातीति चेन्नाभिज्ञप्त्यसाहाय्यात् ॥ ६ ॥

१६ प्रागुक्तञ्च ॥ ७ ॥

१७ एतेन विकल्पोऽपि प्रत्युक्तः ॥ ८ ॥

१८ देवभक्तिरितरस्मिन् साहचर्यात् ॥ ९ ॥

१९ भक्तिः प्रमेया श्रुतिभ्यः ॥ १० ॥

२० पुराणेतिहासाभ्याञ्चेति ॥ ११ ॥

२१ पृथुध्रुवप्रह्लादाम्बरीषशुकनारदभजनाचाराच्च ॥ १२ ॥

२२ योगस्तूभयार्थमपेक्षणात् प्रयाजवत् ॥ १३ ॥

२३ हेया रागत्वादिति चेन्नोत्तमास्पदत्वात् सङ्गवत् ॥ १४ ॥

२४ तदेव कर्मिज्ञानियोगिभ्य आधिक्यशब्दात् ॥ १५ ॥
२५ प्रश्ननिरूपणाभ्यामाधिक्यसिद्धेः ॥ १६ ॥
२६ नैव श्रद्धा तु साधारण्यात् ॥ १७ ॥
२७ तस्यां तत्त्वे चानवस्थानात् ॥ १८ ॥
२८ ब्रह्मकाण्डं तु भक्तौ तस्यानुज्ञानाय सामान्यात् ॥ १९ ॥

(इति प्रथमाध्याये द्वितीयमाह्निकम्)

अथ द्वितीयोऽध्यायः

२९ बुद्धिहेतुप्रवृत्तिराविशुद्धेरवघातवत् ॥ १ ॥
३० तदङ्गानां च ॥ २ ॥
३१ तामैश्वर्यपरां काश्यपः परत्वात् ॥ ३ ॥
३२ आत्मैकपदां बादरायणः ॥ ४ ॥
३३ उभयपरां शाण्डिल्यः शब्दोपपत्तिभ्याम् ॥ ५ ॥
३४ वैषम्यादसिद्धिमिति चेन्न प्रत्यभिज्ञावदवैशिष्ट्यात् ॥ ६ ॥
३५ न च क्लिष्टः परः स्यादनन्तरं विशेषात् ॥ ७ ॥
३६ ऐश्वर्यं तथेति चेन्न स्वाभाव्यात् ॥ ८ ॥
३७ अप्रतिषिद्धं परैश्वर्यं तद्भावाच्च नैवमितरेषाम् ॥ ९ ॥
३८ सर्वानृते किमिति चेन्नैवम्बुद्ध्यानन्त्यात् ॥ १० ॥
४९ प्रकृत्यन्तरालादवैकार्यं चित्सत्त्वेनानुवर्तनात् ॥ ११ ॥
४० तत्प्रतिष्ठा गृहपीठवत् ॥ १२ ॥
४१ मिथोऽपेक्षणादुभयम् ॥ १३ ॥
४२ चेत्याचितोर्न तृतीयम् ॥ १४ ॥
४३ युक्तौ च सम्परायात् ॥ १५ ॥
४४ शक्तित्वान्नानृतं वेद्यम् ॥ १६ ॥
४५ तत्परिशुद्धिश्च गम्या लोकवल्लिङ्गेभ्यः ॥ १७ ॥
४६ सम्मानबहुमानप्रीतिविरहेतरविचिकित्सामहिमख्यातितदर्थप्राणस्थानतदीय-
तासर्वतद्भावाप्रातिकूल्यादीनि च स्मरणेभ्यो बाहुल्यात् ॥ १८ ॥
४७ द्वेषादयस्तु नैवम् ॥ १९ ॥
४८ तद्वाक्यशेषात्प्रादुर्भावेष्वपि सा ॥ २० ॥
४९ जन्मकर्मविदश्चाजन्मने शब्दात् ॥ २१ ॥
५० तच्च दिव्यं स्वशक्तिमात्रोद्भवात् ॥ २२ ॥

५१ मुख्यं तस्य हि कारुण्यम् ॥ २३ ॥
५२ प्राणित्वान्न विभूतिषु ॥ २४ ॥
५३ द्यूतराजसेवयोः प्रतिषेधाच्च ॥ २५ ॥
५४ वासुदेवेऽपीति चेन्नाकारमात्रत्वात् ॥ २६ ॥
५५ प्रत्यभिज्ञानाच्च ॥ २७ ॥
५६ वृष्णिषु श्रैष्ठ्येन तत् ॥ २८ ॥
५७ एवं प्रसिद्धेषु च ॥ २९ ॥

(इति द्वितीयाध्याये प्रथममाह्निकम्)

५८ भक्त्या भजनोपसंहाराद्गौण्या परायै तद्धेतुत्वात् ॥ १ ॥
५९ रागार्थं प्रकीर्तिसाहचर्याच्चेतरेषाम् ॥ २ ॥
६० अन्तराले तु शेषः स्यादुपास्त्यादौ च काण्डत्वात् ॥ ३ ॥
६१ ताभ्यः पावित्र्यमुपक्रमात् ॥ ४ ॥
६२ तासु प्रधानयोगात् फलाधिक्यमेके ॥ ५ ॥
६३ नाम्नेति जैमिनिः सम्भवात् ॥ ६ ॥
६४ अत्राङ्गयोगानां यथाकालसम्भवो गृहादिवत् ॥ ७ ॥
६५ ईश्वरतुष्टेरेकोऽपि बली ॥ ८ ॥
६६ अबन्धोऽर्पणस्य मुखम् ॥ ९ ॥
६७ ध्याननियमस्तु दृष्टसौकर्यात् ॥ १० ॥
६८ यद्यजिः पूजायामितरेषां नैवम् ॥ ११ ॥
६९ पादोदकं तु पाद्यमव्याप्तेः ॥ १२ ॥
७० स्वयमप्यर्पितं ग्राह्यमविशेषात् ॥ १३ ॥
७१ निमित्तगुणाव्यपेक्षणादपराधेषु व्यवस्था ॥ १४ ॥
७२ पत्रादेर्दानमन्यथा हि वैशिष्ट्यम् ॥ १५ ॥
७३ सुकृतजत्वात् परहेतुभावाच्च क्रियासु श्रेयस्यः ॥ १६ ॥
७४ गौणं त्रैविध्यमितरेण स्तुत्यर्थत्वात् साहचर्यम् ॥ १७ ॥
७५ बहिरन्तस्थमुभयमवेष्टि शववत् ॥ १८ ॥
७६ स्मृतिकीर्त्योः कथादेश्चार्तौ प्रायश्चित्तभावात् ॥ १९ ॥
७७ भूयसामननुष्ठितिरिति चेदाप्रयाणमुपसंहारान्महत्स्वपि ॥ २० ॥
७८ लघ्वपि भक्तधिकारे महत्क्षेपकमपरसर्वहानात् ॥ २१ ॥
७९ तत्स्थानत्वादनन्यधर्मः खले वालीवत् ॥ २२ ॥
८० आनिन्द्ययोन्यधिक्रियते पारम्पर्यात् सामान्यवत् ॥ २३ ॥

८१ अतो ह्यविपक्वभावानामपि तल्लोके ॥ २४ ॥
८२ क्रमैकगत्युपपत्तेस्तु ॥ २५ ॥
८३ उत्क्रान्तिवाक्यशेषाच्च ॥ २६ ॥
८४ महापातकिनां त्वार्तौ ॥ २७ ॥
८५ सैकान्तभावे गीतार्थप्रत्यभिज्ञानात् ॥ २८ ॥
८६ परां कृत्वैव सर्वेषां तथाह्याह ॥ २९ ॥

(इति द्वितीयाध्याये द्वितीयमाह्निकम्)

अथ तृतीयोऽध्यायः

८६ भजनीयेनाद्वितीयमिदं कृत्स्नस्य तत्स्वरूपत्वात् ॥ १ ॥
८७ तच्छक्तिर्माया जडसामान्यात् ॥ २ ॥
८८ व्यापकत्वाद्व्याप्यानाम् ॥ ३ ॥
९० न प्राणिबुद्धिभ्योऽसम्भवात् ॥ ४ ॥
९१ निर्मायोच्चवचं श्रुतीश्च निर्मिमीते पितृवत् ॥ ५ ॥
९२ मिश्रोपदेशान्नेति चेन्न स्वल्पत्वात् ॥ ६ ॥
९३ फलमस्माद्बादरायणो दृष्टत्वात् ॥ ७ ॥
९४ व्युक्रमादप्ययस्तथादृष्टम् ॥ ८ ॥

(इति तृतीयाध्याये प्रथममाह्निकम्)

९५ तदैक्यं नानात्वैकत्वमुपधियोगहानादादित्यवत् ॥ १ ॥
९६ पृथगिति चेन्न परेणासम्बन्धात्प्रकाशानाम् ॥ २ ॥
९७ न विकारिणस्तु करणविकारात् ॥ ३ ॥
९८ अनन्यभक्त्या तद्बुद्धिलयादत्यन्तम् ॥ ४ ॥
९९ आयुश्चरमितरेषां तु हानिरनास्पदत्वात् ॥ ५ ॥
१०० संसृतिरेषामभक्तेः स्यान्नाज्ञानात् कारणासिद्धेः ॥ ६ ॥
१०१ त्रीण्येषां नेत्राणिशब्दलिङ्गाक्षभेदाद्रुद्रवत् ॥ ७ ॥
१०२ आविस्तरो भावविकाराः स्युः क्रियाफलसंयोगात् ॥ ८ ॥

(इति तृतीयाध्याये द्वितीयमाह्निकम्)

एवं शाण्डिल्यभक्तिसूत्रे त्रयोऽध्याय विद्यन्ते, तत्र प्रत्यध्यायं च द्वे द्वे आह्निके स्तः। तद्यथा—

१।१—प्रथमाध्यायस्य	प्रथमे	आह्निके	९	सूत्राणि	सन्ति
१।२—	,,	द्वितीये	,,	१९	,,	,,
२।१—द्वितीयाध्यायस्य	प्रथमे	,,	२९	,,	,,
	,,	द्वितीये	,,	२९	,,	,,
३।१—तृतीयाध्यायस्य	प्रथमे	,,	८	,,	,,
३।२—	,,	द्वितीये	,,	८	,,	,,
				१०२		

शाण्डिल्यभक्तिसूत्रं हि भक्तिसम्प्रदाये विशिष्टं स्थानं विभर्ति। अत एवात्र द्वाभ्यां स्वप्नेश्वर-भवदेवमिश्राभ्यां पृथक् पृथक भाष्यद्वयं कृतमस्ति, श्री स्वामिना नारायण-तीर्थेन च भावपूर्णा व्याख्या विहिता विद्यते। एवं भाष्यद्वयविभूषितस्य शाण्डिल्य-भक्तिसूत्रस्य भक्तसमाजे महानस्ति प्रचारः प्रसारः समादरश्च। तत्र निम्नाङ्कितानि विशेषनामघटितानि दशसूत्राणि सन्ति।

१—अत एव तद्भावाद्वल्लवीनाम् (१।२।५)

२—पुराणेतिहासभ्याञ्च (२।१०)

३—पृथु-ध्रुव-प्रह्लाद-अम्बरीष-शुक-सनन्द-नारद-भजनाचाराश्च (१।२।११)

४—ब्रह्मकाण्डं तु भक्तैस्तस्यानुज्ञानाय सामान्यात् (१।२।१९)

५—तामैश्वर्यपरां काश्यपः परत्वात् (२।१।३)

६—आत्मैकपदां बादरायणः (२।१।४)

७—उभयपरां शाण्डिल्यः शब्दोपपत्तिभ्याम् (२।१।५)

८—नाम्नेति जैमिनिः संभवाद् (२।२।६)

९—सैकान्तभावो गीतार्थप्रत्यभिज्ञानात् (२।२।२८)

१०—फलमत्यादिति वादरायणो दृष्टत्वात् (३।२।६)

अथ नारदभक्तिसूत्रम्

(भक्तेः स्वरूपम्)

१. अथातो भक्तिं व्याख्यास्यामः ॥ १ ॥

२. सा त्वस्मिन् परमप्रेमरूपा ॥ २ ॥

३. अमृतस्वरूपा च ॥ ३ ॥

४. यल्लब्ध्वा पुमान् सिद्धो भवत्यमृतो भवति तृप्तो भवति ॥ ४ ॥

५. यत्प्राप्य न किञ्चिद्वाञ्छति, न शोचति, न द्वेष्टि, न रमते नोत्साही भवति ॥ ५ ॥

६. यज्ज्ञात्वा मत्तो भवति, स्तब्धो भवति, आत्मारामो भवति ॥ ६ ॥

(ईश्वरप्रेम्णि अनन्यता)

७. सा न कामयमाना निरोधरूपत्वात् ॥ १ ॥

८. निरोधस्तु लोकवेदव्यापारन्यासः ॥ २ ॥

९. तस्मिन्ननन्यता तद्विरोधिषूदासीनता च ॥ ३ ॥

१०. अन्याश्रयाणां त्यागोऽनन्यता ॥ ४ ॥

११. लोके वेदेषु च तदनुकूलाचरणं तद्विरोधिषूदासीनता ॥ ५ ॥

१२. भवतु निश्चयादार्ढ्यादूर्ध्वं शास्त्ररक्षणम् ॥ ६ ॥

१३. अन्यथा पातित्याशङ्कया ॥ ७ ॥

१४. लोकोऽपि तावदेव, किन्तु भोजनादिव्यापारस्त्वाशरीरधारणावधि ॥ ८ ॥

(प्रेमरूपाया भक्तेर्लक्षणानि दृष्टान्ताश्च)

१५. तल्लक्षणानि वाच्यन्ते नानामतभेदात् ॥ १ ॥

१६. पूजादिष्वनुराग इति पाराशर्यः ॥ २ ॥

१७. कथादिष्विति गर्गः ॥ ३ ॥

१८. आत्मरत्यविरोधेनेति शाण्डिल्यः ॥ ४ ॥

१९. नारदस्तु तदर्पिताखिलाचारिता तद्विस्मरणे परमव्याकुलतेति ॥ ५ ॥

२०. अस्त्येवमेवम् ॥ ६ ॥

२१. यथा व्रजगोपिकानाम् ॥ ७ ॥

२२. तत्रापि न माहात्म्यज्ञानविस्मृत्यपवादः ॥ ८ ॥

२३. तद्विहीनं जाराणामिव ॥ ९ ॥

२४. नास्त्येव तस्मिंस्तत्सुखसुखित्वम् ॥ १० ॥

(प्रेमभक्तेः फलरूपत्वम्)

२५. सा तु कर्मज्ञानयोगेभ्योऽप्यधिकतरा ॥ १ ॥
२६. फलरूपत्वात् ॥ २ ॥
२७. ईश्वरस्याप्यभिमानद्वेषित्वाद् दैन्यप्रियत्वाच्च ॥ ३ ॥
२८. तस्या ज्ञानमेव साधनमित्येके ॥ ४ ॥
२९. अन्योऽन्याश्रयत्वमित्यन्ये ॥ ५ ॥
३०. स्वयं फलरूपतेति ब्रह्मकुमाराः ॥ ६ ॥
३१. राजगृहभोजनादिषु तथैव दृष्टत्वात् ॥ ७ ॥
३२. न तेन राजपरितोषः क्षुच्छान्तिर्वा ॥ ८ ॥
३३. तस्मात् सैव ग्राह्या मुमुक्षुभिः ॥ ९ ॥

(भक्तिसाधनानि)

३४. तस्याः साधनानि गायन्त्यचार्याः ॥ १ ॥
३५. तत्तु विषयत्यागात् सङ्गत्यागाच्च ॥ २ ॥
३६. अव्यावृतभजनात् ॥ ३ ॥
३७. लोकेऽपि भगवद्गुणश्रवणकीर्तनात् ॥ ४ ॥
३८. मुख्यतस्तु महत्कृपयैव भगवत्कृपालेशाद्वा ॥ ५ ॥

(सत्सङ्गमात्म्यम्)

३९. महत्सङ्गस्तु दुर्लभोऽगम्योऽमोघश्च ॥ ३९ ॥
४०. लभ्यतेऽपि तत्कृपयैव ॥ ४० ॥
४१. तस्मिंस्तज्जने भेदाभावात् ॥ ४१ ॥
४२. तदेव साध्यतां तदेव साध्यताम् ॥ ४२ ॥

(दुःसङ्गत्यागः)

४३. दुःसङ्गः सर्वथैव त्याज्यः ॥ १ ॥
४४. काम-क्रोध-मोह-स्मृतिभ्रंश-बुद्धिनाश-सर्वनाशकारणत्वात् ॥ २ ॥
४५. तरङ्गायिता अपीमे सङ्गात् समुद्रायन्ति ॥ ३ ॥

(मायातरणेऽधिकारी)

४६. कस्तरति कस्तरति मायाम् ? यः सङ्गांस्त्यजति,
यो महानुभावं सेवते, निर्ममो भवति ॥ १ ॥
४७. यो विविधस्थानं सेवते, यो लोकबन्धुमुन्मूलयति;
निस्त्रैगुण्यो भवति, यो योगक्षेमं त्यजति ॥ २ ॥

४८. यः कर्मफलं त्यजति, कर्माणि संन्यसति,
ततो निर्द्वन्द्वो भवति ॥ ३ ॥
४९. यो वेदानपि संन्यसति, केवलमविच्छिन्नानुरागं लभते ॥ ४ ॥
५०. स तरति स तरति, लोकांस्तारयति ॥ ५ ॥

(भक्तेः परा-गौणीभेदः)

५१. अनिर्वचनीयं प्रेमस्वरूपम् ॥ १ ॥
५२, मूकास्वादनवत् ॥ २ ॥
५३, प्रकाशते क्वापि पात्रे ॥ ३ ॥
५४. गुणरहितं कामनारहितं प्रतिक्षणवर्द्ध-
मानविच्छिन्नं सूक्ष्मतरमनुभवरूपम् ॥ ४ ॥
५५. तत्प्राप्यतदेवावलोकयति, तदेव शृणोति, तदेव चिन्तयति ॥ ५ ॥
५६. गौणी त्रिधा गुणभेदादार्तादिभेदाद्वा ॥ ६ ॥
५७. उत्तरस्मादुत्तरस्मात् पूर्वपूर्वा श्रेयाय भवति ॥ ७ ॥

(भक्तेः सौलभ्यं महिमा च)

५८. अन्यस्मात् सौलभ्यं भक्तौ ॥ १ ॥
५९. प्रमाणान्तरस्यानापेक्षत्वात् स्वयं प्रमाणत्वात् ॥ २ ॥
६०. शान्तिरूपात् परमानन्दरूपाच्च ॥ ३ ॥

(भक्तेः साधनान्तरायौ)

६१. लोकहानौ चिन्ता न कार्या, निवेदितात्मलोकवेदत्वात् ॥ १ ॥
६२. न तदसिद्धौ लोकव्यवहारो हेयः, किन्तु
फलत्यागस्तत्साधनं च कार्यमेव ॥ २ ॥
६३. स्त्री-धन-नास्तिकचरित्रं न श्रवणीयम् ॥ ३ ॥
६४. अभिमान-दम्भादिकं त्याज्यम् ॥ ४ ॥
६५. तदर्पिताखिलाचारः सन् कामक्रोधाभि-
मानदिकं तस्मिन्नेव करणीयम् ॥ ५ ॥

(प्रेमभक्तिस्तुतिः)

६६. त्रिरूपभङ्गपूर्वकं नित्यदास्यनित्यकान्ताभजनात्मकं वा प्रेमैव कार्यं
प्रेमैव कार्यम् ॥ १ ॥
६७. भक्ता एकान्तिनो मुख्याः ॥ २ ॥
६८. कण्ठावरोधरोमाञ्चाश्रुभिः परस्परं लपमानाः पावयन्ति कुलानि
पृथ्वीं च ॥ ३ ॥

६९. तीर्थीकुर्वन्ति तीर्थानि, सुकर्मीकुर्वन्ति कर्माणि, सच्छास्त्रीकुर्वन्ति शास्त्राणि ॥ ४ ॥

७०. यतस्तन्मयाः ॥ ५ ॥

७१. मोदन्ते पितरो नृत्यन्ति देवताः सनाथा चेयं भूमिर्भवति ॥ ६ ॥

७३. यतस्तदीयोः ॥ ८ ॥

(वादो हेयः)

७४. वादो नावलम्ब्यः ॥ १ ॥

७५. बाहुल्यावकाशत्वादनियतत्वाच्च ॥ २ ॥

(भक्तविधेयानि)

७६. भक्तिशास्त्राणि मननीयानि तदुद्बोधकरकर्माण्यपि करणीयानि ॥ १ ॥

७७. सुखदुःखेच्छालाभादित्युक्ते काले प्रतीक्ष्यमाणे क्षणार्द्धमपि व्यर्थं न नयेत् ॥ २ ॥

७८. अहिंसा-सत्य-शौच-दयाऽऽस्तिक्यादिचारित्र्याणि परिपालनीयानि ॥ ३ ॥

७९. सर्वदा सर्वभावेन निश्चिन्तितैर्भगवानेव भजनीयः ॥ ४ ॥

(प्रेमभक्तेः फलं श्रेष्ठता च)

८०. स कीर्त्यमानः शीघ्रमेवाविर्भवति अनुभावयति च भक्तान् ॥ १ ॥

८१. त्रिसत्यस्य भक्तिरेव गरीयसी भक्तिरेव गरीयसी ॥ २ ॥

८२, गुणमाहात्म्यासक्ति-रूपासक्ति-पूजासक्ति स्मरणासक्ति-दास्यासक्ति-सख्यासक्ति-कान्तासक्ति-वात्सल्यासक्ति-आत्मनिवेदनासक्ति-तन्मयतासक्ति-परकविरहासक्तिरूपा एकधाप्येकादशधा भवति ॥ ३ ॥

८३. इत्येवं वदन्ति जनजल्पनिर्भया एकमताः कुमार-व्यास-शुक-शाण्डिल्य-गर्ग-विष्णु-कौण्डिन्यशेषोद्धवारुणि-बलि हनुमद्विभिषणादयो भक्ताचार्याः ॥ ४ ॥

८४. य इदं नारदप्रोक्तं शिवानुशासनं विश्वसिति श्रद्धत्ते, स भक्तिमान् भवति, च प्रेष्ठं लभत इति ॥ ५ ॥

(इति नारदभक्तिसूत्रम्)

एवं नारदभक्तिसूत्रे न किञ्चिदाह्निकं नवा कश्चन अध्यायो वा वर्तते, किन्तु केवलं प्रकरणबोधकानि विभिन्नशीर्षकाणि सन्ति। तत्र महत्त्वपूर्णानि प्राञ्जलया संस्कृतभाषया गुम्फितानि चतुरशतिः (८४) सूत्राणि सन्ति। अत्र किमपि भाष्यं व्याख्यानं वा नोपलभ्यते, किन्तु केवलं तदीयानि चतुरशीतिसूत्राण्येव दृष्टिपथमायान्ति।

अथ भक्तिमीमांसा

(प्रथमाध्याये प्रथमः पादः)

१. अथातो भक्तिजिज्ञासा ॥ १ ॥

२. भक्तिर्मनस उल्लासविशेषः ॥ २ ॥

३. भाव एवेयमित्येके ॥ ३ ॥

४. रसस्तु तत्सामग्रीत उत्पत्तेः ॥ ४ ॥

(प्रथमाध्याये प्रथमः पादः)

५. स द्विविधो निर्गुणः सगुणश्च ॥ १ ॥

६. अन्त्यो नवविधो भोक्तृभेदात् ॥ २ ॥

७. नवविधश्चैष पुराणादिषु ॥ ३ ॥

८. समानव्यासाभ्यां स पुनस्त्रिविधो विप्रुषनदी समुद्रश्च पूर्वपूर्वाभ्यासात् ॥४॥

९. तद्भेदोऽल्पकालावच्छेदानवच्छेदाभ्याम् ॥ ५ ॥

१०. जातिभेदो वा ॥ ६ ॥

११. साधनेषु भक्तिशब्दो गौणः आयुर्घृतमितिवत् ॥ ७ ॥

(द्वितीयाध्याये प्रथमः पादः)

१२. भक्तिर्न जन्या रसो हि सा ॥ १ ॥

१३. नागमविरोधात् ॥ २ ॥

१४. भक्तियोगो बहुविधः पुराणेषु ॥ ३ ॥

१५. स द्विविधः—शुद्धो मिश्रश्च ॥ ४ ॥

१६. मिश्रस्त्रिविधः, मर्मज्ञानतदुभयमिश्रणात् ॥ ५ ॥

१७. आद्यस्य न विधा कर्मज्ञानविरोधात् ॥ ६ ॥

१८. परिपाकापरिपाकावपीतरभेदाविति चेन्न, अवस्थाभेदौ हि तौ ॥ ७ ॥

(द्वितीयाध्याये द्वितीयः पादः)

१९. त्रिविधः कर्ममिश्रः सात्त्विकादिभेदेन ॥ १ ॥

२०. सात्त्विकस्त्रिविधः, कर्मक्षयविष्णवर्पणविधिसिद्ध्यर्थभेदेन ॥ २ ॥

२१. तथा राजसो विषयाद्यभिसन्धिभेदात् ॥ ३ ॥

२२. एवं तामसो हिंसादिफलभेदात् ॥ ४ ॥

२३. ज्ञानमिश्रस्त्वेक एव ॥ ५ ॥

२४. उभयमिश्रश्च त्रिविध उत्तममध्यमप्राकृतभेदेन सत्त्वतारतम्यात् ॥ ६ ॥

२५. कामादयोऽपीति चेन्नाद्याऽन्त्ययोः साधनं हि फलं न भक्तिः कर्मवत् ॥ ७ ॥

२६. मध्यमयोर्न साधनमपि ॥ ८ ॥

(तृतीयाध्याये प्रथमः पादः)

२७. सर्वं भक्तियोगोऽविशेषात् ॥ १ ॥

२८. त्रिवर्गो वा तस्यैव भक्तिसम्बन्धात् ॥ २॥

२९. यथाश्रुतीति चेन्न भक्तिवैषम्यात् ॥ ३ ॥

३०. अपि वा विलम्बाऽविलम्बाभ्यां तदुभयोपपत्तेः ॥ ४ ॥

३१. श्रवणमेव वा सर्वत्र सामर्थ्यसव्यपेक्षो हि विधिः ॥ ५ ॥

३२. स्मरणमपि वा ॥ ६ ॥

३३. उत्तरोत्तरस्मिन् पूर्वः पूर्वश्च ॥ ७ ॥

३४. समुच्चयस्त्वङ्गभावेऽपि ॥ ८ ॥

३५. न चैष विधिर्हेतुनिर्देशात् ॥ ९ ॥

३६. विधिश्चेन्नित्यः स्यात् ॥ १० ॥

(तृतीयाध्याये द्वितीयः पादः)

३७- इतराणि तदङ्गानि ॥ १ ॥

३८. सर्वैं सर्वाण्यविशेषात् प्रयुज्जन्ते ॥ २ ॥

३९. विन्दुना वाद्यानि लौकिकतुल्यसामग्रीको हि सः ॥ ३ ॥

४०. इतराणि तु द्वाभ्याम् ॥ ४ ॥

४१. आरापकारीण्यप्येवमिति चेत् ॥ ५ ॥

४२. नोच्छिद्येतैव हि नदी ॥ ६ ॥

४३. पादसेवादिकमप्यङ्गं भयद्वेषवतोस्तदनुत्पत्तेः ॥ ७ ॥

४४. नेह प्रधानानिष्पत्तेः ॥ ८ ॥

४५. अपि चोद्दीपकाभावाल्लौकिकवत् ॥ ९ ॥

४६. सङ्गीतशब्दश्रवणमपि प्रधानं भक्तिकामश्रुतेः ॥ १० ॥

४७. न शब्दप्रधानत्वात् ॥ ११ ॥

४८. गानञ्च स्वकर्तृकं नियमः ॥ १२ ॥

४९. सङ्गाने नास्ति नियमः ॥ १२ ॥

५०. पर एव वा गायति, अप्रयोज्यं हि तत्तमेवेति श्रुतेः ॥ १४ ॥

५१. श्रवणं तु भक्तमुखतोऽतिशयहेतुः श्रुतेरनुभवाच्च ॥ १५ ॥

५२. सप्तमवर्गोक्ता आद्यवर्गप्रधानस्यापि वाक्यसंयोगात् ॥ १६ ॥

५३. अपि वा नाम्नातवृद्धिधर्मकस्य द्विस्तयापत्तेः ॥ १७ ॥

५४. न च लक्षणा प्रधानधर्मवित्तातिरल्पधर्मकत्वात् ॥ १८ ॥

५५. अपूर्वं वाऽऽम्नातधर्मकत्वात् ॥ १९ ॥

५६. नान्यानर्थक्यं फलतारतम्यादधिकारिभेदाच्च ॥ २० ॥

५७. सप्तमवर्गोक्ता इहापि ॥ २१ ॥

५८. कीर्तनं पुनरुक्तं स्यादिति चेन्न भिन्नं ह्येतत् ॥ २२ ॥

५९. एतेन षष्ठवर्गश्रवणं व्याख्यातम् ॥ २३ ॥

६०. सप्तमवर्गीयास्तु न तत्र यमनियमोपदेशात् ॥ २४ ॥

६१. सङ्कीर्तनं नाम्नां सुस्वरेण सम्बन्धिगानम् ॥ २५ ॥

६२. न वै लक्षणादौ कीर्तनं शब्दसंस्कारकम् ॥ २६ ॥

६३. नमस्कारमात्राङ्गकं च क्वचिच्छ्रवणम् ॥ २७ ॥

६४. अनुपदेशे फलं स्वर्गः स्यात् ॥ २८ ॥

६५. भक्तिर्वानर्थो हि सः ॥ २९ ॥

६६. लिङ्गाच्च ॥ ३० ॥

६७. षाष्ठवर्गिकप्रकृतिकमिदं साप्तवर्गिकधर्मकं न वा पुनरुपदेशात् ॥ ३१ ॥

६८. नमस्कारोपदेश एवायमिति चेन्नानेकगुणश्रुतेः ॥ ३२ ॥

६९. क्वचित्तु केवलं स्मरणं तदप्येवमेव ॥ ३३ ॥

७०. एतयोरत्युत्तमाधिकारिकत्वम् ॥ ३४ ॥

(चतुर्थाध्याये प्रथमः पादः)

७१. भक्तेः फलमीश्वरवशीकारः ॥ १ ॥

७२. अनर्थनिवृत्तिरित्येके ॥ २ ॥

७३. तन्न विनापि पुरुषप्रयत्नं निवृत्तेः ॥ ३ ॥

७४. जीवन्मुक्तिः फलं नैष्कर्म्यमपीति श्रुतेः ॥ ४ ॥

७५. नैवमपि बाधितनिवृत्तेः पुरुषानुपेयत्वात् ॥ ५ ॥

७६. उक्तदोषाच्च ॥ ६ ॥

७७. भक्तिरेव परमः पुरुषार्थो मोक्षस्यापुरुषार्थत्वादिति तु भागवताः ॥ ७ ॥

(चतुर्थाध्याये द्वितीयः पादः)

७८. तानि च भक्तेः श्रूयन्ते हि ॥ १ ॥

७९. नानानभिसंहितानि हि भक्तिर्हि साधनम् ॥ २ ॥

८०. अविशेषान्न्वायमिति चेत् ॥ ३ ॥

८१. न समुद्रस्तद्वशीकरणविरोधात् ॥ ४ ॥

८२. अन्ययोरपि न त्वं तत्कालेन तद्विरोधादिति चेद् नैवम् प्रागुत्तारं वातत्सम्भवात् ॥ ५ ॥

८३. भक्त्या मामभिजानातीति चतुर्थासाधनमधि त्येत्याचार्याः ॥ ६ ॥

८४. नदी वा ॥ ७ ॥

८५. मध्यमोत्तमयोर्वशीकारः परिग्रहस्तु त्रयाणाम् ॥ ८ ॥

८६. भक्तिर्नार्थो विनाशयोगाज्जन्यभावो हि ॥ ९ ॥

८७. न हेतुर्जन्यत्ववदप्रयोजकत्वात् ॥ १० ॥

८८. अवच्छेदवत्त्वेनाश्रुतेश्च ॥ ११ ॥

८९. ध्वंसकादृष्टाभावाच्च ॥ १२ ॥

९०. मनोनाशात्तन्नाशश्चेत्तथापि नानार्थं इष्टनाशाननुभवात् ॥ १३ ॥

९१. सामर्थ्यमर्थिता विद्यावाधिकारिविशेषणं नान्यदश्रुतेः ॥ १४ ॥

९२. चतुर्णामेवेतरेषां विद्याविरहात् ॥ १५ ॥

९३. पापनाशसाधनत्वं सर्वेषामिति चेत् ॥ १६ ॥

९४. न विद्याद्यपेक्षानपेक्षाभ्यां विशेषात् ॥ १७ ॥

९५. निरङ्कुशत्वाच्च तस्य तत्र ॥ १८ ॥

९६. अपि वाऽन्येषामपि श्रवणात् ॥ १९ ॥

९७. विद्या कथमिति चेद् गुरुपदेशादितः ॥ २० ॥

९८. पूर्वमीमांसासिद्धांत एवं सति व्याप्ये [बाध्ये] नेति चेत् ॥ २१ ॥

९९. नाध्ययनविधितोऽधिकारनिर्णयो हि तत्र ॥ २२ ॥

१००. लिङ्गदर्शनाच्च ॥ २३ ॥

१०१. उपलभ्यते च ॥ २४ ॥

१०२. वामदेवादीनामिव जन्मान्तरीयपुराणश्रवणादिसम्भवाच्च ॥ २५ ॥

(समाप्ता चेयं भक्तिमीमांसा)

एवं भक्तिमीमांसायां चत्वारोऽध्यायाः सन्ति। तत्र प्रत्यध्यायं द्वौ द्वौ पादौ विद्येते। तथाच चतुर्षु अध्यायेषु अष्टसु पादेषु च मिलित्वा १०२ सूत्राणि सन्ति। तद् यथा—

१।१—प्रथमाध्यायस्य	प्रथमे	पादे	४	सूत्राणि सन्ति
१।२— ,,	द्वितीये	,,	७	,, ,,
२।१—द्वितीयाध्यायस्य	प्रथमे	,,	७	,, ,,
२।२— ,,	द्वितीये	,,	८	,, ,,
३।१—तृतीयाध्यायस्य	प्रथमे	,,	१०	,, ,,
६।२— ,,	द्वितीये	,,	३४	,, ,,
४।१—चतुर्थाध्यायस्य	प्रथमे	,,	७	,, ,,
४।२— ,,	द्वितीये	,,	२५	,, ,,
			१०२	

एतद्भक्तिसूत्रातिरिक्ता अनेकै र्भक्तशिरोमणिभि र्विद्वन्मणिभि र्भक्तिविषयमधिकृत्य समये-समयेऽनेके ग्रन्थाः प्रणीता विविधा निबन्धाश्च लिखिताः सन्ति। तत्र वोपदेव-मधुसूदनसरस्वती-वृन्दावनस्थषड्गोस्वामिनां प्रमुखं कार्यमस्ति।